Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# महेश्वरसूत्रेषु पातञ्जलदर्शनम्

श्री वेङ्कटसुब्बय्यः बत्तुलः & डा. मेलुकोटे के. श्रीधरः
S-VYASA, Bangalore, Karnataka

## उपोद्घातः

संस्कृत व्याकरणशास्त्रे महेश्वरसूत्राणां प्राशस्त्यं लोकविदितमेव । १. अइउण् । २. ऋऌक् । ३. एओङ् । ४. ऐऔच् । ५. हयवरट् । ६. लण् । ७. ञमङ्णनम् । ८. झभञ् । ९. घढधष् । १०. जबगडदश् । ११. खफछठथचटतव् । १२. कपय् । १३. शषसर् । १४. हल् । इति चतुर्दश-महेश्वरसूत्राणि । अस्मिन् विषये नन्दिकेश-काशिकायां वर्ण्यते—

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् । उद्धर्तुकामः सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ॥ (नन्दिकेश्वरकाशिका-१)

नृत्तावसाने = यदा चित्तवृत्तयः निरुद्धाः (असम्प्रज्ञाते समाधौ) सन्, नटराजराजः = ईश्वरः, सनकादिसिद्धान् = चतुर्विध (वितर्क-विचार-आनन्द-अस्मिता) तापासान्, उद्धर्तुकामः = चित्तविक्षेपाद्यन्तरायाभ्यामुद्धर्तुं कामः यस्य सः, नवपञ्चवारम् = चतुर्दशवारम् (पञ्चवारं जगद्व्यक्तीकरणार्थं, नववारं जगतः स्तुत्यर्थं च), ढक्कां ननाद = अव्यक्तान् शब्दान् बोधयामास । एतद् शिवसूत्रजालम् = एतान् चतुर्दश सूत्रान्, विमर्शे = विचार्य स्फुटीकरोमि ।तथा चतुर्दशवारं याः नादाः श्रुताः तयेव महेश्वरसूत्राणि वा शिवसूत्राणि इति नम्ना प्रख्याताः ।

## योगदर्शन सारूप्यम्

अत्र नृत्तावसनम् सूचयति असम्प्रज्ञात-चित्तम् । यथा,

- नृत्तम् = नृत् + क्तः । नृती गात्रविक्षेपे । गाते = गच्छति, इति गात्रम् । गाङ् गतौ ।गात्रं सूचयति गमनशीलत्वं च वृत्तिसहितं चित्तम् । तस्य क्षेपं = गात्रविक्षेपम् । क्षिप प्रेरणे । अतः, नृत्तं सूचयति चित्तसत्त्वम् यत् प्रेरयति वृत्तिषु वा निरोधे वा । तस्य भावः नृत्तम् ।
- अवसानम् = अव+सो+ल्युट् । अव इत्युपसर्गविशेषः, निश्चयार्थे । षो अन्तकर्मणि । अतः, अवसानम् = क्रियासमाप्तिः = विरामः।
- नृत्तावसानम् = नृत्तस्य अवसानम् । यत्र गात्रविक्षेपण क्रियायाः विरामः तत् नृत्तावसानम् । तदा निरोधपरिणामान्विताश्च चित्तवृत्तयः,यत्र चित्ते प्रत्ययानां विरामश्च तथा प्रेरणात्माकाभ्यासक्रियायाः समाप्तिश्च । तदेव असम्प्रज्ञातः समाधिः, यथा पातञ्जलदर्शने— विराम प्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः (योगसूत्रम्-१.१८) ।

नटराजराजः = ईश्वरस्य वाचकः । यथा—

- नटे राजा = नटराजः । णट नृतौ । राजृ दीप्तौ । चित्तसत्त्वे प्रदीप्यमानः पुरुषः । नटराजेषु राजा नटराजराजः = पुरुषविशेषः ईश्वरः । क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरेति(योगसूत्रम्-१.२४) । अतः नटराजराजः = ईश्वरः ।

ढक्कां निनाद = ढक् इति अव्यक्तं कायतीति ढक्का । तस्मात् ढक्का-नादं श्रावयामास ।

- ढक्का = ढक्+कै+डः+टाप् । कै+डः = कं = शिरः । कायति = शब्दो निर्गच्छति यतः यस्मिन् सति । कै शब्दे ।
- निनाद = नद्+लिट् । णद अव्यक्ते शब्दे । नादं चकार । यन्नादं प्रणवम् अव्यक्तं च तस्य व्यक्तं बभूव ।
- किन्नाम नाद इत्युच्यते? नाद शब्दस्योत्पत्तिर्यथा- नादः = नद्+घञ् । णद अव्यक्ते शब्दे । अव्यक्तस्य शब्दस्य भावः नादः ।
- ढक्का नादम् = समाधि-निष्पत्तौ सूक्ष्मतरं यच्छब्दं श्रूयते अव्यक्तरूपेण तदेव ढक्कानादम् । यथोच्यते—
  सिद्धासने स्थितो योगी मुद्रां सन्धाय वैष्णवीम् । श्रुणुयाद्दक्षिणे कर्णे नादमन्तर्गतं सदा ॥ (नादबिन्दूपनिषत्-३१)
  महति श्रूयमाणे तु महाभेर्यादिकध्वनौ । तत्र सूक्ष्मं सूक्ष्मतरं नादमेव परामृशेत् ॥ (नादबिन्दूपनिषत्-३६)

नवपञ्चवारम् – चतुर्दशमहेश्वरसूत्राणं विभागद्वयम् ।

- सृष्टिः पच्यते अनेन पञ्चसूत्र्या क्रमेण इति पञ्चवारम् । पचि व्यक्तीकरणे ।
  - १. अइउण् । २. ऋलृक् । ३. एओङ् । ४. ऐऔच् । ५. हयवरट् । इति पञ्चभिः सूत्रक्रमेण सृष्टिः व्यक्तीकृतम् ।
- नूयते इति नव । तत् स्तूयते आध्यात्मिकस्थितये जीवैः अनेन नवसूत्रैः क्रमेण इति नववारम् । णु स्तुतौ ।
  - ६. लण् । ७. ञमङ्णनम् । ८. झभञ् । ९. घढधष् । १०. जबगडदश् । ११. खफछठथचटतव् । १२. कपय् । १३. शषसर् । १४. हल् । इति नवभिः सूत्रक्रमेण सृष्टिविशेषाः स्तूयन्ते ।

उद्धर्तुकामः = उद्धर्तुं कामः यस्य सः । ईश्वरप्रणिधानं सूचितमत्र ।

- उत्+धृ+तुमुन्= पतनात् ऊर्ध्वं धर्तुम् । धृञ् धारणे ।
- कामः = कम्+घञ् । काम्यते असौ । कमु कान्तौ ।
- यथा ईश्वरप्रणिधानस्य फलमुक्तम् पातञ्जले योगदर्शने—ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च । (योगसूत्रम्-१.२९)

सनकादि सिद्धास्तुसवितर्कादि-सम्प्रज्ञातयोगसिद्धा एव । कथम् इत्युक्ते—

- चत्वारः सत्यलोकस्थाः वर्णिताः पातञ्जलयोगदर्शने व्यासभाष्ये, तयेव सनकादि तापसाः —
  - तृतीये ब्रह्मणः सत्यलोके चत्वारो देवनिकायः अच्युताः, शुद्धनिवासाः, सत्याभाः संज्ञासंज्ञिनश्चेति । अकृतभवनन्यासाः स्वप्रतिष्ठा उपर्युपरिस्थिताः प्रधानवशिनो यावत्सर्गायुषः । तत्राच्युताः सवितर्कध्यानसुखाः । शुद्धनिवासाः सविचारध्यानसुखाः । सत्याभा आनन्दमात्रध्यानसुखाः । संज्ञासंज्ञिनश्चास्मितामात्रध्यानसुखाः । तेऽपि त्रैलोक्यमध्ये प्रतितिष्ठन्ति । (व्यासभाष्यम्-३.२६)
- भागवतपुराणे वर्णितम् ब्रह्मणा तपसः सनकादीनां सम्भवः, यथा—

  तप्तं तपो विविधलोकसिसृक्षया मे । आदौ सनात् स्वतपसः स चतुःसनोऽभूत् । (भागवत-पुराणम् २.७.५)

- सनत् = सनातनः ब्रह्मा । षनु दाने ।
  - सनकः = सनतः ब्राह्मणः धर्मः सनकः । सवितर्कध्यानसुखाः ।
  - सनातनः = सदा भवः सनातनः । सविचारध्यानसुखाः ।
  - सनन्दनः = सनतं ब्रह्माणं नन्दयति इति सनन्दनः । आनन्दमात्रध्यानसुखाः ।
  - सनत्कुमारः = सनतः ब्राह्मणः, तस्य कुमारः । अस्मितामात्रध्यानसुखाः ।

**साङ्ख्ययोगदृष्ट्या सृष्टि वर्णनम् ।**

पातञ्जलदर्शनं साङ्ख्यप्रवचनभाष्यमिति प्रख्यातम् । योगदर्शने कापिलमनुश्रुत्य पञ्चविंशति तत्त्वानि निरूपितानि यथा—प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् (योगसूत्रम् २.१८)इति जगतः वर्णनं क्रियते पातञ्जलयोगदर्शने । अतः जगत्सर्वं दृश्यमिति भावनया, त्रिधा दृश्यते सत्त्वरजस्तमो गुण प्रभेदैः । प्रकाशशीलने तु सत्त्वगुणं, क्रियायां च रजोगुणं, स्थितिशीलत्वे तमोगुणश्च, तथा त्रिगुणानां विभागः क्रियते । पुनः, स्थूलरूपेन द्विधा भवति यथा भूतात्मकमिन्द्रियात्मकं च । तत्र पञ्चभूतानि भावयन्ति स्थूलदृश्यम् यथा जाग्रदवस्थायाम् । पञ्चतन्मात्रानि कुर्वन्ति सूक्ष्मदृश्यं यथा स्वप्नकाले । एकादशेन्द्रियाणि तु वस्तुभोगे करणान्येव च । प्रकृतिरेव दृश्यं, द्रष्टा तु पुरुषः । हठयोगादि शास्त्रपरम्परायां तावेव पार्वती-परमेश्वरौ वा शक्ति-शिवौ वेति प्रकीर्त्यते । तयोः सम्बन्धं भगवद्गीतायां वर्ण्यते यथा—

कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते । पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ॥भगवद्गीता-१३.२१॥

एकादशेन्द्रियाणां च पञ्चभूतानां च पञ्चतन्मात्राणां चाहङ्कारस्य च बुद्धेश्च हेतुः प्रकृतिरुच्यते । एकादशेन्द्रियाः = मनः + ५ ज्ञानेन्द्रियाणि + ५ कर्मेन्द्रियाणिच ।श्रोत्रत्वक्चक्षुर्जिह्वानासिकाः पञ्चज्ञानेन्द्रियाणि।वाक्पाणिपादपायूपस्थाः पञ्चकर्मेन्द्रियाणि । पृथिव्यापतेजोवायुराकाशाः पञ्चभूतानि । शब्दस्पर्शरूपरसगन्धाः तन्मात्राणि । अभिमान लक्षितम् अहङ्कार तत्त्वम् । व्यवसायात्मिका तु

बुद्धिः । एते चतुर्विंशति तत्त्वानि । एतेषां चतुर्विंशतिभ्यः तत्त्वेभ्यःपरः केवलः साक्षी च पुरुष उच्यते । द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्यानुपश्यः (योगसूत्रम् -२.२०) । अतः पुरुषस्य भोक्तृत्वम् अविद्यया कल्प्यते । अतः योगदर्शने ईश्वरः प्रतिपादितः । स तु पुरुष एव, किन्तु विशेषलक्षणैः भासते— क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः (योगसूत्रम् १.२४) । तस्य वाचकः प्रणवः (योगसूत्रम्-१.२७) इति ईश्वरः प्रणवेन सञ्ज्ञितः । तथैव उपनिषद्वाक्यम् – ओमिति ब्रह्म (तैत्तिरीयोपनिषद्-१.८) ।

ततः जगदाविर्भावं वर्ण्यते तैत्तिरीयोपनिषदि यथा— सोऽकामयत । बहु स्यां प्रजायेयेति । स तपोऽतप्यत । स तपस्तप्त्वा । इदं सर्वमसृजत । यदिदं किञ्च । तत् सृष्ट्वा । तदेवानुप्राविशत् । (तैत्तिरीयोपनिषद्-२.६) इति ।

## वागेव विश्वा भुवनानि जज्ञे

एतस्मिन् जगति, यत्किमप्यस्ति तत्सर्वं मनोकल्पितं वाङ्मयमेव । "शब्दस्य परिणामोऽयम्" इति वाक्यपदीयम् (१.१२०) ।ऋग्मन्त्रोऽपि यथा— वागेव विश्वा भुवनानि जज्ञे वाच इत्सर्वममृतं यच्च मर्त्यम् । अथेद्वाग् बुभुजे वाग्वुवाच पुरुत्रा वाचो न पदं यच्च नाह ॥

(वाक्यपदीयम्-स्वोपज्ञ-वृत्तिः१.१२०)

यथोक्तं च भागवतपुराणे—

समाहितात्मनो ब्रह्मन् ब्रह्मणः परमेष्ठिनः । हृद्याकाशादभून्नादो वृत्तिरोधाद् विभाव्यते ॥ भागवत-पुराणम्-१२.६.३७ ॥

तथाऽऽव्यक्तात् प्रणवात् नादः व्यक्तीभूतः । प्रणवस्य मात्रात्रयं सूचयति जाग्रत्स्वप्नसुषुप्त्यवास्थेषु साक्षीभूतत्वं चापरामृष्टत्वं च । दृश्यरूपं सर्वं जगत् ततो प्रणवादेव व्यक्तः । यथा,

ततोऽभूत् त्रिवृदोंकारो योऽव्यक्तप्रभवः स्वराट् । यत्तल्लिङ्गं भगवतो ब्रह्मणः परमात्मनः ॥ भागवत-पुराणम्-१२.६.३९

प्रणवादेव अक्षर समाम्नायं सृज्यते । अन्तस्थाः (य-र-ल-व), ऊष्माः (श-ष-स-ह), स्वराः (अ, इ, उ, ऋ, ऌ, ए, ऐ, ओ औ), स्पर्शाः (कादि वर्गाक्षराः पञ्चविंशतिः) सर्वेऽपि प्रणवादेव भवन्ति । स्वरानां ह्रस्वदीर्घादि भेदाश्च स्मर्यन्ते ।

ततोऽक्षरसमाम्नायमसृजद् भगवानजः । अन्तस्थोष्मस्वरस्पर्शह्रस्वदीर्घादिलक्षणम् ॥ भागवत-पुराणम्-१२.६.४३॥

तथैव पाणिनीयेषु महेश्वरसूत्रेषु शब्दब्रह्मणः जगद्व्यक्तीकरणं पञ्चभिस्सूत्रैश्च, तथा ब्रह्मणस्तोत्रं नवभिस्सूत्रैश्च क्रियते यथा—

## पञ्चभिस्सूत्रैः जगद्व्यक्तीकरणम्

महेश्वरसूत्रेभ्यः नन्दिकेश्वरेण काशिका नाम भाष्यं विरचितम् । काशिका अपि उपमन्युमहर्षिणा कृता तत्त्वविमर्शिनी नाम्ना व्याख्यानेन सुशोभते । महेश्वरसूत्रेषु तत्त्वार्थ दर्शनार्थम् एतयोः व्याख्यानद्वयम् अत्यावश्यकम् भवति ।

### १) अ इ उ ण् ।

अकारो ब्रह्मरूपः स्यान्निर्गुणः सर्ववस्तुषु । चित्कलामिं समाश्रित्य जगद्रूप उणीश्वरः ॥ नन्दिकेश्वर-काशिका-३ ॥

तथा अष्टसुकारिकेषु अकार-इकार-उकाराणां विस्तृत्रा चर्चा क्रियते । अकारः निर्गुणतत्त्वं सूचयति । यथोक्तं भगवद्गीतायां अक्षराणामकारोऽस्मि । (१०.३३) । इकारः चित्कलाम्, इच्छाशक्तिं, कामबीजं, जगत्कारणत्वं च सूचयति । उकारस्तु व्यापकत्वं वा सगुणत्वं बोधयति ।

- अ = ब्रह्मरूपः, सर्ववस्तुषु निर्गुणः, प्रकाशः, परमेश्वरः ।
- इ = चित्कला, शक्तित्वम्, जगत्-कारणत्वम्, सर्ववर्णानां-कारणं, कामबीजम्, इच्छाशक्तिः ।
- उ = विष्णुः (व्यापकत्वम्, सगुणत्वम्) ।

यथा ॐ कारात् चितिशक्तिः ज्ञायते; तथा अकारात् ज्ञानशक्तिः, इकारात् इच्छाशक्तिः, उकारात् क्रियाशक्तिश्च ज्ञेयाः । तथैव च ब्रह्माण्डपुराणान्तर्गत-ललितासहस्रनामावल्याम्—

इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्ति-स्वरूपिणी । सर्वाधारा सुप्रतिष्ठा सदसद्रूप-धारिणी ॥ १३०॥

### २) ऋ ऌ क् ।

ऋकारात् सर्वेश्वरो ज्ञातव्यम् । ऌकारात् मनोवृत्तिं त्रिगुणात्मिकां च भावयेत् । तथा, जगत्सर्वं सृष्ट्वा तदेवानुप्राविशत् । यथा ऋऌवर्णयोः

सादृश्यं तथैव चित्तस्य च तद्वृत्तीनां च सादृश्यम् । तदुक्तं पातञ्जले, वृत्तिसारूप्यमितरत्र (योगसूत्रम्-१.४) ।

ऋलृक् सर्वेश्वरो मायां मनोवृत्तिमदर्शयत् । तामेव वृत्तिमाश्रित्य जगद्रूपमजीजनत् ॥ नन्दिकेश्वर-काशिका-१० ॥

- ऋ = सर्वेश्वरः, ऋतम्, चित्तम् ।
- ऌ = माया, मनोवृत्तिः ।

**३) ए ओ ङ् ।**

एकारः सूचयति मायायुक्तं पुरुषम्, तस्य दर्शन शक्तिं च । ओकारः सूचयति केवलं पुरुषम्, तस्य दृग्शक्तिं च। किन्तु बन्धश्च मोक्षश्च प्रकृतेः धर्मौ न च पुरुषस्य । पुरुषः कदापि न बध्यते वा न मुच्यते । सः केवलः साक्षी च । अविद्यावृताऽऽस्मिता तत्त्वमेव बन्धकारणम् । दृग्दर्शनशक्त्योरेकात्मतेवास्मिता (योगसूत्रम्-२.६) ।

एओं मायेश्वरात्मैक्यविज्ञानं सर्ववस्तुषु । साक्षित्वात् सर्वभूतानां स एक इति निश्चितम् ॥ नन्दिकेश्वर-काशिका-१३ ॥

- ए = अ+इ = अक्षरात्मकः + मायायुक्तः ।
- ओ = अ+उ = अक्षरात्मकः + ज्ञानरूपः, निर्गुणत्वम् + सगुणत्वम् ।

**४) ऐ औ च् ।**

ऐकारस्तु जगत्स्वरूपम् । औकारस्तुः परमेश्वरः । अत्र जगतः तिरोभावादनन्तरं परमेश्वरस्य अनुग्रहं स्मर्यते ।

ऐऔच् ब्रह्मस्वरूपः सन् जगत् स्वान्तर्गतं ततः । इच्छया विस्तरं कर्त्तुमाविरासीन्महामुनिः ॥ नन्दिकेश्वर-काशिका-१४ ॥

- ऐ = आ+ई = अक्षरः + आदिशक्तिः, जगत् ।
- औ = आ+ऊ = ब्रह्मस्वरूपः, सम्प्रज्ञानस्वरूपः, परमेश्वरः ।

**५) ह य व र ट् ।**

अत्र भौतिकसृष्टेः प्रारम्भः भवति । ह = आकाशः, य= वायुः, र=अग्निः, व=जलम् ।

हकाराद् व्योमसंज्ञं च यकाराद्वायुरुच्यते ।रकाराद्वह्निस्तोयं तु वकारादिति सैव वाक् ॥ नन्दिकेश्वर-काशिका-१६ ॥

तथा, एतस्मिन् सूत्रपञ्चके सृष्टिवर्णनं कृतम् । तदनन्तरं नवसु सूत्रेषु, तन्मात्राणाम् इन्द्रियानाम्अन्तःकरणस्य त्रिगुणानां च सृष्टिक्रमं व्याख्यातम् ।

**नवभिः सूत्रैः जीवभावेन जगतः स्तुतिः ।**

६) ल ण् = पृथिवी-तत्त्वम्, आधार-भूतम्, अन्नादीनां कारणम् ।

आधारभूतं भूतानामन्नादीनां च कारणम् । अन्नाद्रेतस्ततो जीवः कारणत्वाल्लणीरितम् ॥ नन्दिकेश्वर-काशिका-१७ ॥

७) ञ म ङ णा न (म्) = शब्द-स्पर्श-रूप-रस-गन्धाः ।

८) झ भ (ञ्) = वाक्-पाणीन्द्रियौ (सर्वजन्तुषु विज्ञेयं, स्थावरादौ न विद्यते) ।

९) घ ढ ध (ष्) = पाद-पायु-उपस्थाः (सर्वभूतानाम् विज्ञेयम्) ।

१०) ज ब ग ड द (श्) = श्रोत्र-त्वक्-नयन-घ्राण-जिह्वाः (सर्वेषामपि जन्तूनां विद्यते) ।

११) ख फ छ ठ थ = प्राण-अपान-समान-उदान-व्यानाश्च&च ट त (व्) = मनो-बुद्धि,-अहङ्काराश्च ।

१२) क प (य्) = प्रकृति-पुरुषौ ।

१३) श = राजसगुणम् ; ष = तामसगुणम् ; स = सत्त्वगुणम् ; (र्) ।

१४) ह (ल्) = शिव वर्णः ।

हकारः शिववर्णः स्यादिति शैवागमस्मृतिः । स ईश्वरः तत्त्वातीतः साक्षी च । तस्य तिरोधानं वर्णितमस्मिन्नन्तिमसूत्रे । इत्युक्ते केवल-स्थितिः । यथा चोक्तम्— पतञ्जलिना पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति (योगसूत्रम् ४.३४) ।

तत्त्वातीतः परं साक्षी सर्वानुग्रहविग्रहः । अहमात्मा परो हल् स्यामिति शम्भुस्तिरोदधे ॥ नन्दिकेश्वर-काशिका-२७ ॥

**उपसंहारः**

तथा चतुर्दशमहेश्वरसूत्रेषु पञ्चविंशतितत्त्वानामवलोकनं स्पष्टीकृतम् । सर्गस्थितिसंहारतिरोभवानुग्रहानां पञ्चकृत्यानां वर्णनम् त्रयश्चत्वारिंशद्भिरक्षरैः प्रदर्शितम् । अस्मिन् जगति यत्सर्वं नामरूपैर्निर्दिशितं तदहं शब्देन प्रख्यातम्, यथा—

अकारः सर्ववर्णाग्र्यः प्रकाशः परमेश्वरः ।

आद्यमन्त्येन संयोगात् अहमित्येव जायते ॥ नन्दिकेश्वर-काशिका-४ ॥

नृत्तावसानं सूचयति असम्प्रज्ञातासमाधिस्थं परमेश्वरम् । सम्प्रज्ञातस्थानां योगिनामुद्धर्तुम् नवपञ्चवारं चकार ढक्कानादान् अव्यक्तान् च । तथा महेश्वरसूत्राणां योगदर्शनसारूप्यं, पुनस्तत्र पञ्चविंशतितत्त्वानां निरूपणं च नित्यमुक्तस्य केवलस्य ईश्वरस्य स्वरूपमपि च व्याख्यातम् ।

**सहायकग्रन्थाः**


1) श्रीमद्भगवद्गीता, श्रीमच्छङ्करभाष्येण – आनन्दगिरिकृतव्याख्यायुजा संवलिता –तथा नीलकण्ठी –भाष्योत्कर्षदीपिका – श्रीधरीय सुबोधिनी – अभिनवगुप्ताचार्य व्याख्या –श्रीमधुसूदनसरस्वतीस्वामिकृत गूढार्थदीपिका व्याख्यासहिता – श्रीधर्मदत्तशर्मविरचितगूढार्थतत्त्वालोकेन युता च; द्वितीयावृत्तिः, निर्णयसागराख्या मुद्रणालयः, मुम्बै, १९३६.
2) पातञ्जलसूत्राणि, व्यासभाष्यवाचस्पत्यसहितानि, प्रथमावृत्तिः, निर्णयसागराख्या मुद्रणालयः, मुम्बै, १८९२.
3) श्रीवेदव्यास महर्षिप्रणीतम्, श्रीमद्भागवतमहापुराणम् - द्वितीयः स्कन्धः, श्री श्रीधरस्वामिविरचिता भावार्थदीपिका, श्री वीरराघवनिर्मिता श्रीभागवतचन्द्रचन्द्रिका, श्रीविजयध्वजलिखिता पदरत्नावली, श्रीराधाकृष्णप्रणीता सुधीसुधा चेति चतुर्भिः व्याख्यानैः भूषितम्, तिरुमल तिरुपति देवस्थानम्, २००५.
4) श्रीवेदव्यास महर्षिप्रणीतम्, श्रीमद्भागवतमहापुराणम् –द्वादशः स्कन्धः, श्री श्रीधरस्वामिविरचिता भावार्थदीपिका, श्री वीरराघवनिर्मिता श्रीभागवतचन्द्रचन्द्रिका, श्रीविजयध्वजलिखिता पदरत्नावली, चेति त्रिभिः व्याख्यानैः भूषितम्, तिरुमल तिरुपति देवस्थानम्, २००५.
5) ईशादिदशोपनिषदः श्रीमच्छङ्करभाष्ययुताः श्रीगोविन्दशास्त्रिणा टिप्पणीभिः समलङ्कृताः, मोतीलाल बनारसीदास, वारणासी, १९८७.
6) ईशाद्यष्टोत्तरशतोपनिषदः, चौखम्बा विद्याभवन, वारणासी, २०१०.
7) श्रीनन्दिकेशकाशिका, उपमन्युकृततत्त्वविमर्शिनीसहिता, दि कुप्पुस्वामी शास्त्रि रीसेर्च् इन्स्टिट्यूट्, चेन्नै, २००९.
8) नन्दिकेश्वरकाशिका (अहं पदनिर्वचनमिति आन्ध्रव्याख्यान सहितम्), श्रीकृष्णानन्दमठम्, हैदराबाद्, २००६.
9) शब्दकल्पद्रुमः, चौखम्बा संस्कृत सिरीज आफीस, वारणासी, १९६७.
10) ललितासहस्रनामस्तोत्रं – भट्टनारायणकृत जयमङ्गलव्याख्यानसहितम्, भारतीय कला प्रकाशन्, दिल्ली, २००७.
11) भर्तृहरिप्रणीतं वाक्यपदीयम् – हरिवृषभकृतस्वोपज्ञवृत्तिसहितम् – प्रथमभागम्, सम्पूर्णानन्द संस्कृत विश्वविद्यालयम्, वारणासी, १९८८.



**Prof. Melukote K. Sridhar,**
Registrar, S-VYASA,
Swami Vivekananda Yoga AnusandhanaSamsthana,
(Deemed to be University) 19, Eknath Bhavan,
Gavipuram Circle,
K.G. Nagar, Bangalore, India - 560 019.
Mobile: +91 9480467836,
Email: drmksridhar@gmail.com

**Venkata Subbaiah Bathula,**
Ph. D. Scholar - Yoga & Spirituality Department,
Swami Vivekananda Yoga AnusandhanaSamsthana,
(Deemed to be University) 19, Eknath Bhavan,
Gavipuram Circle,
K.G. Nagar, Bangalore, India - 560 019
Mobile: +91 9945125002,
Email: bvsubbaiah@gmail.com.


*******

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# वेदमन्त्रेषु ऋषीणां प्रज्ञावैशारद्यम्

**Dr. Naveen Bhat,** Kalaburagi, Karnataka

यथा ब्रह्म दृश्यमानायाः सृष्टेः कर्ता तद्वत् ऋषिः अपि अद्भुतं शाब्दिकं प्रपञ्चम् असृजत् । ब्रह्मणः भौतिके जगति यथा वैचित्र्यं पश्यामः तद्वत् अस्यापि ऋषेः वैदिकप्रपञ्चे अनेकानि वैचित्र्याणि पश्यामः। ब्रह्म यथा भोक्तृप्रपञ्चस्य प्रयोजनाय भोग्यं सृजति तद्वत् अत्र मानवानां प्रयोजनाय अनेकान् देवतामन्त्रादीन् पश्यति । अत एव अहं वदामि "शाब्दिकप्रपञ्चस्य स्रष्टा, मन्त्राणां द्रष्टा च ऋषिः" इति ।

**ऋषिः –**

ऋषिः स्वयं सौन्दर्यप्रज्ञायाः आकरः प्रतिमूर्तिः च अस्ति । यतः सहस्राधिकैः वर्षैः पूर्वं एतैः दृष्टाः मन्त्राः अधुनापि सस्वररूपेण उपलभ्यन्ते । इदमेव ऋषीणां सौन्दर्यमिति वदामः यत् "सहस्राधिकेभ्यः वर्षेभ्यः रूपान्तरं विना (शब्दान्तरम्, स्वरान्तरम् ) यः वेदः ऋषिणा उच्चारितः स एव वेदः मया अपि उच्चार्यते इति" । केचन वदन्ति "काश्चन वेदशाखाः नष्टाः" इति किन्तु वेदशाखाः न नष्टाः, अस्माकं वेदावधारणप्रज्ञा नष्टा, अत वेद् एव नष्टा इति प्रतिभाति। प्रज्ञासौन्दर्यं नाम इदं यत् **"नित्यनूतनं सत्चिरकालं तिष्ठत्सार्वकालिकं सार्वदेशिकं सार्वजनीनं च भवति तत्सौन्दर्यम्"**। वेदे अस्य लक्षणस्य समन्वयः एवं भवति यत् "वेदाध्ययनं कुर्वन्तः जनाः अधुनापि नूतनविचारान्प्रकटयन्ति अत नित्यनूतनम्, सहस्राधिकेभ्यः वर्षेभ्यः अस्य अध्ययनं भवदस्ति अत चिरकालस्थायि, वेदोक्ताः विषयाः पुरा अपि नवीनाः भवन्ति अत अस्य (पुरातनम्, नूतनम् outdated & Updated शब्दौ न स्तः) सार्वकालिकम्, यद्यपि केषुचित्प्रदेशेषु अस्य वेदस्य उद्गमः श्रूयते किन्तु अयं वेदः सर्वत्र देशेषु प्रसृतः अस्ति। अयं वेदः केवलम् एकस्य धर्मस्य मतस्य वा जनसमूहस्य हितमेव न काङ्क्षते किन्तु प्रपञ्चस्य समेषामपि जीवजन्तूनां हितचिन्तकः अस्ति । अत लक्षणमिदम् ऋषिभिः ऋतुम्भराप्रज्ञया दृष्टेभ्यः मन्त्रेभ्यः सङ्गच्छते।

**ऋषिलक्षणानि –**

सर्वेषाम् अस्माकं कुलम् ऋषिकुलमेव अस्ति । इदं गोत्र-प्रवरकथनम् अस्माकं परम्परायां प्रचलितं वर्तते। गोत्र-प्रवरेण ज्ञायते यत् एकैकोऽपि मनुष्यः ऋषिणा अथवा ऋषिसमूहेन सम्बद्धः अस्ति। क्वचित्गोत्र-प्रवरस्मरणस्य सम्प्रदायाभावात्केचन न जानन्ति किन्तु तस्य ऋषिणा सह सम्बंधः नास्ति, ऋषिकुलं नास्ति इत्यादिकं वक्तव्यम्। अनेन अस्माभिः ज्ञातव्यं यत् ऋषयः उग्रं तपः कृत्वा ज्ञानप्रदानेन समग्रमपि मानवकुलं स्ववशे स्थापयन्ति इति। सत्यसन्धस्य ऋषेः ज्ञानसम्पादनं तदुपदेशः चैव जीवनस्य व्रतमासीत्। तदुच्यते -

ऊर्ध्वरेतास्तपस्युग्रः नियताशीः च संयमी। शापानुग्रहयोः शक्तः सत्यसन्धो भवेदृषिः॥

यद्यपि मानवाः एव ऋषयः बभूवुः तथापि आवयोः को भेदः इति ज्ञातव्यम् । अनेकेषु अंशेषु भेदान् वक्तुं शक्नुमः तथापि भवभूतेः वचनानुसारं सुन्दररूपेण वर्णयामः। वयं सामान्याः मानवाः शब्दानाम् अर्थं ज्ञात्वा शब्दप्रयोगं कुर्मः अत एव अस्माकं वाक् अर्थम् अनुवर्तते । ऋषीणां साक्षात्कृतधर्माणां या वाक्तां अर्थः एव अनुधावति। तदुक्तम् -

"लौकिकानां हि साधूनामर्थं वागनुवर्तते। ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति"॥

वेदभाष्यकारः सायणाचार्यः अपि **"अतीन्द्रियस्य वेदस्य परमेश्वरानुग्रहेण प्रथमतो दर्शनात् ऋषित्वम्"** इति वदति। अनेन ज्ञातुं शक्नुमः ज्ञानं द्विविधं १. इन्द्रियाधीनम् (इन्द्रियगम्यम्), २. इन्द्रियातीतम् (इन्द्रियागम्यम्) । इन्द्रियगम्येऽपि अत्र लौकिकज्ञाने अस्माभिः ज्ञातव्यं बहु अस्ति किमु वक्तव्यम् इन्द्रियातीते ज्ञाने । इन्द्रियातीतं यज्ज्ञानम् वेदात्मकम् ऋषिभिर्दत्तं तद् आसूर्यचन्द्रं यावत् निष्कम्प्यं तिष्ठति, इदम् उच्यते "ऋषिसौन्दर्यप्रज्ञावैशारद्यम्" इति । यज्ज्ञानं सर्वेषामपि सूत्र-स्मृति-दर्शन-शास्त्र-इतिहास-पुराण-काव्यादीनां स्रोतं भवति, यज्ज्ञानम् निरस्त-समस्तभ्रमः-प्रमाद-करणापाटवादिपुंदूषणतया रहितं सत् अन्यैः वेदाप्रमाणबुद्धिभिः दोषान्वेषणचक्षुभिः शतशो चिन्त्यमानेऽपि किञ्चिदपि दोषम् अपश्यन्तः वेदैकशरणाः अभवन् । अत एव उच्यते इदं ऋषेः दर्शनम्, गीर्वाणवाणी, देवभाषा इत्यादीनि । इयमेव सौन्दर्यप्रज्ञाऋषीणां भवति। सर्वलोकस्य हितकाङ्क्षिणः सर्वजनस्य च सखाः समग्रवेदराशेः द्रष्टारः अस्माकं ऋषयः सन्ति। महाभारते च उच्यते –

**युगान्तेऽन्तर्हितान्वेदान्सेतिहासान्महर्षयः । लेभिरे तपसा पूर्वं अनुज्ञाता स्वंभुवा ॥ [1] इति**

अनेन ज्ञायते यत् युगान्तरेषु यथा वेदाः आसन् तथा सम्प्रत्यपि वेदाः अस्यां प्रकृतौ विद्यन्ते एव। तद्द्रष्टुं अस्माकं योग्यताभवेत्। वेदाः न कदापि नष्टाः भवन्ति नित्यत्वात् । तदुक्तम् "अन्तर्हितान्वेदान्" इति। ऋषीणां विषये "उद्भूताः स्वमीश्वराः" इति श्रूयते अर्थात्स्वयम् ईश्वराः सन्तः वेदमन्त्रान्दृष्टवन्तः इति। अधुनापि वेदाः द्रष्टुं शक्याः यदि तपः आचरन्ति । ऋषयः ईश्वराः भूत्वा वेदमन्त्रान्दृष्टवन्तः। यास्काचार्यः कथयति –

**"साक्षात्कृतधर्माणऋषयो बभूवुः, ते अवरेभ्यो असाक्षाकृतधर्मभ्यः उपदेशेन मन्त्रान्सम्प्रादुः।"**

यैः विशिष्टेन तपसा साक्षात्कृतः प्रत्यक्षतो दृष्टो मन्त्ररूपः धर्मः ते साक्षात्कृतधर्माणः भवन्ति। अवरकालिकेभ्यः विज्ञानशक्तिहीनेभ्यः उपदेशपरम्परया शास्त्रमिदं आगतम् इति ।

**विज्ञानिनः ऋषयः :-**

यत्किमपि ज्ञानम् अनुभवपर्यवसान्नं भवति चेत्तद्विज्ञानं भवति । यद्यपि आधुनिककाले विज्ञानस्य अनेकानि लक्षणानि स्युः किन्तु आर्षं लक्षणमिदम् यत् ज्ञानं स्वानुभवे पर्यवस्यति तर्हि तद्विज्ञानं भवति। ऋषीणां विषयेऽपि "साक्षात्कृतधर्माणः", "मन्त्रदर्शनात्ऋषिः" इत्यादिभिः लक्षणैः इदं ज्ञायते "ज्ञानं विज्ञानसहितम्" इतिवत्साक्षात्विज्ञानमेव अस्मभ्यं प्रदत्तवन्तः इति वक्तुं शक्नुमः ।

अन्यत्रापि श्रूयते – **ऋषयः – ऋषन्ति अवगच्छन्ति अमुष्मात्कर्मणः एवमर्थवता मन्त्रेण संयुक्ताद् अमुनाप्रकारेण एवं लक्षणं फलं सिध्यति इति मन्त्रद्रष्टारः ऋषयः उच्यन्ते** ।

**मन्त्रद्रष्टारः–**

मन्त्रतदर्थयोः विमर्शेणैव तेषां प्रभेदान्ज्ञातुं शक्नुमः । मन्त्रार्थेषु आधिभौतिक-आधिदैविक-आध्यात्मिकादि प्रभेदात् अत्रापि एकस्यैव मन्त्रस्य वेदवेदाङ्गादि ज्ञानवतां सायणाद्याचार्याणां मतानुसारम् अर्थप्रभेदः वक्तुं शक्यः इति अत्र अयमारभ्यते । अत्र मन्त्रेषु लौकिकार्थाः, देवतासम्बद्धार्थाः, दर्शनसम्बद्धाः इत्याद्येनेकान्प्रविभागान् अर्थतः ज्ञातुं शक्नुमः।

मन्त्राः अर्थानुसारम् अनेकविधाः भवन्ति ।ते च -

- स्तुतिः प्रशंसा निन्दा च संशयःपरिदेवना । स्पृहाशीः कत्थनायाच्ञाप्रश्नः प्रैषः प्रवह्लिका ॥
- नियोगश्चानुयोगश्च श्लाघाविलपितं च यत् । आचिकख्यासाथ संलापः पवित्राख्यानमेव च ॥.. ..
- भूतं भव्यं भविष्यं च पुमान्स्त्री च नपुंसकम् । एवं प्रकृतयो मन्त्राः सर्ववेदेषु सर्वशः ॥[2]

एवं स्तुति-प्रशंसा-निन्दा-संशय-विलापादिभिः अर्थैः मन्त्राः ४६ (षड्चत्वारिंशत्प्रकाराः) सन्तीति बृहद्देवताकारः शौनकाचार्यः दर्शयति। तत्र कानिचन उदाहरणानि –

1. वयमुत्वामपूर्व्यस्थूरं न कच्चिद्भरन्तोऽवस्यवः । वाजे चित्रं हवामहे ॥[3] अत्र ऋचि दानप्रशंसा इति विषयः भवति ।
2. माता च यत्र दुहिता च धेनूसबर्दुघेधापयेते समीची । ऋतस्य ते सदसीळे अन्तर्महद्देवानामसुरत्वमेकम् ॥[4]

   अत्र मन्त्रे आक्रोषार्थः सूच्यते ।
3. मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य । नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥[5]

   अत्र मन्त्रे निन्दायाः दृष्टान्तः भवति ।
4. योमायातुं यातुधानेत्याहयोवारक्षाः शुचिरस्मीत्याह । इन्द्रस्तंहन्तुमहतावधेन विश्वास्य जन्तोरधमस्पदीष्ट ॥[6]

   अत्र मन्त्रे शापस्य उदाहरणं भवति ।
5. यदिन्द्रचित्तमेहनाऽस्तित्वादातमद्रिवः। राधस्तन्नोविदद्वस उभया हस्त्याभर॥ अत्र मन्त्रे याचनायाः दृष्टान्तः भवति ।[7]
6. अभीऽदमेकमेको अस्मिनिष्पाळभीद्वाकिमुत्रयः करन्ति । खले न पर्षान्प्रतिहन्मिभूरिकिंमानिन्दन्ति शत्रवोऽनिन्द्राः[8]॥

   अत्र मन्त्रे क्षेपस्य अर्थात् उत्प्रेक्षायाः दृष्टान्तः भवति ।
7. वात आ वातुभेषजं शंभुमयो भुनो हृदे । प्र ण आयूंषि तारिषत् ॥[9] अत्र मन्त्रे प्रार्थनायाः दृष्टान्तः भवति ।

8. दण्डइवेद्गो अजनास आसन्परिच्छिन्ना भरता अर्भकासः । अभवच्चपुर एतावसिष्ठ आदित्तृत्सूनां विशो अप्रथन्त ॥[10]

अत्र मन्त्रे विषादस्य दृष्टान्तः ।

9. पृच्छामित्वा परमन्तः पृथिव्याः पृच्छामि यत्र भुवनस्य नाभिः । पृच्छामि त्वा वृष्णो अश्वस्य रेतः पृच्छामि वाचः परमं व्योम ॥[11]

अत्र मन्त्रे प्रश्नस्य उदाहरणं भवति ।

10. इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः । अयं सोमो वृष्णो अश्वस्य रेतो ब्रह्मायं वाचः परमं व्योम ॥[12]

अत्र मन्त्रे उत्तरस्य दृष्टान्तः ।

11. अक्षैर्मादीव्यः कृषिमत्कृषस्व वित्ते रमस्व बहुमन्यमानः ॥[13]

अत्र मन्त्रे प्रतिषेधस्य उदाहरणं भवति । एवम् अनेकविधाः मन्त्राः अत्र उदाहर्तुं शक्याः भवन्ति ।

**पादटिप्पण्यः**

1. म.भा. । 2. बृ.दे – ३५-४० । 3. ऋक्. सं- ८/२१/१८ । 4. ऋक् .सं – ३/५५/१२ । 5. ऋग्. सं - १०/११७/६
6. ऋग्.सं - ७/१०४/ १६ । 7. ऋग्. सं- ५/३९/१ । 8. ऋग्. सं- १०/४८/७ । 9. ऋग्. सं- १०/१८६/१
10. ऋग्. सं- ७/३३/६ । 11. ऋग् .सं- १/१६४/३४ । 12. ऋग्.सं - १/१६४/३५ । 13. ऋग्.सं - १०/३४/१३

**<u>ग्रन्थसूची :-</u>**

१) सायणमाधवः, सर्वदर्शनसङ्ग्रहः, भाण्डारकर्प्राच्यविद्यासंशोधनमन्दिरम्, पुण्यपत्तनम्, १९७८.

२) शास्त्रीआचार्यजगदीशः, ब्रह्मसूत्रशङ्करभाष्यम्, मोतिलाल्बनारसीदास्, वाराणासी २००५.

३) शास्त्रीकपालिः, collected works of T.V Kapali Shastri, दीप्तिप्रकाशनालयः,पुदुचेरि,१९८८

४) उपाद्यायःबलदेवः, संस्कृतवाङ्मयकाइतिहास, उत्तरप्रदेहशसंस्कृतसंस्थानम्, लखनौ २००६.

५) सायाणाचार्यः, ऋग्वेदभाष्यभूमिका, चौखाम्बाकृष्णदास्अकाडेमी,वाराणासी,२००५

६) निरुक्तम्, यास्कः, चैकम्बासंस्कृतप्रतिष्ठानम्, देह्लिनगरम्, २०१२

७) वैदिकसाहित्यचरित्रे, डा. एन्एस्अनन्तरङ्गाचार्, डिविकेमूर्तिप्रकाशकाः, मैसूरु, २००१

**Dr. Naveen Bhat**
Assistant Professor
Dept of Sanskrit & Vedic Studies
Sri Sathya Sai University for Human Excellence
Kalaburagi, Karnataka
Contact No. : 9449882069
E-mail : nabharigvedi@gmail.com

*************

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# प्रतिनायकानां वैशिष्ट्यम्

**S. Sugandha,** Chennai, Tamil Nadu
(Research Scholar)

**सारांश: - प्रस्तावना**

वेदकालत: आधुनिर्ककालपर्यन्तं काव्येषु नाटकेषु च नायकस्य वृत्तान्तं, वैशिष्ट्यमेव अतिमुख्यत्वेन वर्णयतिस्म। परन्तु भासनाटकेषु प्रतिनायकस्य वैशिष्ट्यं बहुधा वर्णितं दृश्यते। तस्य नाटकेषु प्रतिनायकपात्राणां औदर्यगुणत्वं, तेषां श्रेष्ठत्वमपि वर्णयन्तिस्म। अत्र कविना तस्य स्वाभिप्राय: स्पष्टरीत्या कथापात्रेषु विनिवेशित:।

## रामायणम्

वाल्मिके: रामायणाध्ययनसन्दर्भे वयं सर्वे कैकेय्या: उपरि केवलं घृणां प्रकटयितुं आरभाम:। परन्तु भासस्य प्रतिमानाटके सापि गुणवतीति प्रतिपादयितुं अनेन प्रयत्न: कृत: दृश्यते।

( प्रतिमानाटके षष्टे अङ्के यदा वने सीता रावणेन अपहृता इति त्वाकोपेन भरत: मातरं पृच्छति-

*" य: स्वराज्यं परित्यज्यत्वन्नित्योगाद्वनं गत:। तस्य भार्या हृता सीता पर्याप्तस्ते मनोरथ:॥ "*(1)

तदा कैकेयी वदति-

*" जात । एतन्निमित्तमपराधे मां निक्षिप्य पुत्रको रामो वनं प्रेषित:, न खलु राज्यलोभेन। अपरिहरणी यो महर्षिशाप: पुत्रविप्रवासं विना न भवति"* इति।

तत: भरत: कैकेयीं पृच्छति-*" अथ चतुर्दशवर्षाणि किं कारणमेक्षिताणि" – इति।*

*तदा कैकेयी प्रत्यवदत्- " जात। चतुर्दशदिवसा इतिवक्तु मया पर्याकुलहृदया चतुर्दशवर्षाणीत्युक्तम् "।*

अत्र भास: कैकेय्या: श्रेष्ठगुणत्वं प्रकटयितुकाम: सन्महान्प्रयत्न: स्वीकृतः इति दृश्यते।

## अभिषेकनाटकम्-

(रामायणे विद्यमानवालिसुग्रीवयुद्धे रामेण वालि: मारित:। अस्मिन्सन्दर्भे राम-वाल्यो: संवाद: अभिषेकनाटके प्रथमाङ्के (17-22) श्लोका: दृश्यन्ते। तत्र वाले: पक्षे विद्यमानन्यायधर्मा: सम्यक्कर्णितुं भास: बहुप्रयत्न: स्वीकृत: दृश्यते। अत्र केचन उदहरणानि पश्याम:।

*वालि: – दण्ड्य इति मां भवान्मन्यते।*

*राम: - क: संशयः ।*

*वालि: - केन कारणेन ।*

*राम: - अगम्यागमनेन ।*

*वालि: - एषोऽस्माकं धर्म:* ।

*" भातृदाराभिमर्शनेन तुल्यदोषयोरहमेव दण्डितो न सुग्रीव:"*

*राम: - दण्डितस्त्वं हि दण्डयत्वाद् अदण्डो नैव दण्ड्यते।*

अत्र भास: राम: साक्षात्महाविष्णो: स्वरूपवान् अस्तीति ज्ञात्वापि रामात् अपेक्ष्य वाले: कथापात्रे एव प्रधान्यं प्रदर्शयति।

## *महाभारतम्*

महाभारते सप्तदशदिनस्य युद्धे कर्ण: एव दुर्योधनस्य अत्यन्तं सेनापति:। एतादृशान्विषयान् अधिकृत्य कर्णभारे कर्णस्य मनोव्यपारान् नानाविधप्रकारेण भास: वर्णितवानस्ति। अत्र दुर्योधनस्य पक्षे कर्ण: स्थितवानितिकारणात्स: पाण्डवानां शत्रुर्रिति वक्तुं न शक्यते। कर्णस्य श्रेष्ठगुणत्वं, स: कीदृशकष्टान् अनुभूतवानिति भास: एक: एव स्पष्ट्धृक्तर्तते।

यदा शल्य: अर्जुनस्य शङ्खशब्दं श्रुत्वा भीत: सन् तदा कर्ण: शल्यं शान्त्वयितुं उच्यते-

*" हतोपि लभते स्वर्गं जित्वा तु लभते यशः। उभे बहुमते लोके नास्ति निष्फलतारणे॥ "* (2)
अत्र कर्णस्य निर्भयत्वं, वीरत्वं प्रदर्शयति।
यदा शक्रः ब्राह्मणरूपपिधानेन वञ्चनया कर्णस्य कवचकुण्डलौ याचते, ***तदा शल्यः " न दातव्यम्"*** इति वदन् अस्ति। तत्र कर्णः उच्यते
***" शिक्षा क्षयं गच्छति कालपर्ययात् सुबद्धमूलानि पतन्ति पादपाः।***
***जलं जलस्थानगतं च शुष्यति हुतं च दत्तं च तथैव तिष्ठति॥ "***- इति
अन्यथा इन्द्रः कवचकुण्डलस्य प्रत्युपकारार्थं विमलिनाम अस्त्रं देवदूतेन प्रेषयतिस्म। परन्तु दानशीलः कर्णः देवदूतं प्रतिवदति – यथा ***" दत्तस्य न प्रतिगृह्णामि "*** इति।एतस्मिन् पद्ये सः कर्णस्य दानत्वं साकूतं निरुपयति।
भासस्य ऊरुभङ्गे दुर्योधनः एव नायकः। भारवेः किरातार्जुनीयस्य प्रथमाङ्के कथं दुर्योधनस्य राज्यपालनं धर्मरीत्यासीसिति वर्णनं कृतं वर्तते, तादृशधर्मशीलः दुर्योधनः इतिभासः अपि अङ्गीकरोतीति मन्ये।
वस्तुतः महाभरते दुर्योधनः एव पाण्डवानां शत्रुः। परन्तु अत्र दुर्योधनः पाण्डवानां अपेक्ष्याधर्मपालनं स्वयं करोतिस्म। यदा बलरामः भीमं प्रति क्रोधेन वदति- ***" युद्धवन्जनामुत्पाद्य स्थापयति "*** इति। तदा दुर्योधनः बलरामं समादानं वदति– ***" किंचाहं भीमसेनेन वञ्चितः "*** ।
ततः उच्यते- ***" प्रतिज्ञावसिते भीमे गते भ्रातृशते दिवम्। मयि चैवं गते राम! विग्रहः किं करिष्यति "***॥- इति
ततः सः वदति- भीमस्य प्रतिज्ञापूर्णम् अभवत्। मम शताः सहोदराः दिवं गताः अहमपि गमिष्यामि इदानीं युद्धेन किंकरिष्यति – इति।
अग्रे पश्यामः चेत्कृष्णस्य सहाय्येन भीमः दुर्योधनस्य ऊरुभङ्गं कृतवान्। तत्ज्ञात्वापि दुर्योधनः भीमं न निन्दति। परन्तु तस्य प्रसंशा एव करोति। दुर्योधनस्य अन्तिमसमये तुसः मातरं प्रार्थयामास" हे माता किमपि अहं पुण्यं कृतवान्चेत्तत्पूर्णं मम पुनर्जनने त्वमेव माता भवतु इति प्रार्थयामास।यथा- ***" नमस्कृत्य वदामि त्वां यदि पुण्यं मया कृतम्। अन्यस्या मयि जात्यां मे त्वमेव जननी भव"***॥- इति।
अत्र दुर्योधनस्य मातृभक्तेः निदर्शनेन वर्णितमस्ति। अन्यउदहरणं यदा दुर्योधनः युद्धस्थले अन्तिमकाले पुत्रं आहूय वदति–
***" अहमिव पाण्डवाः शुश्रूषयितव्याः, तत्रभवत्याश्च अम्बायाः कुन्त्यानिदेशो वर्तयितव्यः। अभिमन्योर्जननी द्रौपदी चोभे मातृवत्पूजयितव्ये इति"।***
अत्र दुर्योधनस्य सहोदरस्नेहं दृश्यते। नाटकाध्ययनसन्दर्भे जनानां मनसि सन्देहो जायते, यत्वास्तविकरीत्या दुर्योधनः सुशीलभक्तः किमिति? तदर्थं तस्योपरि कारुण्यो संजायते।

**उपसंहारः**

विश्वे भासस्य रचनाः जनान् आकर्षयन्ति। विशिष्य स्वनाटकेषु सर्वेषां पात्राणां चित्रणम् अतीव चमत्कारतया चित्रितमस्ति। भासनाटके विद्यमानकथापात्राणि सर्वाणि कवेः मनसि विद्यमान एकैकपात्रस्य सत्यस्वरूपमेवेति शिलालेखनमिव प्रतिपादयति।

**ग्रन्थसूचिः**


- **भासनाटकचक्रम्**
- **कर्णभारम्, आर्. एस्. वाद्याअन्दुस न्स्कल्पाति,पालकाट्**-2005.
- **भासनाटकचक्रम् आङ्ग्लभाषा अनुवादः**



**S. Sugandha**
Research Scholar
Madrapuri Sanskrit University
Sanskrit College street, Mylapore-600004
Chennai, Tamil Nadu
Contact No. : 9840287208
E-mail : suganthammn@yahoo.com


*********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# रामायणस्य सार्वकालिकत्वम्

डा. रमेशः टि. एस्. उडुपि, कर्नाटक

रामायणस्य सार्वकालिकत्वम् इत्यस्मिन् विषये कानिचनवचनानिउपस्थापयितुं इच्छामि । वेदोऽखिलो धर्ममूलम्, यतो धर्मः ततो जयः, धर्मो रक्षति रक्षितः, धर्मो विश्वस्य जगतः प्रतिष्ठा, इत्यादीनि वाक्यानि सर्वत्र श्रूयन्ते । वर्णाश्रममाश्रित्य धर्मः उक्तः वर्तते । अतः गीतायां 'स्वधर्मे निधनं श्रेयः परधर्मो भयावहः' इत्येवं प्रतिपादितः वर्तते । रामः न केवलं धर्मस्य अनुष्ठाता परन्तु परिपालकश्च । यथोक्तम्- कर्मयोगेश्वरं धीरं रामं सत्यवतां वरं । रक्षितारं च धर्मस्य वन्देऽहं पुरुषोत्तमम् ॥

हन्तारं भयविघ्नानां दातारं सुखसम्पदाम् । त्रातारं साधुलोकानां नेतारं राममाश्रये ॥ इति ।

अपरिमितैः सद्गुणैः विभूषितः महान् रत्ननिधिः मर्यादापुरुषोत्तमः श्रीरामचन्द्रः धर्मपरायणत्वादेव सर्वैः परमाराध्यः परमेश्वरोवर्तते ।स सत्यसन्धः, धर्मस्य च त्राता । सर्वेषां भयं निवारयिता, सुखानां सम्पत्तीनां च दाता, सर्वेषां सज्जनानां रक्षिता च वर्तते इति अस्यार्थः । तदेव वाल्मीकिः राममुपवर्णयन्पुनः पुनः आचष्टे– 'रक्षिता जीवलोकस्य धर्मस्य परिरक्षिता' इति । दुष्टानां विनाशाय साधूनां चसंरक्षणाय धर्मसंस्थापनाय च रामः पृथिव्यां अवततार । भूभारस्य न्यूनीकरणाय साक्षात् महाविष्णोः भुवि अवतार इति सर्वेषामास्तिकानां मतम्, स्वयं च ब्रह्मरूपेण श्रीकृष्णेन गीतायामिदं प्रतिपादितम् -

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ॥

अवतारे कारणद्वयम् - एकं तु धर्मस्य ग्लानिः, अन्यत्तु अधर्मस्य अभ्युत्थानम् । एतस्मिन् कारणद्वये सत्येव परमात्मनो भूमावतार इति बोध्यम् । श्रीरामचन्द्रोऽयम्अभयदाता, सत्यप्रतिज्ञः, धर्मज्ञः, परन्तपश्च वर्तते । वाल्मीकिना साक्षात् स्वकण्ठरवेण यत्तस्य सत्यप्रतिज्ञत्वं प्रतिपादितं तदेवं वर्तते –

सकृदेव प्रपन्नाय तवास्मीति च याचते । अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥ (६.१८.३३)

यस्तस्य गुणसमूहस्य चिन्तनम्, मननं, निधिध्यासनं च करोति सः सौभाग्ययुक्तः शान्तिमप्यधिगच्छति । श्रीरामचन्द्रः शरणागताय विभीषणाय अभयं दत्वा राज्यमपि ददाति ।

सुदुष्टोवाप्यदुष्टो वा किमेष रजनीचरः । सूक्ष्ममप्यहितं कर्तुं ममाशक्तः कथंचन ।

इति सुग्रीवं प्रति वदति । तत्रेयं कथा वर्तते - कश्चित् व्याधः कस्यचित् कपोतस्य पत्नीं मारयति । कपोतस्तु स्वस्य दौर्भाग्यं शोचन् तत अपक्रामति । कदाचित् स व्याधः तस्य वृक्षस्य मूलम् उपसर्पति यत्रासीत् कपोतस्य वासः । आहाराभावात् कृशः खिन्नश्च परितप्यमानः तत्र यदा तिष्ठति तदा स कपोतः स्वस्य अत्यन्तं दत्तदुःखमपि तं व्याधम् आहारादिना प्रत्युज्जीवयति । एवं कपोतकथाद्वारा शत्रुसम्बन्धी अपि विभीषणो रक्षणीय इति समर्थयते । एतेन प्रसङ्गे सति शत्रुरपि साधुना रक्षणीयो भवतीति धर्मः सूचितो भवति ।

धर्मेण पृथ्वी धार्यते, धर्मेणप्रजाः रक्ष्यन्ते ।ननु को नाम धर्मः ? महाभारतेतस्यलक्षणमेवमुक्तं

धारणाद्धर्ममित्याहुर्धर्मो धारयते प्रजाः । यत्स्याद्धारणसंयुक्तं स धर्म इति निश्चयः । (कर्ण,६९,५८) इति ।

यद्यपि धर्मस्वरूपे महान् विवादो वर्तते विदुषाम् । तत्र धृञ् धारणे इति धातोः कर्तरि मन् प्रत्यये धर्म इति शब्दस्य निष्पत्तिः । यो धारयति स धर्म इति अस्य अर्थः ।धारक इति यावत् । धारकश्च क इति पुनः प्रश्ने तद्विषये नानाविधं मतं वर्तते । तत्र विदुषामपि सन्देहो भवतीति मे प्रतिभाति । तत्र मीमांसका यागादिरेव धर्म इत्यामनन्ति । वर्णाश्रमसम्बन्धिनां कर्मणाम् अनुष्ठानं धर्म इति याज्ञवल्क्यादयः । ब्राह्मणादेः यत् कर्तव्यम् - यजनं याजनम्, अध्ययनम् अध्यापनं दानं प्रतिग्रहश्चेति तदेव तस्य धर्मः । प्रजारञ्जनमेव क्षत्रियस्य परमो धर्म इत्यादिकम् । मनुस्मृतौ तु-

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः । धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥ (६,९२)

इत्युक्तम् । तदनुसारेण धृत्यादीनां दशानां धर्माणां धर्मज्ञापकत्वमिति विज्ञायते । एतद्दशकं धर्मस्य लक्षणम् । लक्षणं नाम लक्ष्यते अनेनेति ज्ञापकम् । तथा च यस्मिन् य एते गुणाः सन्ति स धार्मिक इति निश्चीयते । एवं धर्मविषये एकैकस्य एकैकं मतम् ।

अद्यत्वेऽपि धर्मस्य स्वरूपे महान् मोहः । एवं सत्यपि सारल्येन इदं वक्तुं शक्यम् - यस्मिन् कृते आत्मन मोक्षाभिमुखगमनं सम्पद्यते स एव धर्म इति, तदुक्तं व्यासेन - अष्टादशपुराणेषु व्यासस्य वचनद्वयम् । परोपकारः पुण्याय पापाय परपीडनम् ॥

अन्येषां पीडाम् अकृत्वा यज्जीवनं तदेव जीवनम्, स एव धर्म इति मे मतिः ।

अयं च रामः प्रजानां संरक्षणात् सद्गुणविभूषितानां साधूनां तपस्विनां च परित्राणात् श्रीरामः स्वयं धर्मस्वरूपः वर्तते । दत्तस्य वचनस्य परिपालनं सर्वेषामपि धर्मः विशिष्य राज्ञाम् । रामे एतत् सर्वथा दृश्यते । अद्यत्वे तु ये राजकीयाः पुरुषाः सन्ति ते प्रभूतं वदन्ति। न किञ्चिदप्यनुतिष्ठन्ति । तादृशाः पुरुषाः ते अनालोच्यैव जनैः कण्ठे बद्धपाषाणाः सन्तो जले निमज्जनीया इति सुभाषितम्,यथा-

अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः । स संहत्य निहन्तव्यः श्वेव सोन्माद आतुरः ॥

जाते मनुष्ये ये धर्माः प्रकर्षप्रयोजकाः सन्ति धृतिशौचादयः तेषां सर्वेषामपि धर्माणाम् आश्रयत्वात् रामः साक्षात् धर्मरूपः, स साक्षात् विग्रहवान् धर्मः । रामायणे रामस्य धर्मपरता गुणाश्च संकीर्तिताः सन्ति । अत एव आबालवृद्धाः रामायणपारायणं पुण्यप्रदमामनन्ति । तथा वेदपारायणवत् पुण्यजनकमित्यपि आमनन्ति । धर्मस्य मूलं वेदः, रामायणदयः तस्यैव विवरणरूपाः । वेदः यदि सूत्रत्वेन कल्प्यते तर्हि रामायणदिकं तस्य व्याख्यानमिव भाति ।

मानवः कस्य आचरणे सति धर्मवान् भवति? तत्र तैत्तिरीयकब्राह्मणं विवृणोति–ऋतं च स्वाध्याय प्रवचने च । सत्यं च स्वाध्याय प्रवचेन च । दमश्च स्वाध्याय प्रवचेन च । शमश्च स्वाध्याय प्रवचेन च ।एतदेव पुनः तैत्तिरीयोपनिषदि वाक्यभेदेन श्रूयते -सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । एवं वेदोपनिषदादिषु प्रतिपाद्यमानान् गुणान् धर्मान् च अनुसरन्तः रामादयः मूर्तिरूपेण अविर्भूताः सन्ति । तत्र रामस्तु विग्रहवान् धर्मः । रामः कायेन मनसा वाचा स सत्यस्य पालकः । सः यदा दण्डकारण्ये निवसतिस्म तदा ऋषिगणेभ्यः अभयमादिशन् प्रतिज्ञां करोति- तपस्विनां रणे शत्रून् हन्तुमिच्छामि राक्षसान् । पश्यन्तु वीर्यमृषयः सभ्रातुर्मे तपोधनाः ॥ ( ३,६,२५) इति ।

एतेषां तपोधनानां ये शत्रवः सन्ति तान् मारयितुमिच्छामि । सलक्ष्मणस्य च मम वीर्यं सर्वेऽपि आरण्यकाः अवलोकयन्तु इति अस्यार्थः । एतादृशीं प्रतिज्ञां श्रुत्वा आपतन्तीं विपत्तिम् आशङ्कमाना सीता यदा ऋषिगणाः निवृत्ताः तदा सानुनयं स्वभर्तारं वदति-

प्रतिज्ञातस्त्वया वीर दण्डकारण्यवासिनाम् । ऋषीणां रक्षणार्थाय वधः संयति राक्षसाम् ।।

न कथंचन सा कार्या गृहीतधनुषा त्वया । बुद्धिर्वैरंविना हन्तुं राक्षसान्दण्डकाश्रितान् ॥

अपराधं विना हन्तुं लोकान्वीर न कामये ॥ (३.४.१०,२४.२५) इति ।

सीता कदाचित् रामं प्रति एवं वदति - दण्डकारण्ये ये निवसन्ति राक्षसाः ते निरपराधाः । न ते अस्मद्विषये अनागसः सन्ति । तस्मात् विना कारणं तेषां हननं पापाय कल्पते इति हेतोः तेषां हननं नाहमिच्छामि इति। तत्र रामस्य इदं प्रतिवचनम् -

संश्रुत्य न शक्ष्यामि जीवमानप्रतिश्रवम् । ऋषीणामन्यथा कर्तुं सत्यमिष्टं हि मे सदा ॥

अप्यहं जीवितं जह्यां त्वाम् वा सीते सलक्ष्मणाम् । न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥' (३.१०.१७-१९) इति ।

एतेषाम् ऋषीणाम् अभयं मया दत्तम् । यस्तावत् अभयं दत्त्वा वचनात् प्रमाद्यति स न कदापि क्षन्तव्य । तस्मात् त्वामहं जह्याम्, लक्ष्मणं वा जह्याम्, किं पुनः प्राणानपि जह्याम् तथापि रामोऽयं न जातु वचनं जहाति । शरण्यानां रक्षणं मे परमो धर्मः । तस्मात् नाहं धर्मात् स्खलामीति । अनेनापि तस्मिन् धर्मपरत्वं कियदस्तीति विज्ञातं भवति । एवं सत्यविषयेऽपि तस्य महान् आग्रहः, सत्यसन्धस्य हरिश्चन्द्रस्य कुले जातः खलु सः । यदाह उत्तरत्र -

'सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः । सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम् ॥

दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च । वेदाः सत्यप्रतिष्ठानास्तस्मात्सत्यपरो भवेत् ॥' (२.१०९.१३-१४) इति ।

सः सत्यपरत्वं न केवलम्वाचा शंसति किन्तु अनुतिष्ठति । एवं स धर्मात्मा सत्यसन्धश्च ।

ये तावत् शम्बूकबधविषये, सीतापरित्यागविषये तथाविधे च अन्यस्मिन् विषये रामं निन्दन्ति ते स्वयं क्षणं मनसा रामाः सन्तः पर्यालोचयेयुः - अस्मिन् काले किं कर्तुं युक्तम् । विचारणेन बुद्धिमतां स एव मार्गः परिदृश्यते येन मार्गेण तावत् रामो गतः ।

अत एव सहस्राधिकेषु वर्षेषु व्यतीतेष्वपि अद्यापि रामस्य नाम गृह्णन्ति जनाः न पुनः तं निन्दतां जनानाम्, रावणादीनां वा । एवम् अनुकरणीयचरितत्वादेव स सर्वैरपि मर्यादापुरुषोत्तम इत्युच्यते । पुरुषत्वस्य या चरमा सीमा वर्तते तद्रूपोऽयं पुरुष इति अस्यार्थः । एतस्मात् अधिकं पुरुषत्वं नान्यस्मिन् कस्मिन्नपि पुरुषे वर्तते इत्यभिप्रायः ।

रामस्य मातापितृभक्तिस्तु अवश्यं प्रशंसनीया वर्तते ।पितुः आज्ञायाः परिपालनार्थं सः स्वेनानुभोक्तव्यं राज्यं त्यक्त्वा सानन्दं वनं प्रस्थितः । तस्य पितरि कीयती भक्तिरित्येतत्तुअनेन वचनेन विज्ञायते–

अहं हि वचनाद्राज्ञः पतेयमपि पावके । भक्षयेयं विषं तीक्ष्णं पतेयमपि चार्णवे ॥

नियुक्तो गुरुणा पित्रा नृपेण च हितेन च । (२.१८.२८-२९)

यदि राजा दशरथः कथयति तर्हि एषोऽहं अग्नावपि पतामि, विषमपि भक्षयामि, समुद्रेऽपि मज्जामि । किमिदानीम् अस्मिन् काले विश्वसितुं शक्यम्? कालेऽस्मिन् पिता यद्वदति तद्विरुद्धमेव आचरति पुत्रः । कालेऽस्मिन् पितुः वचनस्य अपरिपालनमेव धर्म इत्यायातम् ।तथा चअग्रेऽपि पुनः प्रतिपाद्यते -

नास्ति शक्तिः पितुर्वाक्यं समतिक्रमितुं मम । पितुर्हि वचनं कुर्वन्न कश्चिन्नाम हीयते ॥ (२.२१.३०-३७) इति ।

नाहं पितुराज्ञाम् उल्लङ्घयितुं शक्नोमीति तस्य वचनम् । एवमेवतस्य अन्यान्यपि वचनानि पश्यत –

संश्रुत्य च पितुर्वाक्यं मातुर्वा ब्राह्मणस्य वा । न कर्तव्यं वृथा वीर धर्ममाश्रित्य तिष्ठता ॥

गुरुश्च राजा च पिता च वृद्धः क्रोधात्प्रहर्षादथवापि कामात् । यद्यादिशेत्कार्यमवेक्ष्य धर्मं कस्तं न कुर्यादनृशंसवृत्तिः ॥
न तेन शक्नोमि पितुः प्रतिज्ञामिमां न कर्तुं सकलां यथावत् । स ह्यावयोस्तात गुरुर्नियोगे देव्याश्च भर्ता स गतिश्च धर्मः ॥

(२.२१.४२-५९-६०)

एवं सः पितुर्वाक्यस्य परिपालनं स्वस्य परमो धर्म इति मन्यते । सः कर्तव्यमनुस्मरन् भरतमेवमुपदिशति-

सोऽयं वनमिदं प्राप्तो निर्जनं लक्ष्मणान्वितः । सीतया चाप्रतिद्वन्द्वः सत्यवादे स्थितः पितुः ॥

भवानपि तथेत्येव पितरं सत्यवादिनम् । कर्तुमर्हसि राजेन्द्र क्षिप्रमेवाभिषिञ्चनात् ॥

ऋणान्मोचय राजानं मत्कृते भरत प्रभुम् । पितरं त्राहि धर्मज्ञं मातरं चाभिनन्दय ॥

पुन्नाम नरकाद्यस्मात्पितरं त्रायते सुतः । तस्मात्पुत्र इति प्रोक्तः पितृण्यः पाति सर्वतः ॥ (२.१०७.८,१०,१२)

पुन्नामनरकात् यः त्रायते स पुत्रः। तस्मात् त्वमपि पितुः वचनमेव अनुवर्तस्व । एतत् तव श्रेयसे इति व्याहरन् पित्राज्ञापरिपालनाय भरतं चोदयति । तस्मात् त्वं विचारमन्तरेण सिंहासनम् आरुह्य पितुर्वचनं पालयन् तमानन्दय इति । आश्चर्यमेतत् । एवं रामः स्वयम् अनुतिष्ठति, अन्यानपि अनुष्ठापयति । अयं रामस्य विशेषः । कैकेयी वचनादेव रामः वनं प्रस्थितः । न कोपि तं रोद्धुम् समर्थो भवति । यतः पितुः प्रतिज्ञापूरणे सः बद्धादरः । तत्काले तस्य वचनं इदम्–

लक्ष्मीश्चन्द्रादपेयाद्वा हिमवान्वा हिमं त्यजेत् । अतीयात्सागरो वेलां न प्रतिज्ञामहं पितुः ॥ (२.११२.१८)

लक्ष्मीः कदाचित् चन्द्रं मुञ्चेत्, हिमालयोऽपि हिमं मुञ्चेत्, सागरोऽपि तीरम् अतिक्रामेत् किन्तु रामोऽयं न कदापि सत्यात् प्रमुह्यति । इदं रामस्य दृढं वचनम् । अद्यत्वे यद्येवं 'वनं गच्छ' इति पिता पुत्रं वदति तर्हि पितुरेव वनवासो नूनम्, न पुत्रस्य ।

रामः यथा पितृभक्तः तथा मातृभक्तोपि आसीत् । कैकेयी राममेवं अभिस्तौति-

रामे व भरते वाहं विशेषं नोपलक्षये । कौसल्यातोऽतिरिक्तं च मम शुश्रूषते बहु ॥ (२.८.१८)

यदा रामः वनमगात् दशरथस्य अन्तःपुरे वर्तमानाः स्त्रियः शोकभूयिष्ठचेतसः रामस्य गुणान् आचारांश्च स्मरन्त्यः एवमभिदधति - न क्रुध्यत्यभिशस्तोऽपि क्रोधनीयानि वर्जयन् । क्रुद्धान्प्रसादयन्सर्वान्समदुःखः क्व गच्छति ॥

कौसल्यायां महातेजा यथा मातरि वर्तते । तथा यो वर्ततेऽस्मासु महात्मा क्व नु गच्छति॥

कैकेय्या क्लिश्यमानेन राज्ञा सञ्चोदितो वनम् । परित्राता जनस्यास्य जगतः क्व नु गच्छति ॥ (२.४१.३-४)

एवमेव श्रीरामस्य भ्रातृवत्सलापि वनगमनात् पूर्वं सीतां प्रत्युक्तेन वचसा परिज्ञायते। यथा-

भ्रातृपुत्रसमौ चापि द्रष्टव्यौ च विशेषतः। त्वया भरतशत्रुघ्नौ प्राणैः प्रियतरौ मम ॥ (२.२६.३३)

श्रीरामः सर्वेषां भ्रातृणां हितमभिलषन् कर्तव्यपरायणः आसीत्। सः भ्रातृषु वात्सल्यं प्रकटयन् लक्ष्मणं प्रति एवं वदति। यथा-

धर्ममर्थं च कामं च पृथिवीं चापि लक्ष्मण। इच्छामि भवतामर्थे एतत् प्रतिशृणोमि ते ॥

भ्रातृणां संग्रहार्थं च सुखार्थं चापि लक्ष्मण। राज्यमप्यहमिच्छामि सत्येन आयुधमालभे ॥

यद्विना भरतं त्वां च शत्रुघ्नं चापि मानद। भवेन्मम सुखं किञ्चिद्भस्म तत्कुरुतां शिखी ॥ (२.९७.५,६,८)

सहोदरान् विना यत् सुखं तन्मम अनपेक्षितम्। तत्सुखं अग्निः भस्मीकरोतु इति अस्य तात्पर्यम्।

श्रीरामः एकपत्नीव्रती आसीत्। तस्य प्रेमपरायणता नोपमातुं शक्यते। अथापि सः प्रजारञ्जनार्थं तथापवादं निवारयितुं प्राणप्रियां अनिन्द्यचरितां गङ्गेव पावनां अग्निपरिशुद्धां सीतां राज्यान् निष्कास्य तपोवने परित्यक्तवान्। सीतां प्रति रामेण यदुक्तं तत् सत्यमेव, कुन्दमाला इति नाटके वाक्यमिदम् श्रूयते -

त्वं देवी चित्तनिहिता गृहदेवता मे स्वप्नागता शयनमध्य सखी त्वमेव।

दारान्तराहरणनिःस्पृहमानसस्य यागे तव प्रतिकृतिर्मम धर्मपत्नी ॥ (कुन्दमालनाटक १.१४) इति।

वाल्मिकिः एवं उपवर्णयति रामं- आनृशंस्यमनुक्रोशः श्रुतं शीलं दमः शमः। राघवं शोभयन्त्येते षड्गुणाः पुरुषर्षभम् ॥(२.३३.१२)इति।

मार्दवम्, दया, शास्त्रश्रवणम्, सच्चरितम्, इन्द्रियनिग्रहः, मनःसंयमश्चेति एते षट् गुणाः रामे शोभां जनयन्ति। सः रामः सर्वलोकप्रियः, प्रजाहितकारकः सर्वश्रेष्ठः, शासकश्च आसीत्। यथा वाल्मिकिनोक्तं –

न हि तद्भविता राष्ट्रं यत्र रामो न भूपतिः। तद्वनं भविता राष्ट्रं यत्र रामो निवत्स्यति ।। इति।

यत्र रामो नास्ति तद्राष्ट्रं न भवति, यत्र पुनः रामो निवसति तदेव राष्ट्रम् इति वाल्मीकेः आशयः। रामः सुग्रीवस्य मित्रम्, विभीषणस्य आश्रयश्च ।दुर्धर्षेण रावणेन साकं धर्मसम्मतं युद्धकौशलं, स्वाश्रितैः कपिभिःसमं सद्व्यवहारः इत्यादिनागुणजातेन रामो राम एव सम्पद्यते। न तस्य अन्यः कोऽपि सदृश इति मन्ये। श्रीरामचन्द्रे ये सद्गुणाः सन्ति ते सर्वेपि अनुसरणीयाः एव। यथोक्तं वाल्मीकिना

धर्मज्ञः सत्यसंधश्च प्रजानां च हिते रतः। यशस्वी ज्ञानसम्पन्नः शुचिर्वश्यः समाधिमान् ॥

स हि रूपोपपन्नश्च वीर्यवाननसूयकः। स च नित्यं प्रशान्तात्मा मृदुपूर्वंच भाषते।

उच्यमानोपि परुषं नोत्तरं प्रतिपद्यते। कथञ्चित् उपकारेण कृतेनैकेन तुष्यति।

नस्मरत्यपकाराणां शतमप्यात्मवत्तया ॥ शीलवृद्धैर्ज्ञानवृद्धैर्वयोवृद्धैश्च सज्जनैः।

कथयन्नास्त वै नित्यमस्त्रयोग्यान्तरेष्वपि ॥ बुद्धिमान् मधुराभाषी पूर्वभाषी प्रियम्वदः।

वीर्यवान् न च वीर्येण महता स्वेन विस्मितः ॥ न चानृतकथो विद्वान् वृद्धानां प्रतिपूजकः।

अनुरक्तः प्रजाभिश्च प्रजाश्चाप्यनुरज्यते ।। सानुक्रोशो जितक्रोधो ब्राह्मणप्रतिपूजकः।

दीनानुकम्पीधर्मज्ञो नित्यं प्रग्रहवानृषिः।

श्रीरामः धर्मज्ञः, सत्यवक्ता, सर्वदा प्रजानां हिते निरतः, यशोवान्, ज्ञानी, असूयारहितः, शूरः, सदा मृदुभाषी च ।यः कोपि तं कठोरं वदतिमृदुभाषयैव तं प्रतिवक्ति ।यः कोऽपि लघुम् उपकारं करोति चेदपि तमुपकारं भावयन् संतुष्टो भवति। भर्तृहरिणा उक्तम्- परगुणपरमाणून् पर्वतीकृत्य नित्यम्, निजहृदि विकसन्ति सन्तः कियन्तः। शताधिकान् अपकारान् कृतानपि न स तान् स्मरति। यदायदा अवकाशः तदा तदा सच्चरित्र्यैः ज्ञानवृद्धैः वयोवृद्धैः सह सम्भाषयित्वा ज्ञानं प्राप्नोति। सर्वदा मधुरं भाषते। स एव पूर्वं सम्भाषते, प्रियं वदति, धीमान्, महता पराक्रमेण अपि न गर्विष्ठो भवति। ये वृद्धाः वर्तन्ते तान् पूजयति ।न कदापि अलीकं वदति। प्रजारञ्जेन तत्परः। अत एव स प्रजानां प्रीतिपात्रम् श्रीरामस्य लोकप्रियता कीदृशी आसीत् इति अनेन ज्ञायते –

सर्वेषु स हि धर्मात्मा वर्णानां कुरुते दयां। चतुर्णां हि वयस्कानां तेन ते तमनुव्रता ॥

एषः धर्मात्मा ब्राह्मण-क्षत्रिय-वैश्य-शूद्रवर्णेषु विशेषेण वृद्धेषु दयां करोति। अतः सर्वेजनाः तं अनुकुर्वन्तिस्म। एषः नायकस्य आदर्शः गुणः वर्तते। रामयणे ब्राह्मे मुहूर्ते उत्थानम् अत्यन्तं प्रशंसितं वर्तते, यथा -

कच्चिन्निद्रावशं नैषि कच्चित्कालेऽवबुध्यसे । कच्चिचापररात्रेषु चिंतयस्यर्थनैपुणम् ॥

यदिशीघ्रं शयनं कृत्वा शीघ्रं उत्थापनं भवति तर्हि आरोग्यं वर्धते । प्रातः शीघ्रम् उत्थानेन बुद्धिःतीक्ष्णा भवति । उत्साहश्च वर्धते। विचारविनिमयस्य, ध्यानस्य, अध्ययनस्य च अयं कालः प्रशस्तो भवति । अत एव उक्तं वाग्भटेन अष्टांगहृदये- ब्राह्मे मुहूर्ते उत्तिष्ठेत् स्वस्थः रक्षार्थं आयुषः । कार्यालोचनविषये कार्यविषये च रामायणे यदुक्तं तत् सार्वकालिकम्।

कच्चिन्मन्त्रयसे नैकः कच्चिन्न बहुभिः सह । कच्चित्ते मन्त्रितो मन्त्रो राष्ट्रं न परिधावति ।

कच्चिदर्थं विनिश्चित्य लघुमूलं महोदयं ।क्षिप्रमारभसे कर्म न दीर्घयसि राघव ।

कच्चित् सहस्रान् मूर्खाणामेकमिच्छसि पण्डितं । पण्डितोऽह्यर्थकृच्छ्रेषु कुर्यान्निश्रेयसं महत् ।

कच्चिन्मुख्या महत्स्वेव मध्यमेषु च मध्यमाः । जघन्याश्च जघन्येषु भृत्यास्ते तात योजिताः ।

एवं यथा यथा रामायणं पठ्यते तथा तथा साधवो गुणाः तस्मिन् समाविशन्ति । काव्यमार्गेऽपि कान्तासम्मित उपदेशो भवति इत्युच्यते । उपदेशश्च कीदृशः? - रामादिवत् वर्तितव्यम् न रावणादिवत् । तथा रामः सर्वेषां मानसे प्रथित इति शम् ।

**डा. रमेशः टि. एस्.**

सहप्राध्यापकः

पूर्णप्रज्ञमहाविद्यालयः, उडुपि, कर्नाटक

Contact No. : 9901636125

E-mail : uduparameshts@gmail.com

**************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# शक्तिविशिष्टाद्वैतसिद्धान्ते – "गुरोः स्वरूपं महत्त्वं च"

**चन्द्रशेखरय्यः**, शोधच्छात्रः, बेङ्गळूरु, कर्नाटक

**पीठिका :**

शक्तिविशिष्टाद्वैतसिद्धान्ते शिवांशरूपः जीवात्मः गुरोः अनुग्रहद्वारा लिङ्गाङ्गसामरस्यरूपमोक्षं प्राप्नोति । गुरुः, लिङ्गं, जङ्गमः, पादोदकः, प्रसादः, भस्म, रुद्राक्षः, मन्त्रः च इति अष्टावरणानि सन्ति । तेषु गुरोः स्वरूपं महत्वं च अधिकृत्य मया प्रबन्धम् अत्र निरूपितम् । गुरोः स्वरूपं सिद्धान्तशिखामणौ एवं निरूपितम् ।

**गुरोः स्वरूपम्-**

उपैति लोकविख्यातं लोभमोहविवर्जितम् । आत्मतत्त्वविचारज्ञं विमुक्तविषयभ्रमम् ॥
शिवसिद्धान्ततत्त्वज्ञं छिन्नसन्देहविभ्रमम् । सर्वतन्त्रप्रयोगज्ञं धार्मिकं सत्यवादिनम् ॥
कुलक्रमागताचारं कुमार्गाचारवर्जितम् । शिवध्यानपरं शान्तण् शिवतत्त्वविवेकिनम् ॥
भस्मोद्धूलननिष्णातं भस्मतत्त्वविवेकिनम् । त्रिपुण्ड्रधारणोत्कण्ठं धृतरुद्राक्षमालिकम् ॥
लिङ्गधारणसंयुक्तं लिङ्गपूजापरायणम् । लिङ्गाङ्गयोगतत्त्वज्ञं निरूढाद्वैतवासनम् ॥
लिङ्गाङ्गस्थलभेदज्ञं श्रीगुरुं शिववादिनम् । सेवेतपरमाचार्यं शिष्यो भक्तिभयान्वितः ॥
षण्मासान् वत्सरं वापि यावदेष प्रसीदति ॥ (सिद्धान्तशिखामणिः, ६. २-७)

वीरशैवदर्शने अष्टावरणानि (गुरुः, लिङ्गं, जङ्गमः, पादोदकं, प्रसादः, भस्म, रुद्राक्षः, मन्त्रः) सन्ति । तेषु गुरोः स्थानम् अधिकम् आसीत् ।

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः । गुरुःसाक्षात् परब्रह्म तस्मै श्रीगुरवे नमः ॥ इतिश्लोकेन गुरोः महत्त्वं वयं पश्यामः । एतादृशगुरोः स्वरूपं महत्त्वं च सिद्धान्तशिखामणौ उपर्युक्तश्लोकद्वारा निरूपितम् । एतादृशविवरणं स्थूलरूपेण कथ्यते । गुरुः लोकविख्यातः, लोभमोहविवर्जितः, आत्मतत्त्वविवर्जितः, ब्रह्मविषयविमुक्तः, शिवसिद्धान्ततत्त्वज्ञः, सर्वतत्त्वप्रयोगज्ञः, सत्यवादी, आचारगुणयुक्तः, त्रिपुण्ड्रधारणयुक्तः, दुद्राक्षधारणविभूषितः, लिङ्गधारणसंयुक्तः, लिङ्गपूजापरायणः, इत्यादिविशेषगुणसंपन्नः । यतः गुरोः परब्रह्मस्वरूम् इति दार्शनिकैः कथ्यते । एतादृशगुरुणा शिष्यस्य शक्तिपातं समालोक्य दीक्षान्तं योजयेत् ।

**शक्तिपातस्वरूपम्-**

श्रीगुरुः भक्तस्य शक्तिपातं समालोक्य शिवभक्तिसंपन्नस्य तस्य शिवज्ञानसंपत्यर्थं परमसाक्षात्काररूपलिङ्गाङ्गसामरस्यकृते अत्यगत्यां दीक्षां प्रयच्छति । शिवगीतायां शक्तिपातलक्षणम् एवम् उक्तमस्ति ।

लक्षणं शक्तिपातस्य प्रबोधानन्दसम्भवः । स यस्मात् परमा शक्तिः प्रबोधानन्दरूपिणी ॥
आनन्दबोधयोर्लिङ्गमन्तःकरणविक्रिया । यथा स्यात् कम्परोमाञ्चस्वरनेत्राङ्गविक्रिया ॥

(शिवगीता, श्रीकरभाष्यम्, सं, २ पु.सं. ३३ भाष्यकारेण उल्लिखितम्)

प्रमोदानन्देन संभाव्यमानस्फूर्तिरिव शक्तिः, सा एव परमाशक्तिः । सा च प्रभोधानन्दरूपिणी । आनन्दस्य बोधज्ञानप्राप्तेः च अनन्तरं भक्तसय अन्तःकरणे केचन विकाराः संभवन्ति । भक्तेः उद्रेकस्थित्यावस्थायां कम्पः, रोमाञ्चः, नेत्रप्रान्ते आनन्दभाष्पस्फुरणम् इत्यादयः अनुभवाः गोचरी भवन्ति ।

**गुरोः महत्त्वम् –**

गुरुः शिष्यस्य शक्तिपातं समालोक्य तं दीक्षया संयोजयति । एनं गुरुणा दीक्षा दीयते सः दीक्षागुरुः इति कथ्यते इति इमं अभिप्रायं

सिद्धान्तशिखामणौ एवं निरूपयति ।

दीयते परमं ज्ञानं क्षीयते पाशबन्धनम् । यथा दीक्षेति सा तस्या गुरुदीक्षा गुरुः स्मृतः ॥

गुणातीतं गुवर्णं च रूपातीतं रुवर्णकम् । गुणातीतमरूपं च यो दद्यात् स गुरुः स्मृतः ॥ (सिद्धान्तशिखामणिः, १५. ७,८)

यस्याः सकाशात् श्रेष्ठशिवज्ञानं संपद्यते यस्याः सकाशात् च मलमायादि पाशबन्धः विनश्यते सा दीक्षेति व्यपदिश्यते । तादृश चित्कलारूपदीक्षां यः प्रददाति सः दीक्षागुरुः इति व्यपदिश्यते । गुरुः इत्यस्मिन् पदे गुकारः प्राकृतगुणराहित्यं बोधयति । रुकारकः प्राकृतरूपराहित्यं बोधयति ।

गुकारश्चान्धकारस्तु रुकारस्तन्निरोधकृत् । अन्धकारनिरोधत्वात् गुरुरित्यभिधीयते ॥ (सिद्धान्तशिखामणिः, पु.सं. २५०)

एतादृशप्रकृतगुणरूपातीतस्य परशिवब्रह्मणः स्वरूपानुग्रहसामर्थ्यवान् गुरुः इति अभिधीयते । दीक्षास्वरूपं सिद्धान्तशिखामणौ एवं निरूपितम् ।

दीयते च शिवज्ञानं क्षीयते पाशबन्धनम् । यस्मादतः समाख्याता दीक्षेतीयं विचक्षणैः ॥

सा दीक्षा त्रिविधा प्रोक्ता शिवागमविशारदैः । वेधरूपा क्रियारूपा मन्त्ररूपा च तापस ॥

गुरोरालोकमात्रेण हस्तमस्तकयोगतः । यः शिवत्वसमावेशो वेधादीक्षेति सा मता ॥

मन्त्रदीक्षेति सा प्रोक्ता मन्त्रमात्रोपदेशिनी । कुण्डमण्डलिकोपेता क्रियादीक्षा क्रियोत्तरा ॥ (सिद्धान्तशिखामणिः, ६, ११-१४)

पाशबन्धनं दहित्वा शिवज्ञानाप्रदायिक एव दीक्षा । सा च वेधादीक्षा, मनुदीक्षा, क्रियादीक्षा इति त्रिविधा । श्रीगुरुः स्वकृपादृष्टिद्वारा शिष्यस्य मस्तकोपरि स्वकरकमलं विनिक्षिप्य तस्य हृदयस्थां चित्कलां यस्मात् प्रतिभासयति, तस्मात् सा दीक्षा वेधादीक्षा इति व्यपदिश्यते । एतया शिष्यस्य आणवमलं निर्मूलितो भवति । अनन्तरं वर्णः पदं, भुवनं, मन्त्रः कला, तत्त्वं च इति क्रमात् षडध्वशोधनद्वारा लिङ्गाङ्गे शुद्धीकृत्य स्वयोगदृष्ट्या शिष्यस्य हृदयकमलस्थां प्राणलिङ्गकलां आकृष्य, विद्युक्तं सुसंकृते लिङ्गे आपूर्य तस्य धारणं कृत्वा पञ्चाक्षरीमहामन्त्रस्य यः उपदेशः क्रियते सा मन्त्रदीक्षा इति व्यपदिश्यते । इयं दीक्षा, मायामलं नाशयति, दीक्षाङ्गत्वेन कुण्डमण्डलकलशस्थापनादिद्वारा क्रियमाणदीक्षा क्रियादीक्षा इति व्यपदिश्यते । एतादृशी दीक्षाद्वारा शिष्यस्य अज्ञानं नाशयति । तस्यावृतशिवज्ञानद्वारा तस्य संसारबन्धं नाशयति । पाशविमुक्तः जीवात्मा शिवज्ञानी भवति । तस्य ज्ञानबलात् शिवेन साकं सामरस्यं प्राप्नोति । एतदेव शक्तिविशिष्टाद्वैतसिद्धान्ते लिङ्गाङ्गसामरस्यरूपमोक्षः इति कथ्यते ।

## उपसंहारः- वीरशैवस्य वैशिष्ट्यम्-

श्रीमोग्गेयमायिदेवैः अनुभवसूत्रे लिङ्गस्थलाङ्गस्थलयोः स्वरूपमित्थं वर्णितम् । यथा-

स्थीयते लीयते यत्र जगदेतच्चराचरम् । तद् ब्रह्मस्थलमित्याहुः स्थलतत्त्वविशारदाः ॥

स्वशक्तिक्षोभमात्रेण स्थलं तद्विविधं भवेत् । एकं लिङ्गस्थलं प्रोक्तमन्यदङ्गस्थलं स्मृतम् ॥

लीयते गम्यते यत्र येन सर्वं चराचरम् । तदेदल्लिङ्गमित्युक्तं लिङ्गतत्त्वपरायणैः ॥

अनाद्यनन्तमजं लिङ्गतत्परं परमं प्रति । यद् गच्छति महाभक्त्या तदङ्गमिति निश्चितम् ॥

अं भवेत् परमं ब्रह्म तद्गतं तत्परायणम् । अङ्गस्थलमिति प्राहुरङ्गतत्त्वविशारदाः ॥ (अनुभवसूत्रम्, २.१, १.१, ३.२, ४.२,३)

तद्ब्रह्मनामकं स्थलं चराचरात्मकं जगत् यत् स्थितं सत् उत्पत्तिं प्राप्य पुनश्च यत्र लीनं भवति तत् स्थलम् इति कथ्यते ।

लिङ्गस्थलम् अङ्गस्थलम् च इति स्थलं द्विविधं भवति । अङ्गस्थलम् उपासकः, लिङ्गस्थलम् उपास्यम् । चराचरात्मकं जगत् यत्र लीनं भूत्वा, पुनः यत्र आविर्भवति तदेव लिङ्गस्थलम् । अं परमं ब्रह्म तदेव अङ्गस्थलम् । यदा लिङ्गाङ्गयोः प्रथमं भक्तिदशायां भेदः मोक्षदशायाम् अभेदः । अस्मिन् सिद्धान्ते शिवशक्त्योः शिवजीवयोः भेदाभेदः । स्वस्मिन् अविनाभावरूपेण वर्तमानायाः शक्तेः क्षोभयकारणेन जगतः

सृष्टिः भवति । अं – इति परब्रह्म, गं – इति तद्गतं तत्प्रति तत्परायणं भवति वा इति अङ्गम्, तदेवाङ्गस्थलम् ।

लिङ्गपदवाच्यस्य शिवस्य अङ्गपदवाच्यस्य जीवस्यापि सामरस्यप्राप्तेः पूर्वं भेदः सामरस्यरूपमोक्षप्राप्त्यनन्तरम् अभेदः इत्यतः दर्शनमिदं भेदाभेदात्मकम् । अन्तिमे जले जलमिव न्यायेन लिङ्गाङ्गसामरस्यरूपमोक्षः शक्तिविशिष्टाद्वैतसिद्धान्तस्य रहस्यम् । एतादृशी मुक्तिः गुरोःअनुग्रहकारणात् जीवात्मानां प्राप्नोति । इति शिवम् ॥

## परामर्शग्रन्थाः

१. अनुभवसूत्रम्- श्रीमायिदेवविरचितं विमर्शात्मकपरिष्करणम्, वि. डा. हेच्. पि. मल्लेदेवरु, प्राच्यविद्यासंशोधनालयः, मैसूरु-१९८३

२. लिङ्गधारणचन्द्रिका- श्रीनन्दिकेश्वरशिवाचार्यविरचितं शिवकुमारव्याख्या सहितं, काशी-१९०५

३. श्रीकरभाष्यम्- श्रीपतिपण्डिताचार्यविरचितः, संपुटः, ०१-०२, प्राच्यविद्यासंशोधनालयः, मैसूरु-१९७७, १९७८

४. सिद्धान्तशिखामणिः- श्रीशिवयोगिशिवाचार्यविरचिता श्रीकाशीनाथशास्त्रीकृता भावप्रकाशव्याख्या, पञ्चाचार्य प्रेस्, मैसूरु-१९८२

५. क्रियासारः- श्रीनीलकण्ठशिवाचार्यविरचितः, भागत्रयोपेतः, प्राच्यविद्यासंशोधनालयः, मैसूरु

**चन्द्रशेखरय्यः**

विद्यावारिधी (पि.हेच् डि.) छात्रः

कर्नाटकसंस्कृतविश्वविद्यालयः

चामराजपेटे-५६००१८

बेङ्गळूरु, कर्नाटक

चरदूरवाणी- **9008190647**

E-mail : chandrashekaryyahiremath@gmail.com

***********

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# रूपगोस्वामिनः कालकृतिनिरूपणं नाटकचन्द्रिकारचनाकालविमर्शनञ्च

**सनातन-दासः**, पश्चिमबङ्गः

## १. रूपगोस्वामिनः कालकृतिनिरूपणम्

### १.१. आविर्भावकालः

गौडीयवैष्णवपरम्परासु ये तावत् गोस्वामिसम्प्रदायिनः दार्शनिकाः प्रसिद्धाः आसन् तेष्वन्यतमः खलु रूपगोस्वामी। प्रामाण्यतथ्याभावात् रूपगोस्वामिनः आविर्भावतिथिः यथार्थरूपेण निर्णेतुं न शक्यते। तथापि गौणतथ्यादिभिः कल्पितकालनिरूपणं क्रियतेऽत्र। श्रीचैतन्यदेवः सन्न्यासग्रहणस्य पञ्चमवर्षादनन्तरं १५१४-१५ ईशवीयाब्दे रामकेलिग्रामं समागतवान्। तदा रूप-सनातनौ गौडाधिपतेः हुसेनशाहस्य मन्त्रिणावस्ताम्। श्रीचैतन्यदेवस्य वयस्तदा अष्टाविंशतिः नवविंशतिर्वेति। आचार्येण सतीशचन्द्रमित्रमहोदयेनोक्तं यत् १४६५ ईशवीयाब्दे सनातनः १४७० ईशवीयाब्दे रूपश्च अजायेताम्।[1]अतः चैतन्यदेवस्य रामकेलिग्रामागमनसमये रूपस्य वयः पञ्चचत्वारिंशदित्यनुमीयते। वयसि अस्मिन् राजमन्त्रित्वं यथार्थमेव। पुनः १५४१ ईशवीयाब्दात् प्राग्रचितस्तवमालायामुक्तं श्रीरूपेण-

“पलितंकरणीदशा प्रभो मुहुरन्धंकरणी च मां गता। शुभगंकरणी कृपा शुभैर्नतवाढ्यंकरणी च मय्यभूत्॥” [गोविन्दविरुदावली २२]
अनेन ज्ञायते यत् यदा स्तवमाला विरचिता तदा रूपगोस्वामी वयोवृद्धो जातः इति। स्तवमालायाः रचनाकालः १५४० ईशवीयाब्दः इति स्वीक्रियते चेत्तदा रूपगोस्वामिनः वयः उपसप्ततिरिति स्यात्। वयसि अस्मिन्पक्वकेशत्वं दृष्टिहीनत्वञ्च स्वाभाविकमेव। अतः रूपगोस्वामिनः जन्मः १४७० ईशवीयाब्दः इत्यनुमीयते।

### १.२. तिरोभावकालः

डॉ दीनेशचन्द्रसेनमहोदयेन भणितं यत् १५९१ ईशवीयाब्दे रूपगोस्वामिनः प्रयाणमभवत्।[2]जगद्बन्धुभद्रेण गौरपदतरङ्गिन्यामुक्तं १४८० शकाब्दे (१५५८ ईशवीयाब्दे) रूपस्य प्रयाणमभूत्। डॉ सुकुमारसेनमहोदयः १५५९ ईशवीयाब्दे[3], राधागोविन्दनाथमहोदयः १५९१-९२ ईशवीयाब्दे[4]तथा गिरिजाशंकररायचौधुरीमहोदयः १५६३ ईशवीयाब्दे[5] रूपगोस्वामिनः मृत्युरभवदित्युक्तवान्। बाबूलालशुक्लमहोदयेनोक्तं यत् १५५३ ईशवीयाब्दस्य मध्ये रूपगोस्वामी जीवितः आसीदिति। यद्वा भवतु षोडशशतकस्य मध्यभागपर्यन्तं रूपगोस्वामी जीवितः आसीदिति तु निर्विवादमेव।

### १.३. साहित्यकृतिः

चैतन्यदेवप्रवर्तितां प्रेमभावनां शास्त्रीयरूपप्रदातृषु श्रीरूपः अग्रणीः आसीत्। केवलं प्रचारेण धर्मस्य स्थितिर्न सुदृढा भवति। अनन्तकालं यावत् धर्मरक्षणाय धर्मप्रसाराय च ग्रन्थरचनां व्यतिरिच्य नास्ति किमप्युपायान्तरम्। तस्माद्वैष्णवसम्प्रदायस्य नवसिद्धान्तस्थापनाय रूपगोस्वामिना नैके ग्रन्था विरचिताः। तद्रचितानां ग्रन्थानां पूर्णाङ्गविवरणं भ्रातुष्पुत्रेण जीवगोस्वामिना लघुवैष्णवतोषण्यामुक्तम्। लघुतोषणीविवरणानुसारेण उत्कलिकावल्लरी, गोविन्दविरुदावली प्रेमेन्दुसागरश्चैते ग्रन्थाः स्तवमालान्तर्गताः, न तु पृथक्भूताः इति। तत्रोक्तं पृथक् पुस्तकं छन्दोऽष्टकमित्यपि स्तवमालान्तर्गतम्। अतः रूपगोस्वामिरचितानां ग्रन्थानां संख्या प्रायः षोडशेति। ताश्च ग्रन्थाः- १. हंसदूतम् २. उद्धवसन्देशः ३. कृष्णजन्मतिथिविधिः ४. बृहद्गणोद्देशदीपिका ५. लघुगणोद्देशदीपिका ६. स्तवमाला ७. विदग्धमाधवम् ८. ललितमाधवम् ९. नाटकचन्द्रिका १०. दानकेलिकौमुदी ११. भक्तिरसामृतसिन्धुः १२. उज्ज्वलनीलमणिः १३. मथुरामहिमा १४. पद्यावली १५. श्रीभागवतामृतम् १६. आख्यातचन्द्रिका इति।

## २. नाटकचन्द्रिकायाः रचनाकालविमर्शनम्

गौडीयवैष्णवालङ्कारशास्त्रेषु नाट्यतत्त्वमूलको ग्रन्थः खलु नाटकचन्द्रिका। रूपगोस्वामिप्रणीतेषु उपविंशतिग्रन्थेषु अन्यतमेयं नाटकचन्द्रिका नामापूर्वा रचना। ग्रन्थस्यास्य रचनाकालविषये किमपि सुनिर्दिष्टं तथ्यं न प्राप्तम्। ग्रन्थस्य पुष्पिकादावपि न लभ्यते तादृशं किमपि तथ्यम्। अपि च विषयेऽस्मिन्विद्यते एव विदुषां विप्रतिपत्तिः। न केवलं नाटकचन्द्रिकायाम्, रूपविरचितेषु चन्द्रिकेतरग्रन्थेष्वपि

चन्द्रिकायाः रचनाकालो न सूचितः। तथापि ग्रन्थानामन्येषां रचनासमयविमर्शनेन परोक्षतथ्यविश्लेषणेन च नाटकचन्द्रिकायाः रचनाकालो निर्णेतुं शक्यते। चैतन्यमहाप्रभोः स्तुत्याधारेणापि विनिर्णीतोऽस्य ग्रन्थस्य रचनासमयः। विविधेषु ग्रन्थेष्वपलभ्यमानान् श्रीचैतन्यदेवस्तुतिवन्दनादीननुसृत्य नाटकचन्द्रिकायाः रचनाकालोऽत्र यथाशक्ति निरूप्यते।

श्रीचैतन्यदेवस्य जन्मो नवद्वीपग्रामे १४८६ ईशवीये वर्षे फेब्रुयारीमासस्य अष्टादशदिनाङ्के अभूत्। तथा च १५३४ ईशवीयाब्दे जुनमासस्य चतुर्दशदिनाङ्के महानुभवोऽयं दिवं गतः। अतः पञ्चदश-षोडश ईशवीयाब्दः तदीयः कालः इति। यदा स वैष्णवमतप्रचाराय रूप-सनातनाभ्यां सह मिलितस्तदा षोडशशतकस्य प्रारम्भकालः इति निश्चप्रचम्। रूपगोस्वामिरचितेषु ग्रन्थेषु कतिपयाः श्रीचैतन्यदेवमेलनात्प्राग्विरचिताः। पुनश्च कतिपयाः श्रीचैतन्यदेवसाक्षादनन्तरमेव रचिताः। ये खलु ग्रन्थाः श्रीचैतन्यदेवस्तुत्यादिरहिताः त एव पूर्वरचिताः। यत्र च श्रीचैतन्यदेवस्य वन्दनादयः विद्यन्ते ते श्रीचैतन्यदेवसाक्षादुत्तरवर्तिनः इति। तद्विरचिते हंसदूते उद्धवसन्देशे च श्रीचैतन्यदेवस्य स्तुतिः नोपलभ्यते। येनानुमीयते यत् श्रीचैतन्यदेवाद्वैष्णवदीक्षाग्रहणात्पूर्वमेव अनयोः रचना जाता इति।

भक्तिरसामृतसिन्धुरिति पुस्तके पद्यावल्याः उल्लेखः अस्ति। अनेनानुमीयते यत् पद्यावली भक्तिरसामृतसिन्धोः पूर्ववर्तिनीति। पद्यावल्यां कुत्रापि श्रीचैतन्यदेवस्य स्तुतिवन्दनादिर्न विद्यते। तस्मात् पद्यावल्याः रचना श्रीचैतन्यदेवमेलनात्पूर्वमेवाभवत्। दानकेलिकौमुद्यामपि श्रीचैतन्यचरितवन्दनादयः नोपलभ्यन्ते। अतः इयमपि चैतन्यसाक्षात्पूर्ववर्तिनी। अस्याः भाणिकायाः दानकेलीकौमुद्याः पुष्पिकायां तद्रचनाकालः सूचितः। ग्रन्थस्यास्य रचना १४१७ शकाब्दे (१४९५ ईशवीये वर्षे) जाता। ग्रन्थोऽयं मित्रमुद्दिश्य विरचितः रूपगोस्वामिना।[6]अनेनेदमनुमीयते यत् श्रीचैतन्यदेवेन सह मेलनात्प्रागेव रूपगोस्वामिना पद्यावलीदानकेलिकौमुद्यादयो ग्रन्था विरचिताः। अपि श्रीचैतन्यदेवमेलनानन्तरं तेन भक्तिरसं शास्त्रीयरूपप्रदातुं नाटकानि नाट्यतत्त्वपुस्तकानि च विरचितानि। तेषु नाटकचन्द्रिका खलु नाट्यलक्षणग्रन्थः। ग्रन्थेऽस्मिन् श्रीचैतन्यदेवस्योल्लेखः तद्वन्दनादयश्च किमपि नास्ति। एतद्दृष्ट्वा श्रीबाबूलालशुक्लमहोदयेन नाटकचन्द्रिका रूपगोस्वामिनः प्रारम्भिकरचना श्रीचैतन्यदेवेन सह मेलनात्प्राग्रचिता वेति भणितम्।[7]परन्तु विषयोऽयं तादृशो नास्ति। नाटकचन्द्रिका इति ग्रन्थः श्रीचैतन्यदेवेन सह मेलनात्परमेव रूपगोस्वामिना विरचितः। तत्र हेतवः यथा-

**<u>प्रथमः</u>-** रासविहारीसांख्यतीर्थ्येनानूदीतायाः नाटकचन्द्रिकायाः प्रथमबङ्गीयसंस्करणस्य पुष्पिकायां श्रीरूपगोस्वाम्यात्मानं श्रीचैतन्यदेवप्रियपार्षदाग्रगण्यरूपेणोद्घोषितम्। सांख्यतीर्थप्राप्तमातृकायाः रचनाकालः १८४२ ईशवीयाब्दः। मातृकायाः पुष्पिकायां श्रीचैतन्यदेवप्रियपार्षदरूपेण रूपगोस्वामी अभिहितः। अतः नाटकचन्द्रिकारचनाकाले श्रीचैतन्यदेवेन सह मेलनं जातं तस्येत्यवगम्यते। तत्रोच्यते- "इति गौडीयवैष्णवसम्प्रदायाचार्य्यवर्य्यकवितापरिमलवासितसज्जनमानसकाननश्रीभगवच्चैतन्यदेवप्रियपार्षदाग्रदण्यपूजनीय श्रीलरूपगोस्वामिपादप्रणीता[8]नाटकचन्द्रिका सम्पूर्णा" इति।

**<u>द्वितीयः</u>-** नाटकचन्द्रिकायां रूपगोस्वामिविरचितस्य ललितमाधवस्य तथा विदग्धमाधवस्य बहुनि वचनान्युदाहरणरूपेण उद्धृतानि। अनयोः द्वयोः ग्रन्थयोः प्रस्तावनायां ग्रन्थकारेण श्रीचैतन्यदेवस्य वन्दना कृता। अतः द्वयोः ग्रन्थयोः रचना निश्चयेन श्रीचैतन्यदेवाद्दीक्षाग्रहणानन्तरमेव सञ्जाता। ललितमाधवस्य पुष्पिकायां तस्य रचनाकालः १४५९ शकाब्दः[9](१५३५ ईशवीयाब्दः) इति वर्णितः। विदग्धमाधवस्यापि पुष्पिकायां तद्रचनासमयः १५८९ विक्रमसम्बत्सरः[10] (१४५४ शकाब्दः, १५३२ ईशवीयाब्दश्च) इत्युल्लिखितः। नाट्याङ्गानामुदाहरणरूपेण द्वयोः ग्रन्थयोः वचनोद्धरणं सूचयति यदेतयोः रचनानन्तरमेव नाटकचन्द्रिका विरचितेति। अतः नाटकचन्द्रिकारचनायाः प्रागेव श्रीचैतन्यदेवाद्वैष्णवधर्मो गृहीतः रूपगोस्वामिना।

**<u>तृतीयः</u>-** भक्तिरसामृतसिन्धुः तथा उज्ज्वलनीलमणिरिति ग्रन्थद्वयं साहित्यशास्त्रमूलकम्। एतयोः ग्रन्थयोः गुणालङ्काररसादीनि साहित्यतत्त्वानि समुपवर्णितानि। नाटकचन्द्रिका अपि साहित्यशास्त्रविषयो ग्रन्थः। परन्तु नास्ति तत्र एतयोरपरसाहित्यशास्त्रयोः किञ्चिद्वर्णनम्। अनेनानुमीयते यत् एतयोः भक्तिरसामृतसिन्धुरुज्ज्वलनीलमणिरिति ग्रन्थयोः रचनायाः पूर्वमेव नाटकचन्द्रिका विरचिता। भक्तिरसामृतसिन्धोः रचना १४६३ शकाब्दे[11]तथा १५४१ ईशवीयाब्दे सञ्जाता। ग्रन्थेऽस्मिन् श्रीचैतन्यदेवस्तुतिर्विद्यते।[12]

परन्तु नास्ति तत्र एतयोरपरसाहित्यशास्त्रयोः किञ्चिद्वर्णनम्। अनेनानुमीयते यत् एतयोः भक्तिरसामृतसिन्धुरुज्ज्वलनीलमणिरिति ग्रन्थयोः रचनायाः पूर्वमेव नाटकचन्द्रिका विरचिता। भक्तिरसामृतसिन्धोः रचना १४६३ शकाब्दे[11]तथा १५४१ ईशवीयाब्दे सञ्जाता। ग्रन्थेऽस्मिन् श्रीचैतन्यदेवस्तुतिर्विद्यते।[12] उज्ज्वलनीलमणिश्च भक्तिरसामृतसिन्धोः पूरकग्रन्थः। तस्मादुज्ज्वलनीलमणेः रचना निश्चयेन भक्तिरसामृतसिन्धोरनन्तरमेव जाता। अतः भक्तिरसामृतसिन्धोः प्रागेव रुपेण नाटकचन्द्रिका विरचिता।

सिद्धान्तोऽयमुपनीतोऽनेन विचारेण यत्, ललितमाधवस्य (१५३५ ईशवीयाब्दः) रचनानन्तरम् तथा भक्तिरसामृतसिन्धोः (१५४१ ईशवीयाब्दः) रचनापूर्वमेव अर्थात् १५३७-३९ ईशवीयाब्दे वैष्णवकविना श्रीलरूपगोस्वामिप्रभुपादेन नाटकचन्द्रिका विरचिता। पण्डितप्रवरेण माणवेन्दुवन्द्योपाध्यायेनापि नाटकचन्द्रिकायाः रचनाकालः १५३९-४० ईशवीयाब्दः इति निरूपितः।

श्रीचैतन्यदेवाद्दीक्षानन्तरं तथा वैष्णवग्रहणानन्तरं रुपगोस्वामिना नाटकचन्द्रिका विरचिता, तथापि ग्रन्थस्यास्य मङ्गलाचरणे श्रीचैतन्यदेववन्दनादिः कथं नास्तीति शङ्का न करणीया। यतः इष्टदेववन्दना तु ग्रन्थकर्तुः इच्छानुसारेण भवति। तत्र श्रीचैतन्यदेवस्य वन्दना एव कर्तव्यासीदिति नास्ति कश्चन नियमः। कविना तु नाट्यशास्त्रस्य प्रथमाचार्यस्य भरतमुनेः नामस्मरणेन तं प्रति भक्तिभावनाभिव्यञ्जिता। अतः नाट्याचार्यस्य भरतमुनेः नामग्रहणमेव तत्र मङ्गलाचरणमिष्टवन्दना वेति निगदितुं शक्यते। इति शम्।

**अन्तटिप्पणी-**

1. यशोहर खुलनार इतिहास। [पृ° ४४९]
2. The Vaishnava Literature of Mediaeval Bengal. [पृ° ३९]
3. वांला साहित्येर इतिहास, प्रथमः खण्डः, तृतीयसंस्करणम्। [पृ° २८६]
4. चैतन्यचरितामृतेर भूमिका। तृतीयसंस्करणम्। [पृ° २५]
5. चैतन्यदेव ओ ताँहार पार्षदगण। [पृ° १३३]
6. ग्रथिता सुमनः सुखदा यस्य निदेशेन भणिका स्त्रगियम्। तस्य मम प्रियसुहृदः कण्ठतटीं क्षणमलंकुरुताम्॥
गते मनुशते शाके चन्द्रस्वरसमन्विते। नन्दीश्वरे निवसता भाणिकेयं विनिर्मिता॥ [दानकेलिकौमुदी, पुष्पिका]
7. नाटकचन्द्रिका भी इनकी आरम्भिक रचना थी जिसको पुनः संशोधित तथा परिवर्द्धित किया गया होगा।
[नाटकचन्द्रिका, भूमिका, पृ° २२]
8. उक्ता, कृता, प्रणीता इत्यादयस्तु शब्दा ग्रन्थकारं निर्दिशति। तथा लिखिता, साक्षरिता इत्यादयः लिपिकारं सूचयति।
9. नन्देषुवेदेन्दुमिते शकाब्दे शुक्रस्य मासस्य तिथौ चतुर्थ्याम्। दिने दिनेशस्य हरिं प्रणम्य समापयं भद्रवने प्रवन्धम्॥ [ललितमा, पुष्पिका]
10. नन्दसिन्धुरबाणेन्दुसंख्ये संवत्सरे गते। विदग्धमाधवं नाम नाटकं गोकुले कृतम्॥ [विदग्धमाधवम्, पुष्पिका]
11. रामाङ्गशक्रगणिते शाके गोकुलमधिष्ठितेन। श्रीभक्तिरसामृतसिन्धुर्विटङ्कितः क्षुद्ररूपेण॥ [भक्तिरसामृतसिन्धुः, पुष्पिका]
12. हृदि यस्य प्रेरणया प्रवर्तितोऽहं वराकरूपोऽपि। तस्य हरेः पदकमलं वन्दे चैतन्यदेवस्य॥ [भक्तिरसामृतसिन्धुः १/१/२]

## सहायकग्रन्थपञ्जी


1. रूपगोस्वामी। (१९६४)। *नाटकचन्द्रिका*। शास्त्री,बाबूलालशुक्लः(सम्पा.)। वाराणसी-१ : चौखम्बा संस्कृत सीरीज आफिस।
1. रूपगोस्वामी। (२००६)। *नाटकचन्द्रिका* (रासविहारीसांख्यतीर्थेनानूदिता)। वन्द्योपाध्यायः, माणवेन्दुः(सम्पा.)। कलकाता-६ : सदेश।
2. रूपगोस्वामी। (१८९७)। *ललितमाधवम्*। वसु, सत्येन्द्रनाथः(अनु.)। कलिकाता : वसुमती साहित्यमन्दिर।
3. रूपगोस्वामी। (१९७०)। *विदग्धमाधवम्*। झा, रमाकान्तः(सम्पा.)। वाराणसी-१ : चौखम्बा संस्कृत सीरीज आफिस।
4. रूपगोस्वामी। (१९७४)। *दानकेलिकौमुदी* (टी. भीमाचार्यकृताङ्गलानुवादसमेता)। शास्त्री, सुरेन्द्रनाथः(सम्पा.)। इन्दोर(मध्यप्रदेशः) : भारती रिसर्च इन्स्टिट्युट।

5. रूपगोस्वामी। (१९८९)। *श्रीभक्तिरसामृतसिन्धुः* (जीवगोस्वामिकृतया टीकया समेतः)। देवगोस्वामी, श्रीधरः (सम्पा.)। कलिकाता-५५: श्रीचैतन्यसारस्वतकृष्णानुशीलनसङ्घः।

6. रूपगोस्वामी। (१८८५)। *स्तवमाला* (जीवगोस्वामिकृतटीकासमेता)। विद्यारत्नः, रामनारायणः (सम्पा.)। मुर्शिदावाद : वहरमपुर राधारमण यन्त्र।

7. नरहरिचक्रवर्ती। (१९१२)। *भक्तिरत्नाकर*। मिश्रः, रामदेवः (सम्पा.)। मुर्शिदावाद : श्रीजानकीनाथसाहा प्रिन्टार।

8. मित्रः, श्रीसतीशचन्द्रः। (१९१४)। *यशोहर-खुलनार इतिहास* (प्रथमः खण्डः)। कलिकाता : चक्रवर्ती चाटार्जी एन्ड कों।

9. Sen, Dineshchandra. (1917). *The Vaisnava Literature of Mediaeval Bengal*. Calcutta : University of Calcutta.

**Sanatan Das**

Assistant Professor & HOD of Sanskrit

Bhatter College, Dantan- 721426

Paschim Medinipur, West Bengal

Phone- 8910208399 ; Whatsapp- 9547163741

E-mail- dassanatan147@gmail.com

***********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# श्रृङ्गारप्रकाशदिशा तत्पुरुषसमासे अवयवसंख्याविचारः

राहुलमाइतिः, हावडा, पश्चिमबंगाल

समासघटकावयवानां प्रकृत्यनुरोधाद् "सुपां सुपा तिङन्तेन...." इत्यनया कारिकया समासस्य षड्विभागाः दर्शिताः श्रृङ्गारप्रकाशकृद्भिः स्वीये श्रृङ्गारप्रकाशे। यदिसुबन्ताभ्यामित्यादिषु प्रयुज्यमानं द्विवचनं द्वित्वसंख्याभिप्रायेणतर्हि ह्यधिकैः पदैः समासो न स्यात्। एतदेव पर्यालोच्य अवादीत् ग्रन्थकृत् भोजराजः - "उपलक्षणं चेह सुबन्ताभ्यीमित्यादिषु द्विवचनम् इति। तेन यथा द्वाभ्यां तथा त्रिभिर्बहुभिश्च समासो भवति"। अर्थात् सुबन्ताभ्यां, तिङन्ताभ्यां, सुब्तिङन्ताभ्यामित्यादिषु यत् द्विवचनेन निर्देशः विहितः तत्र सर्वत्रैव द्विवचनमुपलक्षणमात्रं वर्तते। उपलक्ष्यते स्वं स्वेतरच्चानेन इति व्युत्पत्त्या करणे ल्युड्प्रत्यये कृते उपलक्षणमिति पदं निष्पन्नं ततश्च द्विवचनेन स्वस्य द्वयोः, स्वेतरानां ह्यधिकानां च ग्रहणं सिध्यति। तेन द्वाभ्यां त्रिभिः बहुभिश्च पदैः समासो भविष्यति। अत समासयोग्यपदसंख्यामाश्रित्य अव्ययीभावादयः समासाः त्रिधा विभज्यन्ते-

१) **अव्ययीभावः कर्मधारयश्च द्वाभ्याम्।**

२) **षष्ठीलक्षणः कालपरिमाणलक्षणश्च तत्पुरुषो द्वाभ्यां त्रिभिश्च।**

३) **बहुव्रीहिद्वन्द्वौ द्वाभ्यां त्रिभिर्बहुभिश्च।**

अवयवगतसंख्यामाश्रित्य अत्र समासानां त्रैविध्यं प्रत्यपादि ग्रन्थकृद्भिः। अत्र शोधपत्रस्य विषयत्वेन तावत् द्वितीयः प्रभेदो आलोचयिष्यते - षष्ठीलक्षणः कालपरिमाणलक्षणश्च तत्पुरुषो द्वाभ्यां त्रिभिश्च इति। अर्थात् षष्ठीलक्षणः तत्पुरुषः कालपरिमाणलक्षणश्च तत्पुरुषः द्वाभ्यां वा त्रिभिरेव वा भवति। एवकारः अत्र निश्चयार्थे, तेन कथञ्चिदपि बहुभिर्न इत्यपि गम्यते। अस्योदाहरणं प्राह ग्रन्थकृत् राजगवीक्षीरम्, राजगोक्षीरम्, द्व्यहजातः, द्व्यह्नजातः इति। एकैकमुदाहरणं व्याख्यायते अत्र।

यदा राज्ञः या गौः, सा राजगवी, तस्याः क्षीरमिति विग्रहः क्रियते तदा अयं द्वाभ्यां पदाभ्यां तत्पुरुषः इत्यस्योदाहरणम्। यदा तु राज्ञः गोः क्षीरमिति विग्रहः क्रियते तदा त्रिभिः पदैः तत्पुरुषसमासो विज्ञायते। अत्रैव पूर्वपक्षीणामाशयः, ननु नहि अत्र त्रिभिरपि पदैः समासः अपि तु द्वाभ्यामेव, पृथग्समासविधानात्। न हि युगपत् त्रिषु पदेषु समासो भवति। द्वाभ्यां पदाभ्यां समासे कृते ततः समस्तपदेन इतरपदस्य समासो विज्ञेयः। अतः त्रिपदतत्पुरुषो न भवति इति यावत्। परन्तु अत्र ग्रन्थकृता भाष्यमतमालोच्य स्वमतम् अस्तूयत। तदेव भाष्यमिह संक्षेपेण आलोच्यते- राज्ञः या गौः इति अलौकिकविग्रहे राजन् ङस् गो सु इति स्थिते षष्ठी (पा.सू.-२/२/८) इति सूत्रेण समासे, समासत्वात् प्रातिपदिकत्वे, सुपो धातुप्रातिपदिकयोः (पा.सू.-२/४/७१) इति सुब्लुकि राजन् गो इति जाते नलोपः प्रातिपदिकान्तस्य (पा.सू.-८/२/७) इति नलोपे राजगो इति जाते गोरतद्धितलुकि (पा.सू.-५/४/९२) इति समासान्तटच्प्रत्यये राजगो टच् इति जाते टचः अनुबन्धलोपे राजगो अ इति स्थिते एचोऽयवायावः (पा.सू.-६/१/७८) इति अवादेशे राजगव् अ इति जाते राजगव इति जाते स्त्रीत्वविवक्षायां टचः टित्वात् टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः (पा.सू.-४/१/१५) इति ङीपि, राजगव ई इति जाते यस्येति च (पा.सू.-६/४/१४८) इति अकारे लोपे, राजगव् ई इति जाते सर्ववर्णमेलने राजगवी इति रूपं सिध्यति। राजगव्याः क्षीरमिति विग्रहे षष्ठी इति सूत्रेण राजगवीक्षीरम् इति सिध्यति।

**पूर्वपक्षीणामाक्षेपः**

अत्र हि पूर्वपक्षीणामयमाक्षेपः गोः क्षीरम् इति विग्रहे षष्ठी(पा.सू.-२/२/८) इति सूत्रेण समासे कृते गोक्षीरम् इति सिध्यति, तस्य च समस्तपदस्य पुनः राज्ञः इति षष्ठ्यन्तेन समासे राजगोक्षीरम् इति समस्तं पदं सिध्यति। तत्र च राज्ञः इत्यत्र हि एका षष्ठी, गोः इत्यत्र चापरा षष्ठी वर्तते, इत्यतः द्विषष्ठीदर्शनात् द्विसमासप्रसङ्गः, तथा सति राज्ञः या गौः तस्याः क्षीरमित्यस्मिन्नर्थे राजगोक्षीरमित्यत्रापि समासः प्राप्नोति। परन्तु इष्यते च भिन्नेषु अर्थेषु भिन्नं भिन्नं समस्तं पदम्।

**आक्षेपाशयः-**

वस्तुतः न ह्यत्र द्वयोः समासयोः प्रसङ्गः इति द्विसमासप्रसङ्गः इति पूर्वपक्ष्याशयः, अपि तु अत्र द्विप्रकारस्य समासस्य प्रसङ्गः विवक्षितः।

प्रथमः– राज्ञः या गौः, तस्याः क्षीरम् इति। द्वितीयः गोः क्षीरम्, गोक्षीरम्, तच्च राजसम्बन्धि इति। अत्र एकस्मिन्नेव अर्थे कदाचित् राजगवीक्षीरम् कदाचित् राजगोक्षीरमिति प्राप्नोति, परन्तु तन्नेष्टं वर्तते। वस्तुतः यदा, गोः क्षीरम्, गोक्षीरम्, राज्ञः गोक्षीरं तदा राजगोक्षीरमिति भवितव्यम्, राज्ञः गोः क्षीरमित्यत्र च न भवितव्यं तथापि प्राप्नोति इति हि दोषः। अर्थात् गोः क्षीरम्, गोक्षीरम्, यदा राज्ञः गोक्षीरमिति विग्रहः, तदा राजगोक्षीरमिति समस्तं पदं सिध्यति, तच्च साधुरपि। परन्तु राज्ञः गोः क्षीरमिति त्रिपदाभ्यां विग्रहे क्रियमाणे यत् राजगवीक्षीरम् इति भवति तत् न सिध्यति इति हि दोषः। इष्यते च अत्रापि समासः। तदर्थं भाष्यकृद्भिः यत्यते।

**भाष्योक्तं समाधानम् –**

सिध्यति अर्थभेदात् राजगवीक्षिरमित्यपि। यथा पूर्वं गोः क्षीरमित्यत्र क्षीरं प्रति गोः प्राधान्यं वर्तते। गोः एव क्षीरं न महिष्या-देरिति, तदा गवा सह क्षीरेण समासे गोक्षीरमिति, तच्च राजसम्बन्धि इति विगृह्य राज्ञः गोक्षीरमिति राजगोक्षीरमिति सिध्यति। एवं हि राजगोक्षीरमित्युक्ते राज्ञः अप्राधान्यात् यतः कुतश्चित् आगतं गोक्षीरमात्रं प्रतीयते।

एवं यदा राज्ञः अपि प्राधान्यम् अङ्गीक्रियते तदा राज्ञः या गौः राजगवी, तस्याः क्षीरमिति विग्रहे तदा राजगवीक्षीरमिति समस्तं पदं सिध्यति। तदा पुनः राज्ञः प्राधान्यात् राजसम्बन्धिगोः दुग्धमिति मात्रं प्रतीयते।

गौः इति पदमिह क्वचित् राजनमपेक्षते क्वचित् क्षीरमपेक्षते तेन तद्पदं सापेक्षवाची वर्तते। गोक्षीरयोःपदयोः गौः अप्रधानं वर्तते। क्षीरञ्च प्रधानम्। गोराज्ञोः पदयोश्च गोः प्राधान्यं राजपदस्य चाप्राधान्यम्। अतः कथमत्र गोपदं राज्ञा सह क्षीरेण सह वा समासयितुं शक्यते, यतो हि शाब्दिकसिद्धान्तस्तावत् -"सापेक्षम् असमर्थवत् भवति"। सह सुपा इति सूत्रानुरोधेन सामर्थ्यं विना समासाभावात् असमर्थपदेन समासोऽपि न स्यात्। अतः उक्तं प्रदीपकृता कैयटेन समर्थसूत्रव्याख्यायां "सत्यपि गोः उभाभ्यां सम्बन्धे सापेक्षमसमर्थं भवतीति असामर्थात् गोः क्षीरेण समासो न भवति, राज्ञा तु भवति राजापेक्षया गोः प्राधान्यात्"।[1] अर्थात् गोः प्रधानत्वात् असामर्थ्यत्वेऽपि राज्ञा सह समासे राजगवी इति भवति, ततश्च तस्याः दुग्धमिति विवक्षायां राजगवीक्षीरमिति सुतरां सिध्यति। इदमेव समाधानं भोजप्रवरैः शृङ्गारप्रकाशे प्रादर्शि- "न गौः प्रधानत्वात् तथा राजानमपेक्षते यथा उपसर्जनत्वेन गां राजा, क्षीरमपि अविचालितस्वार्थत्वात् अनौत्सुक्येन न तथा गामपेक्षते यथा उद्धुतसम्बन्धव्यतिरेकत्वादौत्सुक्येन गौः क्षीरम्"[2] । अर्थात् गौः प्रधानत्वात् तथा राजानं न अपेक्षते यथा उपसर्जनत्वात् राजा गाम् अपेक्षते। क्षीरमपि स्वार्थम् अत्यजत् अनौत्सुक्येन न तथा गाम् अपेक्षते यथा उद्धुतसम्बन्धव्यातिरेकत्वात् औत्सुक्येन गौः क्षीरमपेक्षते। वस्तुतः राजा एव गाम् अपेक्षते, येन गोः एव प्राधान्यमवसीयते। एवमेव गौः एव क्षीरमपेक्षते न तु क्षीरं गामपेक्षते, तेन गोराज्ञोः गोः प्राधान्यं, गोक्षीरयोश्च क्षीरस्यैव प्राधान्यवमसीयते। एवञ्च राज्ञः गोः क्षीरम् इत्यत्र राजनमपेक्ष्य गोः प्राधान्यात् तस्य सापेक्षत्वेऽपि भवति समासः। यतो हि प्रधानस्य सापेक्षत्वे अपि समासः दृश्यते शास्त्रे। उक्तञ्च भाष्यकृद्भिः समर्थसूत्रभाष्ये – "भवति च प्रधानस्य सापेक्षस्यापि समासः"[3] । भोजराजः अपि तथैव अवोचत् – "एवं चानुकुल्ये गमकत्वात् प्रधानसापेक्षत्वे सति समासो भवत्येव"[4] । एवमेव गोपदेन राज्ञः समासे राजगवी इति जाते ततः क्षीरशब्दस्य समासे राजगवीक्षीरमिति सिध्यत्येव। इत्थमेव देवदत्तस्य गुरोः कुलम् इति विग्रहे सापेक्षत्वे अपि देवदत्तपदेन समासः भवति तेन च देवदत्तगुरुकुलमिति सिध्यति। राजपुरुषभार्या इत्यादिष्वपि तथा। अर्थात् राज्ञ गोः क्षीरम् इत्यत्र त्रिभिः पदैः समासः भवति इति तु भाष्यकारैरपि अङ्गीकृतम्, अन्यथा प्रधानस्य सापेक्षस्यापि समासः इति वचनम् अनर्थकं स्यात्।अतः भाष्यप्रामाण्येन त्रिपद-तत्पुरुषस्योदाहरणं सुष्ठु प्रतिपादितं ग्रन्थकृता इति यावत्।

द्वितीयमुदाहरणमाह- द्व्यहजातः द्व्यह्नजातः इति। षष्ठीलक्षणत्रिपदतत्पुरुषस्योदाहरणं व्याख्याय कालपरिमाणलक्षणत्रिपदघटिततत्पुरुष-स्योदाहरणमाह द्व्यहजातः, द्व्यह्नजातश्चेति। तदुच्यते ग्रन्थकृद्भिः – एवं द्वे अहनी समाहृते द्व्यहः।

द्व्यहो जातस्येति यदा समासः तदा द्वाभ्याम्, यदा तु द्वे अहनी जातस्य द्व्यहजातः (पा.सू.-द्व्यहजातः[5]) इति तदा त्रिभिः।

द्वे अहनी समाहृते इति लौकिकविग्रहे द्वि औ अहन् औ इति लौकिकविग्रहे तद्धितार्थोत्तरपदसमाहारे (पा.सू.-२/१/५१) च इति सूत्रेण समासे, प्रक्रियायां सुब्लुकि द्व्यह इति जाते तस्य तद्धितार्थसूत्रस्य तत्पुरुषाधिकारे पाठात् राजाहस्सखिभ्यष्टच् इति टचि द्व्यह टच् इति स्थिते अह्नोऽह्न एतेभ्यः (पा.सू.-५/४/८८) इति सूत्रेण अहन्नित्यस्य अह्नादेशे प्राप्ते समास्तपदस्य संख्यादित्वात् न संख्यादेः समाहारे (पा.सू.-५/४/८९) इति सूत्रेण तन्निषेधे यस्येति च (पा.सू.-६/४/१४८) इति टचि परे अल्लोपे, वर्णसम्मेलनेन द्व्यह इति जाते सुबुत्पत्तौ द्व्यहः इति रूपं सिध्यति। ततश्च द्व्यहः जातस्य इति लौकिकविग्रहे, द्व्यह सु जात ङस् इति अलौकिकविग्रहे कालाः परिमाणिना (पा.सू.-२/२/५) इति शास्त्रेण द्व्यहस्य कालवाचकशब्दस्य परिच्छेद्यवाचकेन जातशब्देन समासे सुब्लुकि द्व्यहजातः इति समासः सिध्यति। अत्र द्वाभ्यामेव पदाभ्यां समासः इति कालपरिमाणलक्षणतत्पुरुषः द्वभ्यामवयवाभ्यामिति सिध्यति।

तद्धितार्थोत्तरपदसमाहारे च इति सूत्रे वार्तिककृता "उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम्" वार्तिकमिदं पठितम्। अस्यार्थः – उत्तरपदे परतः दिक्संख्ययोः सुबन्तेन द्विगुसमासो भवति। ततश्च द्वे अहनी जातस्य यस्येति विग्रहे त्रयाणां समासे सति जातशब्दोत्तरपदे पूर्वयोः सुबन्तयोः द्विगुसमासो भवति। स च समासः कालाः परिमाणिना इति सूत्रेण न सिध्यति, यतो हि कालाः परिमाणिना सूत्रे सह सूपा इति अनुवर्तते, तस्मिन् च सूत्रे एकवचनस्य विवक्षितत्वात्। अतः उत्तरपदेन परिमाणिना परिच्छेद्यवाचिना परनिमित्तभूतेन हेतुना द्विगोः सिद्धये तत्पुरुषस्योपसंख्यानं कर्तव्यमेव। अर्थात् उत्तरपदभूतपरनिमित्तकद्विगोः सिद्धये त्रिपदतत्पुरुषो स्वीकर्तव्य एव इति। इदमेव वार्तिकं ज्ञापयति यत् सह सुपा इति सूत्रे एकवचनं विवक्षितमिति। अन्यथा सूत्रे लिङ्गवचनस्य अविवक्षितत्वात् सिध्यत्येव त्रिपदतत्पुरुषः। अतः वार्तिकारम्भसामर्थ्यात् सह सुपा सूत्रे एकवचनस्य विवक्षितत्वं ज्ञापितं भवति। एवञ्च द्वे अहनी जातस्य इति विग्रहे त्रयाणां समासे सुब्लुकि द्व्यहन् जात् इति जातशब्दे उत्तरपदे परे द्वि अहन् इत्यनयोः तद्धितार्थोत्तरपदसमाहारे च इति द्विगुसमासे राजाहस्सखिभ्यष्टच् इति टचि अह्नोऽह्न एतेभ्यः इति अह्नादेशे द्व्यह्नजात इति रूपं सिध्यति। यद्यत्र पूर्वयोः सुबन्तयोः द्विगुतत्पुरुषत्वं न स्यात्तर्हि राजहस्सखिभ्यष्टच् इति टच् न स्यात्, अह्नोऽह्न एतेभ्यः इति अह्नादेशोऽपि न स्यात्। ननु पूर्वं द्विपदघटिततपुरुषेऽपि अह्नादेशो कुतो न विहितः इति चेत् – न संख्यादेः समाहाहे (पा.सू.-५/४/८९) इति सूत्रेण निषेधादिति।

**विमर्शः-**

एतावता व्याख्यानेन अस्माभिः ज्ञातं यत् सह सुपा (पा.सू.-२/१/४) इति अधिकारसूत्रानुरोधेन यद्यपि द्वाभ्यामेव पदाभ्यां तत्पुरुषसमासो विहितः तथापि तद्धितार्थोत्तरपदसमाहारे च (पा.सू.-२/१/५१) इति सूत्रे "उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम्" इति वार्तिकानुरोधेन भवत्येव त्रिपदघटिततत्पुरुषसमासः। ननु "सूत्रे लिङ्गवचनमतन्त्रमिति"[6] परिभाषया ज्ञायते यत् सूत्रे निर्दिष्टानां पदानां लिङ्गं वचनं च विवक्षितं न भवतीति, तदाधारीकृत्यैव भानोः अपत्यं स्त्री इति विग्रहे अपि तस्यापत्यम् (पा.सू.-४/१/९२) इति शास्त्रेण अणि कृते भानवी इति सिध्यति। अथवा भानोः अपत्यानि पुम्सः इति विग्रहे अपि अणि भानवः इति रूपं सिध्यति, यदि सूत्रेषु लिङ्गं वा वचनं वा विवक्षितं स्यात्तदा तु अपत्यमित्यत्र नपुंसकलिङ्गैकवचनयोश्च विवक्षित्वात् स्त्रीयां पुंस्त्वे बहुत्वे वा सूत्राप्रवृत्तौ इष्टं न सिध्यति। तद्वत् प्रकृते सह सुपा (पा.सू.-२/१/४) सूत्रे सुपा इत्यत्र कृतमेकवचनं न विवक्षितमिति मन्यामहे येन सिध्यत्येव त्रिपदघटिततत्पुरुषसमासः इति चेन्न। सह सुपा (पा.सू.-२/१/४) इत्यत्र एकवचनस्य विवक्षितत्वे एव "उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूना तत्पुरुषस्योपसंख्यानम्" इति वार्तिकं सङ्गच्छते, अन्यथा तस्य वैयर्थ्यापत्तिः। ननु तच्च लाघवमिति चेन्न। सह सुपा इति मात्रानुवृत्तौ द्वे अहनी जातस्य इति विग्रहे कालाः परिमाणिना(पा.सू.-२/२/५) इत्यनेन समासो भवति चेत् पूर्वयोः सुबन्तयोः समाहारे कृते द्व्यह इति जाते तस्य च जातपदेन समासे कृते द्व्यहजातः इत्येव सिध्यति, इष्यते च द्व्यह्नजातः इत्यपि। तच्च न सिध्यति न संख्यादेः समाहारे (पा.सू.-५/४/८९) इत्यनेन समाहारे अह्नादेशनिषेधात्।

अतः द्व्यह्नजातः इत्यादीनां सिध्यर्थं वार्तिकं पठनीयमेव। यदि वार्तिकं पठ्यते तर्हि तु एतदपि मन्तव्यं यत् सह सुपा सूत्रे एकवचनं विवक्षितमिति। अन्यथा पुनः तत् व्यर्थं स्यात्। स्पष्टञ्चैतत् कालाः परिमणिना इति सूत्रे बालमनोरमातत्त्वबोधन्यादिषु।

**पादटिप्पणी**

1. महाभाष्यस्थस्य समर्थः पदविधिः सूत्रस्य प्रदीपाख्ये व्याख्याने। पृ.३३९।
2. शृङ्गारप्रकाशः, भोजराजः, प्रथमो भागः, प्रथमप्रकाशः, पृ. 47, रेवाप्रसाद द्विवेदी।
3. महाभाष्यम्, द्वितीयभागः, समर्थः पदविधिः (2/1/1), पृ - 339
4. शृङ्गारप्रकाशः, भोजराजः, प्रथमो भागः, प्रथमप्रकाशः, पृ. 47, रेवाप्रसाद द्विवेदी।
5. वस्तुतः अत्र द्व्यहजातः इति लिखितमस्ति ग्रन्थे स च प्रमादः, परन्तु त्रिपदतत्पुरुषे द्व्यह्नजातः इत्येव रूपं सिध्यति।
6. परिभाषेन्दुशेखरः। परिभाषासंख्या – ७४।

**परिशीलितग्रन्थसूची**


1. भोजदेवः। १९३७। सरस्वतीकण्ठाभरणम्। चिन्तामणिः, टि, आर् (सम्पा.)। माद्रासः, माद्रास विश्वविद्यालयः।
2. भोजदेवः। १८९८। सरस्वतीकण्ठाभरणम्। भट्टाचार्यः, जीवनान्दविद्यासागरः (सम्पा.)। कलिकाता, नारायणयन्त्रालयः।
3. भोजराजः। २००७। सरस्वतीकण्ठाभरणम्। द्विवेदी रेवाप्रसादो, सदाशिवकुरमारः द्विवेदी। नई दिल्ली, इन्दिरागाँधीराष्ट्रीयकलाकेन्द्रम्।
4. काशिका (न्यास-पदमञ्जरी-भावबोधिनीसहिता) (द्वितीयो भागः); वामनजयादित्यौ; जयशङ्करलाल-त्रिपाठी, सुधाकर-मालबीयः (सम्पादकौ); वारणसी – तारा प्रिटिंग वर्क्स; १९८६ (प्रथमं संस्करणम्)।
5. वाक्यपदीयम् (पदकाण्डम्) (हेलाराजकृतम् प्रकाशाव्याख्यासहितम्, रघुनाथशर्माविरचितम् अम्बाकर्त्रीव्याख्यासहितञ्च); भर्तृहरिः; भगीरथप्रसादत्रिपाठी (सम्पादकः); वाराणसी – सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः; १९९१।
6. वैयाकरणसिद्धान्तकौमुदी (बालमनोरमा-तत्त्वबोधिनीसहिता)(द्वितीयः भागः); भट्टोजिदीक्षितः; गिरिधरशर्मा – चतुर्वेदः, परमेश्वरानन्दशर्मा विद्याभास्करः (सम्पादकौ); देहली – मोतिलालबनारसीदास; १९९५।
7. व्याकरणमहाभाष्यम् (उपाध्यायकैयटप्रणीतभाष्यप्रदीपस्तद्व्याख्यानभूतनागेशभट्टविरिचितभाष्य-प्रदीपोद्योतसहितम्) (प्रथमः खण्डः); पतञ्जलिः; भार्गवशास्त्रीजोशीशास्त्राचार्यः (सम्पादकः); सत्यभामावाई – पाण्डुरङ्गः (प्रकाशकः); मुम्बाई – निर्णयसागरमुद्रणालयः; १९४२ (प्रथमं संस्करणम्)।
8. व्याकरणमहाभाष्यम् (उपाध्यायकैयटप्रणीतभाष्यप्रदीपस्तद्व्याख्यानभूतनागेशभट्टविरिचितभाष्य-प्रदीपोद्योतसहितम्) (द्वितीयः खण्डः); पतञ्जलिः; भार्गवशास्त्रीजोशीशास्त्राचार्यः (सम्पादकः); सत्यभामावाई – पाण्डुरङ्गः (प्रकाशकः); मुम्बाई – निर्णयसागरमुद्रणालयः; १९४२ (प्रथमं संस्करणम्)।



**Rahul Maity,**
Research Scholar
Department of Sanskrit and Philosophy,
Guide: Dr. Neeraj Kumar Bhargave
Ramakrishna Mission Vivekananda Educational and Research Institute,
Belur Math, Howrah, 711202, West Bengal.
Mobile no : 7074847827,
Email Id : rahulmaitycr7@gmail.com


*************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# आरण्यकेषु प्राणविद्या - एका समीक्षा

**Dr. Kamal Prasad Gautam,** Assam


## शोधसारः

वैदिकी संस्कृतिर्विश्वेऽस्मिन् यज्ञसंस्कृतिशब्देनाभिहितो वर्तते । सम्पूर्णेषु वैदिकवाङ्मयेषु यज्ञानां स्थानमुच्चतमं विद्यते । यज्ञानाम् विभिन्नानानि व्याख्यानानि, मन्त्राणां विनियोगादीनां व्यापकीभूताश्चर्चाः ब्राह्मणेषु प्राप्यन्ते । यज्ञानां व्याख्यानोपक्रमे क्वचित् क्वचित् तेषु ब्राह्मणग्रन्थेषु आध्यात्मिकतत्वानां निदर्शनम् भवति । तस्यैवाङ्कुरस्य पल्लवितं पुष्पितं रूपमस्ति आरण्यकम् । एतेषु आरण्यकेषु आध्यात्मिकविषयाणां प्राणविद्यानाञ्च सुविस्तृतं व्याख्यानं विद्यते । यद्यपि आरण्यकग्रन्थेषु यद्यपि सर्वेषामेवाध्यात्मिकतत्त्वानां, रहस्यानां आत्मविद्यानाञ्च वर्णनम् प्राचुर्येण प्राप्यते । तथापि एतेषामारण्यकग्रन्थानां मुख्यः प्रतिपाद्यः " प्राणविद्या " वर्तते । सामान्यतया प्राणतत्त्वं लौकिके पारलौकिके चोभयत्र विशेषत्वं भजते । भारतीयाः मुनयो योगिनश्च प्राणतत्त्वमाधारीकृत्य पर्याप्तं चिन्तनम् कृतवन्तो विद्यन्ते । प्राणतत्त्वः योगविद्यायाः कश्चन एको महत्त्वभूतः अङ्गविशेषो वर्तते । यदि कश्चन साधकः प्राणं सम्यक् नियन्त्रयति चेत् सः साधकः आध्यात्मिकोन्नतेश्चरमशिखरं प्राप्तुं शक्नोति । तदुक्तम् अथर्ववेदे प्राणस्य प्रशंसायाम्

**प्राणाय नमो यस्य सर्वमिदं वशे । यो भूतः सर्वस्येश्वरो यस्मिन् सर्वं प्रतिष्ठितम् ॥**

ऐतरेयारण्यके प्राणस्य स्वरूपं विविच्य निगदितम् विद्यते यदयं प्राणः सर्वेषामिन्द्रियाणां रक्षकः सन् कदापि न नष्टीयते । पृथग्भ्यो मार्गेभ्यः अर्थात् स्नायुतन्त्रैर्वपुंसि आवागमनं करोति । आध्यात्मिकदृष्ट्या यदि वयं पश्यामश्चेदयमेव प्राणः वायुरूपेण गात्रे विद्यमानो भवति , एवमधिदैवतरूपे अयमेव आदित्यः वर्तन्ते । उक्तञ्च -

**अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् । सद्ध्रीचिः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वनन्तः ॥ इति**

यथा अयमादित्यः सर्वेषां जगति वर्तमानानां स्थिरजङ्गमानां प्राणीनां कृते उपास्यः, तद्वदेव प्राणोऽपि सर्वेषां कृते परमोपास्यः, यतो हि प्राणः एव सर्वं भूर्भुवं स्वं धारयति । आरण्यकानुसारं प्राणस्य अन्तरिक्षेण वायुना च सह पितृवत् सम्बन्धो विद्यते, एतौ द्वावेव प्राणेन सृष्टौ वर्तेते, यथा सत्कर्मणा पुत्रः पितरं सेवते , तथैवान्तरिक्षः वायुश्च प्राणस्य सेवायां सदैव सन्नद्धौ भवतः ।


## विश्लेषणम्

वैदिकवाङ्मयानुसारमारण्यकग्रन्थो ब्राह्मणोपनिषदोः परस्परसम्बन्धाय किञ्चन सोपानम् इव अस्ति । संहितायाः अन्तिमभागाः ब्राह्मणशब्देन निगद्यन्ते । एतेषु यज्ञानां दार्शनिकाध्यात्मिकयोर्यदङ्कुरणं जातम् , तस्यैवाङ्कुरस्य पल्लवितं रूपमस्ति आरण्यकम् । एतेषु आरण्यकग्रन्थेषु आध्यात्मिकविषयाणां प्राणविद्यानाञ्च सुविस्तृतं व्याख्यानं विद्यते । एतेषामेवारण्यकग्रन्थानां सुपल्लवितम् पुष्पितम् च रूपमस्त्युपनिषद्ग्रन्थः । वेदानां यावत्यः शाखाः शास्त्रेषु विनिर्दिष्टाः वर्तन्ते , ताः सर्वाः शाखाः न प्राप्यन्ते , परन्तु यावत्योऽपि शाखाः समुपलभ्यन्ते , तेषां ग्रन्थानामवगाहनेन तत्तच्छाखगतानां बहूनामारण्यकग्रन्थानां परिचयः प्राप्यते ।

## आरण्यकशब्दार्थविचारः –

" अरण्ये भवम् आरण्यकम् " इत्यस्मिन् विग्रहे अरण्यशब्दात् " **तत्र भवः** "[1] इत्यनेन पाणिनीयेन सूत्रेण भवार्थे ठक् प्रत्यये कृते आरण्यकशब्दो निष्पन्नो भवति । अनेन आरण्यकशब्देन अरण्ये जातम् अध्ययनम्, मननम्, चिन्तनम् , शास्त्रीया चर्चा , आध्यात्मिकविवेचनञ्च गृह्यते । आचार्यसायणः आरण्यकशब्दं विकीर्यन् कथयति -

**अरण्याध्ययनादेतदारण्यकमितीर्यते । अरण्ये तदधीयीतेत्यैवं वाक्यं प्रवक्ष्यते ॥** [2]

एतेषु आरण्यकग्रन्थेषु अध्यात्मविद्या , तत्त्वचिन्तनम् , रहस्यात्मकविषयाणां वर्णनम् प्राप्यते । आरण्यकानि रहस्यशब्देनापि निगदितानि वर्तन्ते , उक्तञ्च - " **सर्वे वेदाः सरहस्याः सब्राह्मणाः सोपनिषत्काः** "[3] । निरुक्तग्रन्थस्य टीकाकाराः दुर्गाचार्याः अपि ब्रुवते - " **ऐतरेयकरहस्यब्राह्मणे** " इति । आरण्यकग्रन्थेषु यज्ञानां गूढरहस्यम् ब्रह्मविद्यायाश्च विस्तृतेन वर्णनम् अस्ति, अत एव एते रहस्य इति

शब्देनाऽपि निगदिताः वर्तन्ते । वैदिकतत्वमीमांसायामारण्यकग्रन्थाः सवैशिष्ट्येन स्वीकृताः वर्तन्ते । एतेषामेव ग्रन्थानां महत्त्वम् प्रतिपादयन् ब्रूते महाभारतस्य आदिपर्वणि महर्षिकृष्णद्वैपायनः

**नवनीतं यथा दध्नो मलयाच्चन्दनं यथा । आरण्यकञ्च वेदेभ्यः औषधिभ्योऽमृतं यथा ॥** [4]

अर्थाद् यथा दधितः नवनीतम् , मलयात् चन्दनम् , औषधिभ्योऽमृतञ्च प्राप्यते, तथैव वेदेभ्यः साररूपेण आरण्यकानि प्राप्तानि । वने निवसताम् निमग्नानां धार्मिककृत्येषु वानप्रस्थवासीनाङ्कृते एतेषां ग्रन्थानां प्रणयनं जातमेतत्प्रतीयते । ब्रह्मचर्यव्रती एव एतेषां ग्रन्थानामध्ययनस्याधिकारी भवति, उक्तञ्च - " **एतदारण्यकं सर्वं नाव्रती श्रोतुमर्हति** "[5] । एतदेव कथनं विस्तीर्य निगदति तैत्तिरीयारण्यकग्रन्थः यद् वनैः सह ग्रामेष्वपि पावनान्तःकरणेन युक्तो भूत्वा एतेषां ग्रन्थानामध्ययनं कर्तुं शक्यते स्म । उक्तञ्च –

**ग्रामे मनसा स्वाध्यायमधीयीत दिवा नक्तम् उतारण्यऽबल उत वाचोत तिष्ठन्नुत ब्रजन्नुतासीन्न उत शयानोऽधीयीतैव स्वाध्यायान्मा** [6]

आरण्यकग्रन्थानामध्ययनं सर्वासामेवावस्थायां कर्तुं शक्यते, उक्तञ्च तैत्तिरीयारण्यके " **य एवं विद्वान् महारात्र उषस्युदिते ब्रजंस्तिष्ठन्नासीनः शयानोऽरण्ये ग्रामे वा यावत्तरसं स्वाध्यायमधीते सर्वांल्लोकाञ्जयति सर्वांल्लोकाननृणोऽनुसञ्चरति** " [7] ।

आरण्यकग्रन्थेषु यद्यपि सर्वेषामेवाध्यात्मिकतत्त्वानां, रहस्यानां, आत्मविद्यानाञ्च वर्णनम् प्राप्यते तथापि एतेषां मुख्यः प्रतिपाद्यः " **प्राणविद्या** " वर्तते । एते ग्रन्थाः प्राणविद्यायाः स्वरुपनिर्वचनार्थं ऋग्वेदं आश्रयत्वेन गृह्णन्ति , अर्थात् स्वकीयसिद्धान्तसिद्ध्यै ऋग्वेदस्य उद्धरणानि प्रददन्ति । उक्तञ्च ऐतरेयारण्यके –

**सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धः एवं सर्वाणि भूतानि आपिपीलिकेभ्यः प्राणेन बृहत्याविष्टब्धानीत्येवं विद्यात्** [8]

अर्थात् प्राणः अस्य विश्वस्य धारको वर्तते, यथा प्राणशक्त्या अयमाकाशः स्वस्थाने स्थितः, तथैव तिमिङ्गिलतः आपिपीलिकापर्यन्तं समस्ताः जीवाः अनेन प्राणेनैव विधृताः सन्ति । यदि प्राणो न स्यात् तर्ह्ययमाश्चर्यवद्दृश्यमानं जगदपि न स्यादिति । अतः प्राणः सर्वत्र व्याप्तो वर्तते । उक्तञ्च - " **सर्वे ह्नीदं प्राणेनावृतम्** "[9] इति । अथर्ववेदे सम्यग्रूपेण प्राणस्य विवेचना समुपलभ्यते , तत्रत्ये प्रथमश्लोके भावपूर्णरीत्या प्राणः 'जगद्व्यापी, नमस्यः , उपास्यः, इत्यादिभिर्विशेषणैर्विशिष्टो वर्तते । यतो हि प्राणतः एवेदं सर्वं जगत् प्रकाशितं भवति एवं तथा च प्राणः एव अस्याः सृष्टेः आधारत्वेन परिगण्यते । उक्तञ्च -

**" प्राणाय नमो यस्य सर्वमिदं वशे । यो भूतः सर्वेश्वरो यस्मिन् हि सर्वं प्रतिष्ठितम् ॥** [10]

अन्यच्च अथर्ववेदः प्राणम् 'जीवनदः' इति शब्देन सम्बोधयति । प्राणः वायुरूपेण आकाशे व्याप्तः सन् कालत्रयं व्याप्नोति । उक्तञ्च -

**" प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते । प्राणो ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम्** [11] **॥** इति ।

मधुसूदनः ओझा महोदयः स्वकीये ' संशयहेतुतदुच्छेदवाद' नाम्नि ग्रन्थे इदम् प्राणसम्बन्धिनं विषयं अधिकं स्पष्टयन् कथयति " सृष्टेः उपादानकारणभूतः प्राणश्चतुर्विधो भवति , उक्तञ्च –

**प्राणोऽयमग्रेऽभवन् समन्तात्यथा सरस्वान्तथाप्तिपूर्णः । स्वभावभेदेन चतुर्विधोऽसौ चत्वार एकत्र समाहिताः स्युः** [12] **॥**

एतन्मतानुसारं प्राणः चतुर्धा विभज्यते । तत्र

प्रथमम् - **परोरजा**-तादृशस्य प्राणस्य नामास्ति, येन सृष्ट्यां विद्यमानाः सर्वेऽपि पदार्थास्स्व-स्वस्थाने नियतरूपेण स्थिताः भवन्ति ।

द्वितीम् - **आग्नेयः** - अयम् प्राणः पदार्थान् सृष्ट्यां स्थितान् विकलयति ।

तृतीयम् - - **सौम्यः** - सौम्यनामकः प्राणः पदार्थेषु घनत्वोत्पादको भवति वा पदार्थान् सङ्कोचयति ।

चतुर्थम् - **आप्यः** - अयम् प्राणः पदार्थानां रुपान्तरणं करोति इति ।

ओझा महोदयेन अन्यान्यपि प्राणस्य दशलक्षणानि निगदितानि वर्तन्ते । तानीत्थम्भूतानि - तत्र

**प्रथमः** प्राणः - ' कुर्वुदुप ' इति संज्ञया अभिहितोऽस्ति, अर्थात् प्राणः प्रतिक्षणं क्रियाशीलो भवति इत्यर्थः । अतः जगति स्थिताः सर्वाः प्राणशीलाः प्राणस्यैव स्वरूपत्वेन परिगण्यन्ते ।

**द्वितीयः** पञ्चमहाभूतस्य लक्षणानि रूपरसगन्धस्पर्शशब्दरूपाणि प्राणतो नोत्पद्यन्ते ।

**तृतीयः**प्राणाः कद - कापि भूतानामाश्रयेण विना स्थातुं नैव शक्नुवन्ति । स्वकीये स्वभावे वाग्रूपेण स्थितः सन् प्राणः ' विधरण ' धर्मेण प्रतिक्षणम् घनायते । एतस्मादेव कारणात् प्राणः ' अर्थवान् ' इति शब्देन प्रोच्यते ।

**चतुर्थः** प्राणे - ' आसञ्जन ' इति नामकः कश्चन धर्मविशेषस्तिष्ठति, अत एव प्राणः ' विधरण ' इति शब्देन कथ्यते ।

**पञ्चमः**प्राणः विसारितो भवति - , अर्थात् अल्पदेशे स्थितः सन्नपि अधिकदेशं व्याप्नोति ।

**षष्ठः** प्राणः मनसः इच्छानुसारं कार्यं करोति - , निद्रावस्थायां प्राणस्य व्यापारः मनसः प्रेरणया प्रचलति ।

**सप्तमः**प्राणः कदाचिदपि न शेते - , अत एव एषः " असुप्तिः " इति शब्देन कथ्यते ।

**अष्टमः** प्राणः कदापि न विश्रमते -। प्राणे या क्लान्तिरनुभूयते, सा क्लान्तिः प्राणस्य न , अपितु मनसो वर्तते ।

**नवमः** प्राणः एकस्माद् वस्तुनः अन्येषु वस्तुषु गच्छति - संक्रमणम् - , अतः एषः संक्रमणेति नाम्ना निगद्यते ।

**दशमः** चलतः स्थिरीभवनम् - प्राणापानम् - , पुनश्चलनमपि प्राणस्य लक्षणम् विद्यते ।

ऐतरेयारण्यके प्राणतत्वस्य विशद्विवेचनं प्राप्यते । तत्र दीर्घतमा ऋषिः प्राणमुल्लिख्य कथयति " सर्वानिन्द्रियान् रक्षयति, सनातनोऽस्ति, पृथग्भिर्मार्गैः , अर्थात् स्नायुतन्त्रैर्यः सदा आवागमनं करोति, अध्यात्मनि रूपेऽयमेव प्राणः वस्तुतः शरीरे वायुरूपेण विद्यमानो भवति । बहिरयमेव प्राणोऽधिदैवतरूपेण स्थितः आदित्यो वर्तते । उक्तञ्च –

**" अपश्यगोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् । स दध्रीचीः स विषूचीर्वसान आ वरीवर्ति भुवनेष्वनन्तः** [13] **॥ "**

अर्थाद् यथा आदित्यः सर्वेषां कृते उपास्यः , तद्वदेव प्राणोऽपि उपास्यो वर्तते । यतो हि प्राणः विश्वं धारयन् अन्तरिक्षं वायुञ्च सर्जयति, उक्तञ्च - **" प्राणेन सृष्टान्तरिक्षं वा अनुचरत्यन्तरिक्षमनु श्रृण्वन्ति वायुरस्मै पुण्यं गन्धमावहत्येवमेतौ प्राणं पितरं परिचरन्तोऽन्तरिक्षं चं वायुश्च, यावदन्वन्रिक्षं यावदनु वायुस्तानवानस्य लोको भवति नास्य तावल्लोको जीर्यते , यावदेतयोर्न जीर्यतेऽन्तरिक्षस्य च वायोश्च य एवमेतौ प्राणस्य विभूतिं वेद इति "** [14] । समस्ताः ऋचयः, समस्ताः वेदध्वनयोऽपि प्राणे सन्निहिताः वर्तन्ते । उक्तञ्च - **" ता वा एताः ऋचः सर्वे वेदाः सर्वे घोषाः एकैव व्याहृतिः प्राणः एव प्राण ऋच इत्येवं विद्यात्"** [15] ॥ वृहदारण्यकेऽपि प्राणानां विशदी चर्चा प्राप्यते , उक्तञ्च - **" अथाह प्राणमूचुस्त्वन्न उद्गायेति तथेति तेभ्यः प्राणः उद्गायद् यद् यः प्राणे भोगस्तन्देवेभ्यः अगायद्यत् कल्याणं जिघ्रति तदात्मने"** [16] । पुनरपि बृहदारण्यकम् प्राणस्य एकेन शिशूना सह वा धेनोर्वत्सेन सह उपमानं प्रदाय एतस्य निवासस्थानं शरीरमिति परिगण्यते । उक्तञ्च - **" यो ह वै शिशुं साधनं सप्रत्याधानं संस्थूणं सदामं वेद सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि अयं वाव शिशूर्योऽयं मध्यमः प्राणस्तस्येदमेवाऽऽधानमिदं प्रत्याधानं प्राणः संस्थूणान्नं दाम"** [17] । प्राणम् अग्नेः परमात्मानश्च समः इति बृहदारण्यकं स्वीकुरुते । उक्तञ्च **" प्राणोऽग्निः परमात्मा "**[18] इति । प्रश्नोपनिषदि अपि प्राणस्य माहात्म्यं वर्णयन् शब्दान्तरेण प्राणमेव सर्वश्रेष्ठत्वेन स्वीक्रियते , उक्तञ्च -

**"इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता । त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः ॥** [19]

अर्थात् हे प्राण ! भवान् सर्वतोभावेन तेजसा युक्तोऽस्ति, भवान् त्रयाणां लोकानां स्वामी इन्द्रोऽस्ति, प्रलयकाले सर्वेषां संहर्ता रुद्रोस्तित्वं सर्वेषां रक्षकः असि , त्वम् अन्तरिक्षे विचरणशीलो वायुः असि, त्वमग्नेः चन्द्रस्य, नक्षत्राणां, समग्रज्योतिर्गणानां च स्वामी सूर्यः असि । यज्ञोपवीतस्य सर्वप्रथमोल्लेखस्तैत्तिरीयारण्यके प्राप्यते । तत्रैव यज्ञोपवीतस्य माहात्म्यं वर्णयन् कथितं विद्यते यद् यज्ञोपवीतन्धारयित्वा यो यज्ञः पठनादिकं वा करोति, सः सर्वान् पापान् विमुच्य स्वर्गलोके महीयते, तेन कृतानि सर्वाणि कार्याणि यज्ञरूपेण परिगण्यन्ते । यज्ञोपवीतधारकः पुरुषः आरण्यके "श्रमण " इति शब्देन सम्बोध्यते । इदानीं श्रमण इति शब्दस्य प्रयोगः बौद्धसम्प्रदाये बौद्धभिक्षूणां कृते बहुशः दरीदृश्यते । किन्तु एतच्छब्दस्य प्रयोगः सर्वप्रथमः तैत्तिरीयारण्यके बृहदारण्यकोपनिषदि च प्राप्यते , उक्तञ्च " **वातरशना ह वा ऋषयः श्रमणाः** " इति । सन्यासीनां कृते परिव्राट् वा परिव्राजकेति शब्दस्य प्रयोगो भवति । उक्तञ्च बृहदारण्यके - " **एतमेव विदित्वा मुनिर्भवति । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति** " ॥ आरण्यकेष्वैतिहासिकतथ्यानामपि प्रचुरेण प्राप्तिर्भवति , यथा - गङ्गायमुनयोर्मध्यवर्तिनः प्रदेशाः आरण्यकेषु पवित्रतमत्वेन स्वीकृताः वर्तन्ते । एतस्मिन्नेव प्रकरणे कुरुक्षेत्रस्य खाण्डववनस्य च वर्णनम् प्राप्यते । उक्तञ्च तैत्तिरियारण्यके " **नमो गङ्गायमुनयोर्मध्ये य वसन्ति** " । शाङ्खायनारण्यके उशीनराः, कुरवः, पाञ्चालाः , मत्स्याः, काश्यः , विदेहाः, इत्येतेषाञ्जनपदानां वर्णनम् प्राप्यते । उक्तञ्च - " **उशीनरेषु, मत्स्येषु, काशीविदेहेषु** " इति ।

अतः उपर्युक्तेन व्याख्यानेनेदं निगदितुं शक्यते यन् मण्डूकप्लुतिन्यायेन आरण्यकेषु संहितानां विषयाणां, ब्राह्मणग्रन्थेषु निहितानामपि विषयाणां प्रतिपादनमस्ति । इत्यलम् ॥

## निष्कर्षः

वैदिकवाङ्मयानुसारमारण्यकानाम् प्रतिपाद्यविषयत्वेन ' आत्मदर्शनम् , परमात्मदर्शनम्, अध्यात्मतत्वनिरूपणम् , इत्यादयो निरूपिताः वर्तन्ते । यद्यप्यारण्यकेषु स्थूलरूपेण यज्ञानां दार्शनिकाध्यात्मिकपक्षयोश्च विवेचनमस्ति, तथापि तेषां विशेषतो विवेच्यः " प्राणविद्या " वर्तते । एतेष्वारण्यकग्रन्थेषु प्राणः " कालचक्र" इति नाम्नाऽभिहितो वर्तते । दिवसः प्राणसंज्ञकः, रात्रिश्चापानसंज्ञिका इति । मैत्रायणी आरण्यकम् प्राणमग्नेः परमात्मनश्च समत्वेन स्वीकरोति , उक्तञ्च - " प्राणोऽग्निः परमात्मा " इति । प्रश्नोपनिषद्यपि प्राणस्य माहात्म्यं वर्णयन् शब्दान्तरेण प्राणमेव सर्वोत्तमत्वेन स्वीक्रियते , उक्तञ्च - इन्द्रस्त्वं प्राण तेजसा रुद्रोऽसि परिरक्षिता । त्वमन्तरिक्षे चरसि सूर्यस्त्वं ज्योतिषां पतिः ।

अन्यच्च अथर्ववेदः प्राणम् 'जीवनदः' इति शब्देन सम्बोधयति । प्राणः वायुरूपेण आकाशे व्याप्तः सन् कालत्रयं व्याप्नोति । उक्तञ्च -
" **प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते । प्राणो ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम्** [11] ॥ इति ।

मधुसूदनः ओझा महोदयः स्वकीये ' संशयहेतुतदुच्छेदवाद' नाम्नि ग्रन्थे इदम् प्राणसम्बन्धिनं विषयं अधिकं स्पष्टयन् कथयति " सृष्टेः उपादानकारणभूतः प्राणश्चतुर्विधो भवति , उक्तञ्च - **प्राणोऽयमग्रेऽभवन् समन्तात्यथा सरस्वान् स तथाप्तिपूर्णः । स्वभावभेदेन चतुर्विधोऽसौ चत्वार एकत्र समाहिताः स्युः** [12] ॥ पुनरपि बृहदारण्यकम् प्राणस्य एकेन शिशूना सह वा धेनोर्वत्सेन सह उपमानं प्रदाय एतस्य निवासस्थानं शरीरमिति परिगण्यते । उक्तञ्च - " **यो ह वै शिशुं साधनं सप्रत्याधानं संस्थूणं सदामं वेद सप्त ह द्विषतो भ्रातृव्यानवरुणद्धि अयं वाव शिशूर्योऽयं मध्यमः प्राणस्तस्येदमेवाऽऽधानमिदं प्रत्याधानं प्राणः संस्थूणान्नं दाम**" [17] । प्राणम् अग्नेः परमात्मानश्च समः इति बृहदारण्यकं स्वीकुरुते । उक्तञ्च " **प्राणोऽग्निः परमात्मा** "[18] इति । प्रश्नोपनिषदि अपि प्राणस्य माहात्म्यं वर्णयन् शब्दान्तरेण प्राणमेव सर्वश्रेष्ठत्वेन स्वीक्रियते ॥

## सन्दर्भग्रन्थसूची.

1. सिद्धान्तकौमुद्यास्तृतीये भागे, शैषिकप्रकरणे, सूत्रसंख्या -4.3.53 । 2. तैत्तिरीयारण्यकस्य भाष्यभूमिकायां सायणः, पृष्ठसंख्या -06.
3. गोपथब्राह्मणम् -1.2.10 । 4. महाभारते आदिपर्वणि -1.331.3 ।
5. संस्कृत वाङ्मय का बृहत् इतिहास, बलदेव उपाध्याय, उत्तर प्रदेश संस्कृत संस्थान, लखनऊ , 1996, पृष्ठसंख्या -245,
6. तैत्तिरीयारण्यके -2.12.2 । 7. तैत्तिरीयारण्यके -2.15.1 । 8. ऐतरेयारण्यके -2.1.6 । 9. ऐतरेयारण्यके -2.1.6 ।
10. अथर्ववेदे, एकादशकाण्डे -6.1. । 11. प्रश्नोपनिषदि-3.6 । 12. संशयतदुच्छेदवादे, पण्डितमधुसूदनः ओझा -3.5.2.1,
13 - ऐतरेयारण्यके -2.1.6, पृष्ठसंख्या –107 । 14. ऐतरेयारण्यके -2.1.7, पृष्ठसंख्या –110 । 15. ऐतरेयारण्यके -2.2.1, पृष्ठसंख्या –117 । 16. बृहदारण्यके -1.3.3 । 17. बृहदारण्यके -2.2.1 । 18. मैत्रायणी आरण्यके -6.9 ।

**Dr. Kamal Prasad Gautam**
Assistant Professor.
Sanskrit Department.
Arya Vidyapeeth College. Guwahati -16. Assam
Contact No. : 8133813967
E-mail : kamalprasadgautam57@gmail.com

************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# आस्तिकदर्शनेषु पदार्थतत्त्वसमीक्षा

**सुदीप सरदारः**, पश्चिमबङ्गाल

**सारसंक्षेपः**

*पदस्यार्थः पदार्थः* इति व्युत्पत्त्याऽभिधेयत्वं पदार्थसामान्यलक्षणमिति सिद्ध्यति। गत्यर्थकात् ज्ञानार्थकात् वा *ऋ गताविति* धातोर्निष्पन्नस्यार्थशब्दस्य निष्पत्तिः अङ्गीक्रियते। अर्थः नाम अभिधेयः। तथाच पदस्य यः अभिधेयः स एव पदार्थ इति। अतः *पदजन्यप्रतीतिविषयत्वं पदार्थसामान्यलक्षणम्* इति वक्तुं शक्यते। अभिधा नाम अस्मात् पदादयमर्थो बोध्यव्यः इति ईश्वरेच्छा शक्तिः, तन्निरूपितपदनिष्ठविशेष्यतायाः परम्परया निरूपिता या विषयित्वसम्बन्धावच्छिन्ना प्रकारता तदाश्रयत्वं पदार्थत्वमित्यर्थः। एवञ्च यथा अभिधेयत्वं तथा ज्ञेयत्वं, वाच्यत्वं, प्रमेयत्वम् अपि पदार्थस्य लक्षणरूपेण स्वीक्रियते। अतः *प्रमितिविषयाः पदार्थाः* इति सप्तपदार्थी ग्रन्थे प्राप्यते। वैशेषिकभाष्यकारोऽपि भाष्ये इमामेव युक्तिमुपस्थापयति यथा - *षण्णामेव पदार्थानामस्तित्वाभिधेयत्वज्ञेयत्वानि*। अतः यस्य कस्यापि पुरुषस्येश्वरस्य वा यो ज्ञानविषयो भवितुमर्हति सः पदार्थः इत्यभिधातुं शक्यते। तस्मातत्र प्रतिपादितेषु दर्शनसम्प्रदायेषु आस्तिकदर्शनस्य पदार्थविचारः करिष्यते।

**सूचकशब्दाः** - पदार्थः, निश्रेःयसम्, प्रकृतिः, पुरुषः, ईश्वरः, प्रणवः, ब्रह्मः ।

**मूलप्रवन्धः**

*दृशिर् प्रेक्षणे* इति धातोः *ल्युट् च*[1] इति सूत्रेण ल्युट् प्रत्यये दर्शनमिति पदं सिध्यं भवति।भारतीयदर्शनम् आस्तिकनास्तिकभेदेन द्विधा विभक्तमस्ति। वस्तुतः भारतीयदर्शने आस्तिकः नास्तिकः इति शब्दद्वयं विशिष्टे अर्थे प्रयुक्तमस्ति। साधारणतः ईश्वरे विश्वासी भवति आस्तिकः, किञ्च ईश्वरे अविश्वासी भवति नास्तिक इति। किन्तु महामुनिः पाणिनिः परलोकविषये जन्मान्तरविषये च अविश्वासीमेव नास्तिक इति उक्तवान्। *दर्शनशास्त्रे वेदप्रामाण्यं ये स्वीकुर्वन्ति ते एव आस्तिकाः किञ्च वेदप्रामाण्यं वैदिकधाराञ्च ये न स्वीकुर्वन्ति ते नास्तिकाः इति*[2] ।तस्मात् ईश्वरमनङ्गीकृत्य अपि वेदप्रामाण्यवादि सांख्यदर्शनं मीमांसादर्शनं च आस्तिकश्रेणीभुक्तं अभवत्। भारतीयदार्शनिकसम्प्रदायेषु चार्वाकः, जैनः, बौद्धः- एते सम्प्रदायाः वेदविरोधित्वात् नास्तिकसम्प्रदायभुक्ताः अपि च न्यायः, वैशेषिकः, सांख्यः, योगः, मीमांसा, वेदान्तः- एते वेदस्वीकृतत्वात् आस्तिकसम्प्रदायभुक्ताः भवन्ति।एतेषु भारतीयदर्शनेषु आस्तिकदर्शने पदार्थस्य यद् स्वरूपमभिधीयते तदालोच्यते।

**न्याय-वैशेषिकदर्शने पदार्थतत्त्वम्-**

वैशेषिकदर्शने षड्भावपदार्थः एकश्चाभावपदार्थ इति सप्त पदार्थाः अंगीकृताः। यद्यपि पदार्थानां संख्याविषये आचार्येषु मतभेदो दृश्यते। तेषु आचार्यस्य कणादस्य मते सप्त एव पदार्थाः भवन्ति । अर्थात् अस्मिन् अनन्ते ब्रह्माण्डे अस्माभिः यत् किमपि दृश्यते, यत् किमपि अवगम्यते, तत् सर्वमेव सप्तत्वेन विभक्तम्। यद्यपि कणादः स्वग्रन्थे साक्षात्रूपेण षण्णामेव पदार्थानामुल्लेखं कृतवान्- *धर्मविशेषप्रसूताद् द्रव्यगुणकर्मसामान्य विशेषसमवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्*[2] ।प्रशस्तपादाचार्यः पदार्थधर्मसंग्रहः इति ग्रन्थे षण्णामेव पदार्थानामुल्लेखं कृतवान्- *द्रव्यगुणकर्मसामान्यविशेषसमवायानां षन्नां पदार्थानां साधर्म्यवैधर्म्यतत्त्वज्ञानं निःश्रेयसहेतुः*[3]। कणादसूत्रे बहुवारम् अभावः इति शब्दः दृश्यते चेदपि प्रशस्तपादाचार्यः सप्तपदार्थेषु अभावस्य गणनां न कृतवान् तथापि परवर्तिनः वैशेषिकाचार्याः अभावं स्वीकृत्य पदार्थाः सप्त इति प्रतिपादितवन्तः।

शिवादित्याचार्येण उक्तम्- *ते च द्रव्यं-गुण-कर्म-सामान्य-विशेष-समवायाभावाख्याः सप्तैव*[4] । अस्माभिः एवं चिन्त्यते स्वतन्त्ररूपेण अभावपदार्थः परिचितः भवितुं नार्हतीति कृत्वा महर्षिः कणादः पदार्थरूपेण अभावं न स्वीकृतवान् इति। किन्तु महर्षिः कणादः षडपदार्थवादी चेदपि अभावः तस्य उल्लिखितः स्वीकृतश्चासीत्। वैशेषिकमतानुसारेण विश्वनाथाचार्येणापि भाषापरिच्छेदे उक्तम्-

द्रव्यं गुणस्तथा कर्म सामान्यं सविशेषकम् । समवायस्तथाभावः पदार्थाः सप्त कीर्तिताः ।।[5]

परन्तु प्राचीनन्याये षोडशपदार्थाः अभ्युपगताः । यथा न्यायसूत्रे प्राप्यते-

*प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्ताऽवयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानाद् निःश्रेयसाधिगमः*[६]।

अत्र प्राचीनैः स्वीकृतानां षोडशपदार्थानां सप्तपदार्थेष्वन्तर्भावः जायते। यथा- प्रत्यक्षानुमानोपमानशब्दरूपाणि चत्वार्येव प्रमाणानि प्रसिद्धानि सन्ति। तत्रेन्द्रियादीनां प्रत्यक्षप्रमाणानां द्रव्येष्वन्तर्भावः। प्रमीयते अनेन इति प्रमाणमित्येवमत्र व्युत्पत्तिर्गृहीताऽस्ति। व्याप्तिज्ञानरूपस्यानुमानप्रमाणस्य गुणेष्वन्तर्भावः। एवं सादृश्यज्ञानरूपस्योपमानस्य पदज्ञानस्य च शब्दप्रमाणस्य गुण एवान्तर्भावः स्वीक्रियते। *आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफल-दुःखापवर्गास्त प्रमेयम्*[७]-इति न्यायसूत्रम्। तत्रात्मशरीरेन्द्रियमनसां द्रव्येऽन्तर्भावः। गन्धरसरूपस्पर्शशब्दस्वरूपस्यार्थस्य बुद्धेश्च गुणेऽन्तर्भावः। प्रवृत्तिः, धर्माधर्मौ, तयोरपि गुणे। दोषाणामिच्छाद्वेष-मिथ्याज्ञानस्वरूपाणां रागद्वेषमोहप्रतिपाद्यानां गुणेऽन्तर्भावः। प्रेत्यभावो प्रेत्य मृत्वा भावो जननमिति व्युत्पत्त्या मरणोत्तरजन्मत्वं प्रेत्यभावपदप्रवृत्तिनिमित्तं चरमप्राणशरीरसंयोगध्वंसो मरणं, आद्यशरीरप्राणसंयोगो जननम्। तथा च मरणानन्तरं तादृशसंयोगरूपस्य तस्य गुणे, सुखदुःखसम्बेदनस्वरूपस्य मुख्यफलस्य गुणे। गौणमुख्यसाधारणजन्यमात्रस्वरूप- फलस्यापि द्रव्यादिषु, पीडालक्षणस्य दुःखस्य गुणे स्वीकरणं जायते। अपवर्गः मोक्षः तस्यात्यन्तिकदुःखनाश- रूपस्याभावेऽन्तर्भावः। संशयस्य ज्ञानरूपत्वाद् गुणेऽन्तर्भावः। प्रयोजनं सुखं दुःखहानिश्च, तत्र सुखस्य गुणे, दुःखहानेश्चाभावेऽन्तर्भावः। दृष्टान्तो महानसादिः, एतेषां यथायथं द्रव्यादिष्वन्तर्भावः। सिद्धान्तः प्रामाणिकत्वेनाभ्युपगतोऽर्थः, एतस्य द्रव्यादिष्वन्तर्भावः। प्रतिज्ञादीनां वाक्यात्मकावयवानां गुणेऽन्तर्भावः, एषां शब्दरूपत्वाद्। व्याप्यारोपेण व्यापकारोपस्तर्कः, अस्य च गुणे। निर्णयो निश्चयः, प्रमाणफलमिदम्, एतस्य च गुणो तत्त्वबुभुत्सोः कथारूपवादस्य गुणे, विजिगीषुकथारूपजल्पस्य गुणे, स्वपक्षस्थापनहीनकथारूपवितण्डायाः गुणे, अनुमितितत्कारणज्ञानान्यतरप्रतिबन्धकज्ञानविषयरूपाणां हेत्वाभासानां यथायथं द्रव्यादिषु, अभिप्रायान्तरेण प्रयुक्तशब्दस्यार्थान्तरं परिकल्प्य दूषणाभिधानरूपस्य छलस्य गुणे, असदुत्तरं, स्वाभिमतार्थव्याघातकं स्वोत्तरवाक्यं वा जातिः, एतस्याः शब्दरूपत्वाद् गुणे स्वीकरणं स्यात् । वादिनोऽपजयहेतुः निग्रहस्थानं, तथा चेदं द्वाविंशतिविधम्। तत्र हेत्वाभासोऽप्यन्तर्गतः। एतेषां मध्ये हेत्वाभासव्यतिरिक्तानां निग्रहस्थानानां गुणेऽन्तर्भावः जायते । अत एव स्पष्टतया सप्तपदार्थः सिद्ध्यति । अतः तावदत्र स्पष्टतया वक्तुं शक्यते यत् *वैशेषिकदर्शनोक्तः गुणः न्यायेनाप्यंगीकृतः*[८]।

## सांख्य-योगदर्शने पदार्थतत्त्वम् -

पंचविंशतितत्त्वानां विचारः संख्या, तमधिकृत्य कृतो ग्रन्थो सांख्यमित्युच्यते। समग्रेऽस्मिन् भारतीयदर्शनवाङ्मये सांख्यदर्शनं तत्त्वप्रधानदर्शनत्वेनाख्यायते । एतदर्थं साधूक्तं देवतीर्थेण यत् सम्यक् क्रमपूर्वकं ख्यानं कथनं यस्याः सा संख्या क्रमपूर्वकविचारणा, तमधिकृत्य कृतो ग्रन्थः सांख्यम् । तन्मते आत्मापरपर्यायः पुरुषः कस्यचित् वस्तुनः कार्यं कारणं वा न भवति। सांख्यदर्शनेऽपि न्यायवैशेषिकदर्शनवद् जडपदार्थस्यैव जगदुपादानकारणत्वं स्वीकृतं वर्त्तते। मूलप्रकृतिः सांख्यमते जगतः उपादानकारणम्।
सा च प्रकृतिरनादिः सत्त्वरजस्तमसां साम्यापन्ना समष्टिरूपा विद्यते । अत्र तत्त्वानां सूक्ष्मविवेचनं प्राप्यते । एतानि तत्त्वामि विभज्यन्ते-

मूलप्रकृतिरविकृति महदाद्याः प्रकृतिविकृतयः सप्तः। षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः[९]॥

चतुर्ष्वेषु मूलप्रकृतिः कारणस्वरूपाऽव्यक्तरूपा एकाऽस्त्यविकृतिः। महदाद्याः महदहंकारौ, पंचतन्मात्राणि च सप्तसंख्यकाः प्रकृतिविकृतयः सन्ति । एते पूर्वोक्तानां विकारे सति पश्चाद्वर्त्तिनीनां प्रकृतिरूपेण कार्यं निर्वहन्ति । अर्थादेषामुत्पत्तिरेषु चोत्पत्तिर्जायते। एते कस्यचित् कारणानि कस्यचिच्च कार्याणि भवन्ति । पंचभूतानि पृथिव्यप्तेजोवाय्वाकाशाख्यानि, एकादशेन्द्रियाणि यथा मनः, श्रोत्र-त्वक्-चक्षुः-जिह्वा-घ्राण-रसनाख्यानि ज्ञानेन्द्रियाणि, वाक्-पाणि-पाद-पायु-उपस्थाख्यानि पंचकर्मेन्द्रियाणि चेति षोडशसंख्यकानि तत्त्वानि केवलं विकाराण्येव भवन्ति । पुरुषस्तु न कस्यचित् कार्यं नापि कस्यचित्कारणमपितूभयरहितं निर्लिप्तो द्रष्टा ज्ञ एव भवति । वस्तुतस्तु सांख्ये द्वे एव तत्त्वे प्रकृतिपुरुषाविति वक्तुं शक्यते । प्रकृतेः महदादीनामुत्पत्तिः इह खलु दर्शने अंगीक्रियते । यथा प्रकृतेर्महान्, महतोऽहङ्कारः, अहङ्काराद् षोडशकगणः, तस्माच्च पंचभ्यः पंचतन्मात्रेभ्यः पंचभूतान्युत्पद्यन्ते।तथा च सांख्यकारिकायां दृश्यते-

प्रकृतेर्महांस्ततोऽहंकारस्तस्माद्गणश्च षोडशकः। तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि॥[१०]

एवमनेनापि पंचविंशतितत्त्वानि सिद्ध्यन्ति। प्रकृतिस्तु गुणानां सम्यावस्थाऽस्ति। वैषम्यावस्थात् विकाराणि जायन्ते। अतः विकाराण्यपि गुणरूपेण स्वीकर्तुं शक्यते ।

योगदर्शने सांख्यदर्शने प्रतिपादित -पञ्चविंशतितत्त्वानि एव याथातथ्येन अङ्गीकृतानि । ततः पञ्चविंशतितत्त्वेभ्यः परं पुरुषविशेषम् ईश्वरं षड्विंशतितत्त्वरूपेण अङ्गीकरोति । तानि तत्त्वानि क्रमशः यथा- मूलप्रकृति: (प्रधानम्), पुरुषः, महत् (बुद्धिः),अस्मिता (अहङ्कारः), पञ्चतन्मात्राणि (शब्दस्पर्शरूपरसगन्धाः), एकादशेन्द्रियाणि ( घ्राण- रसन-चक्षु श्रोत्र - त्वक् वाक्-पाणि-पाद-पायु-उपस्थ-मनांसि ), पञ्चमहाभूतानि (पृथिव्यप्तेजोवाय्वाकाशानि ), ईश्वरश्चेति ।

योगदर्शनं मुख्यतया तत्त्वत्रयं विचारयति । तानि ईश्वरो जीवः प्रकृतिश्चेति । त्रिगुणात्मिका जडत्वादिगुणवती नानाविधपरिणामशालिनी संसारकारणभूता प्रकृतिः वर्तते । यः जीवधर्माधर्मयोर्व्यवस्थां करोति, अपि च सर्वज्ञः, पुरुषविशेषः सः ईश्वरः । किञ्चिज्ज्ञविशिष्टः पुरुष एव जीवः।सूत्रं यथा- *क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः*[११]। अविद्यादि क्लेशरहितः शुभाशुभकर्मफलसञ्चित राशिभिः असंस्पृष्टः, देशकालातीतः, सर्वशक्तिमान्, परिपूर्ण, विशेषपुरुषः ईश्वरः वर्तते । सः प्रणवशब्देन वाच्यः भवति । स च ईश्वरः ब्रह्म-विष्णु-शिवेभ्यः भिन्नः विराजते। *तज्जपस्तदर्थभावनम्*[१२]साधकः एकाग्रतासिद्धये प्रणववाच्य ईश्वरस्य पौनःपुन्येन जपप्रक्रियां कुर्वतः तस्य रूपं भावयतश्च तत्सिद्धिं लभते। यथा मुक्तस्य पूर्वा बन्धकोटि प्रज्ञायते नैवमीश्वरस्य । यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटि सम्भाव्यते नैवम् ईश्वरस्य। स तु सदैव मुक्तः, सदैव ईश्वर इति। स च ईश्वरः *पूर्वेषामपि गुरुः कालेनानवच्छेदात्*[१३]इति ईश्वरस्वरूपं स्फुटं जीवभिन्नत्वेन वेदव्यासेन भाष्ये प्रपञ्चितम् ।

**मीमांसादर्शने पदार्थतत्त्वम्-**

वेदमुपजीव्य प्रवृत्तत्वात् पूर्वमीमांसादर्शनं पूर्णं वैदिकदर्शनम्। धर्म एव मुख्यतयाऽस्य प्रतिपाद्यो विषयः। अतएव दर्शनान्तरवदत्र द्रव्यगुणादिपदार्थानां विशदो विचारः नोपलभ्यते। मीमांसादर्शनस्य विभिन्नेषु सम्प्रदायेषु ये पदार्थविचाराः प्राप्यन्ते, तेऽपि परस्परं विभिन्ना । मीमांसासूत्रेषु शाबरभाष्ये- *द्रव्य-गुण-कर्म-अवयवस्वरूपाणां चतुर्णां पदार्थानामुल्लेखोपलभ्यते*[१४]।

भाट्टनये तु पदार्थः भावाभावश्चेति द्विधा विभज्यते । तत्र भावः द्रव्यं, गुणः, कर्म, सामान्यं, अभावश्च पुनश्चतुर्विधः यथा प्राग्भावः, अत्यन्ताभावः, ध्वंसाभावः, अन्योन्याभावश्चेति । अनेन *भाट्टमते पंचपदार्थाः प्राप्यन्ते*[१५]।प्राभाकरप्रस्थाने च *द्रव्य-गुण-कर्म-सामान्य-समवाय-संख्या-शक्ति- सादृश्यभेदात् अष्टौ पदार्थाः स्वीकृताः*[१६]।मुरारीमिश्रमते ब्रह्मस्वरूपः एक एव मूलभूतः पारमार्थिकः पदार्थः, किन्तु *लोकव्यवहारायान्येऽपि चत्वारो पदार्था आवश्यकाः*[१७]। यथा : धर्मः, धर्मी, आधारः प्रदेशविशेषश्चेति । एषु धर्मेषु सर्वेषां मौलिकपदार्थानामन्तर्भावः जायते ।

जातिः व्यक्तौ अवस्थिता, नित्या, प्रत्यक्षविषया, व्यक्तितः च भिन्नाभिन्ना । कुमारिलभट्टमते जातिः व्यक्तौ तादात्म्यसम्बन्धेन तिष्ठति। अस्मिन् मते समवायः न स्वीक्रियते। प्राभाकराः समवायसम्बन्धम् आश्रित्य जाति-जातिमतोः सामानाधिकरण्यं व्याख्यान्ति । एते जाति-जातिमतोः तादात्म्यसम्बन्धं न अङ्गीकुर्वन्ति । अपि च, एते नैयायिकस्वीकृतं समवायसम्बन्धम् अङ्गीकुर्वन्ति।कुमारिलभट्टः अभावम् पदार्थत्वेन अङ्गीकरोति, परन्तु प्रभाकरः अभावम् अतिरिक्तपदार्थत्वेन नाङ्गीकरोति। भाट्टमते अनुपलब्धिप्रमाणेन अभावः गृह्यते। प्रभाकरमते *अभावाख्यः पदार्थस्तु नास्ति*[१८]इति । एतस्य मते अभावः अधिकरणस्वरूपः ।

**वेदान्तदर्शने पदार्थतत्त्वम्-**

वेदान्तदर्शने प्रथमतः सृष्टिचिन्तकाः निरर्थकारिति अद्वैतवादिनोऽभिमतं सन्ति । अतः पदार्थविषयेऽत्र चर्चा न प्राप्यते। अत्र ब्रह्म हि केवलं पारमार्थिकमन्यत्सर्वं प्रातिभासिकमलीकं चेति। अत्र दर्शने सत्ता त्रिविधा स्वीकृता, यथा- *पारमार्थिकी, प्रातिभासिकी, व्यावहारिकी चेति*[१९]। त्रिष्वेषु त्रैकालावाधितं पारमार्थिकं सत् केवलं ब्रह्म तिष्ठति। मिथ्याज्ञानभूतमयं संसारः प्रातिभासिकम् । केवलमस्य प्रतिभासो भवति, न तु वस्तुसत् । मिथ्याज्ञानभूते संसारेऽस्मिन् व्यवहाराय सत्यरूपेण या सत्ताऽङ्गीक्रियते सा व्यावहारिकी सत्ताऽस्ति। प्रातिभासिकं व्यावहारिकं च जगत् मिथ्याज्ञानाश्रयत्वात् हेयमित्यभ्युपगम्यते। अतः दर्शनेऽस्मिन् अनयोः पारमार्थिकी चर्चा न विद्यते । वस्तुसत् केवलं ब्रह्म एव विद्यते । अस्य विशेषचर्चाऽत्र प्राप्यते। ब्रह्मातिरिक्तं सर्वमसदेव इति स्वीकृतं वर्त्तते।

अस्य ब्रह्मणः सगुणनिर्गुणाविति द्वौ भेदौ स्तः। यद्यपि शंकराचार्यः *ब्रह्मणः निर्गुणत्वमेव स्वीकरोति पारमार्थिकत्वेन तथाप्युपासनानिमित्तं तस्य सगुणत्वमप्यंगीकरोति*[२०]। रत्नविभाकरानुसारं निर्गुणब्रह्म विद्याविषयं सगुणब्रह्म चाविद्याविषयमस्ति- *विद्याविषयो ज्ञेयं निर्गुणं सत्यम्, अविद्याविषय उपास्यं सगुणकल्पितम्*[२१]। अविद्याकारणादेव ब्रह्म स्रष्टृनियन्त्रादिरूपेणाभिधीयते ।

एतानि सर्वाणि रूपाणि कल्पितानि सन्ति । तत्त्वज्ञानानन्तरं द्वैतबुद्धेः निरासो जायते । एतेन यदा द्वैतबुद्धेर्निवृत्तिः जायते तदा सृष्ट्यादीनां कर्त्तुः सगुणपरमात्मस्वरूपविवेचनं न जायते। अतः अस्मात् स्पष्टं प्रतीयते यत् सगुणब्रह्मणः स्वरूपं पारमार्थिकं न सत् अविद्याकल्पितमस्ति । सगुणब्रह्मणः पारमार्थिकत्वाभावेऽपि आचार्यप्रवरेण श्रीशंकरेणोपासनादृष्ट्याऽस्योपादेयता प्रतिपादिता।

**उल्लेखपञ्जिः**

१. *पाणिनिसूत्रम्, ३/३/११५* । २. *वैशेषिकसूत्रम् – १/१/४* । ३. *प्रशस्तपादभाष्यम्- २* । ४. *सप्तपदार्थी, सूत्र-२* ।
५. *भाषापरिच्छेद्, कारिका- २* । ६. *न्यायसूत्रम्-१/१/१* । ७. *तर्कभाषा (सम्पा. शर्वाणीगाङ्गुलिः), पत्राङ्कः – ६७* ।
८. *दिनकरी टीका, पत्राङ्कः -५१* । ९. *सांख्यकारिका – ३* । १०. *सांख्यकारिका – २२* । ११. *योगसूत्रम्- १/२४* ।
१२. *योगसूत्रम्- १/२८* । १३. *योगसूत्रम्- १/२६* । १४. *मीमांसादर्शन का विवेचनात्मक इतिहास, पत्राङ्कः – ५०* ।
१५. *तत्रैवम्* । १६. *प्रकरणपंचिका, पत्राङ्कः – ३१* । १७. *मीमांसादर्शन का विवेचनात्मक इतिहास, पत्राङ्कः – ५०* ।
१८. *तदेवम् , पत्राङ्कः – ५१* । १९. *The Philosophy of the Vedanta and the Vedantasara, pg- 31.*
२०. *ब्रह्मसूत्रम्, शाङ्करभाष्यम् -१/१/२०,२४,३१* । २१. *रत्नप्रभा, ब्रह्मसूत्रम्- १/१/१२* ।

**परिशीलिता ग्रन्थानुक्रमणी**

अन्नंभट्टः । *तर्कसंग्रहः* । सम्पा. श्रीनिवास शर्मा । वाराणसी: भारतीय-विद्या-संस्थान, २०१९ ।
आद्याप्रसादमिश्रः । *सांख्यतत्त्वकौमुदी-प्रभा* । वाराणसी: सत्य-प्रकाश-मन्दिरः, १६५६ वङ्गाब्दः(प्रथमसंस्करणम्)
ईश्वरकृष्णः । *सांख्यकारिका* । सम्पा. नारायणचन्द्र-गोस्वामी । कलिकाता: संस्कृत-पुस्तक-भाण्डारः, २०१६ (पुनर्मुद्रणम्)
केशवमिश्रः । *तर्कभाषा*(प्रथमद्वितीयखण्डश्च) । सम्पा. गङ्गाधर-करः । कलिकाता: महाबोधि-वुक्- एजेन्सि , २०१९ (तृतीयसंस्करणम्)
गौतमः । *न्यायदर्शनम्* (प्रथमखण्डः) । सम्पा. फणिभूषणतर्कवागीशः । कलिकाता: पश्चिमवङ्गराज्यपुस्तकपर्षत् , (षष्ठप्रकाशः २०१८)
नारायणभट्टः । *मानोमेयोदयः* । सम्पा. स्वामियोगीन्द्रानन्दः । वाराणसी : षड्दर्शनप्रकाशनप्रतिष्ठानम् , १९७८ (प्रथमप्रकाशः)
पतञ्जलिः । *योगदर्शनम्* । सम्पा. स्वामी भर्गानन्दः । कलिकाता: उद्बोधन-कार्यालयः, २०१७ (चतुर्थमुद्रणम्)
पाणिनिः । *अष्टाध्यायी* । सम्पा. तपनशङ्कर-भट्टाचार्यः । कलिकाताः संस्कृत-वुक-डिपो, २०१७ (तृतीयसंस्करण्म्)
प्रशस्तपादाचार्यः । *प्रशस्तपादभाष्यम्* ( प्रथमभागः द्वितीयभागश्च ) । कलिकाताः दामदराश्रमः, २०१० ( तृतीयसंस्करणम् )
विश्वनाथः । *भाषापरिच्छेदः* । सम्पा. पञ्चानन-भट्टाचार्यः । कलिकाता: महाबोधि-वुक्- एजेन्सि , २०१६ (पुनर्मुद्रणम्, १९७० प्रथमप्रकाशः)
*मीमांसादर्शन का विवेचनात्मक इतिहास* । सम्पा. गजानन शास्त्री मुसलगांवकर । वाराणसी: चौखाम्भा विद्याभवन, १९९२ ।
शिवादित्यः। *सप्तपदार्थी* । सम्पा. तपनशङ्करभट्टाचार्य्यः । कलिकाता: संस्कृत-वुक-डिपो , (प्रथमप्रकाशः २०१२)

**SUDIP SARDAR,**
M. Phil, Research Scholar, Sanskrit Department
Jadavpur University, Vill : Tararat, P.O. : Dhamua- 743610
P.S. Magrahat, Dist : South 24 Paragana, West Bengal
Contact No. : 8479992434
E-mail : sardar22sudip@gmail.com,

******

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# अद्वैतवेदान्तदर्शने अध्यासभाष्यस्य औचित्यं – प्रयोजनं च

**डा. आर्. शिवकुमारस्वामी,**
साहित्यसहायकः
श्रीराजराजेश्वरी संस्कृत कालेज, स्वर्णवल्ली, शिरसि

ब्रह्मसूत्रस्य भाष्यं कर्तुं प्रवृत्तेन भगवता शङ्कराचार्येण 'युष्मदस्मत्प्रत्ययगोचरयोः' इत्याद्यारभ्य 'सर्वे वेदान्ताः आरभ्यन्ते' इत्येतदन्तः यो ग्रन्थः उपस्थापितः, न तस्य भाष्ये उपयोगित्वम्, तस्य भाष्यत्वाभावात्। तथाहि – 'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुसारिभिः । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः ॥' इति भाष्यलक्षणमभिहितम् । न चायं ग्रन्थः सूत्रार्थं प्रतिपादयति, येन अस्य भाष्यत्वमुपपद्येत । तथा च अस्य ग्रन्थभागस्य कथं भाष्यत्वमङ्गीक्रियते? इत्ययं प्रश्नः समुदेति ।

अत्रायं विचारः – 'अथातो ब्रह्मजिज्ञासा' इति प्राथमिकसूत्रगतस्य आर्थिकार्थस्य प्रकाशकत्वेन अस्य ग्रन्थस्य भाष्यत्वं द्रष्टव्यम् । तथाहि यागादीनाम् अनित्यफलकत्वात् विवेकादिसाधनचतुष्टयसम्पन्नस्य ब्रह्मजिज्ञासा उदेति । ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्यः इति जिज्ञासासूत्रस्य अर्थः । साधनचतुष्टयान्तर्गतेन मुमुक्षुत्वाख्येन अधिकारिविशेषणेन अर्थात् मोक्षप्राप्तिरूपं विचारफलं निर्दिश्यते । 'स्वर्गकामो यजेत' इत्युक्ते यथा यागस्य स्वर्गफलकत्वमवगम्यते, तथा मुमुक्षुणा ब्रह्मज्ञानाय वेदान्तविचारः कर्तव्यः इत्युक्ते मोक्षस्यैव परम्परया विचारफलत्वं सिध्यतीति मोक्ष एव शास्त्रस्यास्य प्रयोजनमिति सूच्यते । मोक्षश्च आनन्दात्मकब्रह्मप्राप्तिः, आत्यन्तिकी दुःखनिवृत्तिश्च । ब्रह्मप्राप्तिस्तु जीवब्रह्मणोरैक्यबोध एव इति वेदान्तिनामाकूतम् । जीवब्रह्मणोरैक्यबोधश्च शुद्धचैतन्यं ब्रह्मैव । तदेव शास्त्रस्यास्य विषयः । ताथाचोक्तं – 'अज्ञातं ब्रह्म विषयः ज्ञातं तच्च प्रयोजनम्' इति । सूत्रेण च सोऽयं विषयः सूचितः सन्दिग्धस्य ब्रह्मणः जिज्ञास्यत्वेन उपस्थापनात् । सूत्रेण एवमुपस्थापिते शास्त्रस्य विषयप्रयोजने अनेन ग्रन्थेन सोपपत्ति प्रतिपादिते इति ग्रन्थस्यास्य भाष्योपयोगित्वम् अस्त्येवेति ज्ञायते । तदुक्तं पञ्चपादिकायां – 'शास्त्रस्य विषयः प्रयोजनं च अर्थात् प्रथमसूत्रेण सूत्रिते इति प्रतिपादयति' इति ।

तथाहि शोकाद्यनर्थनिवृत्तिः मोक्षः इत्युक्तम् । अनर्थश्च कर्तृत्वभोक्तृत्वादिकम् । तद्यदि वस्तुभूतं, न ब्रह्मज्ञानेन निबर्हणीयम्, यतः ज्ञानम् अज्ञानस्य अज्ञानकार्यस्य च निवर्तकं भवति, न वस्तुभूतस्य ।

मुमुक्षूणां कृते शास्त्रमारब्धम् । मुमुक्षवो नाम मोक्षेच्छवः । मोक्षरूपं फलं ये इच्छन्ति, तेषां कृते किमपेक्षितम्? इति जिज्ञासायां प्राथम्येन मोक्षस्य यत् साधनं, तदेव अपेक्षितम् इति युक्तं वक्तुम् । कुतः इति चेत्, या फलेच्छा सा साधने इच्छा- मुत्पाद्यैव अर्थिनं प्रवर्तयति । एवं मोक्षेच्छा यस्य वर्तते, तस्य मोक्षसाधने अपि इच्छा भवितुमर्हति। अत एव वेदान्तिभिः मुमुक्षूणां ब्रह्मजिज्ञासा भवति इत्युच्यते । ब्रह्मज्ञानं यदि तदभिलषितमोक्षसाधनं न स्यात्, तर्हि मुमुक्षूणां कृते ब्रह्मज्ञाने कथमिच्छा स्यात्? यदा स्वर्गे इच्छा वर्तते, तदा स्वर्गसाधनं किमित्यन्विष्य, यागादिकमिति ज्ञात्वा, यागादिकरणे इच्छा उदेति इति तु अनुभवः । एवमेव मोक्षे यस्य इच्छा वर्तते, तस्य मोक्षस्य यत् साधनं तस्मिन्नपि इच्छा भवति । अतः ब्रह्मज्ञानं यदि मोक्षसाधनं स्यात्, तदैव तेषां ब्रह्मजिज्ञासा सम्भाव्यते । एवं च मुमुक्षूणां कृते 'अथातो ब्रह्मजिज्ञासा' इत्यनेन सूत्रेण इदमेव सूचितं भवति - 'ब्रह्मज्ञानमेव मोक्षसाधनम्' इति । ब्रह्मज्ञानमेव मोक्षस्य साधनमित्युच्यते चेत्, तेनेदमर्थात् सिद्धं भवति यत् - 'बन्धः ब्रह्माज्ञाननिमित्तकः' इति । अन्यथा ब्रह्मज्ञानेन मोक्षस्य सिद्धिः न भवितुमर्हति । अयमंशः स्वाराज्यसिद्धिनामके ग्रन्थेऽपि एवं प्रकाशितः – 'ज्ञात्वा देवं सर्वपाशापहानिः नान्यः पन्थाश्चेति भूयो वचोभिः । ज्ञप्तेः साक्षान्मुक्तिहेतुत्वसिद्धौ अध्यासत्वं बन्धनस्यार्थसिद्धम् ॥' इति ।

यागस्य स्वर्गहेतुत्वं वर्तते । परन्तु यागस्य साक्षात् स्वर्गहेतुत्वं वक्तुं न शक्यते । यतो हि यागस्य क्षणिकत्वात्, स्वर्गस्य च

कालान्तरभावित्वात् यागस्वर्गयोर्मध्ये किञ्चिदपूर्वमिति द्वारमपेक्ष्यते । एवं च विना द्वारं साक्षात् स्वर्गसाधनत्वं कर्मणः नास्तीत्यवगम्यते । परन्तु ज्ञानस्य साक्षादेव मुक्तिहेतुत्वम् । यतो हि बन्धो नाम-अविद्यायोगः, अविद्यापरिणामो वा । पारतन्त्र्यमित्यपि बन्धशब्दस्य अर्थः स्वीक्रियते। स च बन्धः कस्येति जिज्ञासायां जीवस्यैवेति वदामः । अयं तु जीवः अविद्ययोपगूढः, कर्मानुसारजननमरणशीलः, कर्तृत्व-भोक्तृत्वाद्यभिमानी, संसारीति व्यपदिश्यते । तथा जीवस्य जननमरणचक्रे नैरन्तर्येण संसरणमेव संसारः, स एव बन्ध इत्ययमर्थः सङ्गच्छते ।

जीवस्य संसाररूपो बन्धः प्रत्यक्षगोचर इति नात्यन्तमेवासत्वम्, ब्रह्मज्ञानाद्बाध्यत इति न अत्यन्तं सत्वम्, परस्परविरोधात् न सदसत्वं, सदसद्भिन्नत्वञ्च दूरापास्तमेवेति बन्धस्य मिथ्यात्वम् अनिर्वचनीयत्वम् अध्यस्तत्वं च अनवद्यतया सिध्यति ।

अपि च 'प्रत्यग्ब्रह्मैक्ये महावाक्यस्येव बन्धमिथ्यात्वे त्वं पदार्थशोधकवाक्यानां तदनुग्राहकन्यायानाञ्च विद्यमानतया तत्प्रदर्शनद्वारेण जीवस्य ब्रह्मणा ऐक्यमिति वस्तुगतिमनुरुध्यैव वादकथारूपेऽत्र शास्त्रे पूर्वपक्षः परिहरणीयः' इति बन्धस्य मिथ्यात्वमेव प्रतिपादयामास दीक्षितेन्द्रः ।

अपि च ब्रह्मविषयकमज्ञानमेव बन्धकारणम् । अत एव मोक्षस्य प्रतिद्वन्द्विरूपेण विद्यमानस्य अज्ञानस्य निवर्तकं यत् ब्रह्मज्ञानं, तत् किमपि द्वारमनपेक्ष्यैव बन्धमूलस्य अज्ञानस्य निवर्तकं भवतीति तस्य साक्षान्मोक्षहेतुत्वम् प्रतिपाद्यते ।

बन्धस्य अध्यासत्वसिद्धिरेव शास्त्रस्य विषयप्रयोजनवत्वं साधयति इति शास्त्रारम्भोऽपि समर्थितो भवतीत्यपरोऽयं मन्तव्यो विषयः । अत एव भाष्यकारैः श्रीमच्छङ्करभगवत्पादैः प्रथमतो अध्यासभाष्यं प्रणीतम् ।

किंच विना ज्ञानं कर्मणा, अयत्नेन वा निरतिशयानन्दावाप्तिरूपः, आत्मस्वरूपावस्थितिरूपो वा मोक्षः न साधयितुं शक्यते । यत् ज्ञानं तत् सत्यं भावपदार्थं न नाशयति । यथा सत्यो घटः पुरतः विद्यमानः न तत् 'अयं घटः' इति ज्ञानेन निवर्तते, किन्तु मुद्गरपातादिरूपेण कर्मणैव नश्यति । एवं च यः सत्यः भावपदार्थः तस्य ज्ञानेन निवृत्तिः कुत्रापि न घटत इत्युक्तं भवति । अनेनैव इदमपि अर्थात्सिद्ध्यति यत् – यद्वस्तुतो मिथ्याभूतं तत् ज्ञानातिरिक्तसाधनेन न निवर्तते । यतो हि तत् ज्ञानैकनिवर्त्यम् । एवं च अयं विभागः अत्र प्रदर्शितो भवति – यः सत्यो भावपदार्थः सः न ज्ञाननिवर्त्यः, कर्मनिवर्त्य एव सः । यथा घटादिः । तथा यन्मिथ्याभूतं तत्तु ज्ञानैकनिवर्त्यम् । कर्मणा न तन्निवृत्तिः । यथा शुक्तिरजतम्, इति । एवं विभागे सिद्धे सति यः संसाररूपो बन्धः सोऽपि ज्ञाननिवर्त्य इति वेदान्तप्रमाणसिद्धत्वात् तस्य मिथ्यात्वमपि सिद्ध्यति । तथा च मिथ्याभूतस्य ज्ञानैकनिवर्त्यत्वात् तन्निवृत्तौ यत्किमपि कर्म सुतराम् असमर्थमिति सिद्धं भवति । एतेन बन्धस्य ज्ञानैकनिवर्त्यत्वरूपं अध्यस्तत्वं प्रतिपादयता भाष्यकारेण 'मोक्षसाधनब्रह्मज्ञानाय वेदान्तविचारः कर्तव्यः' इत्ययं सूत्रार्थः समर्थितः इति सुतरां अस्य ग्रन्थभागस्य सूत्रार्थप्रकाशने उपयोगः सुस्पष्टं विज्ञायते ।

अपि च जीवब्रह्मणोरैक्यम् अस्य शास्त्रस्य विषयः इत्युक्तम् । ब्रह्मैव आत्मा, तत्त्वमस्यादिश्रुतेः । ब्रह्म तावत् आनन्दरूपं चैतन्यैकरसम् इति श्रुतौ गीयते । 'अहं सुखी, अहं दुःखी' इत्यादि प्रत्यक्षज्ञानेन तु तद्विरुध्यते । अतः प्रत्यक्षादिसिद्धायाः व्यावहारिकसत्तायाः मिथ्यात्वे अविद्यात्मकत्वे आध्यासिकत्वे वा सिद्धे एव जीवब्रह्मणोरैक्यं सिद्ध्यति । अतः बन्धात्मिकायाः व्यावहारिकसत्तायाः मिथ्यात्वप्रदर्शनार्थं जीवब्रह्मणोरैक्यप्रदर्शनार्थं च अध्यासः प्रदर्शनीयः । बन्धश्चेदाध्यासिकः तर्हि बन्धस्य मिथ्यात्वात् जीवब्रह्मणोः भेदोऽपि मिथ्या इति जीवब्रह्मैक्यरूपः विषयः सिद्धो भवति इत्यतः अध्यासप्रतिपादनद्वारा जीवब्रह्मणोरैक्यरूपः सूत्रोपात्तः विषयः प्रतिपादितः भगवता भाष्यकारेण । तथा च अध्यासप्रतिपादनपरः ग्रन्थः अध्यासप्रतिपादनपुरःसरं बन्धस्य अविद्यात्मकत्वं निर्दिशन् साक्षात् विषयप्रयोजने प्रतिपादयति । अध्यासलक्षणादिसाधनपरो ग्रन्थस्तु विषयादिसिद्धिहेतोरध्यासस्य सिद्धिहेतुभूतानि लक्षणसम्भावनासद्भावप्रमाणानि प्रतिपादयन् विषयादौ पर्यवस्यति । अध्यासप्रदर्शनद्वारा ब्रह्मणः स्वरूपमपि व्याख्यातम् । ब्रह्म हि नाम

सजातीयविजातीयस्वगतभेदरहितं निर्गुणं निष्प्रपञ्चं द्वैतजालविवर्जितम् इत्यद्वैतिनां सिद्धान्तः । प्रपञ्चसत्यत्वे तु नेदं ब्रह्म सिद्ध्येत् । न हि जगच्च ब्रह्म च इत्युभयमपि सत्यं भवितुमर्हति । तस्माद् ब्रह्मणः निष्प्रपञ्चत्वसिद्ध्यर्थं प्रपञ्चमिथ्यात्वं प्रतिपादनीयम् । प्रपञ्चमिथ्यात्वं च आत्मानात्मनोरध्याससाधनेनैव साधनीयम् इति अयं ग्रन्थः अध्याससाधनद्वारा प्रपञ्चमिथ्यात्वं साधयन् अद्वैतं ब्रह्म नूनं प्रतिपादयति । एवं च सूत्रगृहीतस्य ब्रह्मशब्दस्य अर्थप्रतिपादनार्थं, ब्रह्मस्वरूपप्रतिपादनार्थं च प्रवृत्तस्य अस्य ग्रन्थस्य सुतराम् उपयोगित्वमित्यवगम्यते ।

अपि च ब्रह्मजिज्ञासा इति सूत्रयता सूत्रकारेण ब्रह्मणः सन्दिग्धत्वं प्रतिपादितम् । यतः सन्दिग्धे विषये एव जिज्ञासा उदेति, न तु असन्दिग्धे । तथा च 'यदसन्दिग्धमप्रयोजनं च न तत् प्रेक्षावत्प्रतिपित्सागोचरः' इत्युक्तं वाचस्पतिमिश्रैः । ब्रह्मणः आत्मनो वा सन्दिग्धत्वं च आत्मानात्मनोरध्यासादेव इति ब्रह्मणः जिज्ञास्यत्वसिध्यर्थम् अध्यासः प्रतिपादनीय एव । अतः 'युष्मदस्मत्' इत्यादिः ग्रन्थः अध्याससाधनद्वारा सूत्रनिहितमर्थं परिस्फुटयतीति अस्य सूत्रार्थप्रकाशने औचित्यमस्तीत्येतदवगम्यते । अत एव च अस्य भाष्यत्वमपि निरवद्यम् । अयमेव विषयः 'ज्ञानेन हि प्रमाणेन अवगन्तुमिष्टं ब्रह्म । ब्रह्मावगतिर्हि पुरुषार्थः, निःशेषसंसारबीजाविद्याद्यनर्थनिबर्हणात् । तस्माद् ब्रह्म जिज्ञासितव्यम् ।' इत्युक्तवता भाष्यकारेण स्फुटीकृतम् ।

अपि च 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथा' इत्यादिस्मृतेः, 'एतं हवाव न तपति, किमहं साधु नाकरवं किमहं पापमकरवमिति' इत्यादिश्रुतेश्च सर्वकर्मोच्छेदक्षमं ज्ञानमेव मोक्षसाधनमिति सिद्धम्। एवं च तत् कर्तृत्वभोक्तृत्वं यदि अज्ञानहेतुकं स्यात् तर्हि तस्य ज्ञानेन निवर्तनीयत्वेन ब्रह्मज्ञानम् अनर्थहेतुनिवारकमित्युपपद्येत । कर्तृत्वभोक्तृत्वादेः अज्ञानहेतुकत्वं च आत्मानात्मनोरध्यासे सिद्धे एव सिद्ध्यति । ग्रन्थश्चायम् आत्मानात्मनोरध्यासं प्रतिपादयितुं, तदर्थमेव अध्यासस्य लक्षणसद्भावप्रमाणानि प्रतिपादयितुं च प्रवृत्त इति परम्परया ग्रन्थोऽयं मोक्षरूपं सूत्रस्य आर्थिकार्थं शास्त्रप्रयोजनं प्रदर्शयति । कर्तृत्वभोक्तृत्वादीनां सुखदुःखादीनाम् आध्यासिकत्वेन मिथ्यात्वात् ज्ञानेन तन्निवृत्तिः स्वाभाविकी इति शास्त्रस्य प्रयोजनमपि अनेन ग्रन्थेन व्याख्यातमित्यवगम्यते । यदि बन्धः अध्यासात्मकः तदैव तस्य ज्ञानैकनिवर्त्यत्वं सिद्ध्यति । अतः ज्ञानस्य मोक्षसाधनत्वानुरोधेन बन्धस्य अध्यासात्मकत्वं अर्थात् सिद्धं भवति । तदेव सप्रपञ्चं प्रितिपादितं भगवता भाष्यकारेण इत्युक्त्वा विस्तराद्विरम्यते ॥

॥ जयतु गीर्वाणभारती ॥

**आधारग्रन्थाः**


* ब्रम्हसूत्र शांकर भाष्यम्
* उपनिषद् भाष्यम्
* श्रीमद् भगवद्गीता भाष्यम्
* अद्वैतसिद्धिः
* नैष्कर्म्यसिद्धिः
* सिद्धान्तलेशसंग्रहः
* न्यायरक्षामणि:



**Dr. R. Shivkumarswami**

Associate of Sahitya

Shree Rajarajeswari Veda Samskrita Snatakottara Adhyayana Centre

Swarnavalli Matha, P.O. : Mathadevala-581336

Shirsi, Uttarakannada, Karnataka

Contact No. : 7353096127

E-mail : likhitamay30@gmail.com


*********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# गङ्गेशोपाध्यायकृतसामान्यनिरुक्तौ हेत्वाभासनिरूपणे सङ्गतिविमर्शः

**डा. अञ्जनदासः**, पश्चिमबंगाल
सहाचार्यः, संस्कृतविभागः, पश्चिमबङ्गाल

प्रत्येकं शास्त्रे सङ्गतिनिरूपणमतीव प्रयोजनीयो विषयः। यतो हि निरूपणमात्रमेव पूर्वग्रन्थेन सह तथा अव्यवहितपूर्वग्रन्थेन सह ग्रन्थस्यास्य सङ्गतिरस्ति न वेति जिज्ञासा स्वत एवोदेति। किञ्च शास्त्रेऽपि एवमनुरूपमुक्तम् –

१) "शास्त्रे नासङ्गतं प्रयुञ्जीत।"[1]

२) "असङ्गतं प्रयुञ्जानः प्रयोक्ता अवधीरितवचन उन्मत्तवदुपहस्यते"चेति।

तथाच सङ्गतिशब्दस्यार्थो हि पूर्वग्रन्थेन सह परग्रन्थस्य आकांक्षणीयसम्बन्धः। तद्धि न्यायभाषायां भाषितम् – "अनन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयीभूतोऽर्थः"[2] इति। इयं सङ्गतिश्च षड्विधा –

"सप्रसङ्ग उपोद्घातो हेतुतावसरस्तथा। निर्वाहैककार्यत्वे षोढा सङ्गतिरिष्यते॥"[3] इति।

अर्थात् षोढा सङ्गतिर्हि – प्रसङ्गसङ्गतिः, उपोद्घातसङ्गतिः, हेतुतासङ्गतिः, अवसरसङ्गतिः, निर्वाहकत्वसङ्गतिः, एककार्यत्वसङ्गतिश्चेति।

तथा च सामान्यनिरुक्तौ अनन्तराभिधानं हेत्वाभासविषयकज्ञानानुकूलव्यापारात्मक-हेत्वाभासनिरूपणमेव, तत्प्रयोजिका जिज्ञासा च 'के हेत्वभासा' इति हेत्वाभासत्वा-वान्तरधर्मप्रकारकज्ञानं जायतामित्यर्थिका; तज्जनकज्ञानञ्च हेत्वाभासत्वज्ञानं तद्धर्मावान्तरधर्मप्रकारकज्ञानगोचरेच्छां प्रति तद्धर्मज्ञानस्य कारणत्वस्याङ्गीकारात्। एतदस्वीकर्तृमते तु इष्टसाधनताज्ञानञ्च हेत्वाभासत्वज्ञानं मे इष्टसाधनमित्याकरकम्। तथा च इष्टसाधनताज्ञानविशेष्यीभूतज्ञानांशे प्रकारतया भासमानस्य हेत्वाभासत्वस्य तादृशजिज्ञासाकाराणीयभूतेष्टसाधनताज्ञानविषयत्वमप्यक्षतम्, तदेव च हेत्वाभासत्वं सङ्गतिः।

"अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते"[4] इत्यत्र अथशब्दोऽन्यार्थमुपनीयमानोदकुम्भदर्शनवदानन्तर्य-वाचकोऽपि स्वप्रयोगमात्रेण मङ्गलार्थमपि सूचयति। यतः शङ्खध्वनेरिव अथशब्दोच्चारणस्यापि माङ्गलिकत्वान्निम्नोक्तवचनस्मरणात् –

"ॐ कारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा। कण्ठं भित्त्वा विनिर्यातौ तेन माङ्गलिकावुभौ॥"[5] इति।

न च ग्रन्थादावेव सम्भावितविघ्नविनाशाय मङ्गलाचरणसमुदाचार इति वाच्यम्, "मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते" इत्यादिश्रुतेर्ग्रन्थमध्यभागेऽपि तदाचरणदर्शनाद्विशेषतोऽतिगहनस्य हेत्वाभासनिरूपणस्य कृच्छ्रसाध्यतया तन्निरूपणप्रारम्भे सम्भावितविघ्नाशङ्कया तदाचरणस्य न्यायत्वाच्च। 'अथ'शब्दस्यानन्तर्यार्थः। तच्च ध्वंसाधिकरणकालवृत्तित्वरूपम्। वस्तुतस्तु सद्धेतु-निरूपणानन्तरं वेत्यानन्तर्यार्थः। 'अथ हेत्वाभासास्तत्त्वनिर्णयविजयप्रयोजकत्वान्निरूप्यन्ते' इति मूलमेव प्रतिज्ञा। सा च स्वाव्यवहितो-त्तरकालकर्तव्यप्रकारकबोधानुकूलव्यापारः। तत्र 'निरूप्यन्ते' इत्यत्र वर्तमानसामीप्यार्थकलट्प्रत्ययस्य वर्तमानकालाव्यवहितोत्तर-कालीनत्वमर्थः, तस्य च निरूपण-पदार्थेऽन्वयः। 'तत्त्वनिर्णयविजयप्रयोजकत्वाद्' इत्यत्र तज्ज्ञानजन्यजिज्ञासाधीनत्वं पञ्चम्यर्थः। 'निरूप्यन्ते' इत्यत्र कर्मवाच्यविहितलट्प्रत्ययस्य विषयत्वरूपं कर्मत्वमर्थः। शिष्यसमवेतज्ञानानुकूलव्यापारो निपूर्वरूपधात्वर्थः। व्यापारस्य निर्विषयकत्वेऽपि शिष्यसमवेतज्ञानविषयतापन्नेषु हेत्वाभासेषु याचितमण्डनन्यायेन निरूपणघटकशिष्यसमवेतज्ञानीयविषयतामादाय तत्र तदनुकूलव्यापारस्यापि निरूपितत्वसम्बन्धेनान्वयो बोध्यः। मयेति कर्तृपदमूह्यमत्र, तत्र तृतीयार्थः कृतिः। तथा च मत्समवेतवर्तमान-कालोत्तरकालवृत्तिकृति प्रयोज्यसद्धेतुनिरूपणानन्तरमयेति कर्तृपदमूह्यमत्र, तत्र तृतीयार्थः कृतिः। तथा च मत्समवेतवर्तमान-कालोत्तरकालवृत्तिकृति प्रयोज्यसद्धेतुनिरूपणानन्तरकालीनतत्त्वनिर्णयविजय-प्रयोजकत्वज्ञानजन्यजिज्ञासाधीनशिष्यसमवेतबोधानुकूल-व्यापारविषयतावन्तो हेत्वाभासा इति समुदितशाब्दबोधः।

'अथ'शब्दार्थविषये कलाविलासे विलसति एवं तत्त्वम् –"आनन्तर्यमथशब्दार्थः। आनन्तर्यञ्च ध्वंसकालीनत्वमवयवग्रन्थ-ध्वंसकालीनत्वमिति यावत्।"[6] इति।

शिष्यो हि द्विविधः तत्त्वबुभुत्सुर्विजिगीषुश्च। तयोरुभयोरेव प्रयोजनं प्रदर्शयन्नाह – "तत्त्वनिर्णयविजयप्रयोजकत्वात्"[7] इति।

एतेन शास्त्रस्य सम्बन्धप्रयोजनोऽपि प्रदर्शितः। न ह्यविदितसम्बन्धप्रयोजनः कोऽपि शास्त्रे प्रवर्तते इति। तदुक्तं कुमारिलभट्टैः –

"ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते। ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः॥"[8] इति।

तत्त्वनिर्णयविजयप्रयोजकत्वादित्यत्र स्वमतव्यवस्थापनरूपे स्वार्थे तत्त्वबुभुत्सुकथारूपे च वादे तत्त्वनिर्णयः। अवास्तव-कोटिनिश्चायकहेतौ दुष्टत्वज्ञाने वास्तवकोटिनिश्चयो भवतीति हेत्वाभासस्यापि तत्त्वनिर्णयप्रयोजकत्वमिति। जल्पश्च वास्तवकोटिक-निश्चयपूर्वक-परमतनिराकरणम्, परमतनिराकरणमात्रञ्च वितण्डेति। तथा चोक्तम् –

"स्वपक्षस्थापनहीना विजिगीषोः कथा तु या। सा वितण्डा समाख्याता वादनिग्रहकारिणी॥"[9] इति।

तदेतयोरुद्भावनद्वारा परोक्तहेतौ दुष्टत्वोद्भावने परस्य निग्रहाद्दोषस्य विजयप्रयोजकत्वमिति। केषाञ्चिद्वादिनां 'के हेत्वाभासाः' इति जिज्ञासया, केषाञ्चिच्च 'के तत्त्वनिर्णयप्रयोजका' इति जिज्ञासया हेत्वाभासनिरूपणहेत्वाभासत्वरूपप्रसङ्गस्य तत्त्वनिर्णयरूपैककार्यकारित्व-रूपैककार्यानुकूलत्वस्य चानन्तराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वादत्र मूले एव सङ्गतिः प्रदर्शिता इति।

## सङ्गतिप्रदर्शने दीधितिकारमतम्–

नव्यन्यायशिरोभूषणेन दीधितिकारेण सङ्गतिप्रदर्शने स्वाभिमतं व्यक्तम् – "एतावता प्रबन्धेन सपरिकरं हेतुं निरूप्य तत्प्रसङ्गात् तत्त्वनिर्णयादिरूपतत्कार्यकारित्वाच्च तदाभासनिरूपणं प्रतिजानीते 'अथे'ति ।"[10] 'एतावता प्रबन्धेन' इत्यत्र एतावत्पदोत्तरं तृतीयार्थः प्रबन्धपदार्थावयवग्रन्थान्वयोऽभेदः, प्रबन्धपदोत्तरं तृतीयार्थोऽप्यभेदः, तस्य निरूप्य इत्यत्र निपूर्वकरूपधात्वर्थीभूते ज्ञानानुकूल-व्यापारेऽन्वयः।

ननु प्रबन्धस्याभेदेन निरूपणक्रियायामन्वये कथं न द्वितीया? क्रियाविशेषणानां कर्मत्वमित्यनुशासनादिति चेन्न, अजहल्लिङ्गस्य क्रियाविशेषणत्वे तद्वाचकपदात् तृतीयैव, जहल्लिङ्गस्य क्रियाविशेषणत्वे तद्वाचकपदाद् द्वितीया तत्रैवोक्तानुशासनप्रवृत्तेः, अन्यथा अनुमितिं जानातीति प्रयोगापत्तेः। वस्तुतो यत्राभेदसम्बन्धेन धात्वर्थेऽन्वयः तत्रैव द्वितीया यत्राभेदस्यापि धात्वर्थे प्रकारतया भानं तत्र तृतीयापीति कलापे उक्तम्। अयन्तु विशेषः। क्रियाविशेषणस्य द्वितीयान्तस्य तृतीयान्तस्य वा सर्वत्राभेदो विभक्तेरर्थः। द्वितीयार्थाभेदस्य संसर्गविधया तृतीयार्थस्य च प्रकारविधया भानमिति।

सपरिकरं हेतुं नाम व्याप्तिपक्षधर्मताविशिष्टम्, सद्धेतुमिति यावत्। द्वितीयार्थोऽभेदः, तस्य हेतावन्वयः। हेतुमित्यत्र द्वितीयार्थो विषयित्वम्, तस्य निरूप्येत्यत्रत्यधात्वर्थनिरूपणघटकज्ञानेऽन्वयः। निरूपणञ्च शिष्यसमवेतज्ञानानुकूलो व्यापारः, आनन्तर्यं ल्यवर्थः, तच्च ध्वंसाधिकरणकालवृत्तित्वम्, तस्याग्रिमनिरूपणेऽन्वयः। तत्प्रसङ्गादिति तस्य प्रसङ्गः तत्प्रसङ्गः, तस्मादिति। तत्पदं सपरिकरहेतुपरम्, निरूपितत्वं षष्ठ्यर्थः सम्बन्धो वा, प्रसङ्गो नाम सङ्गतिः। पञ्चम्यर्थो हि ज्ञानजन्यजिज्ञासाधीनत्वम्। तस्य निरूपणेऽन्वयः। तत्कार्येत्यत्रापि तत्पदं पूर्ववत्। सपरिकरहेतुप्रयोज्यकार्येत्यर्थः। एककार्यकारित्वं नाम सङ्गतिः। प्रकृते एककार्यं हि तत्त्वनिर्णयो विजयश्च, तत्प्रयोजकत्वं सद्धेतौ हेत्वाभासे चेत्यर्थः। पञ्चम्यर्थः ज्ञानजन्यजिज्ञासाधीनत्वम् । तदाभासेत्यत्र तत्पदं हेतुमात्रपरम्, हेत्वाभासेत्यर्थः।

अतः तदाभासनिरूपणशब्दोत्तरं द्वितीयार्थो विषयत्वं विषयित्वं वा तस्य चाव्यवहितोत्तरकालकर्तव्यत्वप्रकारक-शिष्यसमवेतबोधानुकूलव्यापारात्मकप्रतिपूर्वकज्ञाधात्वर्थप्रतिज्ञैकदेशे बोधेऽन्वयः। निरूक्तप्रतिज्ञायाश्चाख्यातार्थकृतावनुकूलत्वसम्बन्धेन अन्वयः। तथा च एतावदभिन्नप्रबन्धाभिन्नं यत्सपरिकरहेतुविषयकज्ञानानुकूल-व्यापारात्मकं निरूपणं तद्ध्वंसकालीनो यः सद्धेतु-निरूपितप्रसङ्गसङ्गतिज्ञानजन्यजिज्ञासाधीनस्तत्त्वनिर्णय-विजयरूपतत्कार्यकारित्वसङ्गतिज्ञानजन्यजिज्ञासाधीनो दुष्टहेतुविषयकज्ञानानु-कूलव्यापारः तदविषयकाव्यवहितोत्तरकालकर्तव्यत्वप्रकारकशिष्यसमवेतबोधानुकूलव्यापारानुकूलकृतिमान् मूलकारस्तथा मणिकार इत्यन्वयबोधः इति दिक्।

पादटिप्पणी

1. व्या.प., सम्पा. राजेन्द्रनाथ घोष, पृ. - ३०

2. तदेव

3. तदेव
4. सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०१
5. मी.द., सम्पा. भूतनाथ सप्ततीर्थ, पृ. - ०५
6. सा.नि.प्र.(चन्द्रकला-कलाविलासटीकाद्वयसहित), पृ. – ०१-०२
7. सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०१
8. श्लोकवार्तिक, श्लो. – ११, सू. - १
9. सा.नि.जा., पृ. – २३
10. सा.नि.प्र., सम्पा. सुधाकरमालवीय, पृ. – ०२

ग्रन्थपञ्जी-

गौतम। न्यायसूत्र(१)। सम्पा. फणिभूषण तर्कवागीश। कोलकाता : पश्चिमवङ्ग राज्य पुस्तक पर्षद्, २०१२। मुद्रित।
गदाधरभट्टाचार्य। गादाधरी। सम्पा. प. श्रीकीर्त्यानन्द झा। बाराणसी : चौखाम्बा संस्कृत सीरीज, २०१०। मुद्रित।
मालवीय, सुधाकर। गादाधरीसामान्यनिरुक्तिः। वाराणसी : चौखाम्बा संस्कृत भवन, २००७। मुद्रित।
जगदीशतर्कलंकार। सामान्यनिरुक्तिप्रकरणम्। सम्पा. यादवेन्द्रनाथभट्टाचार्य। कोलकाता : संस्कृत ग्रन्थालय, १९६५। मुद्रित।
विश्वनाथन्यायपञ्चानन। न्यायसिद्धान्तमुक्तावली। सम्पा. श्री कृष्णावल्लभाचार्य। वाराणसी : चौखाम्बासंस्कृतसीरीज, २०११ मुद्रित।
शुक्ल, राजाराम। सामान्यनिरुक्तिसौगन्ध्यम्। बाराणसी : सम्पूर्णानन्द-संस्कृतविश्वविद्यालयः, २००३। मुद्रित।
भट्टाचार्य, वामाचरण। सामान्यनिरुक्तिप्रकरणम्। बाराणसी : श्री साधुवेला आश्रम, विजया दशमी सम्बत् २०१०। मुद्रित।

**Dr. Anjan Das**
Assistant Professor
Department of Sanskrit
Ramakrishna Mission Vidyamandir
Belur Math, West Bengal-711202
Contact No. : 7797287630
E-mail : dasanjan530@gmail.com

***********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावः

**समीरः डि. एस्.**
विद्यावारिधि (पि. हेच् डि) शोधच्छात्रः, बेङ्गळूरु, कर्नाटक

भारतीयदर्शनेषु मध्ये न्यायशास्त्रमत्यन्तं प्रामुख्यं वहति। तत्र कारणं तु निखरवैचारिकदृष्ट्या आलोचनं कृत्वा प्रमेयनिर्धारणम्।अत एवोक्तमभियुक्तैः – **काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्** । इति।
युक्तिभूयिष्ठमेतत् न्यायशास्त्रं प्राचीनन्यायशास्त्रम् नवीनन्यायशास्त्रमिति द्वेधा विभक्तम् ।नवीनन्यायशास्त्रे विशेषतः प्रमाणानां विषये विस्तृतचर्चा कृता वर्तते ।गङ्गेशोपाध्यायनाम्ना मैथिलपण्डितप्रवरेण विरचितः तत्त्वचिन्तामणिनामकः ग्रन्थः नवीनन्यायशास्त्रीयमूर्धन्यग्रन्थः । तत्र प्रत्यक्ष-अनुमान-उपमान-शब्दाख्यानि चत्वारि खण्डानि सन्ति । द्वितीये खल्वनुमानखण्डे –

- अनुमितिर्नाम का?
- अनुमितिहेतुभूतव्याप्तिज्ञाने विषयीभूतायाः व्याप्तेः स्वरूपं किम् ?
- पक्षतास्वरूपं किम् ?
- प्रतिज्ञादिपञ्चावयवानां लक्षणानि कानि ?
- उपाधिर्नाम कः ?
- हेत्वाभासाः कति ?
- तेषां लक्षणं किम् ?

-इत्यादीनां बहूनां विषयाणां विस्तृतचर्चा नैकप्रकरणेषु दृश्यते ।

**<u>व्याप्तिस्वरूपविचारः –</u>**

अनुमानखण्डे बहुधा चर्चितविषयेषु व्याप्तिस्वरूपमपि अन्यतमम् । अस्य निरूपणार्थमेव दशाधिकानि प्रकरणानि सन्ति । प्रथमतो व्याप्तिपञ्चकप्रकरणे व्याप्तेः पञ्च लक्षणानि पूर्वपक्षतया आशङ्कितानि । तानि च –

- **साध्याभाववदवृत्तित्वम् ।**
- **साध्यवद्भिन्नसाध्याभाववदवृत्तित्वम् ।**
- **साध्यवत्प्रतियोगिकान्योन्याभावासामानाधिकरण्यम् ।**
- **सकलसाध्याभाववन्निष्ठाभावप्रतियोगित्वम् ।**
- **साध्यवदन्यावृत्तित्वम् । इति।**

पञ्चानामपि लक्षणानाम् इदं वाच्यं ज्ञेयत्वात् इत्यादिकेवलान्वयि- साध्यकस्थलेवाच्यत्वरूपसाध्याभावादीनामप्रसिद्धत्वाद् अव्याप्तिरिति दूषणम् च दत्तम् । तदुपरि समवायितया वाच्यत्वाभावादीनां व्यधिकरणधर्मावच्छिन्नप्रतियोगि- ताकानामभावानां प्रसिद्धिसम्भवात् न अव्याप्तिरिति शङ्का कृता । एवंरीत्या व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य प्रसक्तिर्जाता ।

**<u>व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावः नाम कः</u>** ?

सौन्दडोपाध्यायनामकः कश्चित् प्राचीननैयायिकप्रवर आसीत् । स ईदृशाभावमङ्गीचकार । व्यधिकरणधर्मावच्छिन्न- प्रतियोगिताकाभाव इत्युक्ते कस्य व्यधिकरणो धर्म इति आकाङ्क्षा जायते । तस्य उत्तरं तु - प्रतियोगितापदस्य सन्निधानवशात् अभावीयप्रतियोगिताया व्यधिकरणो धर्म एवात्र विवक्षित इति । एवं च प्रतियोगिताया व्यधिकरणो यो धर्मस्तदवच्छिन्न- प्रतियोगिताकाभाव एव सौन्दडोपाध्यायसम्मत इति भवति । यथा – समवायितया वाच्यत्वाभावः । तत्र प्रतियोगिता वाच्यत्वेऽस्ति । प्रतियोगितावच्छेदकं तु समवायित्वम् ।तत्तु प्रतियोगिनि वाच्यत्वे नास्ति । अतः वाच्यत्वनिष्ठप्रतियोगिताव्यधिकरणो यः समवायित्वरूपो धर्मः तदवच्छिन्न-

प्रतियोगिताकत्वं समवायितया वाच्यत्वाभावे अस्तीति समन्वयः ।

**प्रतियोगिताव्यधिकरणत्वस्वरूपविचारः**–

अत्र धर्मे यत् प्रतियोगिताव्यधिकरणत्वविशेषणं निविष्टमस्ति तत् द्वेधा निर्वक्तुं शक्यते । यथा –

- प्रतियोगिताधिकरणावृत्तित्वम् ।
- प्रतियोगितानधिकरणवृत्तित्वम् । इति ।

अत्र उभयोः पक्षयोः मध्ये साधकबाधकविचारः क्रियते । **प्रथमपक्षस्वीकारे**[1]–

समवायितया वाच्यत्वाभावस्थले प्रतियोगिताधिकरणं वाच्यत्वम् तदवृत्तिः समवायित्वरूपो धर्मो भवतीति समन्वयो भवतीतियद्यपि आपाततः प्रतिभाति । तथापि समनियताभावानामैक्यमिति मते केवलान्वयिनां सकलव्यधिकरण- धर्मावच्छिन्नप्रतियोगिताकाभावानां समनियतत्वेन अभिन्नतया समवायितया वाच्यत्वाभावीयप्रतियोगितायाः घटत्वादिना पटाद्यभावीयप्रतियोगिषु पटादिष्वपि सत्त्वेन तद्वृत्तेः समवायित्वस्य प्रतियोगिताव्यधिकरणत्वं न स्यादित्यापत्तिः ।

**द्वितीयपक्षस्वीकारे**[2]–

समवायितया वाच्यत्वाभावस्थले प्रतियोगितानधिकरणं यत्घटपटादिकम् तद्वृत्तित्वंसमवायित्वरूपे धर्मे अस्तीति यद्यपि समन्वयो भवति । तथापि समनियताभावानामैक्यमिति मते व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वेन सम्मतानां अभावानां स्वप्रतियोगितानधिकरणस्यैवाप्रसिद्धिः । सर्वेषामपि पदार्थानां व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगित्वात् । तथा च प्रतियोगिताव्यधिकरणत्वं निर्वक्तुं न शक्यते इत्याक्षेपे सति तस्य समाधानमुच्यते –

**समस्यापरिहारः**–

स्वप्रतियोगिताधिकरणावृत्तित्वमेवधर्मेप्रतियोगिताव्यधिकरणत्वमिति प्रथमपक्ष एव स्वीक्रियते । समनियताभावानामैक्यमते अभावानामैक्येऽपि तदीय-प्रतियोगितानां भेद एवास्ति , न त्वैक्यम् । व्यधिकरणधर्मावच्छिन्नप्रतियोगिता-कानां सर्वेषामभावानाम् अभिन्नत्वेऽपि तदीयप्रतियोगिता वाच्यत्वनिष्ठा एका घट-निष्ठा अन्या एवं पटनिष्ठा अपरा इत्येवं पृथक् पृथगेव प्रतियोगितेति स्थितिः । सति चैवं, यादृशप्रतियोगिता गृह्यते तादृशप्रतियोगिताधिकरणावृत्तिधर्म एव प्रतियोगिताव्यधिकरणधर्म इति विवक्षणात् न कोऽपि दोषः । समवायितया वाच्य-त्वाभावस्य घटत्वेन पटाभावस्य चैकत्वेऽपि प्रतियोगितापदेन वाच्यत्वनिष्ठायाः प्रतियोगिताया ग्रहणे तदधिकरणवाच्यत्वावृत्तिधर्मः समवायित्वं भवति । एवं प्रतियोगितापदेन पटनिष्ठप्रतियोगिताया ग्रहणे तदधिकरणपटावृत्तिधर्मः घटत्वं भवतीति समन्वयः सुगमतया सम्पद्यते । एवं च स्वप्रतियोगि- ताधिकरणावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभाव एव व्यधिकरणधर्मावच्छिन्नप्रति- योगिताकाभावशब्दार्थ इति सर्वं समञ्जसम् ।

**अनुगमप्रकारस्तु**–

स्वतादात्म्य-स्वाधिकरणावृत्तिधर्मावच्छिन्नत्वोभयसम्बन्धेन प्रतियोगिताविशिष्टप्रतियोगिताकाभाव एव व्यधिकरणधर्मावच्छिन्न-प्रतियोगिताकाभाव इति ।

**Sameera D. S.**
Ph. D. Student
Karnataka Samskrita University
Ghamaraj Pete-560018
Bengaluru, Karnataka
Contact No. : 9482265371
E-mail : dsstata007@gmail.com

**********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# "अनुष्टुभ्-छन्दः" एकम् अध्ययनम्

डा. नवीन भट्ट, उप्पिनपट्टण, कर्नाटक

विदितमेवैतत् वेदस्य षडङ्गानि शिक्षा व्याकरणं छन्दः निरुक्तं ज्योतिषं कल्पश्चेति । तेष्वङ्गेषु छन्दश्शास्त्रं वेदस्य पादाविव इत्युक्तम् । तदेवम् – **छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामयनं चक्षुर्निरुक्तं श्रौतमुच्यते ।।**

**शिक्षा घ्रणां तु वेदस्य मुखं व्याकरणं स्मृतम्। तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते।।** [1] इति ।

एतेषु वैदिकं लौकिकं च प्रयोजनं प्राप्तवदस्ति छन्दश्शास्त्रम् । यतो हि शिक्षाकल्पनिरुक्तानां वेदानामुच्छारणे वेदोक्तकर्मणे वेदार्थज्ञाने च क्रमशः विनियोगः । परन्तु छन्दोव्याकरणज्योतिषाणां लौकिकसंस्कृते लौकिकव्यवहारे च विनियोगः दृश्यते । छन्दांसि वैदिकाः लौकिकाश्च सन्ति । वेदाङ्गछन्दश्शास्त्रे सप्त छन्दांसि उक्तानि पिङ्गलाचार्येण । तदेवम् –

**तान्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यः ।२।१४॥** [2]

**(अस्यार्थः- गायत्र्याः अग्रे छन्दांसि उष्णिग्-नुष्टुब्-बृहती-पङ्क्ति-त्रिष्टुब्-जगत्याख्यानि क्रमेण भवन्ति)**

लौकिके छन्दश्शास्त्रे षड्विंशति छन्दांसि उक्तानि विद्वद्भिः[3] । तानि - १.उक्ता २.अत्युक्ता ३.मध्या ४.प्रतिष्ठा ५.सुप्रतिष्ठा ६.गायत्री ७.उष्णिक् ८.अनुष्टुब् ९.बृहती १०.पङ्क्तिः ११.त्रिष्टुब् १२.जगती १३.अतिजगती १४.शक्वरी १५.अतिशक्वरी १६.अष्टिः १७.अत्यष्टिः १८.धृतिः १९.अतिधृतिः २०.कृतिः २१.प्रकृतिः २२.आकृतिः २३.विकृतिः २४.सङ्कृतिः २५.अतिकृतिः २६.उत्कृतिः इति । अतः वेदोक्तानि सप्त छन्दांसि लौकिकेऽपि सन्तीत्यवगम्यते । तेष्वपि लौकिके अधिकविनियोगवदस्ति छन्दोऽनुष्टुभ् छन्दः ; यतो हि रामायणमहाभारतपुराणेषु अधिकाः अनुष्टुभ्-श्लोकाः एव दृश्यन्ते।अतः अस्य छन्दसः विषयं जिज्ञास्यामोऽस्मिन् लेखे।

**वैदिकानुष्टुभ्-छन्दः –** पिङ्गलाचार्योक्तसूत्रवत् गायत्री-छन्दसि अष्टाक्षराणां त्रयः पादाः सन्ति [4]। अतोऽत्र गायत्रीछन्दसः एकः पादः इत्युक्ते अष्टाक्षराणीत्यवगन्तव्यं वैदिकप्रकरणे । अनुष्टुभ्-छन्दसः लक्षणमतः गायत्रीछन्दसः चतुष्पादः अनुष्टुब्-छन्दः रचयतीत्युक्तमेवम् –

**अनुष्टुब्गायत्रैः ।३।२३॥** [5]

**(अस्यार्थः – गायत्रैरष्टाक्षरैः पादैः चतुष्पाच्छन्दः अनुष्टुभ् संज्ञं भवति ।)**

वैदिकछन्दस्सु प्रत्येके अष्ट-प्रकाराः सन्ति । ते १.आर्षी २.दैवी ३.आसुरी ४.प्राजापत्या ५.याजुषी ६.साम्नी ७.आर्ची ८.ब्राह्मी इति ।[6] अतः वैदिकानुष्टुब् छन्दसि अष्टप्रकाराः सन्ति ।

| अनुष्टुभ्-प्रकारः | अक्षर-सङ्ख्या | उदाहरणम् |
|---|---|---|
| आर्षी | ३२ | सहस्रशीर्षा पुरुषः । सहस्राक्षः सहस्रपात् । स भूमिं विश्वतो वृत्वा । अत्यतिष्ठद्दशाङ्गुलम् ॥ |
| दैवी | ३ | मखोऽसि ।(तै.आ.४-२) |
| आसुरी | १३ | भृगूणामङ्गिरसां तपसा तप्यध्वम् । (तै.सं. १।१।७।१०॥) |
| प्राजापत्या | १६ | वृश्च प्रवृश्च संवृश्च दह प्रदह सन्दह ।(अथ.सं.१२।५।६२॥) |
| याजुषी | ८ | विश्वे देवा विश्वे देवाः ॥ (तै.सं. ४।१।११॥) |
| साम्नी | १६ | रात्रिः केतुना जुषताँसुज्योतिर्ज्योतिषा स्वाहा ।(शु.यजु. वाज.सं. ३७-२९) |
| आर्ची | २४ | देवो वः सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः । (तै.सं. १।१।५।९॥) |
| ब्राह्मी | ४८ | अयं लोकः प्रियतमो देवानामपराजितः । यस्मै त्वमिह मृत्यवे दिष्टः पुरुष जज्ञिषे ।<br>स च त्वानु ह्वयामसि मा पुरा जरसो मृथाः ॥(अथ.सं. ५।३०।१७॥) |

जगतीछन्दसः द्वाभ्यां पादाभ्यां सह गायत्रीछन्दसः एकः पादः(८ अक्षराणाम् एकपादः) युज्यते चेदपि सः अनुष्टुभ्-छन्दः एव ; यः त्रिपादनुष्टुबिति कथ्यते । तदुक्तम् अनयोः सूत्रयोः –

**त्रिपात् क्वचिज्जगताभ्यां च ।३।२४॥**

**(अस्यार्थः – गायत्रेणैकेन ततो द्वाभ्यां जागताभ्यां क्वचित् "त्रिपादनुष्टुब्" भवति ।)**

**मध्येऽन्ते च ।३। २५ ॥**

**(जागतयोः मादयोर्मध्येऽन्ते च यदा गायत्रपादो भवति, तदानुष्टुबेव स्यात् ।)**

आवयोः सूत्रयोः अवगम्यते यत् जगतीछन्दसः द्वयोः पादयोः आदौ मध्ये अन्ते वा गायत्र्याः एकपादः अर्थात् अष्टाक्षरपादः आगमिष्यति चेत् तदपि अनुष्टुभ् एव इति । अत्र त्रयोः प्रादयोः एव मन्त्रः समाप्यते इत्यतः इतीदं त्रिपादनुष्टुभ् इति कथ्यते । अत्र जगतीछन्दसि द्वादशाक्षरा एकपादे वर्तन्ते । त्रिपादनुष्टुभि चत्वारिंशदक्षराणि द्वयोः पादयोः अपि च गायत्रीछन्दसः एकपादे अष्टाक्षराणि आहत्य द्विचत्वारिंशद्वर्णाः भवन्ति (१२+१२+८=३२) । अनुष्टुभ्-छन्दस्यपि प्रतिपादे अष्टाक्षरानि ; चत्वारः पादाः ; आहत्य द्वात्रिंशद्वर्णाः एव भवन्ति (८x४=३२)।

## लौकिकानुष्टुभ्-छन्दः –

वैदिकानुष्टुभ्-छन्दसः "अष्टाक्षराणां चतुष्पादः" इति सूत्रमनुसृत्यैव लौकिकेषु छन्दश्शास्त्रीयग्रन्थेषु तल्लक्षणमुक्तम् । वृत्तरत्नाकरे नाट्याशास्त्रे च एकाक्षरादारभ्य षड्विंशत्यक्षरपर्यन्तं पृथक् पृथक् छन्दसः नाम उक्तम् ; तानि नामानि पूर्वमक्तमस्मिन् लेखे । तत्र अष्टमः छन्दः अर्थात् अष्टाक्षरवच्छन्दः अनुष्टुभित्युक्तम् ।

वृत्तरत्नाकरे मात्रा वर्ण भेदेन छन्दः द्विविधः इत्युक्तम् । तदेवम् –

**पिङ्गलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा । मात्रावर्णविभेदेन छन्दस्तदिह कथ्यते ॥**[7] इति ।

उभयप्रकारेऽपि अनुष्टुभुक्तम् ; तदत्र कोष्टकद्वये विवरिष्यते ।

| वृत्तरत्नाकरोक्तेषु मात्राछन्दस्सु अनुष्टुभ्-प्रकाराणि | | |
|---|---|---|
| **अनुष्टुम्नाम** | **लक्षणम्** | **विवरणम्** |
| वक्रम् | वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् । | प्रथमाक्षरात् परतः नगणसगणौ न भवेताम् ।<br>किन्तु चतुर्थाक्षरात् परतः यगणः कार्यः । |
| पथ्यावक्रम् | युजोर्जेन सरिद्भर्तुः पथ्यावक्त्रं प्रकीर्तितम् । | समपादयोः चतुर्थाक्षरात् परे जगणः कार्यः । |
| विपरीतपथ्यावक्रम् | अयुजोर्जेन वारिधेस्तदेव विपरीतादि । | विषमपादयोः चतुर्थाक्षरात् परे जगणः कार्यः । |
| चपलावक्रम् | चपलावक्त्रमयुजोर्नकारश्चेत्पयोराशेः ॥ | विषमपादयोः चतुर्थाक्षरात् पुरतः नगणः । |
| युग्मविपुला | यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता ।<br>सैव तस्याखिलेष्वपि ।(मतभेदः) | समपादयोः सप्तमाक्षरे लघू भवतः ।<br>सर्वेषु पादेषु सप्तमाक्षणि लघूनि ।(मतभेदः) |
| भविपुला | भेनाब्धितो भविपुला | चतुर्थाक्षरात् परतः भगणेन भविपुला स्यात् । |
| रविपुला | इत्थमन्या रश्चतुर्थात् | चतुर्थाक्षरात् परतः रगणेन रविपुला स्यात् । |
| नविपुला | नोऽम्बुधेश्चेन्नविपुला । | चतुर्थाक्षरात् परतः नगणेन न-विपुला स्यात् । |
| तविपुला | तोऽब्धेस्तत्पूर्वान्या भवेत् । | चतुर्थाक्षरात् परतः तगणेन तविपुला स्यात् । |

| वृत्तरत्नाकरोक्तेषु मात्राछन्दस्सु अनुष्टुभ्-प्रकाराणि | | |
|---|---|---|
| **अनुष्टुम्नाम** | **लक्षणम्** | **विवरणम्** |
| चित्रपदा | भौ गिति चित्रपदा गः | द्वौ भगणौ गुरुद्वयम् च । |
| विद्युन्माला | मो मो गो गो विद्युन्माला | द्वौ मगणौ गुरुद्वयम् च ।(सर्वाण्यक्षराणु गुरूणि) |
| माणवकम् | माणवकं भात्तलगाः | भगणः तगणः लघुः गुरुः च। |
| हंसरुतम् | म्नौ गौ हंसरुतमेतत् | मगणः नगणः गुरुद्वयम् च । |
| समानिका | र्जौ समानिका गलौ च | रगणः जगणः गुरुः लघुः च । |
| प्रमाणिका | प्रमाणिका जरौ लगौ | जगणः रगणः लघुः गुरुः च । |
| वितानम् | वितानमाभ्यां यदन्यत् | समानिका-प्रमाणिकाभ्यां अन्यंल्लक्षणं वितानमित्युक्तम्।<br>(तदेवं द्विप्रकारकं भवितुमर्हति तद्यथा –<br>रगणः जगणः लघुः गुरुः च ।<br>जगणः रगणः गुरुः लघुः च ।) |

श्रीमत्कालिदासविरचिते श्रुतबोधाख्ये ग्रन्थे अनुष्टुभ्-जातौ (अष्टाक्षरजातौ) पद्यं, माणवकं, नखस्वरूपिणी, विद्युन्माला चेति चतुष्प्रकारका अनुष्टुभ् उक्ता ।

१. **पद्यम्** - द्वयोः श्लोकयोः पद्यलक्षणमाह –

**श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् । द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥**

**पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः । षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम् ॥**[8] इति ।

द्वयोः श्लोकयोः अर्थे - "सर्वत्र चरणेषु पञ्चमवर्णं लघु भवति । द्वितीयचतुर्थयोः चरणयोः सप्तममक्षरं लघु भवति ।सर्वेषु चरणेषु षष्ठमक्षरं गुरुर्भवति" इति समानं वर्तते । परन्त्वत्रोक्तं **"पञ्चमं लघु सर्वत्र....एतत्पद्यस्य लक्षणम्"** इति द्वितीयं श्लोकं अनुष्टुभ्-छन्दसः लक्षणश्लोकमिति बहवः कथयन्ति । तन्न । अनुष्टुभ्-छन्दसः लक्षणं प्रतिपादे अष्टाक्षरत्त्वम् । स तु अनुष्टुभ्-जातिः इत्यपि कथ्यते । अस्मिन् अनुष्टुभ्-जातौ अथवा अष्टाक्षरजातौ **"पद्यम्"** इतीदं श्रुतबोधोक्तं छन्दसः नाम वर्तते । अतः इदं पद्यमिति अनुष्टुभ्-प्रकारकस्य लक्षणं ; न तु अनुष्टुभ् लक्षणम् ।रामायणादि आर्षग्रन्थेष्वपि अनुष्टुभ्-छन्दसि अस्य लक्षणस्य अनुसरणं नस्तीत्ययः एतत् स्पष्टं भवति [9] ।

२. **माणवकक्रीडम्** – तल्लक्षणमाह –

**आदिगतं तुर्यगतं पञ्चमकं चान्त्यगतम् । स्याद्गुरु चेत्कथितं माणवकक्रीडितकम् ॥**[10] इति ।

प्रथमं चतुर्थं पञ्चमं तथा चाष्टममक्षरं लघुभवति चेत्तत् माणवकक्रीडम् । वृत्तरत्नाकरोक्तं माणवकम् अत्रोक्तं माणवकक्रीडं च समाने स्तः ।

३. **नगस्वरूपिणी** – लक्षणमेवमाह –

**द्वितुर्यषष्ठमष्टमं गुरुप्रयोजितं यदा । तदा निबोधयन्ति तां बुधा नगस्वरूपिणीम् ॥**[11] इति ।

यदा द्वितीयं चतुर्थं षष्ठम् अष्टमं चाक्षरं गुरु भवति तदा नगस्वरूपिणीति छन्दः । वृत्तरत्नाकरे एषा प्रमाणिका इति उक्ता ।

४. **विद्युन्माला** – तल्लक्षणमुक्तम् –

**सर्वे वर्णाः दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः । विद्वद्वृन्दैर्वीणापाणि व्याख्याता सा विद्युन्माला ॥**[12] इति ।

यत्र सर्वे वर्णाः गुरुभूताः भवन्ति तत्र छन्दसः नाम विद्युन्माला इति । अन्यग्रन्थेष्वपि इदं छन्दः उक्तम् ।

## नाट्यशास्त्रे अनुष्टुभ्-छन्दः –

षड्विंशतिछन्दसां प्रस्तारयोगतः कति वृत्तानि भवन्तीति नाट्यशास्त्रे १४ अध्याये उक्तम् । तत्रानुष्टुभि २५६ प्रकाराः भवन्तीत्यप्युक्तम्।[13] तेषु सर्वे प्रख्याताः नेत्युक्त्वा सिंहलेखा, मत्तचेष्टितं, विद्युन्माला, चित्तविलसितञ्चेति चत्वारः प्रकाराः उक्ताः ।

**१. सिंहलेखा –**

**आद्यं तृतीयमन्त्यं च पञ्चमं सप्तमं यथा । गुरूण्यष्टाक्षरे पादे सिंहलेखेति सा स्मृता**[14] ॥ इति लक्षणम् । एतादृशं छन्दः अन्यग्रन्थेषु नोक्तम् ।

**२. मत्तचेष्टितम् –**

**चतुर्थं च द्वितीयं च षष्ठमष्टममेव च । गुरूण्यष्टाक्षरे पादे यत्र तन्मत्तचेष्टितम् ॥** इति लक्षणम् । प्रस्तारः क्रियते चेत् अवगम्यते यत् इदं छन्दः वृत्तरत्नाकरोक्ता प्रमाणिका एवेति ।

**३. विद्युन्माला –**

**अष्टाक्षरकृते पादे सर्वाण्येव भवन्ति हि । गुरूणि यस्मिन् सा नाम्ना विद्युन्मालेति कीर्तिता ॥** इति लक्षणम् । इदं छन्दः सर्वत्र समानम् ।

**४. चित्तविलसितम् –**

**पञ्चमं सप्तमं चान्त्यं गुरु पादेष्टके तथा । छन्दोज्ञैर्ज्ञेयमेतत्तु वृत्तं चित्तविलासितम् ॥** इति लक्षणम् । इदं छन्दः केवलं नाट्यशास्त्रे उक्तम् ।

पिङ्गलकृतं छन्दश्शास्त्रं उपलभमानेषु छन्दश्शास्त्रीय-ग्रन्थेषु आदिमम् । अत्र वैदिकानि लौकिकानि छन्दांसि उक्तानि । तदनुसृत्यैव वृत्तरत्नाकरं रचितमिति केदारनाथेनैव उक्तम् । लौकिकानुष्टुभि पिङ्गलछन्दसि माणवकक्रीडितकं, चित्रपदा, विद्युन्माला अपि च हंसरुतं चेति चत्वारि वृत्तान्युक्तानि । तानि सर्वाणि तथैव वृत्तरत्नाकरे उक्तत्वात्, ग्रन्थविस्तारभयाच्च अत्र नोच्यन्ते ।

एतेषामध्ययनेन अवगम्यते यत् अष्टाक्षरजातौ अनुष्टुभि नाट्यशास्त्रे यथा उक्तं तथा २५६ प्रकाराः सन्ति । तेषु अन्यान्यग्रन्थेषु अन्यान्यप्रकाराः नाना नाम्ना उक्ताः । कानिचन वृत्तानि सर्वेषुग्रन्थेषु उक्तानि ; कानिचन केषुचित् ग्रन्थेषु उक्तानि । तेषां लक्षणान्यनुसृत्य यथासाध्यं श्लोकरचना भवितुमर्हति । लक्षणानि विहाय रचयन्ति चेदपि अष्टाक्षरयुते अनुषुष्टुभ्-छन्दसि नाट्यशास्त्रोक्तेषु २५६ प्रकारेषु एकस्मिन् अन्तर्भविष्यत्येव स श्लोकः ।

## पादटिप्पणी

1. पाणिनीयशिक्षायाम्, अपि च परम्परायाम् - "छन्दः पादौ शब्दशास्त्रं च वक्त्रं कल्पः पाणी ज्योतिषं चक्षुषी च । शिक्षा घ्राणं श्रोत्रमुक्तं निरुक्तं वेदस्याङ्गान्येवमाहुर्मुनीन्द्राः ॥" । 2. पिङ्गलछन्दश्शास्त्रम् । 3. उक्तात्युक्ता तथा मध्या....तथातिकृतिरुत्कृतिः ॥ वृत्तरत्नाकरः अ-१ श्लो १९-२१, एकाक्षरं भवेदुक्तं ...... षड्विंशत्युत्कृतिर्भवेत् ॥ नाट्यशास्त्रम् अ-१४ श्लो ४८-५४ । 4. लौकिकगायत्रीछन्दसि ६ अक्षराणां ४ पादाः । उभयत्र आहत्य २४ अक्षराणि समानानि । 5. पिङ्गलसूत्रम् । 6. पिङ्गलसूत्रम् २।३॥ तः २।१०॥ पर्यन्तानि सूत्राणि । 7. वृत्तरत्नाकरः अ-१ श्लो-४ । 8. श्रुतबोधः श्लो -१०,११ । 9. त्वमेव राजा धर्मज्ञ इति रामं वचोऽब्रवीत् । रामोऽपि परमोदारः सुमुखः सुमहायशः ॥ रामायणं, बालकाण्डः, अ-१ श्लो ३६ । अत्र प्रथमपादे पञ्चमाक्षरं जा इतीदं गुरुः । 10. श्रुतबोधः श्लो-१२ । 11. श्रुतबोधः श्लो-१३ । 12. श्रुतबोधः श्लो-१४ । 13. षट्पञ्चाशच्छते द्वे च वृत्तानामप्यनुष्टुभि ॥नाट्यशास्त्रम् अ-१४ श्लो-६९ । 14. ना.शा अ-१५ श्लो-१५

## ग्रन्थसूची –


१. पिङ्गलछन्दश्शास्त्रम् – पिङ्गलाचार्यः सं – अनन्तशर्मा – निर्णयसागरप्रकाशनम् – १९३८

२. वृत्तरत्नाकरः – केदारभट्टः सं – बलदेव उपाध्यायः – चौकाम्बा सुरभारती प्रकाशनम् - २०१७

३. श्रुतबोधः – कालिदासः सं – हरिप्रसादशर्मा – निर्णयसागरप्रकाशनम् – १८१५

४. नाट्यशास्त्रम् (तृतीयो भागः)- भरतमुनिः सं- डा॥ पारसनाथद्विवेदी – सम्पूर्णानन्दसंस्कृतविद्यालयः – २००१

५. श्रीमद्वाल्मीकिरामायणम् – सं – रङ्गनाथशर्मा – रामायणप्रकाशनसमिति बेङ्गलूरु - २००७



**Dr. Naveen Bhat**
Assistant Professor in Sanskrit
MES Institute of Management
Rajajinagara, Bengaluru, Karnataka
Contact No. : 9480342408
E-mail : naveengbhat@gmail.com


***************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# संस्कृतसाहित्यक्षेत्रे डा. वेणीमाधवशास्त्रीणां योगदानम्

शोधाच्छात्रः
**वसन्तशास्त्री रा. पुराणिकः**, बेङ्गळूरु, कर्नाटक
मार्गदर्शकः
**विद्वान् डा. जयरेवण्ण एम्. वि.**, बेङ्गळूरु, कर्नाटक

**प्रस्तावना :-**

डॉ. वेनिमाधवशास्त्री जोशीवयर्याणां संस्कृते अपारं ज्ञानं आसीत्, गहनं ज्ञानं च प्राप्तम्। संस्कृतम्, आङ्ग्लभाषा, प्राकृत, योगादीनि ग्रन्थाः रचयित्वा पी. एच्. डी. तानि कार्याणि सन्ति येषां अध्ययनं युवानः प्रौढाः कर्तुं शक्नुवन्ति। शास्त्री इत्यस्य जन्म २०-११-१९४९ दिनाङ्के धारवाडनगरे अभवत्, तस्य परिवारे शास्त्रस्य, वैदिकस्य, आध्यात्मिकज्ञानस्य परम्परा अस्ति तथा च तत्कुलपरम्परा रूपेण निर्वाहितवान् अस्ति, देवी सरस्वती तस्य गृहे निवसति, तस्य अर्थः अस्ति यत्कोऽपि त्रुटिः नास्ति। शास्त्री अस्ति ३० वर्षाणि यावत् अध्यापनं कुर्वन् अस्ति। कर्नाटकमहाविद्यालये तथा कर्नाटकविश्वविद्यालये धारवाडे च संस्कृतप्राकृतयोगस्य प्राध्यापकत्वेन कार्यं कृत्वा अस्मिन्विश्वविद्यालये १७ वर्षाणि यावत्जैनशास्त्रविभागे सेवां कृतवान्। UGC, एनएसी. आङ्ग्लभाषायाः सदस्यत्वेन कार्यं कृतवान्तथा कन्नडभाषाकृतयः प्रकाशिताः सन्ति। आकाशवाण्यां प्रकाशनार्थं बहूनि कृतयः सज्जीकृताः, दूरदर्शने संस्कृतनाट्येषु भागं गृहीतवन्तः, नाटकानि निर्देशितानि च। तस्य कृतयः सन्ति-

| | | | |
|---|---|---|---|
| १) काव्यग्रन्थाः | २) वेदान्तग्रन्थाः | ३) साहित्यग्रन्थाः | ४) ऐतिहासिकग्रन्थाः |
| ५) अनुवादग्रन्थाः | ६) कथाग्रन्थाः | ७) रेडियोनाटकाः | ८) समश्रग्रन्थाः |
| ९) शोधाग्रन्थाः | १०) संस्कृतविषयेकन्नड-आङ्ग्लग्रन्थाः | | |

**१) काव्यग्रन्थाः -**

काव्यग्रहः कविताञ्जलिः - काव्यसंग्रहः सप्तविमशतिः काव्याः सन्ति सलीलारमणि स त्रिपाथगः, श्रीशङ्कराचार्यः मामादेहीकरवलम्बं, कविकामनाशुभाशंसनम्, प्रकृतिः: प्रकृतिं, गङ्गानदी दिल्लिनागरम्, संस्कृतम्, वर्द्धक्यम्, विधविशयपरणं कवितानम्, सम्वेषः अस्मीन कवितकुसुमालीनाम्।

२) **कविताः -**

कविताञ्जलिः - एषः काव्यसंग्रहः अस्ति यस्मिन् सप्तविमशतिः काव्यानि निम्नलिखितरूपेण सन्ति, सलीलारमणि स त्रिपाथगः, श्रीशङ्कराचार्यः मामा देहि करवलम्बं, कवि कामना शुभाशंसनं, प्रकृतिः: प्रकृतिं, गंगानादी दिल्लिनागरम्, संस्कृतम्, वर्मेधक्यम्, विदविषयापराननाम कवितनाम, सम्वेशः : अस्मीन सुमकुठाकवि: सन्ति। भारतस्य वैभवस्य चित्रणं सुन्दराणि काव्यानि सन्ति। * बाला-संस्कृत-सारिका:- अस्मिन् काव्यसंग्रहे त्रिमशत् काव्यसंग्रहं रचितवान् अस्मिन् च शारदानीति, मयुराः, लघु जागृही पाठिका, श्रीमति नेहरू कमला महोदैनी, इत्यादीनि गीतात्मककथानां निर्माणं कृतवान्। तथा गीता कथा: नारायणम् उपवासः, साकेतस्य च राजकुमारः, नयने सजले कुरुता, एतादृशी महत्त्वपूर्णा काव्यसृष्टिः अस्ति। संस्कृत साहित्यस्य रमनीयकं तवत परेवचमिती तु विदिताव्रतन्त एव। प्रौधामहाकाव्यनि नटकानि हृदयानि रचिता गद्यम् अयं ग्रन्थः नूतनविधा अस्ति ।

३) **वेदान्त ग्रन्थाः -**

अद्वैत दर्शन सारांश: * ब्रह्म नमावली माला * शारीरिक मीमांसा, अद्वैत सिद्धान्त सारांश अस्ति । इदं ब्रह्मनामावली मालाग्रन्थं बहुमूल्यं पाषाणैः निर्मितं माला अस्ति यत् अस्य सिद्धान्तस्य विविधरूपेण समर्थनं करोति।

श्लोकाः अतीव सरलाः इव भासन्ते चेदपि तस्य सम्यक् व्याख्यानं आवश्यकम्। तथापि डा. वेणीमाधवशास्त्री संस्कृतसाहित्यस्य अनुवादं व्याख्यानं च लिखित्वा योगदानं दत्त्वा लोहमुष्टिवत् सिद्धान्तं सुलभव्याख्यानेन सामान्यजनस्य समीपम् आनयितुं प्रशंसनीयं कार्यं कर्तुं सफलः अभवत्। ईशन्य वास्या मिदं सर्वं यत् किञ्चित जगत्य जगत इत्यादि भगवद्गीतायां यत् आत्मा सर्वस्य आधारः अस्ति तथा च वेदान्तस्य सारं प्रस्तुतं यथा सुलभतया अवगन्तुं शक्यते।

साहित्यग्रन्थाः कन्नड-आङ्ग्लभाषायां संस्कृत-साहित्यग्रन्थानां अनुवादं कृत्वा प्राकृत-कृतीनां संस्कृतभाषायां च अनुवादं कृत्वा अनेकानि संस्कृत-कृतयः रचयत् मुलादेवेन जैन-साहित्यस्य सुप्रकारेण रचितम् संस्कृतं वाम्या प्राणी विज्ञानं तथायोगदानं संस्कृतं महत्त्वं दत्तवान्, सः सफलतया संस्कृतस्य सेवां प्रदातुं कार्यं कुर्वन् अस्ति अनेकविधासु साहित्यम् ।

४) **शोधलेखाः -**

संस्कृतेन १५२ तः अधिकाः शोधलेखाः लिखिताः सन्ति । इच्छुकानाम् कृते संग्रहीतं उपयोगी चसूचना। सःभासकालिदासदीकविभिःप्रभावितःआसीत्,वैदर्भिशैल्याःप्रभावःवयंस्पष्टतयाद्रष्टुंशक्नुमः।

५) **काव्यग्रन्थाः- -**

कन्नडभाषायां बहूनां संस्कृतग्रन्थानां स्वरां व्याख्यानं कृत्वा मौलिककाव्यलेखनं कृत्वा संस्कृतसाहित्यजगति स्वकीयं योगदानं कृत्वा जिज्ञासुनां कृते वरदानं कृतम्। तद्विधं सर्वभारतस्तरस्य अपि लाभप्रदं भविष्यति। एतदतिरिक्तं संस्कृते स्वकीयानि ग्रन्थानि अपिरचयत्। कृतिसङ्ग्रहः, कथासङ्ग्रहः संस्कृतं शिक्षमाणानां छात्राणां हिताय तेन निर्मिताः बहूनि कृतयः बालासंस्कटसारिका, संस्कृतकाव्यानि, लघुनाटकानि बालानाम्कृते अतीव उपयोगिनो भवन्ति। एतेषां अतिरिक्तं कन्नडभाषायां केन्द्रीयसाहित्यअकादमीपुरस्कारं प्राप्तवन्तः डॉ. वैदेहिरस्य क्रौञ्चपक्षिगु इति कथासङ्ग्रहेण सम्पूर्णे भारते संस्कृतप्रशंसकानां कृते कन्नडसाहित्यस्य परिचयः कृतः। चन्द्रशेखरकम्बरस्य महामयीनाटकं संस्कृतभाषायां लिखित्वा प्रकाशितम्, यत्भारतस्य अपि गौरवम् अस्ति ।

अन्योक्तिमुक्तावली कवितामञ्जरी च पण्डितप्रकाशभालचन्द्रशास्त्री इत्यस्य जीवनवृत्तान्तं संस्कृतभाषायां लिखित्वा प्रकाशनाय सज्जा अस्ति। संस्कृतकथाः सौधामिनी इतिनाम्ना अस्मिन्कथापुस्तके भक्तिरस, वीररस, सगहवैराग्यादिभ्यः विविधविषयेषु आधुनिकजनानाम्हृदयस्पन्दनानि सृष्टानि बालसाहित्यकाव्यानि: गीताकथा, लघनाटकं, बालसाहित्यकार्ये काव्यं, एतानि सन्ति बालकानां कृते उपयोगी कार्याणि, ते बालानाम्मनसः ज्ञानस्य च कृते उपयुक्तानि कार्याणि सन्ति। बालानां समग्रविकासस्य अनुरूपाः सन्ति। प्रकाशनाटकम्लघुनाटकं बालकानां कृते विनिर्मितम् अस्ति तथा च बालकानां भावनां नाटकशैलीं च ज्ञातुं सहायतार्थं विनिर्मितानि कार्याणि सन्ति तथा च बालकानां कृते लघुनाटकानाम् अभिनयाय अतीव उपयुक्तानि सन्ति। पुण्यकन्या, मरीनन्दस्य चरित्रम् इत्यस्य विषये संस्कृतखण्डकाव्यद्वयं प्रकाशनार्थं सज्जम् अस्ति।

६) **अनुवादितकृतयः –**

केन्द्रसाहित्यअकादमीद्वारा प्रकाशितेन कन्नडकवियाा वैदेह्याः क्रौञ्चपक्षिणा: ग्रन्थस्य संस्कृते अनुवादं कृत्वा कन्नड-संस्कृतभाषा-बन्धनं वर्धितवान्। शोधलेखाः द्विशताधिकलेखानां लेखकः। धर्मः तथा विज्ञानं, वेदपौरुषेयत्वविचार: संस्कृतवामये गुप्तचरव्यावस्था इत्यादिषु शोधलेखाः लिखिताः सन्ति। संस्कृतविषयेषु कन्नडआङ्ग्लप्रबन्धाः सुहासिनी, भामती, ग्रामवानरअप्रकाशिताः ग्रन्थाः इत्यादयः जीवनगीताञ्जलिः कन्नडभाषायां पञ्चशताधिकाः मुक्तिकाः लिखितवन्तः। एवं जीवनपर्यन्तं सः संस्कृतसाहित्ये महत्योगदानं दत्तवान्, बाल्यकाले अमरकोशं कण्ठस्थं कृत्वा गहनं अध्ययनविषयज्ञानं प्राप्तवान्। सरलशैल्या रचिताः कृतयः हृदयस्पर्शी तथा शास्त्रीविषयाः, शोधप्रधानं उन्नतसंस्कृतसाहित्यं शोधछात्रादिनां कृते दीपकं भवति, अधिकानि बहूनि कृतयः सरस्वतजगत् अर्पयितुं सज्जाः सन्ति। एवं संस्कृतसाहित्यजगति तस्य महत्योगदानम् अस्ति।

**उपसंहार : -**

परामर्शग्रन्थाः - डॉ. वेनिमाधवासस्त्री जोशी इत्यस्य संस्कृत-साहित्यस्य संवर्धनेन उत्तम-फसलं दातुं सर्वविध-ग्रन्थाः निर्मिताः, ये युवानः वृद्धाः च तस्य कृतीः पठित्वा ज्ञान-क्षुधां पूरयितुं शक्नुवन्ति। अस्मिन् विषये काव्यं, शोध-लेखाः, बाल-साहित्यम्, जैन-साहित्यम्, योगः, नाटककृतयः, संस्कृतसम्मेलनेषु पठितानि भाषणानि अपि संस्कृतग्रन्थाः भवन्ति येन संस्कृतस्य प्रशंसा वर्धते, प्रशंसकाः च। कृतवन्तः तस्य कृतयः विद्यालयस्य महाविद्यालयस्य च पाठ्यपुस्तकेषु समाविष्टाः सन्ति । संस्कृत-प्राकृतग्रन्थानां कन्नड-आङ्ग्लभाषायां अनुवादः कृतः येन सर्वे मूलसंस्कृतग्रन्थानां ज्ञानेन सह संस्कृतं अवगन्तुं शक्नुवन्ति।

**परिशीलितग्रन्थसूची**

१) अद्वैत दर्शन - डा. वेणीमाधवशास्त्री - ब्रह्माविद्या प्रकाशनम्- २०१९-धारवाड
२) लेखमञ्जरी - डा. वेणीमाधवशास्त्री - रूपा प्रकाशन –२०१८ - धारवाड
३) शारीका मीमामसा - डा. वेणीमाधवशास्त्री - ब्रह्माविद्या प्रकाशनम् -२००१-धारवाड
४) संस्कृत सप्त महाकाव्या, - डा. वेणीमाधवशास्त्री-ब्रह्माविद्या प्रकाशनम्-२०१६ - धारवाड
५) ब्रह्म नामावली माला - डा. वेणीमाधवशास्त्री- ब्रह्माविद्या प्रकाशनम्-२०११-धारवाड
६) संस्कृत काव्य मंजरी - डा. वेणीमाधवशास्त्री - महाती प्रकाशन -२००० - धारवाड
७) कवितञ्जलि - डा. वेणीमाधवशास्त्री- ब्रह्माविद्या प्रकाशनम् – २०१५-धारवाड
८) मुलादेवो - डा. वेणीमाधवशास्त्री - महाती प्रकाशन-२०१४-धारवाड

**वसन्तशास्त्री रा. पुराणिकः**
शोधच्छात्रः
कर्णाटक संस्कृत विश्वविद्यालयः,
चामराज पेटे-५६००१८, बेङ्गलूरु, कर्नाटक
Contact No. : 9449254997
E-mail : pvshastri13@gmail.com

*********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# मीमांसादर्शने मोक्षविचारः

**डा. प्रशान्त गांव्करः**
सहायकप्राध्यापकः
के एल् ई श्री बि एम् के आयुर्वेदमहाविद्यालयः
बेळगावी, कर्णाटकम् - ५९०००३
वैद्युतिकसङ्केतः- prashantpsjr@gmail.com
Contact No. : 9449623988

**शबरेण कृतं भाष्यं भट्टपादेन वार्तिकम् । सूत्रं जैमिनिना प्रोक्तं वन्दे चेमान् मुनीनहम् ॥**

दर्शनप्रपञ्चे आस्तिकदर्शनानां मूर्धन्यस्थानं भजते पूर्वमीमांसाशास्त्रम् । धर्मार्थकाममोक्षाख्येषु चतुर्विधपुरुषार्थेषु प्रथमस्य धर्मस्य परमं प्रमाणं भवति वेदः । तादृशस्य वेदस्य यथार्थनिर्णयार्थं प्रवृत्तमिदं मीमांसाशास्त्रम् ।

**धर्मे प्रमीयमाणे[1] हि वेदेन करणात्मना । इतिकर्तव्यताभागं मीमांसा पूरयिष्यति ॥[2]**

इत्येवं वेदप्रणिहितो धर्मः इतिकर्तव्यतादिभिः सम्यक् विवेचितः इति सर्वथा धर्मानुष्ठातृभिः मीमांसैव अनुसरणीया ।

शास्त्रेऽस्मिन् प्राधान्येन धर्मो विचारितः । परमपुरुषार्थः मोक्ष एवेति क्वचिन्मोक्षस्वरूपविचारोऽपि प्रदर्शितः । तत्र तावत् **"स एष यज्ञायुधी यजमानोऽञ्जसा स्वर्गं लोकं याति"**[3] इति सशरीरकं स्वर्गगमनं तावत् प्रत्यक्षविरुद्धम् । शरीरसम्बन्धात् यस्य तच्छरीरं सोऽपि यज्ञायुधी, आत्मा इत्यर्थः । एवं **शरीरसम्बन्धः एव बन्धः, तदभावो मोक्षः**[4] इति भाट्टमीमांसकानां समयः ।

चार्वाकास्तावत् शरीरापातः एव मोक्षः इत्याहुः । शरीराद्भिन्नः आत्मा वर्तत एव इत्यनेन तस्यैव मोक्षः, न तु शरीरस्य । तस्मान्न शरीरापातः मोक्षः ।

सौगतास्तावत् नीलपीतादिविषयोपाधिविलये उपाधिरहितविज्ञानसन्ततेः स्वरूपेणावस्थानं मोक्षः इति । तन्न युक्तम् – निर्विषयकज्ञानसन्तानस्य स्वरूपेणावस्थितिः नैवोपपद्यते । क्षणे-क्षणे निरन्तरमुत्पद्यमानविनश्यमानबोधसन्तानेषु कस्यापि ज्ञानक्षणस्य मोक्षफलं नानुभूयते । एवमननुभूयमाने वस्तुनि पुरुषेच्छाभावात् मोक्षस्य पुरुषार्थत्वमेव न स्यात् ।

एकविंशतिदुःखविच्छेदो मोक्षः इति नैयायिकाः कीर्तयन्ति । देहः, षडिन्द्रियाणि, षड्विषयाः, षड्बुद्धयः, सुखम्, दुःखं चेति एकविंशतिप्रभेदं च दुःखमाचक्षते । तत्र सुखस्यापि विच्छेदेन मोक्षस्यापुरुषार्थत्वप्रसङ्गः । पुरुषार्थत्वे दुःखाभावः पर्याप्तः, सुखं भवेदेवेति नास्ति इति चेत्, न, तथात्वे सुषुप्तेः उत्थितः पुरुषः सुषुप्तिकालीनं दुःखाभावं स्मरन् प्राप्तसुखवियोगेन दुःखमनुभवति । दुःखाभावस्य सुषुप्तौ प्राप्तौ तत्र यदि सुखं न स्यात्तर्हि उत्थिते सुखवियोगरूपं दुःखं कथं वा अनुभूयेत ? तस्मात् ज्ञायते पुरुषार्थत्वस्वीकारे दुःखाभावः न पर्याप्तः, सुखभावोऽपि तत्र स्यादेव ।

प्रकृतिपुरुषविवेकज्ञानात् पुरुषस्य स्वरूपेणावस्थानं मोक्षः इति सांख्याः । तस्यापि सुखव्यतिरेकेण मोक्षस्य अपुरुषार्थत्वमेव स्यादिति तन्निरस्तम् ।

प्रपञ्चविलयो हि मोक्षः इति वेदान्तिनः । आत्मनः आनन्दमयत्वस्वीकारात् नापुरुषार्थत्वम् । अथापि प्रपञ्चविलयस्यैवाभावात् एवं मोक्षस्वरूपकथनं न युज्यते । प्रपञ्चस्य मायामयत्वात् विज्ञानोदये तल्लयः एवेति चेत्, न । प्रपञ्चो मिथ्या, दृश्यत्वात्, स्वप्नप्रपञ्चवत् इति जगतः मायामयत्वसिध्यर्थं प्रयुक्तेऽनुमाने किं नाम मिथ्यात्वम् ? अत्यन्तासत्वं वा ? सदसद्विलक्षणत्वं वा ? बाध्यत्वं वा ? इति । अत्यन्तासत्वे नरविषाणवत् जगतः प्रतीतिरेव न स्यात् । अन्यत्राप्रसिद्धत्वात् पक्षस्य प्रपञ्चस्य अप्रसिद्धविशेषणदोषत्वेन सदसद्विलक्षणत्वमपि न मिथ्यात्वम् । नापि बाध्यत्वम्, जाग्रत्प्रपञ्चस्य बाधकप्रमाणस्यानुपपत्तेः । सुखोपभोगरूपस्य मोक्षत्वे स्वर्ग एव कल्पनीयः । तथा **'यदुत्पद्यते तन्नश्यति'** इत्यतः तस्य क्षयित्वमस्त्येव । भावपदार्थाः उत्पत्तिधर्मकाः घटादयः क्षयधर्मकाः तद्वदिति । उच्यते –**शरीरसम्बन्धो हि बन्धः, तदभावो मोक्षः** इति ।

**निष्पन्नानां देहानां यः प्रध्वंसाभावः यश्चानुत्पन्नानां प्रागभावः सः मोक्षः**[5] इति । शरीरसमन्बन्धश्च कर्मनिमित्तः । कर्मक्षयादेव बन्धः न भवति । अभावात्मके मोक्षे नित्यत्वं च सिध्यति । एतादृशस्य अविद्यानिवृत्तिरूपज्ञानमेव साधनमिति वक्तुं न शक्यते । क्रियायाः कस्याश्चित् अभावः फलमिति केनापि नेष्यते । तर्हि कथमस्य सिद्धिरिति चेत् – कर्मक्षयादेव ।

तथा हि - यो हि देहात् विविक्तमनन्तमजरममरमदुःखात्मकमात्मानं जानाति तस्य देहसम्प्रयोगविरक्तस्य पूर्वकृतानां कर्मणां फलभोगेन क्षयात् तन्निमित्ते शरीरे पतितमनागतानां च कर्मणामननुष्ठानादेवासत्वात् देहान्तरानुत्पत्तेः अत्यन्तासम्बन्धः शरीरेण सिध्यति ।

मुमुक्षुभिः एवं कर्तव्यमित्याहुः भट्टपादाः –

**मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धयोः । नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया ॥**[6] इति ।

काम्यनिषिद्धे कर्मणी स्वफलयोः अभ्युदयप्रत्यवाययोः उपभोगाय शरीरमारभेते । शरीरावस्थां परिजिहीर्षता मोक्षार्थिना न कर्तव्ये । नित्यनैमित्तिके पूर्वकृताधर्मक्षयाय कर्तव्ये । तदैव पूर्वकृतकर्मक्षयद्वारा मोक्षः सिध्यति ।

नित्यानि अग्निहोत्रादीनि स्वर्गार्थान्यपि इति कथं तत्कुर्वतः मोक्षः इति चेत् –**"प्रार्थ्यमानं फलं दृष्टं न चानिच्छतो भविष्यति"**[7] इति ।

**दुःखात्यन्तसमुच्छेदे सति प्रागात्मवर्तिनः । सुखस्य मनसा भुक्तिर्मुक्तिरुक्ता कुमारिलैः ॥**[8]

इति मानमेयोदयः । अनुभवहेतोरभावात् संसारावस्थायां सुखानुभवः न भवति । देहेन्द्रियाणामात्यन्तिकपरिध्वंसानुगृहीतं मनः तदनुभवसाधनम् । न मुक्तेन्द्रियस्य कथं मनसा भुक्तिरिति वाच्यम् । यतः मुक्तस्य बाह्येन्द्रियाण्येव निवर्तन्ते, न तु मनः, तत्तु तस्यामवस्थायामनुवर्तते ।

निषिद्धकाम्यकर्मभ्यःनित्यनैमित्तिकप्रायश्चित्तप्रध्वस्तदुष्कृतेश्चसम्यक्तयाव्यावृत्तचेतसःसुखदुःखानुभूत्याक्षीणप्रारब्धकर्मणःब्रह्मचर्याद्यैःअङ्गैःशमदमादिभिःयुक्तस्यवेदान्तोक्तेनमार्गेणआत्ममीमांसांकुर्वाणःएवसद्योमोक्षःसम्पद्यतेइतिमानमेयोदयःअभिप्रैति।

तथा हि-

**निषिद्धकाम्यकर्मभ्यः सम्यग्व्यावृत्तचेतसः । नित्यनैमित्तिकप्रायश्चित्तप्रध्वस्तदुष्कृतेः ॥**

**सुखदुःखानुभूतिभ्यां क्षीणप्रारब्धकर्मणः । युक्तस्य ब्रह्मचर्याद्यैरङ्गैः शमदमादिभिः ॥**

**कुर्वाणस्यात्ममीमांसां वेदान्तोक्तेन वर्त्मना । मुक्तिः सम्पद्यते सद्यो नित्यानन्दप्रकाशिनी ॥**[9]

इत्थंप्रकारेणमीमांसादर्शनसरण्याःअनुसारंशरीरसम्बन्धएवबन्धः, तदभावोमोक्षः। तच्चोक्तं भवति यन्निष्पन्नानां देहानांयः प्रध्वंसाभावः यश्चानुत्पन्नानांदेहानांप्रागभावःसएवमोक्षइति।

आकरग्रन्थाः –

१. मीमांसाश्लोकवार्तिकम् । २. शतपथब्राह्मणम् । ३. सर्वलक्षणसङ्ग्रहः ।

४. न्यायकोशः । ५. मानमेयोदयः । ६. शास्त्रदीपिका ।

७. शास्त्रदीपिकायाः रामकृष्णप्रणीतसिद्धान्तचन्द्रिकाव्याख्या ।

**********

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# रघुवंशे अभिज्ञानशाकुन्तले च विश्वकल्याणचिन्तकः महाकविकालिदासः

**Prasenjit Malo,** West Bengal
Research Scholer

**प्रस्तावना –**

साहित्यलोके बहवः कवयः वर्तन्ते इति ज्ञायन्ते। किन्तु तेषु अत्यल्पानामेव कवीनां काव्यानि समुपलभ्यन्ते पठ्यन्ते च। तथापि एतेषु कविषु कालिदासः विख्यातः श्रेष्ठश्च। रघुवंशः कुमारसम्भवञ्च इति द्वे महाकाव्ये, मेघदूतम्, ऋतुसंहारः च इति द्वे खण्डकाव्ये, मालविकाग्निमित्रम्, विक्रमोर्वशीयम् , अभिज्ञानशाकुन्तलम् चेति त्रीणि नाटकानि श्यामलादण्डकं श्रुतबोधः अनेकमुक्तश्लोकाः इति च सन्ति कालिदसस्य कर्तृत्वेन प्रसिद्धाः। तथापि रघुवंशमहाकाव्यम् अभिज्ञानशाकुन्तलं च सहृदयहृदये विशिष्टं स्थानम् आवहति। वैदेशिकेष्वपि कालिदासप्रतिष्ठा सुप्रतिष्ठिता इति सम्माननम् अस्ति अभिज्ञानशाकुन्तलस्य।

कालिदासः सरलया आत्मार्थयुक्तया गिरा एव कार्यं साक्षाद्वदति स्म। अक्षरप्रासश्लेषादिकप्राप्तेः पाण्डित्यप्रकटनस्य च लाञ्छनापि तत्र द्रष्टुं न शक्यते। स्वतस्सिध्दभावना सूक्ष्मस्वभाववर्णनाचातुर्यं प्रकृतिप्रेम अनिवार्यसन्दर्भेषु अलङ्कारादिप्रयोगः च इत्यादि कालिदासस्य इतरभिन्नं वैशिष्ट्यं भवति। उपमालङ्कारप्रयोगे कालिदाससमानः अन्यः न इति कृत्वा उपमा कालिदासस्य इति उक्तिः अपि जाता। कालिदासवर्णनायाः निमित्तं सहस्रजिह्वाः अपर्याप्ताः भवन्ति। येन प्रयोगेण शब्दः सार्थकः सफलः च भवति सः प्रयोगः कविकुलगुरुसार्वभौमः कालिदासः इति ननु। महाकविः कालिदासः संस्कृतसाहित्यस्य ध्रुवनक्षत्रं, विश्वसाहित्यस्य गौरीशिखरः, विश्ववाङ्मये सर्वोत्कृष्टः कविरिति प्रथितः। कविकुलगुरुः, कविचक्रवर्ती च इत्यादिरीत्या प्रख्यातिः प्राप्ता अस्ति।

कालिदासकवेः सर्वासां कृतीनाम् आन्तरिकं तत्त्वम् एकमेव। तत्तु एष एव यः पूज्यपूजाव्यतिक्रमो पापाय इति श्रुतिसारांशः। रघुवंशे दिलीपस्य कामधेनुविषयकः पूज्यपूजाव्यतिक्रमः आरम्भे एव। अन्ततो गत्वा अग्निवर्णस्य पुज्यराजधर्माचारादि व्यतिक्रमश्च।

अभिज्ञानशाकुन्तले पूज्यतातकण्वस्य स्मरणं विना आचारमर्यादाम् उल्लङ्घ्य दुष्यन्तस्वीकारेणा शकुन्तलया कष्टमनुभोक्तव्यम् आपतितम्। अपि च अतिथेः पूज्यदुर्वाससः पूजाम् अकृत्वा शापपात्रम् अभवत् सा। तस्य परिणाम एव शाकुन्तलं नाटकम्। एवं कालिदासकृतिषु सर्वत्र एतत् द्रष्टुं शक्यते।

रघुवंशे अभिज्ञानशाकुन्तले च जनानां कर्तव्यम् अकर्तव्यम् आचरणम् इच्छा सामाजिकमूल्यबोधश्च इत्यादिनां सुव्यवस्थिता स्थापना दृश्यते। अनेन प्रकारेण रघुवंशे महाकाव्ये अभिज्ञानशाकुन्तले नाटके च विश्वकल्याणमूलकं मरममूल्यरूपेण चित्रणं प्राप्यते। अत्र सामाजिकमूल्यरूपेण स्थापितस्य आश्रमस्य जीवनस्य च संकेतः करोति यत्र विश्वकल्याणभावना स्पष्टं प्रतिभाति।

**रघुवंशे विश्वकल्याणमूल्यानि -**

**'सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम्। आसमुद्रक्षितीशानामानाकरथवर्त्मनाम्।।'** [1]

**'यथाविधिहुताग्नीनां यथा कामार्चितार्थिनाम्। यथा पराधदण्डानां यथाकालप्रबोधिनाम्।।'** [2]

**'त्यागाय संभृतार्थानां सत्याय मितभाषिणाम्। यशसे विजिगीषूणां प्रजायै गृहमेधिनाम्।।'** [3]

**शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम्। वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम्।।** [4]

अत्र कालिदासः जन्मनः आरभ्य किं किं करणीयम् इति उल्लिखति। निषेकादिसंस्कारैः शुद्धः भवेत्, फलसिद्धिं यावच्च कर्म भवेत्। विधिपूर्वकम् अग्नौ आहुतिः दद्यात्, स्वेच्छानुसारं सामर्थानुसारं याचकानां सम्माननम्, अपराधानुसारं दण्डनं, समुचितकाले धैर्यस्थापनं च प्राप्यते। एवम् अस्मिन् महाकाव्ये जीवनस्य सम्यक्दर्शनं प्राप्नोति।

सत्पात्राय दानं कर्तुं धनार्जनं करणीयम्, यशप्राप्तिहेतुः जयं प्राप्तिः, सन्तानार्थं विवाहसंस्कारश्च इत्यादि वर्णनं कालिदासस्य रघुवंशे वर्तते। बाल्यकाले एव समस्तविद्यानाम् अध्ययनं करणीयम्, युवावस्थायां भोगाभिलाषास्थापनम्, वृद्धावस्थायां मुनेः जीवनस्थापनम्, अन्तिमे काले योगेन शरीरत्यागश्च इत्येवं गृहस्थाश्रमादारभ्य सन्यासग्रहणं यावत् सार्थक्यं प्रतिपादयति। संसारस्य सर्वं नियमं परिपाल्य एकः मोक्षार्थी संसारस्य निवृतये कर्मबन्धनछेदकधर्मं प्रति उन्मुखो भवति। दाम्पत्यजीवनमपि प्राचूर्येण वर्णितमस्ति अस्मिन् महाकाव्ये। विवाहसम्बन्धोऽपि आत्मनाम् अनुरूपगुणानाम् आधारभूम्यामधिष्ठितः। प्रजायाः कर्तव्येऽपि महाकाव्योऽयम् आदर्शः। इत्येवम् अत्र प्राचीनैः नवीनान् भारतीयसंस्कृतेः धर्मकर्मणी शिक्ष्यते। तेन पुरुषार्थचतुष्टयं लब्ध्वां परमात्मतत्त्वं प्राप्नुवन्ति मनुष्याः।

<u>**अभिज्ञानशाकुन्तले विश्वकल्याणमूल्यानि –**</u>

**'शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य। दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः।।'** [5]

**'सरसिजमनुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति।**
**इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम्।।'** [6]

**'अस्मान्साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन- स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम्।**
**सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः।।'** [7]

**'प्रवर्ततां प्रकृतिहिताय पार्थिवः सरस्वती श्रुतिमहतां महोयसाम्। ममापि च क्षपयतु नीललोहितः पुनर्भवं परिगतशक्तिरात्मभूः।।'** [8]

अलङ्कारैः अलङ्कृतसौन्दर्यं सौकुमार्यं च अन्यत्र अस्ति। किन्तु आभूषणैः हीना नैसर्गिकशोभया सम्पन्ना मुनिकुमारीणाम् अवलोकनेन तासां सौन्दर्यं न्युनं गच्छति। अत्र एवं वर्णितमस्ति यत् अरण्ये निवासीनां मुनिकन्यानां सारल्यं सौन्दर्यं च। तत् तु अधिकम् आकर्षनजनकम्।

अत्र अभिज्ञानशाकुन्तले स्त्रीणां यथायथसौन्दर्यं शकुन्तलावर्णनेन प्रतिपादयति कविः विभिन्नैः उपमाभिः। सर्वमपि वस्तु रम्याणां सुषमां वर्धयत्येव। नीलकण्ठस्य कण्ठे विषमिव, कलङ्केन चन्द्रस्येव, शैवलेन कमलस्येव, अनेन वृक्षत्वग्वस्त्रेण अस्याः शकुन्तलायाः शोभैवा। यथा सरसिजादीनि शैवलादिभिः अधिकमनोज्ञानि भवन्ति।

अभिज्ञानशाकुन्तले कविः विश्वकल्याणां सद्व्यवहारं प्रदर्शयति। कविः तत्र कण्वमुखेन कथयति दारसामान्यप्रतिपत्त्या नूनं परिपालनं कार्यं, नो चेत् प्रतिकूलेषु शाप एवसास्त्रम्। सम्यग् विचार्य कार्यमिति भावः। इति तु विश्वकल्याणाय महौषधम्।

विश्वकल्याणमूलकप्रार्थना अपि कविना प्रदर्शिता। लोके जनाः कीदृशीम् आकाङ्क्षां कुर्युः इति वदति – समस्ताः पृथ्वीपतयः स्वमुखनिरपेक्षाः सन्तः अन्येषां श्रेयसे सर्वदा प्रवर्तन्ताम्, सर्वे चमत्कारं जनयित्वा विशिष्टसम्मानं लभेरन्। सर्वशक्तिशाली पार्वतीपतिः परमेश्वरश्च जन्मान्तरं निरस्य शाश्वतं पदं दिशेत् इति।

सम्प्रति पाश्चात्यसंस्कृतेः प्रभावात् भारतेऽपि दाम्पत्यजीवने कषायं जातम्। अतः अस्मिन् विषये अभिज्ञानशाकुन्तलनाटकम् आदर्शभूतम्। पत्नीं प्रति पतिं प्रति वा भावविषयेऽपि नाटकमिदम् आदर्शभूतम्। धार्मिकमूल्येष्वपि नाटकमिदम् अन्यतमम्। अत्र मूल्यरूपे तपसः अनेकशः वर्णनं प्राप्यते। एवमेव प्रकारेण अन्येषु काव्येष्वपि विश्वकल्याणम् अनुसंधातव्यम्।

<u>**उपसंहारः –**</u>

कालिदासस्य काव्यनाटकादिषु विश्वकल्याणभावना एवं परिदृश्यते। तेन चित्रिताः नायकाः प्रेमपाशे संलग्नाः चेदपि सभ्यतायाः सीमां न अतिक्रामन्ते स्म। नायकाः दाक्षिण्यपराः, धर्मनिष्ठाश्च आसन् इति कवेः चित्रणं तस्य मनोधर्मं सूचयति। कालिदासः बालेषु

नितरां स्निह्यति स्म इति बहुत्र प्रकाशितः भवति। मित्राणि, परिवाराः, भृत्याः, अतिथि-अभ्यागताः, तपस्विनश्च इत्यादिभिः नायकैः आचर्यमाणया रीत्या कवेः कुटुम्बदृष्टिं ज्ञातुं शक्नुमः। अभिज्ञानशाकुन्तले परमेश्वरेण पुनर्जन्मराहित्या मुक्तिः दीयताम् इति प्रार्थना विश्वकल्याणचिन्तनं स्पष्टं करोति। कालिदासः तृप्तिकरं परिपूर्णं जीवनं कृत्वा भगवति मुक्तिमपेक्ष्यमाणः अस्तीति अवगम्यते। कालिदासः भारतीयसंस्कृतेः प्रतिनिधिः कविरिति सुधीभिः परिस्कृतः। अस्य रचनाः चतुर्वर्गपुरुषार्थानां प्रदानसाधनस्वरूपाः इत्यपि स्वीकृतं सरसान्तःकरणैः संख्यावद्भिः। तस्य कृतिषु वैदिकयज्ञयागादिनाम् उच्चस्थानम् अस्ति। उपनिषदां तत्वानि विश्वकल्याणाय आधारभूतानि इति परिदृश्यते।

## पादटिप्पणी

1. रघुवंशः – 1.5
2. रघुवंशः – 1.6
3. रघुवंशः – 1.7
4. रघुवंशः – 1.8
5. अभिज्ञानशाकुन्तलम् – 1.16
6. अभिज्ञानशाकुन्तलम् – 1.18
7. अभिज्ञानशाकुन्तलम् – 4.17
8. अभिज्ञानशाकुन्तलम् – 7.35

<u>सन्दर्भग्रन्थसूची-</u>


- भारतीयसंस्कृति में मानवमूल्य एवं लोक कल्याण, सुकेश शर्मा, सञ्जय प्रकाशन, 2008
- अभिज्ञानशाकुन्तलम्, कालिदासः, डायमण्ड बुक् प्रकाशन, 2010
- रघुवंशः, कालिदासः, राजपाल् एण्ड सन्स् पावलिसिङ्, 2006
- Kalidasa, Translations of Shakuntala and other Works, By Arthur W. Ryder
- Biography of Kalidasa
- Clay Sanskrit Library, Publishes classical Indian literature, including the works of Kalidasa with Sanskrit facing-page text and translation.
- Kalidasa at The online library of Liberty.



**Prasenjit Malo**
Research Scholer
Department of Sanskrit
Tilka Manjhi Bhagalpur University
Bhagalpur-812007, Bihar
Contact No. : 9800953250
E-mail : prasenjit.malo1983@gmail.com


*************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# श्रीउमचिगि शङ्करशास्त्रिविरचिता ब्रह्मसूत्रशाङ्करीवृत्तिरीत्या "तत्तुसमन्वयात्" इति सूत्रार्थविचारप्रतिपादनम्

**जे. आर्. सिद्धलिङ्गस्वामि**, बेङ्गलूरु, कर्नाटक

**पीठिका–**

**१. ब्रह्मश्रीशङ्करशास्त्रिणः संक्षिप्तपरिचयः**

सुगृहीतनामधेयाः के. शङ्करशास्त्रिमहोदयाः कर्णाटान्तर्भूत–धारवाड–जिल्ला–उमचिगिग्रामे क्रि.शक १९ शतकस्यान्तभागे समभवन् । एते च महाभागाः साहित्य–व्याकरण–न्याय–पूरोत्तरमीमांसाशास्त्रेषु पारङ्गताः भूत्वा प्रथमतः प्रातःस्मरणीयानां शिवयोगिमहामन्दिरसंस्थापकानां लि० श्रीमन्निरञ्जनप्रणवस्वरूपिणां श्रीश्रीकुमारमहास्वामिनामाश्रयमुपलभ्यतत्र ग्रन्थसंशोधका आसन्नित्यनुश्रूयते । हैदराबाद् प्रान्ते परलीपवित्रतीर्थक्षेत्रे लोकप्रसिद्धस्य ज्योतिर्लिङ्गस्वरूपस्य वैद्यनाथेश्वरस्य पूजाधिकारविषये (१९१८–२०) समुपजातब्राह्मण–वीरशैव–विवादप्रसङ्गेआहूतेषु पण्डितप्रवरेषु प्रधानस्थानभाजोऽभूवन्निति विज्ञायते । मैसूरु महानगरे प्रकाशित वीरशैवभाष्यसहित ईशावास्योपनिषद् इत्यादि देवनागरी ग्रन्थानां संस्करण ब्रह्मश्री शङ्करशास्त्रीजी द्वारा प्रणितःग्रन्थस्य प्रकटनं पूज्यजगद्गुरु उज्जयिनीसद्धर्मसिंहासन द्वारा प्रकटितः तत् ग्रन्थस्य पुनः प्रकटनं कार्यं काशी ज्ञानगुरु विद्यापीठस्य संरक्षणेणया प्रकाशितम् तेषां नामानि – ईशावास्योपनिषद् –शाङ्करी व्याख्या – केनोपनिषद् – शाङ्करीव्याख्या – मुण्डकोपनिषद् वीरशैवभाष्य–सिद्धान्त शिखोपनिषद् – वीरशैवभाष्यम् – ब्रह्मसूत्रशङ्करीवृत्ति ग्रन्थाः ।

**२. ग्रन्थकारस्य आशयः**

इह खलुपनिषद ब्रह्मसूत्रादिभाष्याणि वीरशैवसिद्धान्तपराणिदुःखार्णवनिमग्नजगजुहिधीषुभिः परमकारुणिकैः रेणुकादि भगवत्पादैः प्रणीतानीति विदितमेव श्रीकरभाष्यादिना । तथापि तेषामनुपलभ्यमानत्वात् विद्यामानानां च श्रीकरभाष्यादीनामनवलोकनात् । वीरशैवसिद्धान्तपर – प्रस्थानत्रयभाष्याणामेवभावात् नैवेदं वीरशैवमतंवैदिकमिति मोमुच्यमानानां स्वसम्यधिक्यशन्य वीरशैवसिद्धान्त–गन्धाघ्राणविवर्जितानां केषांचित् ।

शिवेतरदेवासु तत्साम्याधिक्यावादिनां शिवविहिषणां पण्डितमानिनामादृशमनाय वीरशैवमत्त्वाध्यवसायेनैवलोकयात्रां निर्वहन्तो वयं श्रीपूर्वाचार्यकृपया द्वैताद्वैतविशिष्टाद्वैतपरापनिषद्धाष्याकस्य सिद्धान्तविरुद्धत्वात् वेदवेदान्तस्यापि विरुद्धत्वात् अत एव तदनुसारिस्मृति – पुराणयुक्तनुभवविरुद्धमित्यवेवुध्य ईशावास्याद्युपनिषदो व्याचिख्यासवः सन्तः पूर्वाचार्यपदशिवेन पयोपनिषद्वनं प्रविश्यतत्र शक्तिविशिष्टाद्वैतापरपर्यायलिङ्गाङ्ग समरस्यफलं स्कल्योनाकल्य ईशावास्योपनिषत् सिद्धान्तशिखोपनिषद्व्झशैवभाष्यं च वीरशैवपरकत्वेनप्रणिनीय सम्मुद्रय प्रकटीकृत्य शिवभक्तिभाजां महान्तमानन्दं प्रापय्य मुण्डकोपनिषद्धाष्यं नीलकण्ठ शिवाचार्यविरचित नीलकण्ठभाष्यकारिकरूप क्रियासारस्य व्याख्यामपिब्रह्मसूत्रवृत्ति नाम्ना विरचय्य । इष्टलिङ्गधारणमुक्तम् । स्पष्टि(निरा)कृतं लिङ्ग–धारणविधायकानां वचसामसामञ्जस्यं क्रियासारे लिङ्गधारणोपदेशे । तस्मात्त एवावगन्तव्यं मुमुक्षूणां लिङ्गधारणमावश्यकमिति । तथा च ब्रह्मनिष्ठानां पञ्चाचारअष्टावरणरूपेणेष्टादिलिङ्गनिष्ठानां मोक्षस्य सङ्कुचितस्वशक्तिविकासस्य उपदेशत्, छान्दोग्यादिषु कथनात् । नह्यचेतनप्रधाननिष्ठानां कुत्रापि मोक्षोपदेशस्यादर्शनात् प्रधानं जगज्जन्मादिकारणं भवति । तथा च "अजामेकां लोहितकृष्णशुक्लाम्" इत्यादिश्रुतीनां पूर्वोक्तस्वविमर्शशक्तिस्वातन्त्र्यपरिकल्पित मायाशक्तिपरकत्वेनान्वयसम्भवात् तादृशशक्तिसहितषट्स्थल परशिवलिङ्गमेव जगज्जन्मादिकारणम् । तस्मात्तदेव मुमुक्षुभिरुपास्यम् ।

"अथातो ब्रह्मजिज्ञासा" इति सूत्रे विवृत ब्रह्मैव मुमुक्षूणां उपास्यलिङ्गं भवति । तथा अग्रिमसूत्रे अपि ब्रह्मगुणाः एव वर्णितः । अत्र जैमिनिसूत्र अनुसृत्या अथशब्दं "अनन्तरं" इति अथप्रयोग भवति । किन्तु यस्य कार्यं कृत्वा अनन्तरं इति अत्र ज्ञातुं धर्मविचारानन्तरं एव लिङ्गत्वविचारं क्रियते इति उक्तः । पर्न्तु "ओंकार अथशब्दश्च द्वयोः पुरा परब्रह्मस्य कण्ठं भित्वा आगच्छन्ति । तदर्थं ते मङ्गलरूपबोधकः भवति । इति प्रमाणेन अत्र अथशब्दं मङ्गलं इति अर्थं किमर्थं उक्तः । इत्युक्ते अथ अत्र न सम्भवति किमर्थं तादृश उक्तः पूर्वकाण्डस्य विरोधः सम्भवति । पूर्वोत्तरकाण्डाय अङ्गाङ्गिभावः । एतत् किमपि नास्ति ब्रह्मं लिङ्गं इति उक्तयितुं न युक्तं भवति । एतादृशं समासयता अत्र सूचयते ।

तैत्तरीयश्रुतैः "आत्माय–आत्मलिङ्गाय नमः, भवाय–भवलिङ्गाय नमः, ज्वलाय– ज्वललिङ्गाय नमः, एतत्सोमस्य सूर्यस्य सर्वं स्थापयति पाणिमन्त्रं पवित्रम् । इति आरभ्य( प्रारभ्य) पदमपि लिङ्गशब्दस्य प्रयोगः दृश्यते । अयं प्रकरणे लिङ्गशब्दाभ्यां न ब्रह्मः

अन्यस्य अर्थमेव सहजरूपेण अन्वयं न भवति । "आत्माय नमः यत्र नामो परब्रह्मः सर्वव्यापकत्वेन आत्मः इति । अत एव तदर्थं नमस्काररूपत्वं श्रुतेः विधितः । पुनः "आत्माय नमः" किमत्र ( ) ब्रह्मः आत्मेव उक्ता सह लिङ्गमेव रूपं भव अधिक ( महत्तर) नमस्कारयोग्यता इति विधितः । एवं उक्तमेव श्रुतयः समञ्जसार्थं युक्तयते । नो चेत् "आत्माय नमः" इति पुनर् उक्तयञ्च "आत्माय नमः" इति द्विवारं नमस्कारं विधितं कथं समरसत्वं कथं सामरस्यं योजयते ? अतः लिङ्गपदं नित्यनिरञ्जननिष्कल ब्रह्ममेव अर्थं इति स्पष्टयते ।

किन्तु पूर्वकाण्डे उक्तयत अग्निष्टोमादिकर्मणि आचरणतानन्तर इति अथशब्दाभ्यां अर्थं उक्तयते । वीरशैवाणां एतत् कथं योजयते ? एतत् परिवर्तितावेदोक्ता भस्मरुद्राक्षलिङ्गधारणमिति न कर्माचरण अनन्तरं लिङ्गतत्त्वस्य मीमांसायां प्रचलितावश्यं इति उक्तः । इयं कस्यैव विरोधमेव न सम्भवः । पूर्वकाण्डाभ्यां न विरुद्धं सर्वार्थमेव वेदसम्मता । ननु शास्त्रस्य न प्रामाण्यम्, सिद्धान्तवस्तुप्रतिपादकत्वेनाक्रियार्थत्वात् । तदुक्तम्– 'आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्' इति । कर्तृदेवतादिसाधनपरत्वे त्वनुष्ठानोपयोगित्वेन सार्थक्यात्, अतो न सिद्धशिवलिङ्गपरत्वम्, वेदान्तेषु जीवप्रतिपादकवाक्यानां यागादिक्रियाकर्तृयजमानपरकत्वात्, ब्रह्मप्रतिपादकवाक्यानां देवतापरकत्वात् सृष्टिप्रतिपादकवाक्यानां द्रव्यादिसाधनपरकत्वाद् अनुष्ठानोपयोगित्वेन वेदान्तानां सार्थक्यम् । ब्रह्मपरकत्वे तदभावाद्वैयर्थ्यं स्यादित्यत आह–

## ३. तत्तु समन्वयात् इति सूत्रार्थप्रतिपादनम् ।

अत्र तुशब्दः पूर्वपक्षनिराकरणार्थः । तच्छब्दः सर्वशक्तिजगदुत्पत्त्यादिकर्तृपरशिवलिङ्गे वर्तते । तद्ब्रह्मवेदान्तशास्त्रादवगम्यते, कुतः ?**"सदेव सौम्येदमग्र आसीत्, एकमेवाद्वितीयं ब्रह्म, आत्मा वा इदमेकाग्र आसीत्, ऐतदात्म्यमिदं सर्वम्, तत्सत्यं स आत्मा, तत्त्वमसि"** इत्यादीनां वाक्यानां समन्वयात् समनुगतत्वात्, भिन्नप्रकरणपठितत्वाच्च न कर्मोपयोगिकर्तृदेवतादि साधनपरत्वं वेदान्तानाम्, ब्रह्मणः कर्मापेक्षितकर्तृत्वाद्यभावात्, अन्यथा श्रुतहान्यश्रुतकल्पनाप्रसक्तेः । न चानर्थक्यम्, हेयोपादेयरहित्रसिद्धवस्तुप्रतिपादकत्वादिति वाच्यम्, परमार्थमोक्षसाधनज्ञानविधिविषयत्वात् ।

ननु ज्ञानस्य विधेयत्वे "चोदना लक्षणोऽर्थो धर्मः" इति सूत्रोक्तधर्मलक्षणसद्भावात् इति सूत्रोक्तधर्मलक्षणसद्भावाद् धर्मत्वं स्यात् । इष्टापत्तौ तत्साधनमोक्षस्यानित्यत्वप्रसङ्गः, तद्यथेह कर्मचितो लोकः क्षीयते, एवमेवामत्र पुण्यचितो लोकः क्षीयते" इति श्रुतेः, **"परीक्ष्य लोकान् कर्मचितान् ब्रह्मणो निर्वेदमायान्नात्स्य कृतेन""तद्विज्ञानार्थं स गुरुमेवाऽभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्"** कृतः इति श्रुतेश्च कर्मफलस्य अनित्यत्वश्रवणादिति चेन्न, "अयं हि परमो धर्मो यद्योगेनात्मदर्शनम्, ज्ञानविज्ञानमास्तिक्यं ब्राह्मं कर्म स्वभाजनम्" इत्यादिस्मृतेर्ज्ञानस्य धर्मरूपत्वेऽपि तत्साध्यस्य मोक्षस्य नानित्यत्वम् । "तद्यथेह कर्मचितः : इति वाक्यं त्वात्मभिन्नकेवलेष्टापुर्तादिकर्मफलप्रतिपादकत्वेन प्रमाणम्, तदनन्तरम् "अथ य इहात्मानमनुविद्य व्रजन्त्येतांश्च सत्यान् कामान्" इति विहितविद्ययाऽक्षय्यफलकत्वदर्षनात् । "नास्त्यकृतः क्त्तेन" इति वाक्यं तु विद्याभिन्नकर्मविषयकमेवेति बोध्यम् । अन्यथा "श्रोतव्यो निदिध्यासितव्यः", "तमेव धीरो प्रज्ञां कुर्वीत ब्राह्मणः", ज्ञात्वा देवं मुच्यते सर्वपाशैः", आत्मन्येवात्मानं पश्येत्", शम्भुराकाशमध्ये ध्येयः" इत्यादिना उक्तध्यानविधेरनुपत्तेः । तस्माद्वेदान्तेषु मोक्षफलाय ज्ञानस्य विधीयमानत्वात् तादृशज्ञनोपासनविषयका–ङ्क्षायामवान्तरवाक्येन ब्राह्मणोऽपि प्रतिपाद्यत्वं सिद्ध्यति विध्यनुप्रवेशमात्रेण । सिद्धवस्तुमात्रप्रतिपादकत्वे वेदान्तानामानर्थक्यं दुर्निवारं स्यात् ।

ननु "रज्जुरियं नायं सर्पः" इति वस्तुमात्रप्रतिप्दनेऽपि सर्पभ्रान्तिनिवृत्त्या तत्कृतभयकम्पादिनिवृत्तिरूपप्रयोजनस्य दृष्टत्वात् तत्त्वज्ञानान्मिथ्याभिमाननिवृत्या तत्कृतसुखदुहखादेरपि निवृत्तिरूपप्रयोजनसम्भवान्नानर्थक्यमिति चेन्न, निश्चितात्मतत्त्वस्यापि यथापूर्वं दुःखाद्यनुभवदर्शनात्, जनकादीनामपिइ यथापूर्वं क्षुत्पिपासादीनामनुमितत्वात् । तस्मान्नावगतब्रह्मभावस्य यथापूर्वम् क्षुत्पिपासा–दीनामनुमितत्वात् । तस्मान्नावगतब्रह्मभावस्य यथापूर्वं संसारित्वमित्याद्युक्तं साहसमात्रम् । अन्यथा "भोगेन त्वितरे क्षपयित्वा सम्पद्यते" इति सूत्रेण यावन्मरणं विदुषोऽपि यथापूर्वं सुखदुःखानुभवस्य दर्शितत्वमसङ्गतं स्यात् । अत एवोक्तं आओपस्तम्बेनापि– "बुद्ध्वेश्चेत् क्षेमप्रापणं इहैव न दुःखमुफलभेद– एतेन परं व्याख्यामीति" । यदुक्तं रज्जुसर्पदृष्टान्तेन आत्मतत्त्वज्ञानाद् मिथ्याभिमाननिवृत्त्या दुःख निवृत्तिरिति, तत्तुच्छम्, जगतो मिथ्यात्वस्यैव असिद्धत्वात् । किं तावज्जगन्मित्यात्वम्, त्रैकालिकनिषेधप्रतियोगित्वम् । तथा हि – शुक्तौ "नेह नाना" इति श्रुत्या प्रपञ्चस्य स्वरूपेणैव निषेधस्य प्रतीयमानत्वात् । त्रैकालिकनिषेधप्रतियोगित्वं जगति वर्तते, इति चेन्न, त्रैकालिकनिषेधस्य तात्त्विकत्वेऽप्यद्वैतहानिः, अतात्त्विकत्वे तस्यापि निषेध इत्यनवस्थापत्तेः । न च प्रपञ्चनिषेधाधिकरणीभूत ब्रह्माभिन्न –त्वान्निषेधस्य तात्त्विकत्वेऽपि नाद्वैतहानिः, अभावस्याधिकरणात्मकत्वादिति वाच्यम्, ब्रह्मणः शून्यत्वापत्तेः शून्यवादिमत प्रवेशप्रसङ्गः

स्यात् । ननु घटाभावस्य कपालस्वरूपत्वेऽपि कपालस्य शून्यत्वाभाववद्ब्रह्मणः किं न स्यादिति चेत्, जगद्ब्रह्मणोरुपादानोपादेय भावोऽस्मन्मतानुकूलः स्यात्, स्थूलचिदचित्प्रपञ्चाकारशक्तिविशिष्टं प्रति सूक्ष्मचिदचित्प्रपञ्चाकारशक्तिविशिष्टस्य ब्रह्मण उपादानत्वस्य स्वीकृतत्वात् । किञ्च, इदमप्यत्र विमर्शनम्– योग्यानुपलब्धेरभाव–प्रत्यक्षत्वावच्छिन्नं प्रति कारणत्वस्वीकाराद् योग्यत्वघटकप्रपञ्च–प्रतियोगिसत्वोपानस्य अशक्यत्वान्न त्रैकालिकनिषेधः प्रामाणिकः स्यात् । किञ्च, कालस्य निषेधविशेषणत्वं निषेधप्रतियोगिविशेषणत्वं वा? नाद्यः, तस्य निषेध्यभिन्नत्वानिषेधकान्तरमपि कल्पनीयं स्यात् । न द्वितीयः, निषेध्यतावच्छेदककुक्षिप्रक्षिप्तत्वात् । निषेध्यस्वरूपाद्धा पूर्वकाले जगन्नासी, इदानीं नास्ति, अग्रे न भविष्यतीति त्रैकालिकनिषेधो व्याहन्येत ।

ननूक्तदृष्टान्तानुसारेण निषेधसम्भवे कथं व्याहतमिति चेत्, तत्र कालादीनां सत्वेन कथञ्चित् स्वीकारेऽपि दृष्टान्ते तथाभावाद् व्याहतेस्तादवस्थ्यात् । प्रपञ्चस्य त्रैकालिकनिषेधप्रतियोगित्वाभावे– "नेह नाना", "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिप्रपञ्चापवादप्रतिपादकश्रुतीनामप्रामाण्यमिति चेन्न, वाचारम्भणश्रुतीनां शिवोपादानत्वात्, प्रपञ्चस्य तत्तादात्म्यबोधकत्वान्न मिथ्यात्वबोधकत्वमिति श्रुतितात्पर्यस्य वक्तुं शक्यत्वात्, वाचारम्भणवाक्यानां तदनन्यत्वबोधनात्, " न मिथ्यात्वाय कल्पन्ते जगतः शिवरूपतः" इति स्मृतेश्च । अत एव भगवता व्यासेन "तदनन्यत्वमारम्भणशब्दादिभ्यः" इति सूत्रे तज्जन्यप्रपञ्चस्य तद्रूपत्वं निर्दिष्टम् ।

अपि च, अध्यारोपस्तु ब्रह्मणस्तदन्यस्य वा ? नाद्यः, ब्रह्मणः शरीरेन्द्रियादिशून्यत्वात्, {न द्वितीयः} "सदेव सौम्येदमग्र आसीत्" इत्यादौ सृश्टेह् प्राग् द्वितीयवस्तुनिषेधदर्शनात्, तदा तदन्यस्वीकारे शुद्धाद्वैतभङ्गप्रसङ्गाच्च । ज्ञाननिर्वर्त्यत्वं जगन्मिथ्यात्वमिति चेत्, तदसम्भवस्य पूर्वमेव दर्शितत्वान्नात्र पिष्टपेषणं क्रियते । न कुत्रापि वेदान्ते ब्रह्मज्ञानेन प्रपञ्चनिषेधो विधियते, "सर्वो वै रुद्रः", "सर्वं खल्विदं ब्रह्म" इत्यादिना सर्वप्रपञ्चस्य शिवात्मकत्व् ओपदेशत् । "नान्यत्पश्यति नान्यत् शृणोति" इत्यादिश्रुत्या मुक्तात्मनामिदन्तारूपघटपटात्मकप्रपञ्चत्वेन व्याहृतमायापाशमेवसर्वशिवात्मकज्ञानेन तिरोधीयत इति ज्ञायते । अतो जगतो मिथ्यात्वमयुक्तम्, अन्यथा एकविज्ञानेन सर्वविज्ञानप्रतिज्ञाश्रूतेप्रामाण्यं स्यात् । जगद्ब्रह्मणोरुपादानोपादेयत्वे तस्य प्रामाण्यं स्यात् ।

किञ्च, "अखण्डाद्वैतभावे तु सर्वं ब्रह्मैव नान्यथा । ज्ञानाद्विकल्पबुद्धिस्तु लीयते न स्वरूपतः" । "असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्" इति गीतायां च श्रूयते ।ननु "असद्वा इदमग्र आसीत्", "एकमेवाद्वितीयं ब्रह्म" इत्यादिश्रुत्या प्रपञ्चस्यासत्वोपदेशात् कथं जगतस्त्रैकालिकसत्यत्वमिति चेन्न, तत्रासत्पदस्य नामरूपविभागानर्हप्रपञ्चार्थकत्वात्, अन्यथा "ततो वै सदजायत" इत्यनेन विरोधः स्यात् । तस्मात् प्रतिपत्तिविधिविषयतयैव वेदान्तानां सार्थक्यम्, न तु सिद्धवस्तुप्रतिपादनेन । एवं च तस्मात् प्रमाणान्तरान् अवगतस्वाभाविकानन्तशक्तिविशिष्टजगदुभयकारणपशुपाशनियामकसकलनिष्कल्स्थूलचिदचित्प्रकाशकसत्यज्ञानानन्तकल्याणगुणविभव ाश्रयलिङ्गरूपपरब्रह्मण उपासनाविधिपरत्वेन च तेषां सार्थक्यं प्रामाण्यं चेति सिद्धम् । अपि च, न स्वप्नमिथ्यात्वं जगतः, अर्थसिद्धिक्रियासिद्धिदर्शनात् । विधिनिषेधविधायकशास्त्राचार्ययोरुपदेशादिकर्तव्यायोगेन बुद्धमतप्रवेशाच्च, "नाभावउपलब्धेर्वैधर्म्याच्च न स्वप्नादिवत्" इति द्वितीयाध्याये मिथ्यात्ववादस्य निरस्तत्वात् । अत एव एतन्मिथ्यावादमुद्दिश्य– "मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमेव च । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा ॥ अपार्थं श्रुतिवाक्यानां दर्शयित्वातिगर्वितम् । कर्मस्वरूपत्याज्यत्वमत्र च प्रतिपाद्यते । सर्वकर्मपरिभ्रंशान्नैष्कर्म्यं तत्र चोच्यते" । इत्यादि विज्ञानभिक्षुप्रमुखप्राचीनभाष्यकारादिस्वीकृतपद्मपुराणादिवाक्यं श्रूयते । अथ च न स्वप्नवज्जगतो मिथ्यात्वम्– "जीवस्योन्नतिनाशौ च मास्तामद्वैतवादिनाम् । स्वप्नावस्थासमुत्पन्नपीयूषविषपानतः" ॥ इति । उक्तं चान्यत्रापि– "भार्यात्वभ्रमविषये सुतायां चेत् स्वदारता । तात्कालिकं तया सार्धं मैथुनं स्यादपातकम् ॥" इत्याद्यनेकानिष्ठापत्तेर्न युक्तं जगतो भ्रमविषयत्वं वक्तुम् ।

**[ग्रन्थपातः] – <u>अत्र तत्र समन्वायदिति सूत्रार्थविचारः क्रियासारे</u>–**

एतेषां ब्रह्मवाक्यानामन्वयो ब्रह्मणि स्मृतः ॥ समन्वयात्तु तद्ब्रह्म धार्यं पूज्यं मुमुक्षुभिः ।
वैषम्यद्योतनार्थाय तुशब्दोऽयं प्रकाशितः ॥ तस्माद्विषयवाक्यानिबह्वर्थानि न संशयः ।
तत्रैकार्थमुदाहृत्य स्वस्वबुद्ध्यनुसारतः ॥ लोका मुह्यन्ति सततं विवदन्तः परस्परम् ।
पुनः संसारचक्रेऽस्मिन् भ्रमन्ति परिमोहिताः ॥ कण्वादिकृतशापाश्च परतन्त्रा जना भुवि ।
साधुमार्गं परित्यज्य मार्गान्तरमुपासते ॥ ते सर्वे तप्तनरके पतन्ति सततं ध्रुवम् ।
किमस्ति बहुनोक्तेन मानुषं जन्म दुर्लभम् ॥ वीरशैवान्वये जन्म परमं दुर्लभं स्मृतम् ।
विष्ण्वादिदेवसङ्घानां रक्षकत्वात् सदाशिवः ॥ वीरस्स तु समाख्यातस्तल्लिङ्गं शिव उच्यते ।
वीरलिङ्गं समभ्यर्च्य तत्स्वरूपं प्रयन्ति ये ॥ ते वीरशैवा लोकानां नित्यं क्षेमाभिलाषिणः ।

त्रिपुण्ड्रावलिभिर्दीप्ताः रुद्राक्षस्रगलङ्कृताः ॥ शिवलिङ्गार्चनपराः शिवभक्तप्रपूजकाः ।
पञ्चाक्षररता नित्यं गुर्वाराधनतत्पराः ॥ कीर्तनीयाश्च वन्द्याश्च दर्शनीयाः प्रयत्नतः ।
शिवलोकाच्च गलितास्ते शिवा नात्र संशयः ॥ लिङ्गाङ्गसामरस्येन जीवन्मुक्ताः समाहिताः ।
तस्मात् सर्वप्रयत्नेन लिङ्गं धार्यं मनीषिभिः ॥ शिवस्वरूपलाभाय पशुपाशनिवृत्तये ।
तल्लिङ्गधारणं मुक्त्वा मुक्तिमिच्छति यः पुमान् ॥ विषपानेन नित्यत्वं कुरुते स्वात्मनो हि सः ।
यो लिङ्गधारणं मुक्त्वा पशुशास्त्ररतो भवेत् ॥ करस्थं पायसं त्यक्त्वा कुर्परं लेढि चात्मनः ।
अथातो ब्रह्मजिज्ञासा जन्माद्यस्य यतः शिवात् ॥ तस्मात्तच्छास्त्रयोनित्वाद् भूयस्तत्तु समन्वायात् ।
वेदान्तप्रत्ययन्यायमंशांशित्वमधात् स्वयम् ॥ अंशो नानेति न्यायेन तदेव परिकीर्त्यते ।
शिवांशब्रह्मविष्ण्वाद्या अंशी देवः शिवः स्मृतः ॥ सर्वोप्स्यो महादेवः सर्वे चोपासकाः स्मृताः ।
कथं तयोः प्रभेदो हि जीवात्मपरमात्मनोः ॥ सर्वज्ञत्वादयो धर्माः शिवस्य परमात्मनः ।
किञ्चिज्ज्ञात्वादयो धर्मा जीवानामिति निश्चितम् ॥ अभेदः कथमत्यन्तं भेदाभेदौ व्यवस्थितौ ।
ब्रह्मणः शास्त्रयोनित्वं कथं तन्न भवेन्निजम् ॥ आम्नायस्य क्रियार्थत्वादक्रियतवच्छिवस्य तत् ।
बृहिक्रियायाः कर्त्रादिप्रकाशनमतो न च ॥ इति चेत्तत्र वक्ष्यामः समन्वयनिरूपणम् ।
वेदान्तैरवगम्यन्ते सर्वज्ञात्वादयो गुणाः ॥ वेदान्तेषु च वाक्यानि समन्वयदृढानि हि ।
एतेन शास्त्रयोनित्वं ब्रह्मणो दृढमिष्यते ॥

एतेषां ब्रह्मवाक्यानां ब्रह्मणि अन्वयः स्मृतः ।मोक्षाकाङ्क्षिभिः तद् ब्रह्म एव धार्यं, पूज्यं च भवति । तत्तु समन्वयात् सूत्रे तु शब्दः वैलक्षण्यप्रतिपादनाय प्रयुक्तः । विषयवाक्यानां बहवः अर्थाः सन्ति, तत्र न कापि संशीतिः । तत्र स्व–स्वबुद्ध्यनुसारं एकार्थं स्वीकुर्वन्ति जनाः ।जनाः परस्परं वादं कुर्वन्तः मोहिताःपुनः संसारमण्डले अस्मिन् भ्रमन्ति ।ते सर्वे निश्चयेन तप्तनरके सदा पतन्ति । किं बहु वक्तव्यम् ? मनुष्यजन्म दुर्लभं जन्तूनाम् ।तत्रापि दुर्लभं जन्म कुले शैवस्य कस्यचित् ।शिवलोकात् आगताः ते साक्षत् शिवा इत्यत्र नास्ति संशयः । लिङ्गाङ्गसामर्स्येन समाहिताः ते जीवन्मुक्ताः, यतः सर्वत्र यत्नेनबुद्धिमद्भिः लिङ्गः धारणीयम् ।लिङ्गधारणम् अकृत्वा यः मोकाहम् इच्छति, सः विषपानेन आत्मनः नित्यत्वं कामयेदिव भवेत् ।यः लिङ्गधारणं त्यक्त्वा पशु– शास्त्रे प्रवर्तेत, सः करे विद्यमानं पायसं त्यक्त्वा कर्पूरं लेलिह्यमानः इव भवति । अथातो ब्रह्मजिज्ञासाशिवाद् जन्मद्यस्य यतः तस्मात्शास्त्रयोनित्वात् पुनः तत्तु समन्वयात् ।स्वयं शिवः वेदान्तप्रत्ययानाय अंशांशित्वं व्यधात् । 'अंशः नाना' इति न्यायेन तदेव उच्यते । ब्रह्मविष्ण्वाद्याः शिवांशाः भवन्ति, शिवः अंशी देवः भवति । महादेवः शिवः सर्वैः पूजनीयः । देवाः सर्वे उपासकाः । जीवात्म–परमात्मनोः प्रकृष्टभेदः कथं भवितुमर्हति ?परमात्मनः शिवस्य सर्वज्ञत्वादयः धर्माः प्रसिद्धाः । जीवानां तु अल्पज्ञत्वादयः धर्माः इति निश्चयः ।तत्रापि वीरशैवस्य वंशे जन्म अत्यन्तं दुर्लभम् । वीरशैवकुले जन्म परमं कष्टसाध्यम् । तत्र जाता नराः सर्वे वीरशैवा नरोत्तमाः ।वीरशैवकुले जाताः मनुष्याः सर्वे नरोत्तमाः भवन्ति । विष्णु–आदिदेवसमूहस्य सदाशिवः सदा रक्षकः ।सः वीरः इति प्रसिद्धः ।तल्लिअङ्गं शिव इति कथ्यते, वीरलिङ्गं पूजयित्वा नराः तत्स्वरूपं यान्ति ।ते वीरशैवाः सदा लोकानां क्षेमं वाञ्छन्ति । त्रिपुण्ड्रैः आवलीभीः कान्तियुक्ताः, रुद्राक्षमालाभिः अलङ्कृताः भवन्ति ।प्रयन्तपूर्वकं ते दर्शनीयाः, यतः ते नित्यं पञ्चाक्षरमन्त्ररताः गुरोः आराधनेआशक्ताः, वन्द्याः,स्तोतुं योग्याः ।कथं वा अत्यन्तं अभेदः संघठते ? जीवात्मा–परमात्मनोः भेदाऽभेदौ विनिश्चितौ ।

**उपसंहारः**

अस्य शिवे सर्वज्ञत्वादिधर्माः अपि, जीवे तत् विरुद्धरूप अज्ञत्वादिधर्माः अस्ति चेत्, चेतनरुप द्वयोः पूर्णभेदाः अपि पूर्ण अभेदः अपि न सम्भवति । तदर्थं तस्मै अपक्वस्थितिरूपे भेदः, पक्वस्थिते अभेदः अपि कालभेदेन अङ्गीकृतः । श्रुतेः उक्तः जीवब्रह्मस्य भेदं च अभेदमपि । एवं अवस्था विशेषरूप अनुसृत्यान्वयं प्राप्तुं परस्पर वैषम्यस्य अवकाशं न लभ्यते । परिस्थितिः एवंरीत्या स्पष्टतया अत्र ब्रह्मं शास्त्रयोनि इति उक्त्वा समञ्जसः न अपि इति आक्षेपः आगच्छति । किमर्थं इत्युक्ते सर्व शास्त्राः क्रियाचरणं एव विधिं भवति । परशिव ब्रह्म न क्रियारूपः । तदर्थं ब्रह्मशब्दे 'बृह' धातुः जगत् कर्तरुप परशिवं न बोधयति । एवं ब्रह्मं शास्त्रयोनि इति आक्षेपः भवति तदर्थं परिहारस्य समन्वयसूत्रः गच्छति । परशिवब्रह्म न क्रियारूपः तस्मिन् सर्वज्ञत्वादिधर्माः शास्त्रः वेदान्तवाक्यैः ज्ञायते ।

वेदान्तवाक्याः अपि जीवस्य अवस्था च योग्यतारूप अनुसृत्य आगच्छति । सर्वे जीवाः एकं रूप न अधिकारी । अधिकारितारतम्येन वेदान्तस्य उपदेशेषु परस्परः विरोधः दृश्यते । तेषु समन्वयस्य अवश्यकता अनिवार्य भवति । एतदर्थं परशिवब्रह्मं

शास्त्रः एव योनि इति निश्चितः । 'ब्रह्मं ज्ञायति ब्रह्म एव भवति । इति श्रुतेह् विधि अनुसृतः ब्रह्मः एकमेवाद्वितीयः इति । तत् ब्रह्ममेव तस्य अविद्याजीवः इति संसारे परिभ्रमति । इति अयं जीवः ब्रह्मैव अभेदं कथयति । एवंरीत्या भेदाभेदवादं प्रति न अवकाश इति आक्षेपः आगच्छति । तत् प्रति समाधान एवं अस्ति । "ब्रह्मवद् वाप्नोति ब्रह्मैव भवति" । इति वाक्यं न प्रधानं उपासनं प्रति अङ्गं प्रति श्रुतिसूत्रेषु निर्णयः भवति । ब्रह्मनिष्णातः जीवं प्रति मोक्षः लभ्यते इति श्रुतेः उक्तः परब्रह्मः एव शाश्वत वस्तु इति कथ्यते । एवं सत्पद्दः ब्रह्मः प्रधान इत्यादय इति बोधयति इति सर्ववेदान्तवाक्यानि परशिवब्रह्म एव जगत्कारणम् इति प्रतिपादयन्ति इति स्पष्टं भवति ।

## परामर्शनग्रन्थाः


१) ब्रह्मसूत्रशाङ्करीवृत्तिः– उमचिगि शङ्करशास्त्रिविरचिता – शैवभारतीशोधप्रतिष्ठानम्, जङ्गमवाडीमठ, वाराणसी ।

२) अनुभवसूत्रम् – श्रीमायिदेवविरचितं विमर्शात्मकपरिष्करणम् – वि । डा । हेच्. पि. मल्लदेवरु, प्राच्यविद्यासंशोधनालयः, मैसूरु.

३) बृहदारण्यकोपनिषत् – स्वामि आदिदेवानन्दः –रामकृष्णमठः, मैसूरु.

४) लिङ्गधारणचन्द्रिका – आंग्लटिप्पण्या संकलिता – एम्. आर्.साखरे, बेळगाम्.

५) क्रियासारः – श्रीनीलकण्ठशिवाचार्य विरचित भागत्रयोपेतः, प्राच्यविद्यासंशोधनालयः,मैसूरु.

६) महानारायणोपनिषत् – श्रीवृषभदेवकृतव्याख्यासमलङ्कृता, काशी ।

७) मुण्डकोपनिषत्– वीरशैवभाष्यम् – उमचिगि शङ्करशास्त्रिविरचितम् संस्कृतमूलसहितम्, प्राच्यविद्यासंशोधनालयः, मैसूरु.

८) श्रीकरभाष्यम् – सम्पुट १ –२ – श्रीपति पण्डिताचार्य विरचितम् – प्राच्यविद्यासंशोधनालयः, मैसूरु.

९) वीरशैवानन्दचन्द्रिका – श्रीमरितोण्टाधार्यशिवयोगि विरचित, हुब्बळ्ळि.

१०) सिद्धान्तशिखामणिः – श्री शिवयोगि शिवाचार्यः – प्राच्यविद्यासंशोधनालयः, मैसूरु.

११) सिद्धान्तशिखोपनिषत् – उमचिगि शङ्करशास्त्रिविरचितम् –श्री वृषभदेवपण्डितः काशी ।



**जे. आर्. सिद्धलिङ्गस्वामि**

**अनुसन्धाता**

**कर्नाटक संस्कृत विश्वविद्यालयः**

**चामराज पेटे-५६००१८, बेङ्गळूरु, कर्नाटक**

Contact No. : 9620816109

E-mail : siddalingaswamyjr@gmail.com


*****************

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# काव्यप्रकाशमनुसृत्य वाक्यगतरसगतदोषाणां विचारः

**Arnab Bandyopadhyay**
Assistant Professor
Dept. of Sanskrit
Pijush Kanti Mukherjee Mahavidyalaya
Alipurduar, West Bengal
Contact No. : 9333544737
Email – ghantanotfound555@gmail.com

**प्रस्तावना-**

काव्यशास्त्रस्य बीजं तु वेदेषु एव समुपलभ्यते। आचार्यभरतमुनिम् आरभ्य आधुनिककाव्यपरम्परासु आचार्यमम्मटः प्रख्यातः वर्तते। संस्कृतकाव्यशास्त्रस्य प्रतिष्ठितः समन्वयवादीग्रन्थः आचार्यमम्मटस्य काव्यप्रकाशः अस्ति। काव्यप्रकाशग्रन्थे काव्यशास्त्रस्य तत्वानां विवेचनं कृतं वर्तते। आचार्येण कृतः अयं ग्रन्थः दशसु उल्लासेषु विभक्तः वर्तते। एतेषु उल्लासेषु काव्यलक्षणम्, काव्यप्रयोजनम्, काव्यकारणम्, शब्दार्थस्वरूपम्, शब्दार्थप्रकारः, काव्यप्रकाराणां लक्षणानि, उदाहरणं च इत्यादिनि विस्तारेण विवृतानि सन्ति। आचार्यमम्मटः काव्यपरिभाषायां दोषराहित्यं काव्यस्य एकं लक्षणम् कथयन् लिखति –

**"तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि"**

अत्र प्रयुक्तस्य अदोषौ शब्दस्य तात्पर्यः भवति दोषराहित्यम्। काव्यं भवति दोषहीनं गुणयुक्तं कदाचित् अलङ्काराहित्यं च।

**'उद्वेगजनको दोषः'**

आचार्यविश्वनाथानुसारं **'रसापकर्षः दोषः'**। काव्यदोषेण काव्यमाधुर्यं सौन्दर्यं वा नष्टं भवति।

मुख्यार्थस्य अपकर्षः येन भवति सः दोषः। मुख्यार्थपदस्य अभिप्रायः वाच्यार्थे नास्ति अपि तु रसे एव। अतः मुख्यतः रसस्य अपकर्षजनककारणं दोषः इति उच्यते। मम्मटः सर्वप्रथमं दोषानां विभाजनं प्रकारत्रयेण कृतम्। रसदोषः पददोषः अर्थदोषः च। ततः पददोषस्य पुनः विभाजनं पद-दोषः, पदांश-दोषः, वाक्यदोषः च इत्येवं कृतम्।

आत्मनः शूरत्वं वीरत्वम् इव रसे अचलरूपेण स्थितेन काव्योत्कर्षकारकः यः धर्मः सः गुणः इति उच्यते।

मुख्यार्थस्य अपकर्षकारकं दोषः उच्यते। रसः एव मुख्यः अर्थः। अतः रसापकर्षजनककारकं दोषः उच्यते। रसस्य आश्रयत्वात् वाच्यार्थः अपि मुख्यार्थः भवति। अतः रसेन सह चमत्कारीवाच्यार्थस्य अपकर्षकारकमपि दोषः इति उच्यते। सः च अर्थदोषः। शब्दाः रसवाच्यार्थयोः अवबोधे उपकारकं सहायकं भवति अतः तत्रापि दोषः तिष्ठति। सः च पददोषः इति उच्यते।

**विषयप्रवेशः -**

दोषस्य लक्षणं आचार्यमम्मटेन एवं प्रोक्तम् –

**'मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्रयाद् वाच्यः। उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः।।**

**हतिरपकर्षः। शब्दाद्या इत्याद्यग्रहणाद् वर्णरचने।'**[1]

कारिकायां विद्यमानस्य 'हति' शब्दस्य अर्थः न विनाशः अपि तु अपकर्षः अस्ति। 'शब्दाद्याः' इतिपदग्रहणेन वर्णानां रचनानां च ग्रहणं भवति।

**विशेषलक्षणम् आह –**

**'दुष्टं पदं श्रुतिकटुच्युतसंस्कृत्यप्रयुक्तमसमर्थम्। निहतार्थमनुचितार्थं निरर्थकमवाचकं त्रिधाश्लीलम्।।'**[2]

**सन्दिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत्क्लिष्टम्। अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेव।।'**[3]

एते दोषाः षड्विधाः भवन्ति-

1. पददोषाः च्युतसंस्कृत्यादयः 16 पददोषाः भवन्ति।

2. वाक्यदोषाः श्रुतिकट्वादयः 13 वाक्यदोषाः भवन्ति।

3. पदांशगतदोषाः पदांशगतनिहितार्थादयः सप्तदोषाः भवन्ति।

4.वाक्यगतदोषाः प्रतिकूलवर्णादयः 21 वाक्यदोषाः भवन्ति।

5. अर्थदोषाः अपुष्टादयः 23 अर्थदोषाः भवन्ति।

6. रसदोषाः रसस्य स्वशब्दवाच्यता इत्यादयः 13 रसदोषाः भवन्ति।

शीर्षकानुसारम् अत्र केवलं वाक्यदोषाः रसदोषाः यतामति चर्च्यन्ते।

## वाक्यगतदोषः –

आचार्यमम्मटेन पदे वाक्ये पदैकदेशे च विद्यमानानां 16 सामान्यदोषानां निरूपणं कृत्वा पुनः विंशतिवाक्यदोषाणां निरूपणं कृतम्। सर्वादौ तेषां नाममात्रोल्लेखः क्रियते –

**'प्रतिकूलवर्णमुपहतलुप्तविसर्गं विसन्धि हतवृत्तम्। न्यूनाधिककथितपदं पतत्प्रकर्षं समाप्तपुनरात्तम्।।'**[4]
**'अर्थान्तरैकवाचकमभवन्मतयोगमनभिहितवाच्यम्। अपदस्थपदसमासं सङ्कीर्णं गर्भितं प्रसिद्धि हतम्।।**[5]

**भग्नप्रक्रममक्रमममतपरार्थं च वाक्यमेव तथा।।'**

अर्थात् – 1. प्रतिकूलवर्णना, 2. उपहतविसर्गता, 3. विसन्धिः, 4. हतवृत्तता, 5. न्यूनपदता, 6. अधिकपदता, 7. कथितपदता, 8. पतत्प्रकर्षता, 9. समाप्तपुनरात्तता, 10. अर्थान्तरैकवाचकता, 11. अभवन्मतसम्बन्ध, 12. अनभिहितवाच्यता, 13. अस्थानपदता, 14. अस्थानसमासता, 15. सङ्कीर्णता, 16. गर्भितता, 17. प्रसिद्धिविरोध, 18. भग्नप्रक्रमता, 19. अक्रमता, 20. अमतपरार्थता ।

## रस-दोषाः –

पूर्वं चर्चिताः दोषाः परोक्षरूपेण रसप्रतीतये व्यावधानम् उत्पादयन्ति। किन्तु ये दोषाः प्रत्यक्षरूपेण रसप्रतीतौ बाधकाः भवन्ति, ते रसदोषाः उच्यन्ते। काव्यप्रकाशे निम्नोल्लिखिताः दोषाः रसदोषाः उच्यन्ते –

**'व्यभिचारिरसस्थायिभावानां शब्दवाच्यता। कष्टकल्पनया व्यक्तिरनुभावविभावयोः।।'**[6]

**'प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः। अकाण्डे प्रथनच्छेदौ अङ्गस्याप्यतिविस्तृतिः।।'**[7]

**'अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः। अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशाः।।'**[8]

1. व्यभिचारिभावस्वशब्दवाच्यता, 2. रसस्वशब्दवाच्यता, 3. स्थायिभावस्वशब्दवाच्यता, 4. अनुभावस्य काठिन्यम्, 5. विभावस्य काठिन्यम्, 6. प्रतिकलविभादिग्रहणम्, 7. रसस्य पुनः पुनः दीप्तिः, 8. अनवसरे रसविस्तारः, 9. अनवसरे रसविच्छेदः, 10. अप्रधानरसस्य अत्यधिकविस्तारः, 11. अङ्गीरसस्य अननुसन्धानम्, 12. प्रकृतिनां विपर्ययः, 13. अनङ्गरसस्य कथनम्।

रसस्य अपकर्षत्वमेव काव्यदोषलक्षणमास्ते। यैः साधनैः काव्ये रसस्य न्यूनता अभावः वा आगच्छति, ते दोषाः इति बोध्यन्ते। वस्तुतः काव्यस्य मुख्योद्देश्यं रसानुभूतिः अतः रसानुभूत्यां यः विघातकः तत्त्वः सः रसदोषः इत्युच्यते।

## उपसंहारः -

काव्येषु व्यभिचारभावः, स्थायिभावः, रसश्च इत्यादिशब्दानां विश्लेषणेन दोषाणां स्थितिः उत्पद्यते। अनुभावस्य विभावस्य वा काठिन्येन

प्रतिपादनं, प्रतिकूलविभावादिनां ग्रहणं च इत्यादिकारणेन काव्येषु दोषाः दृश्यन्ते। काव्येषु गुणानाम् अवस्थितिः आत्मरूपरसस्वरुपः इति। अतः दोषाः काव्यत्वं नाशयन्ति। काव्यगुणानां व्यावहारः शब्दार्थैः कृतो भवति। एतेषां भूमिका रसोत्कर्षे अधिका भवति। अतः तत्र एतेषां गुणानां स्थितिः वर्तते।

## पादटिप्पणी

1. काव्यप्रकाशः, उल्लासः 7, श्लो. 49
2. काव्यप्रकाशः, उल्लासः 7, श्लो. 50
3. काव्यप्रकाशः, उल्लासः 7, श्लो. 51
4. काव्यप्रकाशः, उल्लासः 7, श्लो. 53
5. काव्यप्रकाशः, उल्लासः 7, श्लो. 54
6. काव्यप्रकाशः, उल्लासः 7, श्लो. 60
7. काव्यप्रकाशः, उल्लासः 7, श्लो. 61
8. काव्यप्रकाशः, उल्लासः 7, श्लो. 62

## सहायकग्रन्थसूची –


- संस्कृत साहित्य का इतिहास, बलदेव उपाध्याय, प्रकाशक शारदा निकेतन वी, कस्तुरवानगर सिगरा, वाराणसी भारती वाराणसी।
- काव्यप्रकाश, आचार्य मम्मट, चौखाम्बा संस्कृत भारती, वाराणसी
- अमरकोश – अमरसिंह, चौखाम्बा संस्कृत भारती, वाराणसी
- काव्यप्रकाश आचार्य मम्मट, व्याख्याकारविश्वेश्वर पाण्डेयः, चौखाम्बा संस्कृत भारती, वाराणसी।
- बालरामायणम् – राजशेखरसूरी
- The Natyasastra, By Sri Bharatamnl, Satyabhamabal Pandurang, 1962


************

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# उपनिषत्सु योगस्वरूपसमीक्षणम्

**Dr. Gobinda Das**
Assistant Professor,
Department of Sanskrit,
Debra Thana Sahid Kshudiram Smriti Mahavidyalaya
Vill : Chak Madhuri, P. O. : Chakpurusottam- 721211
P.S.-Debra, Dist. : Paschim Medinipur, West Bengal
Comtact No. : 8768145379
E-mail : dasgobinda064@gmail.com

**पुरोवाक्**

वैदिकसाहित्यस्यान्तिमांशोऽस्ति उपनिषद्। उपनिषद्वेदान्तनाम्नापि ज्ञायते। सर्वमनर्थकरं संसारं विनाशयतीति उपनिषद् अथवा संसारकारणभूतमज्ञानञ्च शिथिलयतीत्युपनिषदिति व्युत्पत्यानुसारं या विद्या सर्वान् अज्ञानजनितक्रियाकलापान्विनाशयति सा उपनिषद्। तदुक्तमाचार्यशंकरेण - '**सेयं ब्रह्मविद्या उपनिषच्छब्दवाच्या**'[1] इति। तस्मादुपनिषद् शब्दस्यार्थः 'ब्रह्मविद्या' भवति। सन्तीह बहुसङ्ख्यकाः उपनिषदः। तासु बृहदारण्यकोपनिषद्, कठोपनिषद्, श्वेताश्वतरोपनिषद्, तैत्तिरीयोपनिषद्, माण्डुक्योपनिषद्, योगराजोपनिषद्, अद्वयतारकोपनिषद्, अमृतनादोपनिषद्, अमृतबिन्दूपनिषद्, मुक्तिकोपनिषद्, योगशिखोपनिषद्, योगतत्त्वोपनिषद्, योगचूडामण्युपनिषद्, योगकुण्डलिन्युपनिषद्, नादबिन्दूपनिषद्, ध्यानबिन्दूपनिषद्, तेजोबिन्दूपनिषद्, शाण्डिल्योपनिषद्, हंसोपनिषद्, मण्डलब्राह्मणोपनिषद्, ब्रह्मविद्योपनिषद्, त्रिशिखाब्राह्मणोपनिषद्, पाशुपतब्रह्मोपनिषद्, जाबालोपनिषदित्यादिषु प्राचीनार्वाचिनोपनिषत्सु योगस्य सुस्पष्टं विस्तृतञ्च विवेचनमुपलभ्यते। एषु उपनिषद्ग्रन्थेषु योगस्वरूपं तथा बहुविधाः योगसम्बन्धिताः विषयाः प्रत्यक्षपरोक्षरूपेण विवेचिताः सन्तीति।

**कुञ्चीशब्दाः –**
योगलक्षणम्, योगप्रशंसा, योगाङ्गाः, साधनाविधयः, योगफलम्।

**सन्दर्भः –**

चित्तस्य अन्तःकरणस्य वृत्तेः सर्वतो भावेन निरोध एव योगरिति **मन्यन्ते योगिनः।**[2] उपनिषत्सु योगस्य नैकाः परिभाषाः प्रतिपदिताः सन्ति। तत्र योगशिखोपनिषदि योगस्य स्वरूपं कतिथम्- '**प्राणापानयोश्च एकता सत्त्वरजरूपी कुण्डलिनेः शक्तिः स्वरेतसरूपी च आत्मतत्त्वस्य मेलनम्, सूर्यचन्द्रयोः मेलनं एवं च जीवात्मपरमात्मानयोः मेलनं योगपदवाच्यमि**'ति।[3]

एवञ्च कठोपनिषद्युक्तम्- "तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्। अप्रमत्तस्तदा भवति योगो हि प्रभवाप्ययौ॥"[4]
यदा पञ्चेन्द्रियाणि मनसा सह स्थिराणि भवन्ति, बुद्धेः चेष्टा यदा विनष्टा भवति तदा योगिनः परमागतिं प्राप्यन्ते। इन्द्रियाणां स्थिरभावः हि योगस्य परमावस्था। स्थिरभावं प्राप्य योगी प्रमादरहितो भवति।

योगो मानवस्य सर्वोत्कर्षप्राप्तये सर्वोत्तमं साधनमस्ति। योगः शरीरमारोग्यं बलिष्ठञ्च कुरुते, मानसं निर्मलं पवित्रञ्च सम्पादयति। तद्यथोक्तं श्वेताश्वतरोपनिषदि- 'न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्।'[5] **अर्थात् यो व्यक्तिः योगाभ्यासं करोति, तस्य शरीरे रोगो जरा वा कदापि न जायते। अतः योगाभ्यासेन योगी योगाग्निमयं शरीरं लभते।** बृहदारण्यकोपनिषदपि आत्मदर्शनस्य कृते समाधिरनिवार्यमिति प्रसङ्गे जनकमुपदिशति महर्षिः याज्ञवल्क्यः- 'तस्मादेवंविच्छान्तोदान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवाऽऽत्मानं पश्यति.........'[6] **इति। अर्थाद् ब्रह्मविन्महिमानं विदित्वा कदापि पापकेन कर्मणा वा न लिप्यते। एवं विच्छास्त्रजन्यज्ञानवान् अन्तरिन्द्रियनियमनरूपः शमः, बहिरिन्द्रियनियमनरूपः दमः, निषिद्धकाम्यादिषु कर्मसूपरतिः, तितिक्षा क्षमा समाहितचित्त इत्यर्थः। एवं रूपः सन्नात्मनि जीवात्मनि परमात्मनं तदन्तर्यामिणं पश्यतीति।**

**योगसाधनाय** प्राणायाम-प्रत्याहार-ध्यान-धारणा-समाधि-तर्कश्चैतषां **योगाङ्गानां प्रयोजनमुपनिषत्काराः सततमनुभवन्ति स्म। तेषां मते**

**योगस्य षड्-अङ्गाः सन्ति। यदुक्तं मैत्रायाण्युपनिषत्कारेण-**

"तथा तत्प्रयोगकल्पः प्राणायामः प्रत्याहारोध्यानं धारणा। तर्कः समाधिः षडङ्गः इत्युच्यते योगः॥"[7]

एवं अमृतनादोपनिषद्- ध्यानबिन्दूपनिषद्- योगचूडामण्युपनिषद्- प्रभृतिषु उपनिषत्स्वपि योगस्य षड्-अङ्गानामुल्लेखः लक्षीक्रियते सामान्यशब्दपरिवर्तनेन सह।[8] तद्यथा अमृतनादोपनिषदि **मैत्रायाण्युपनिषदनुरूपं** षड्-अङ्गा**नां नामानि सन्ति केवलं योगशब्दस्य स्थाने** अमृतनादोपनिषदि समाधिशब्दस्य प्रयोगः दृश्यते। तथा च षड्-अङ्गा**नां** नामानां क्रममपि भिन्नमस्ति। ध्यानबिन्दु-योगचूडामण्युपनिषदोः मते **आसन-प्राणसंरोध-प्रत्याहार-धारणा-ध्यान-समाधयश्च षड्-योगाङ्गा इति। अत्र नाम दृष्ट्या पूर्वोक्ताभ्यामुपनिषद्भ्याम् एतयोः उपनिषदः पार्थक्यं परिदृश्यते। यथा आसन-प्राणसंरोध इति शब्दद्वयं प्राणायामतर्कयोः स्थाने प्रयुक्तमस्ति।** परन्तु योगतत्त्वोपनिषदि यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-भ्रूमध्ये हरिध्यानं समाधेः साम्यावस्थाञ्चाष्टाङ्गयोगं निर्दिष्टमस्ति।[9]

अर्वाचीनोपनिषत्सु योगस्य आसनः, प्राणायामः, ध्यानः, धारणा, समाधीनाञ्चेति पूर्णपरिचयः प्राप्यते। एताः उपनिषदः योगस्य विकसितरूपस्य प्रवाहकाः सन्ति। योगस्य विकसितोरूपः प्रधानत अमृतनादादिषु योगोपनिषत्सु यथा लभ्यते न तथा प्राचीनेषु कठाद्युपनिषत्सु। एतासु अर्वाचीनोपनिषत्सु योगस्वरूपः, योगसाधनविधिः, योगाङ्गानां यमनियमानां समयोचितः पालनविधिश्च सुविस्तृतया वर्णितमस्ति। अत्र च चित्त-चक्र-नाडी-कुण्डलिन्यादीनां वर्णनम्, यम-नियम-आसनप्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधि-मन्त्रयोग-लययोग-हठयोग-राजयोग-ब्रह्मध्यानयोग-प्रणवोपासना-ज्ञानयोगैः सह चित्तस्य अवस्थायाः विस्तृतं वर्णनं दृष्यते।

प्राचीनोपनिषत्सु यद्यपि आसनप्राणायामयोः कोऽपि विशिष्टप्रकारस्य उल्लेखो नोपलभ्यते तथापि यम-नियम-क्रियायोगस्य प्राणस्य नाडीनाञ्च विस्तृतविवेचनमस्तीति परिलक्ष्यते। तैत्तिरीयोपनिषदः भृगुवल्ल्यां ब्रह्मसाक्षात्कारस्य महत्त्वपूर्णसाधनस्य कारणत्वेन तपस्योल्लेखः वर्तते।[10] कठोपनिषदि योगशब्दः समाधेः इति स्वपारिभाषिकार्थः। अस्यामुपनिषदि नचिकेता-यमयोः संवादमाध्यमेनेयं वार्ता स्फुटं भवति। यथा - **'अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति'।**[11] अस्यामुपनिषदि अप्रत्यक्षरीत्या प्राणायामस्यापि उल्लेखोऽस्ति। अस्यामुपनिषदि वाणीं मनसि, मनसः ज्ञानमयमात्मनि, ज्ञानमयात्मानः महत्तत्त्वयुक्तमात्मनि, तं महत्तत्त्वयुक्तमात्मानं शान्तात्मनि मिलनार्थं या प्रक्रिया क्रियते सा योगेन सम्भव इति।[12] उपनिषदियं वदति यत् **'यदा पञ्चज्ञानेन्द्रियाः मनसा सह आत्मनि स्थिराः भवन्ति, यदा बुद्धिः निश्चलगतिका भवति तदा सेयमवस्था योग उच्यते।'**[13] अनेन ज्ञायते यदस्यां प्रक्रियायां साधकः एकाग्रतायाः सर्वोच्चसोपानमारोहति।

माण्डुक्योपनिषदि 'ॐ' कारस्य माहात्म्यं बहुशः दृश्यते। तत्रोच्यते यदभयं दुःखक्षयं प्रबोधमक्षयञ्च शान्तिमनोग्रहस्य अधीनाः सन्ति। अस्मिन् रूपे इयमुपनिषद् यम-नियमस्य प्रत्ययं स्पष्टं करोति। रहस्यात्मकानुभवस्य प्राप्त्यर्थमियमुपनिषद् चित्तशुद्धेरनन्तरं ध्यानस्य विधानं ददाति। यज्ञानुष्ठानं व्यर्थमितिकेवलम् 'ॐ' कारस्य उपासनायाः जीवस्य शान्तिलाभः इतीयं वाणी अस्याः उपनिषदः। गर्भोपनिषद् जन्म-मरणस्य बन्धनात् मुक्त्यर्थं योगाभ्यासमेवमद्वितीयं साधनमिति प्रतिपादयति। योगचूडामण्युपनिषदि चक्र-नाडी-पवनादीनां स्वरूपप्रतिपादनपुरःसरं षड्-अङ्गयोगस्य प्रणवाभ्यासस्य च वर्णना वर्तते। अर्थात् चक्र-नाडी-प्रभृतिभिः ज्ञानैः सह आसनादेः षड्-अङ्गयोगस्य 'ॐ' कारस्य यथायथ अभ्यासेन योगसिद्धिर्जायते। एवं तत्रैव उपनिषदि गायत्रीमन्त्रस्य महत्त्ववर्णयन् स कथं योगीजनस्य मोक्षप्रदो भवतीति व्याख्यातः। तस्य मन्त्रस्य सङ्कल्पमात्रेणैव सर्वपापेभ्यो विमुच्यते योगी।[14]

श्वेताश्वतरोपनिषद् योगदृष्ट्या अतिमहत्त्वपूर्णः ग्रन्थोऽस्ति। अत्रध्यानस्य महत्त्वं प्रदीयते।[15] योगी सर्वादौ ध्यानार्थमुपयुज्य आसनान् प्रस्तूयते। ततः प्राणायामस्य अभ्यासः प्रत्याहारादीनाम्। ततः शिष्टयोगाङ्गानामनुशीलनं करणीयम्। अत्र द्रष्टव्यं यत् मैत्रायण्युपनिषदि यमनियमासनानां वर्णना नास्ति किन्तु प्राणायामः, प्रत्याहारः, ध्यानः, धारणा, तर्कः, समाधेश्चेतियोगाङ्गानां विवेचनं लभ्यते।[16] वस्तूतया यमादिभिः सह प्राणायामादीनां साम्यत्वं वर्तते।

**योगकुण्डलिन्युपनिषदि मिताहारः, आसनम्, शक्तिचालनमित्येतानि वायुजपोपायतत्वेन योगसिद्धिर्भवतीति प्राप्यते।**[17] **उपनिषद् मते प्राणायामस्य ब्रह्म-विष्णु-रूद्रात्मकं ग्रन्थित्रयमस्ति। एवं प्राणायामं कुर्वतः** साधकस्य चित्तादिकं **न चलति। न च कदापि वायुः**

**प्रधावति। केवलं यदा कुम्भकतो नाडीगतमले शुष्के सत्यथः सुषुम्नायां प्राणगतिः चालिता स्तम्भिता तदा योगी स्यादिति।**[18] **षड्चकालङ्कारग्रन्थित्रयभेदनानन्तरमियं कुण्डलिनीशक्तिः शिवेन सह सहस्रारे मोदते। सैवावस्था विदेहमुक्तिरिति।**[19] **तेषाञ्च विभेदनेन कुण्डलिन्याः सहस्रकमले उन्नयस्य वर्णनं विद्यते। खेचरीमुद्रा, समाधौ सर्वत्र चिन्मात्रत्वस्यानुभूत्यादयः योगविषयाः निबद्धाः सन्ति। नादबिन्दूपनिषदि नादानुसंधानेन** विदेहमुक्तिलाभोपायः विशेषरूपेण **विवेचनं विद्यते। अत्रोपनिषदि नादस्य मनोनियमनम्, सामर्थ्यस्य विवेचनं विशदरूपेण कृतं वर्तते। चित्तं तदव्यतिरिक्तं न किमपि विषयं काङ्क्षतीति सदृष्टान्तेन च प्रतिपादितम्। ध्यानबिन्दूपनिषदि षड्योगाङ्गैः सह नाडीचक्रः, प्राणादि दशवायुः, अजपाहंसविद्या, कुण्डलिनीप्रबोधनेन मोक्षद्वारविभेदनश्च वर्णनं वर्तते। तेन सह बन्धत्रयः, विपर्ययादि मुद्राणां वर्णनञ्च विद्यते। एषु यथानुरूपमनुशीलनेन अवबोधनेन वा साधकस्य साधना सफलतां याति।** योगशिखोपनिषदि मन्त्र-लय-हठ-राजयोगानां स्वतन्त्ररूपेण वर्णना वर्तते। एषां सम्मेलनं हि महायोगः। यदुक्तम् -

"मन्त्रो लयो हठो राजयोगान्ता भूमिकाः क्रमात्। एक एव चतुर्धाऽयं महायोगोऽभिधीयते॥"[20]

**अस्य महायोगस्य अभ्यासेन निर्विशेषब्रह्मज्ञानसमकालप्राप्य कैवल्यवद्योगफलं प्राप्तिर्भवति।**[21]

योगेन आत्मज्ञानस्य साधनं सम्भवेत्। ततः सुखदुःखरहितो वीतशोको वा भवति योगीति प्राचीनोपनिषत्सुकठोपनिषद्भणति - 'अध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ जहाति।'[22] मैत्रायण्युपनिषद्यपि समाधिना चित्तशुद्धिं विधाय आत्मानुभूतेः आनन्दं लब्धुं शक्यते इत्युपदेशः दृश्यते - **'समाधिनिर्धूतमलस्य चेतसो,निवेशितस्यात्मनि यत्सुखं लभेत्'**[23] **इति।** गर्भोपनिषद् जन्ममरणरूपाय बन्धननिवृत्तये योगमद्वितीयं साधनमिति वर्णयति - 'यदियोन्याः प्रमुच्ये हं तत्साङ्ख्यं योगमभ्यसे' इति। **एवं योगस्य फलमुक्त्वा श्वेताश्वतरोपनिषद् कथयति -**

"लघुत्वमारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौष्ठवं च। गन्धः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमा वदन्ति॥"[24]

मुक्तिलाभाय ज्ञानयोगयोश्चानिवार्यता प्रतिपादयति योगतत्त्वोपनिषद्। तत्र योगं विना निश्चलं ज्ञानं मोक्षप्रदं भवितुं नैव सम्भवः यथा उपपादितः तथैव ज्ञानहीनो योगोऽपि मोक्षकर्मण्यसमर्थो इति सम्यक् उपन्यस्तम्।[25]

### निष्कर्षः

**बहुषूपनिषत्सु योगसाधनस्य उपायाः अनेकैः प्रकारै अनेकाभिः विधाभिः उपन्यस्ताः। तत्र योगस्वरूपम्, तदङ्गानि, अङ्गानां प्रकाराः, साधनाविधयः, उद्देश्यम्, महत्ता, ब्रह्मात्मनः प्राप्तौ परमोपादेयतायाः निरूपणमुपलभ्यते।** उपनिषद्ग्रन्थानां सम्यगध्ययनेनेदं प्रतीयते यदिह योगसाधनं विना अस्माकं पारमार्थिकी प्रवृत्तिः पूर्णतां न्नाप्नोति। तस्माद्योगो मोक्षप्राप्तेरुत्तमसाधनमस्तीति उपनिषदामभिमतम्।

### उल्लेखपञ्जी

1. बृहदारण्यकोपनिषद् १/५/१७, शङ्करभाष्यम् 2. योगसूत्रम् १/२ 3. योगशिखोपनिषद् ६८ 4. कठोपनिषद् २/३/११
5. श्वेताश्वतरोपनिषद् २/१२ 6. बृहदारण्यकोपनिषद् ४/४/२३ 7. मैत्रायण्युपनिषद् ६/१४ 8. अमृतनादोपनिषद् ६, ध्यानबिन्दूपनिषद् ४१, योगचूडामण्युपनिषद् २ 9. योगतत्त्वोपनिषद् २४,२५ 10. तैत्तिरीयोपनिषद्,भृ.,द्वि. 11. कठोपनिषद् १/२/१२ 12. तत्रैव १/३/१३
13. तत्रैव २/३/१०-११ 15. श्वेताश्वतरोपनिषद् १/३ 16. मैत्रायण्युपनिषद् ६/१८ 17. योगकुण्डल्युपनिषद् १/२ 18. तत्रैव १/६३-६४
19. तत्रैव १/८६-८७ 20. योगशिखोपनिषद् १२९ 21. तत्रैव १३९-१४० 22. कठोपनिषद् १/२/१२ 23. मैत्रायण्युपनिषद् ४/९
24. श्वेताश्वतरोपनिषद् २/१३ 25. योगतत्त्वोपनिषद् १४-१५

### सन्दर्भग्रन्थसूची


१. ***ईशादि नौ उपनिषद्***, गीताप्रेस, गोरखपुर, एकविंशसंस्करणम्, वि.सं. - २०५८।
२. ***योगदर्शनम्***, महर्षिपतञ्जलिः, सं...श्रीश्वेतवैकुण्ठः, चौखम्बा विद्याभवन, वाराणसी, प्रथमसंस्करण-२०१८ सन्।
३. ***संस्कृतवाङ्मय का वृहत् इतिहास***, उपाध्याय श्रीबलदेव, उत्तर प्रदेश संस्कृत संस्थान, लखनऊ, वि.सं. - २०६३।
४. ***१०८ उपनिषद्***, शर्मा श्रीराम्, युगनिर्माण योजना गायत्री तपोभूमि, मथुरा, २०१०।


*************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# आधुनिकसंस्कृतवाङ्मयेषु 'भारतायन'महाकाव्यस्य काव्यिकसौन्दर्यपर्यालोचनम्

**जयश्री दे,** शोधछात्रा, पश्चिमबंगाल

**सारसंक्षेपः-**

आधुनिके काले प्रभुतं साहित्यं संस्कृतभाषया विरचितम्। नवीनं संस्कृतसाहित्यं परिमाणेन गुणवत्तया च अतीवोल्लेखयोग्यम्। अर्वाचीनसंस्कृतवाङ्मये ख्यातिमानाचार्येषु आचार्यः हरेकृष्णशतपथिमहोदयः अन्यतमः। शतपथिमहोदयस्य 'भारतायनम्' 'विश्वायनम्' चेति महाकाव्यद्वयमस्ति। तयोः महाकाव्यद्वययोः मम आलोच्यविषयस्तावत् 'भारतायनम्' इति महाकाव्यस्य काव्यिकसौन्दर्य विश्लेषणम्। अस्मिन् महाकाव्ये कविना प्रधानतया भारतजनन्याः ऐश्वर्यम्, औदार्यम्, वैभवम्, गौरवेण परिपूर्णं शान्तं कान्तं चित्रं सरससुन्दरतया विहितम्। 'भारतायनम्' इति महाकाव्ये काव्यात्मकसौन्दर्यस्य बहुविधानि वैशिष्टानि सुस्पष्टरूपेण परिलक्ष्यन्ते। प्रसादगुणान्विते अस्मिन् महाकाव्ये समग्रतया दश सर्गाः ६४६ श्लोकाश्च विलसन्ति। तत्र महाकाव्यस्य प्रतिसर्गस्य नामश्रवणेन महाकाव्यस्य मुख्यप्रतिपाद्यविषयाः बोध्यन्ते।

**सूचकशब्दाः –**

आधुनिकसंस्कृतसाहित्यम्, आचार्यः हरेकृष्णशतपथिः, भारतायनम्, महाकाव्यम्, रसः, अलङ्कारः, गुणः, रीतिः, ध्वनिः।

## मूलप्रबन्धः-

आधुनिके एव काले (खि. अष्टादशशताब्दीतः) विविधं साहित्यं संस्कृतभाषया विरचितम्। नवीनं संस्कृतसाहित्यं परिमाणेन गुणवत्तया च सर्वथा महीयते। आधुनिके काले साहित्यपाठः अनुशीलनेन सह संस्कृतसाहित्यस्य कवि-काव्ययोः सम्बन्धं रचनाकालगतं सामाजिकमवस्थानं साहित्यस्य स्वरूपं रचनाशैलीं विविधेन विचारमार्गेण विचारयति निरूपयति च। कवेः प्रज्ञा वैदुष्यं प्रतिभा च मिलित्वा साहित्यं काव्यं वा निर्माति। तच्च विचित्रं सुन्दरं रमणीयमुज्ज्वलं सहृदयहृदयावर्जकम्। प्रज्ञावान् प्रतिभावान् कविः हि स्वतन्त्रः।तथापि स्थान-काल-जातिगोष्ठीजीवनचर्यादिभिः तस्य प्रयासः सुविस्तृतः। अतः काव्यस्योपादानं बहुविधं भवति। आधुनिके काले संस्कृतसाहित्ये दृश्य-श्रव्य-मिश्रकाव्यमवलम्ब्य यानि यानि काव्यानि रचितानि तानि सर्वाणि आधुनिकसाहित्य-पदवाच्यानि।विवेकानन्दोत्तरम् अरविन्दोत्तरञ्च संस्कृतसाहित्यं स्वातन्त्रेण प्रतिभातम्। ऊनविंशशतके आधुनिक-संस्कृतसाहित्ये विविधानां महाकवीनां मौलिकभावनयाप्राचीनसाहित्यवत् आधुनिकसंस्कृतसाहित्यं विकसितं सुप्रतिष्ठितञ्च जातम्। आधुनिक-संस्कृतसाहित्यस्य चर्चा न केवलं बङ्गप्रदेशे विकसिता, अपि तु समग्रभारतवर्षे अस्य साहित्यस्य प्रभूता चर्चा दृष्टा।

आधुनिकसंस्कृतवाङ्मये आचार्यहरेकृष्णशतपथिमहोदयस्य स्थानमन्यतमम्। आधुनिक-संस्कृतसाहित्यजगति तस्यावदानम् अनस्वीकार्यम्।सः ओडिशाराज्यस्य केन्द्रापडामण्डलस्य 'डम्पुर' इत्याख्ये उपमण्डले 'भीतरबाम्फ' इत्यस्मिन् ग्रामे १९५६ तमे खिष्टाब्दे आगष्ट-मासस्य पञ्चमदिनाङ्के (०५/०८/१९५६) आविर्भवति। शतपथिमहोदयः एकाधारेण कविः, प्राबन्धिकः, प्रवक्तारः, लेखकः, प्रशासकश्चासीत्।तिरुपतिस्थराष्ट्रिय-संस्कृतविश्वविद्यालये दशवर्षाणि यावत् कुलपतिपदमलंकृतं कृत्वा विश्वविद्यालयस्य इतिहासे सुवर्णयुगमानीतवन्तः। तस्य मौलिकग्रन्थाः – आचार्यशंकरः, धर्मपदम् (खण्डकाव्यम्), कविशतकम् (शतककाव्यम्), गङ्गाजलदूषितम् (खण्डकाव्यम्), श्रीचन्द्रशेखरेन्द्र-सरस्वतीशतपुष्पमाला (शतककाव्यम्), जननी (शतक-काव्यम्), भारतायनम् (महाकाव्यम्), विश्वायनम् (महाकाव्यम्), पातु नः शारदाम्बा (खण्डकाव्यम्)।

उपर्युक्तेषु बहुविधेषु ग्रन्थेषु अस्माकमालोच्यविषयस्तावद् **'भारतायनम्'** इति महाकाव्यम्। अस्मिन् महाकाव्ये कविना प्रधानतया भारतजनन्याः ऐश्वर्यम्, औदार्यम्, वैभवम्, गौरवेण परिपूर्णं शान्तं कान्तं चित्रं सरससुन्दरतया विहितम्। 'भारतायनम्' इति महाकाव्ये काव्यात्मकसौन्दर्यस्य बहुविधानि वैशिष्टानि सुस्पष्टरूपेण परिलक्ष्यन्ते। प्रसादगुणान्विते अस्मिन् महाकाव्ये समग्रतया दश सर्गाः ६४६ श्लोकाश्च विलसन्ति। तत्र महाकाव्यस्य प्रतिसर्गस्य नामश्रवणेन महाकाव्यस्य मुख्यप्रतिपाद्यविषयाः बोध्यन्ते। अतः सर्गाणां नामानि

क्रमानुसारेण यथा –**प्रथमसर्गः** भारतजननीवात्सल्यम्, **द्वितीयसर्गः** मातृगौरवंशिशुस्पन्दनम्, **तृतीयसर्गः** भारतनीलाचलमहिमवर्णनम्, **चतुर्थसर्गः** महोदधि-महिमवर्णनम्, **पञ्चमसर्गः** सागरसमर्पणम्, **षष्ठसर्गः** दारुमहोत्सवमन्दिरनिर्माणम्, **सप्तमसर्गः** द्वारकासाधना, **अष्टमसर्गः** काशिविलासः, **नवमसर्गः** काञ्चिवैभवम्, **दशमसर्गः** तीर्थवसतिश्चेति।

अस्य महाकाव्यस्य प्रारम्भे "माता भूमिः पुत्रोऽयं पृथीव्याः इति वैदिकवचनं स्मारं "जननीजन्मभूमिश्च स्वर्गादपि गरियसी" इति ध्यायं कविवरोऽयं भारतजननी-वात्सल्यम् वर्णयति। माता यथा स्वपुत्रस्य लालनं परिपालनं संवर्धनञ्च करोति, तथैव जन्मभूमिरपि स्ववक्षसि विद्यमानैः पोषणात्मकफलपुष्पखाद्यपेयसम्भारैः स्वपुत्रकल्पनया समेषां प्राणिनां परिपोषणं संवर्धनं च करोति । अतः महोद्येनोक्तम् – जनन्या भारतभूमेर्जयगानं विधाय कविर्महाकाव्येऽस्मिन् देशात्मबोधं जागरयितुकामः।

"माता हि जगति भारतभूमिरेषा / तस्या वयं हि नियतं शिशुपुत्रकल्पाः।

स्तन्यामृतं मधुमयं समवाप्य तस्याः / सर्वे भवन्तु सुखिनशिशवस्तदङ्के ॥"[१]

जनन्या भारतभूमेर्जयगानं विधाय कविर्महाकाव्येऽस्मिन् देशात्मबोधं जागरयितुकामः।

## महाकाव्यस्य रसविचारः –

काव्ये रसः स्वरूपाधायकतत्त्वेष्वन्यतम आत्मस्थानीय इति मुक्तकण्ठेन पौनःपुन्येन च जांघुष्यते विद्वत्प्रवरैः विवेचकैः सहृदयैश्च। काव्यस्य नाटकादिप्रभेदेषु गद्यात्मककथाऽख्यायिकादिषु, पद्यात्मकखण्डकाव्यमहाकाव्यादिषु सर्वेषु प्रभेदेषु सर्वत्र आनन्दानुभूतये रसस्य काम्यत्वं प्रायेण सर्वैः स्वीक्रियते। तत्रादौ भरतमुनिना उक्तम् –"न हि रसादृते कश्चिदर्थः प्रवर्तते" इति ।[२]अर्थात् रसं विहाय किमपि वस्तु प्रकर्षेण काव्येषु न तिष्ठति। रस एव परमोत्कृष्टतया आस्वाद्यो भवति। शरीरस्य सर्वेभ्यः वाच्यार्थ-लक्ष्यार्थ-गुण-रीति-वक्रोक्त्यादिभ्यः उपमारूपकाद्यलङ्कारेभ्यश्च भिन्नः काव्यात्मस्थानीयोऽयं रसः स्वीक्रियते।

महाकाव्यस्य लक्षणानुसारं तत्र श्रृङ्गार-वीर शान्तेषु कश्चन एकः रसः अङ्गी भवति, अन्ये च रसाः तत्सहायकतया अङ्गत्वेन तिष्ठन्ति। तथैव भारतायनमहाकाव्ये अङ्गी रसः शान्तो भवति, वात्सल्यम्, करुणः, वीरः, भयानक, अद्भुतः, रौद्र, श्रृङ्गारः इत्यादयः रसाः अङ्गत्वेन विराजन्ते सहृदयैर्वाऽस्वाद्यन्ते। एतेषां सलक्षणविचारोऽत्र प्रस्तूयते। भारतायने श्रृङ्गार-रसस्योदाहरणं यथा–

"लताऽबला वातसमीरिता सती / प्रकाश्य हासं स्फुटसूनशोभनैः । विलासराशिं निजपल्लवैः पुनर्न पादपैः सम्मिलितं स्म कांक्ष्यति॥"[३]

प्रतीकात्मकेऽस्मिन् पद्ये लता नाम्नी काचिदबला तथा च पादपरूपः कश्चिन्नायकः आलम्बनविभावौ भवतः। अत्र स्फुटसूनशोभनः वातः उद्दीपनविभागः। निजाङ्गपल्लवन- बिलासनादयः अनुभावाः भवन्ति । करुण-रसस्योदाहरणं यथा–

भारतायनस्य पञ्चमसर्गे प्रकृतेः विनाशेन कवेः मनसि जायमानः शोकः श्लोकत्वमापद्यत तत्र सर्वेऽपि करुणरसव्यञ्जका विभावानुभावव्यभिचारिभावा: कविना हृदयावर्जकतया मर्मस्पर्शितया च सन्निविष्टास्सन्ति। तत्रोदाहरणं यथा–

"यदा ह्यश्रृण्वं भगिनी दिवंगता / प्रभञ्जनैस्सम्पतिता यथा लता। तथा तदा भूमितले कलेवरलता मदीयान्वपतत्त्वहो विधिः॥"[४]

अस्मिन् श्लोके स्वयं भ्रातृरूपकविस्तथा मृता प्रकृतिरूपिणी भगिनी आलम्बन-विभावां भवति। कवेः भूमौ पतनम् अस्ति। अहो विधिरिति प्रलपनमनुभावः। निर्वेदः, स्मृतिः, जडता इत्यादयः व्यभिचारिभावो विजृम्भन्ते। एवमेतैर्विभावानुभावव्यभिचारिभावैः परिपुष्टः स्थायिभावः शोकः करुणरसत्वेन अभिव्यज्यते।

## अलङ्कारविचारः –

भारतायनमहाकाव्ये अर्थालङ्कारः – **उपमालङ्कारस्य** लक्षणप्रसङ्गे मम्माटार्येणोक्तम् – 'साधर्म्यमुपमा भेदे'[५] इति। अर्थात् यत्र उपमानोपमेययोः स्वरूपतः सत्यपि भेदे उभयोः समानधर्मः वर्तते तर्हि तत्र उपमालङ्कारस्य शक्तिः।

"कदाऽपि मातुर्ऋणभारगौरव- / मिहैव तच्छोधयितुं न सम्भवम्। तथाऽपि याचे मम जन्मजन्मनि / विभातु भक्तिर्जननीपदाम्बुजे॥"[६]

अस्मिन् श्लोके अन्तिमपादे 'पदाम्बुजे' इत्य पदमम्बुजमिव इति मध्यपदलोपिकर्मधारयसमासो भवति। अत्र केवलं उपमानोपमेययोः पद्मपादयोः समासरूपेण केवलं द्वयोरेव प्रतिपादनात् समासगतलुप्तोपमा स्वीक्रियते।

"कृपार्थिपुत्रन्तव पादपद्मयोः / प्रपश्य मातर्मधुपं त्विव स्थितम् । तवातुलाशी: कणिकां दयामयि ! / प्रदेहि मह्यं जननीह याचना॥"[७]

अस्मिन् पद्ये 'कृपार्थिपुत्रं तव पादपद्मयोः प्रपश्य मधुपमिव स्थितम्' इत्यस्मिन्उपमा वर्तते अत्र पुत्रः - उपमेयः, मधुपः - उपमानम्, इव -उपमावाचकशब्दः, स्थितिरवस्थानम् - साधारणधर्मः। एतेषां चतुर्णामेकत्र समावेशात् पूर्णोपमालङ्कारः द्योतते। अत्रापि पादपद्मयोरित्यत्र रूपकम्, तथा च उपमारूपकयोः तिलतण्डुलन्यायेन निरपेक्षतयाअवस्थानात् संसृष्टिश्चालङ्कारः सम्भवति। अनेन प्रकारेण भारतायनमहाकाव्ये प्रतिवस्तुपमा,[८] रूपकम्,[९]अर्थान्तरन्यासः[१०] इत्यादयः अलङ्काराः भवन्ति।

**गुणविचारः –**

काव्यस्यात्मा रसः। तस्य रसस्य अन्वयेन व्यतिरेकेण च गुणाः परिपोषकाःभवन्ति। यथा–शरीरे दयादाक्षिण्यादयः गुणाः आत्मोत्कर्षहेतवो भवन्ति, तथैव काव्ये रसस्य माधुर्यादयो गुणाः उत्कर्षकाः भवन्ति। अतः अलङ्कारविरहितेऽपि काव्ये काव्यत्वंतु स्वीकर्तुं शक्यते, परन्तु गुणशून्यं काव्यं न काव्यत्वसम्पन्नं स्वीक्रियते इत्यभियुक्तैरुच्यते।

भारतायनमहाकाव्ये माधुर्यगुणः –शृङ्गाररसे य आनन्दमयो गुणश्चित्तद्रवीभावकारणभूत स एवं माधुर्याख्यः। अस्यातिशयत्वं क्रमशः विप्रलम्भे, करुणे, शान्ते च कल्प्यते।अस्य व्यञ्जकाः वर्णाः ट-ठ-ड-ढ-वर्जिताः कादयो मावसानाः शिरसि निजवगान्त्यगयुक्ताः तथा रेफणकारै ह्रस्वान्तरितौ सन्ति। काव्यप्रकाशकारमतेन यन्मूर्ध्नि वर्गान्त्यगाः क-च-ट-त-पाः एवञ्च अन्त्यगाः ङ-ञ-ण-न-मरूपाः, स्पर्शवर्णाः (वर्णमालायां कवर्णतः म-वर्णं यावत् सर्वेऽपि स्पर्शसंज्ञकाः) माधुर्यगुणस्य व्यञ्जकाः भवन्ति । यथा– अङ्गम्, सङ्गतिः, कुजम्, गुञ्जन्, सन्तानः, पञ्चाननः, कुञ्चिका, कुञ्जरः, कण्टकम्, सम्पादनम् इत्यादयः शब्दाः। अस्मिन् गुणे समासाभावोऽथवा मध्यमसमासो दृश्यते। उक्तं च काव्यप्रकाशे– "आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्.......।"[११]

माधुर्यगुणयुक्तपद्यानि यथा–

"त्वदीयसम्पर्कमवाप्य शङ्करः / भयङ्करो वा कमनीयकङ्करः। ऋतम्बके ! त्वत्स शिवां शवो भवेत् / कदा पुनः स्पन्दितुमेव न क्षमः॥"[१२]

अत्र शङ्करः, किङ्करः, ऋतेम्बिके, स्पन्दितुम् इत्यादौ माधुर्यव्यञ्जकवर्णाः ङ्क-म्ब-न्दादय कविना प्रयुक्ताः। पुनश्च प्रायशः समासरहितत्वात् 'कमनीयशङ्करः' इत्यत्र मध्यमसमासत्वाच्च पद्यमिदं माधुर्यगुणस्याभिव्यञ्जकं प्रकृष्टमुदाहरणमिति वक्तुं शक्यते।

**रीतिविचारः –**

भारतायनमहाकाव्ये एतासां चतसृणामपि रीतीनां बन्धविन्यासः आकलयितुं शक्यते।क्रमशः तासां विचारः क्रियते। भारतायने वैदर्भीरीतिविचारः–सर्वासु रीतिषु वैदर्भी सर्वरीतिसारभूतेतिउच्यते। विह्लणः वैदर्भरीतिं श्रवणामृतस्यानभ्रवृष्टित्वेन सरस्वत्याः विभ्रमस्य जन्मभूमित्वेनप्रकल्पयति। साहित्यदर्पणे वैदर्भीरीतेः लक्षणं यथा–

"माधुर्यव्यवर्णं रचना ललितात्मिका। / अवृत्तिरल्पवृत्तिर्वा वैदर्भीरीतिरिष्यते॥"[१३]

अर्थात् यत्र काव्यं माधुर्यव्यञ्जकाः वर्णाः, ललितात्मिका रचना, समामराहित्यम्,अल्पसमासयुक्तत्वं च भवन्ति तत्र वैदर्भीरीतिः अङ्गीक्रियते । भारतायनमहाकाव्येऽस्या उदाहरणं यथा–

"दलितमानवरक्षणतत्परां / कलितकोटिकला कमलाकराम्। चलितकालकरालकृपाकरां / नमत भारतमातरमादरात्॥"[१४]

अनेन प्रकारेण भारतायनमहाकाव्यस्य नवमाध्ययस्य ९५तमे श्लोके गौडीरीतिः अपि परिदृश्यते।

**ध्वनिविचारः–**

आचार्यहरेकृष्णशतपथिमहोदयेन रचितं भारतायनमिति महाकाव्यं ध्वन्यध्वनि गहनातिगहनैः रमणीयतमैः प्रतीमानाथैः परिपूर्णमस्तीति कमनेन नात्युक्तिदोषस्सम्भविष्यति। अस्य महाकाव्यस्य नाम्नैव महान् ध्वन्यर्थः प्रतीयते अत्र प्रतिपदं प्रतिपद्यं प्रतिसर्गञ्च वस्त्वलङ्काररसरूपध्वनिवैभवमाकलयितुं शक्यते सर्वैः हृदयविद्वत्प्रवरैः। वस्तुतः महाकाव्यमिदं रसभास्वरं भावध्वनिं बहुधा द्योतयति यद्यपि वात्सल्यशान्त करुणादीनां रसानां विलासः वरीवर्ति, तथापि भगवद्विषयकरतिविषयेऽपि भगवद्विलासी न न्यूनीभवति। एवं भारतायने यो रसध्वनिरास्वाद्यते, तस्य विचारः अग्रिमाध्याये प्रस्तोष्यते। अत्र वस्त्वलङ्कारध्वन्योस्साधारण्येन विचारः क्रियते।तत्रादौ भारतायनस्य मङ्गलाचरणपद्ये ध्वनेस्त्रैविध्यं प्रमुखतया विलसतितराम् ।यथा–

"असीमसौन्दर्यविशेषसौरभम्/ हिमालयादन्यदिगन्तवैभवम्। यदा नमामि प्रियभारतं मम / तदा स्वरूपं प्रतिभाति तेऽम्बिके ॥"[१५]

## उपसंहृतिः

हरेकृष्णशतपथिमहोदयः स्वकीयवार्तां सर्वजातीयस्तरे प्रसारितवान्। सहज-सरल-सावलीलभाषया दृष्टिभङ्ग्या च विश्ववार्तां सर्वजातीयस्तरे प्रतिस्थापनाय महत्कृतित्वस्य परिचयं ददाति। अमूर्तभावश्च व्यक्तिकरणेन अस्य महाकाव्यस्य गुरुत्वं त्वरान्वितमभवत्। आचार्यः हरेकृष्णशतपथिमहोदयः एवं भावेन महाकाव्यद्वयं विलिख्य भारते प्रसिद्धाः सन्ति। तेषां मनोहारिणी काव्यशैली, गभीरं दार्शनिक-प्रतिफलनं विमुग्धं काव्यिकपल्लवनं सरलसावलीलं प्रसादमयञ्च काव्योपस्थापनं पाठकानां मनांसि आवर्जयति। भारतायनम् इति महाकाव्यस्य अध्ययनेन वयं तेषां अनन्यां काव्यप्रतिभां अनुभवामः। शब्दानां पारस्परिकसुबन्धनम्, अर्थानां सुगन्धिपुष्पायनम्, काव्यवस्तुनः प्रवाहमयता, सहृदयचित्ताकर्षि-रसपरिवेषणं माधुर्यगुणानां सुप्रसारश्च तान् विश्वे मूर्धण्यसंस्कृत-महाकविरूपेण प्रतिष्ठापयति।

## तथ्यसुत्राणि

१. भारतायनम् – १/१२० । २. नाट्यशास्त्र – ६/३१ । ३. भारतायनम् – ५/६ । ४. तत्रैव –५/२१ । ५. काव्यप्रकाशः – १०/ सू. १ ६. भारतायनम् – १/९ । ७. तत्रैव – १/११५ । ८. तत्रैव –२/४२ । ९. तत्रैव – १/७, ४/४३, ५/५५, ५/५७, ७/१२ । १०. तत्रैव – ५/५६ । ११. काव्यप्रकाशः – ८/६९ । १२. भारतायनम् – १/२३ । १३. साहित्यदर्पणम् – ९/२ ।१४. भारतायनम् – ३/४ । १५. तत्रैव – १/१

## ग्रन्थपञ्जी

पाठकः, जगन्नाथः। *संस्कृत-वाङ्मय का बृहद् इतिहास*। लखनऊ : उत्तर प्रदेश संस्कृत संस्थान, २०१७ (द्वितीयसंस्करणम्), २००० (प्रथमसंस्करणम्)।

भरतः। *नट्यशास्त्रम्*। सम्पा. सुरेशचन्द्रः वन्द्योपाध्यायः। कलिकाता : नवपत्र प्रकाशन, २०१४ (षष्ठसंस्करणम्), १९८० (प्रथमसंस्करणम्)।

विश्वनाथः। साहित्यदर्पणः। सम्पा. उदयचन्द्रः वन्द्योपाध्यायः। कलिकाता : संस्कृत बुक डिपो, २००५, २००० (प्रथमसंस्करणम्)।

शतपथी, हरेकृष्णः। *भारतायनम्*। तिरुपति : राष्ट्रियसंस्कृतविद्यापीठम्, २००८ (प्रथम-संस्करणम्)।

Chattopadhyay, Rita. *20th Century Sanskrit Literature (A glimpse into Tradition and Innovation).* Kolkata: Sanskrit Sahitya Parishat, 2008 (1st Ed.).

**JAYASHREE DEY**
M.PHIL. RESEARCH SCHOLAR,
DEPARTMENT OF SANSKRIT, PALI & PRAKRIT
VISVA-BHARATI, P. O.- SANTINIKETAN-731235
WEST BENGAL
CONTACT NO. : 7044166794
Email – jayashree.bkt@gmail.com

********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# भगवद्गीतायां धर्मरक्षणार्थं भगवदवतार:

**आर्. जगन्नाथ पूजार्**, बेङ्गळूरु, कर्नाटक

विश्वस्मिन् जगतीतले विद्यमानेषु अध्यात्मविद्याग्रन्थेषु बहुमुख्यं हि महाभारतम् । तत्र च न केवलं पौराणिकी गाथा अपि च शास्त्रविषया: अध्यात्मविद्या च दरीदृश्यन्ते । महाभारते भीष्मपर्वणि श्रीकृष्णार्जुनसंवादरूपेण "भगवद्गीता" निबद्धा दृश्यते । तत्र अर्जुनस्य शोकव्यामोहनिबहार्णार्थं भगवता श्रीकृष्णेन उपदेश: कृत: ।

तत्र च चतुर्थे अध्याये धर्मसंरक्षणार्थं भगवत: अवतारनिरूपणं दृश्यते । जीववैलक्ष्यण्यपुरस्सरं भगवत: वैशिष्ट्यं सम्यक् निरुपितम् । जीवस्य शरीरधारणं अज्ञानेन, कर्मबन्धनेन च । न एतवता, किन्तु गतजन्मन: ज्ञानं जीवे न तिष्ठत्येव जीवप्रतिकत्वेन अर्जुन: स्थित:। वैलक्षणं च स्वयं भगवनाह ।

<u>श्री भगवान् उवाच</u>

बहूनि मे व्यतीतानि जन्मानि तवचार्जुन । तान्यहं सर्व वेद सर्वाणि न त्वं वेत्त परंतपम् ॥

अस्मिन् श्लोके जीवपरमात्मनो: वैलक्ष्यण्यं अतिस्पष्टतया प्रतिपादितम् । यद्यपि अत्र तु कण्ठरवेण भगवत: सार्वज्ञं, जीवस्य अल्पज्ञाता एव वैशिष्ट्यद्योतनाय समुक्ता । श्रीशङ्कराचार्याणां भाष्ये प्रतीकत्वेन कृष्णार्जुनयो: वैलक्ष्यण्यं, ग्रन्थसंवादेन अङ्गीकृतमेव । परन्तु कृष्णस्य सार्वज्ञविषये कारणमाह :-

**"नित्यशुद्धबुद्धमुक्तस्वभावत्वात् अनावरणशक्ति:"** इति । तत्रपि सूक्ष्मं कारणं "**धर्माधर्मभाव:" इति** । स्पष्टं चैतत् तत्रेव पूर्वमातृकावलोकने- "**धर्माधर्मदिप्रतिबद्धज्ञानशक्तित्वात** [1]" इति अर्जुनस्य विषये उक्तमस्ति ।

श्रीरामानुजाचार्याणां भाष्ये अत्र भगवत: अवतार: सद्भाव: प्रदर्शित: । धनपते: व्याख्याने भगवत: अवतारविषये अर्जुन: अज्ञानवत्वात् न जानाति इति निरुपितम् । मधुसूदनसरस्वते: व्याख्याने भगवत: अवतारविषये लीलामात्रत्वं निरूपतम् । जन्मानि लीलया देहग्रहणानि लोकदृष्ट्याभिप्रायेण आदित्यस्य उदयवत् मे मम बहूनि व्यतीतानि" इति उक्तमस्ति । तत्र स्पष्टतया भगवत: अवताररूपाणां आर्विभाव: एव, न तु पुन: जन्म, इति स्पष्टं पुरुषोत्तमस्य व्याख्याने । भगवत: सर्वज्ञात्वात् भगवान् तु अर्जुनस्य बहूनि जन्मानि जानत्येव, अर्जुनस्तु सार्वज्ञत्वभावात् भगवत: अवतारान् न जानाति ।

**"तव जन्मानि अहं वेद जानामि"**

श्रीधरस्वामिन: व्याख्याने कृष्णार्जुनयो: वैलक्ष्यण्यं एव निरुपितं अस्ति । **"अलुप्तविद्यशक्तित्वात् त्वं तु न जानासि अविद्यावृतत्वात्"** इति अद्वैतप्रमेय: एव वैलक्षण्याय निरुपित: । अभिनवगुप्तस्य व्याख्याने भगवान् पूर्णषड्गुण: एव: परन्तु मायाशक्त्या **"आत्मांशं शरीरं गृह्णाति"** इति ।

अनेन स्पष्टं भवति यत् भगवत: अवतारस्तु जीवजन्मवत् न कर्माजितं किन्तु लोकोध्दाराय एव इति । गीताया: पश्चातनश्लोके :-

**"अजोऽपि सन् अव्ययात्मा भूतानां ईश्वरोऽपि सन् । प्रकृतिं स्वाधिष्टाय सम्भवायात्ममायया** [2]" ॥

अस्मिन् श्लोके अजोऽपि सन् प्रारम्भे एव भगवत: जन्माभाव: प्रतिपादित: । जीववत् भगवत: प्राकृतिकं जन्म नास्ति, भगवत: चित्शरीरत्वेऽपि न तस्य दिव्यशरीरस्य विकार: । तदुक्तं **"अव्ययात्मा"** इति । कुत: जीवस्योपरि एव कर्मणां प्रभाव,

पाञ्चभौतिकशरीरसंस्पर्शः नतु भगवतः इत्यत्र कारणमाह **"भूतानां ईश्वरोऽपि सन् इति"** ।

भगवान् तु प्रकृतीश्वर इति ब्रह्माण्डपुराणे कथ्यते **"प्रवृत्तये प्रकृतिगं यस्मात् सः प्रकृतीश्वरः"** (उदाहृतं चैतदवाक्यं श्रीमध्वाचार्याणां ईश्ववास्योऽपनिषद्भाष्ये)

अस्य श्लोकस्य उत्तरार्धः प्रमुखः। अस्मिन् श्लोकेऽपि लोकरक्षणार्थमेव भगवदवतार इति स्पष्टमुक्तमस्ति । आत्ममायया इत्यनेन मायायाः स्वाधीनत्वं प्रकटीकरोति भगवनात्र उत्तरश्लोके

**"यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहं [3] " ॥ इति ।**

एवं रीत्या भगवद्गीतास्थानां श्लोकानां बहुभाष्यपुरस्सरं अध्ययनेन ज्ञातं भवति, भगवदवतारः लीलया, धर्मसंरक्षणार्थं, भक्तनां उद्धरार्थं च इति । बहुमुख्यतया अयं प्रमेय एवमुक्तमस्ति भगवता ।

**"परित्राणाय साधूनां विनाशाय च दुष्कृतां । धर्म संस्थापनार्थाय संभवामि युगे युगे [4] " ॥ इति ।**

अत्र च भगवदवतारस्य प्रयोजनत्रयं विवृतमस्ति :-

१) सज्जनानां रक्षणं प्रथमः उद्धेशः

२) दुष्टानां निर्बर्हणं द्वितीयः उद्धेशः

३) तृतीय उद्धेशः धर्मस्य संरक्षणं एव ।

भगवद्गीतायाम् भगवदवतार विषये क्रमः प्रयोजनश्च विवृतमस्ति इति निगमनम् ।

पादटिप्पणी

1. भगवद्गीता ४ अध्याय ५ श्लोक । 2. भगवद्गीता ४ अध्याय ६ श्लोक । 3. भगवद्गीता ४ अध्याय ७ श्लोक ।4. भगवद्गीता ४ अध्याय ८ श्लोक ।

-: श्रीकृष्णार्पणमस्तु :-

**प्रधान लेखकः**

**विद्वान् आर्. जगन्नाथ पूजार्**

**संशोधना सहायकः**

**वेदान्त विभागः**

**कर्नाटकसंस्कृत-विश्वविद्यालयः**

**बेङ्गळूरु-५६००१८. दू-** 9036143822

E-mail : jagannathapoojar87@gmail.com

**सह लेखकः**

**डा. पि. विनय**

**सहायकप्राद्यापकः**

**वेदान्त विभागः**

**कर्नाटकसंस्कृत-विश्वविद्यालयः**

**बेङ्गळूरु-५६००१८. दू-9845324894**

*************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# आलङ्कारिकः मम्मटाचार्यदिशा गुणानां विवेचनम्

**नीलमाधव प्रधानः**, भुवनेश्वरम्, ओडिशा

रीतिसम्प्रदायस्य प्रवर्तकः वामनाचारिति सर्वेऽपि ज्ञायते एव। वामनाचार्येण काव्यस्यात्मारूपेण रीतिः एव स्वीकृतः। स्वस्य काव्यालङ्कारसूत्रग्रन्थे वामनाचार्येण रीतिः एव काव्यस्यात्मास्वीकृत्य उक्तं यत् – "रीतिरात्मा काव्यस्य" पुनश्च रीत्याः लक्षणं वामनाचार्येण उक्तं यथा –

**विशिष्टा पदरचना रीतिः विशेषो गुणात्मा।**[1]

अर्थात् पदे विशिष्टता रीतेः कारणात् आयाति। गुणं विना पदं सामान्यं भाति। अतः एतत्सर्वमान्यं भवति यत् रीतिः गुणैराश्रितः काव्यशास्त्रीयतत्त्वं भवति। अतः रीतिसम्प्रदायरेव गुणसम्प्रदायः भवतीति वक्तुं शक्यते। रीतेः प्राचीनः नाम मार्गं इति उच्यते। महाकवि दण्डीः द्वारा स्वीकृतदशगुणं वैदर्भमार्गरूपेण आचार्यैः अभिहितः कृतः।

## मम्मटाचार्यदिशा गुणस्वरूपम्

गुणः काव्ये शोभावर्धकारि अन्तर्निहितधर्मः भवति। गुणविहीनकाव्यस्य कल्पनां कर्तुं नैव शक्यते। अलङ्कारविहिनकाव्यस्य स्वरूपं भवितुमर्हति परन्तु गुणं विना काव्यं नैव सम्भवति। काव्यस्यात्मा रसः भवति परन्तु गुणः एव तस्य रसस्य मुख्यधर्मः भवति। संस्कृतकाव्यशास्त्रीयाचार्याणां द्वारा रसस्य उत्कर्षतायां स्थायीभावान् गुणरूपेण स्वीकृतः वर्तते।

साहित्यशास्त्रजगती गुणस्वरूपं तथा गुणसंख्याश्च सुव्यवस्थितं सर्वेऽपि आचार्यैः कृतम्। किन्तु काव्यगुणः संख्यास्वरूपसन्दर्भे मम्मटाचार्यगणानां मतं भिन्नं दृश्यते। तत्र मम्मटाचार्येण अपि स्वस्य मतं स्थापितं वर्तते। यथा –

**ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः। उत्कर्षहेतवस्ते स्युरचलस्थितियोः गुणा।।**[2]

अर्थात् गुणमेव रसस्य धर्मः भवति नित्यश्च भवति, रसस्योत्कर्षं प्रतिपादयति। पुनरुक्तं यत् मम्मटाचार्यः –

**रसस्योत्कर्षापकर्षहेतू गुणदोषौ भक्त्या शब्दार्थयोः।**[3]

गुणानां संख्या सन्दर्भे सर्वैः आचार्यैः स्वस्य मतं प्रकटितवन्तः। तत्र मम्मटाचार्यमपि गुणानां संख्याविषये स्वस्य मतम् उपस्थाप्य वदति यत् – **माधुर्यमोजः प्रसादाख्यास्त्रयस्ते न पुनर्दशः।**[4]

अर्थात् काव्यप्रकाशकारः मम्मटाचार्येण माधुर्य-ओज-प्रसादरूपेण गुणत्रयं स्वीकतम्। एतस्य गुणत्रयस्य व्याख्या मम्मटाचार्यरीत्या क्रियते।

## माधुर्यगुणः

माधुर्यगुणस्य सन्दर्भे मम्मटाचार्येण उक्तम् यत् – **"आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम्"**[5] अर्थात् यः चित्तं द्रवीभूतं करोति अपि च शृङ्गारेस्थित्वा आह्लादस्वरूपं प्रकाशयति सः गुणः एव माधुर्यगुणः। अयं माधुर्यगुणः सामान्यरूपेण शृङ्गारे स्थाप्यति। परन्तु एषः करुण-विप्रलम्भ-शान्तरसस्योत्तरोत्तरः चमत्कारं प्रतिपादयति। उक्तं यत् मम्मटाचार्येण –

**करुणे विप्रलम्भे तच्छन्ते चातिशयान्वितम्।**[6]

माधुर्यगुणस्य अभिव्यञ्जकः गुणानां सन्दर्भे मम्मटाचार्यमुक्तं यत् –

**मूर्ध्नि वर्गान्त्यगाः स्वर्शा अटवर्गा रणौलघू। अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा।।**[7]

माधुर्यगुणस्य उदाहरणं मम्मटाचार्यः प्रस्तुति –

**अनङ्गरङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः। कुर्वन्ति यूनां सहसा यथैताः स्वान्तानि शान्ता पर चिन्तनानि।।**

अर्थात् अनङ्गरङ्गः कामदेवः अस्याः नायिकायाः शरीरे अलौकिकभङ्गिनां रङ्गीकृत्य युवकानां चित्तं शान्तयतीति।

उदाहरणेऽस्मिन् गकारः तथा तकारः स्वकीयवर्गस्य अन्तिमवर्णैः सह युक्तं भवति। अनङ्गः, तदङ्गः, भङ्गीभिः, अङ्गीकृतम् एतेस्मिन् पदे गकारः तथा शान्तः इत्यादौ तकारः स्वकीय वर्गस्य अन्तिमाक्षरैः सह युक्तं भवति। रङ्गादि पदेस्मिन् ह्रस्वस्य व्यवहारः रेफरूपेण भवति। एते सर्वेऽपि वर्णाः माधुर्यस्य व्यञ्जकाः भवन्ति।

## ओजगुणः

ओजगुणस्य सन्दर्भे मम्मटेन उक्तम् यत् – **दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।**[8]

अर्थात् वीररसे स्थित्वा चित्तानां विस्तारे हेतुभूतदीप्तिः ओजः उच्यते। ओजगुणस्य अभिव्यञ्जकः वर्णः तावत् –

**योग आद्यतृतीयाभ्यामन्त्ययोरेण तुल्ययोः। टादि शषौवृत्तिदैर्घ्यं गुम्फ उद्धत ओजसि।।**

मम्मटाचार्यः अत्र ओजगुणस्य उदाहरणं प्रस्तुतं करोति—

**मूर्ध्नामुद्वृत्तकृन्ताविरलगलद्रक्तसंसक्तधाराधौतेशाङ्घ्रिप्रसादोपनतजयजगज्जातमिथ्यामहिम्नाम्।**

**कैलासोल्लासनेच्छाव्यतिकरपिशुनोत्सर्पिदर्पोद्धुराणां, दोष्णां चैषां किमेतत्फलमिह नगरीरक्षणे यत्प्रयासः।।**

अर्थात् औद्धत्यपूर्वकं निरन्तरं शिरछेदनेन कण्ठात् निर्गतः अविच्छिन्नरक्तस्रावयेन शिवस्य चरणाबिन्दम् अभिशिक्तवान्। तत् कृत्वा संसारे विजयं प्राप्य अथवा मे शिरोदानं कैलासाधीपतिं मदिच्छा सूचयितुं गर्वितः भूजानां किम् एतादृशं फलं लब्धं यत् अद्य स्वस्य नगर्याः रक्षार्थं स्वयं प्रयासः कुर्वन् अस्मि। संसारेऽस्मिन् महत्त्वं मे गतः।

प्रस्तूतोऽयं श्लोके दीर्घसमासः शकारः तथा षकारः एवं विकट रचनायाः दृष्ट्या अत्र ओजगुणस्य निष्पत्तिर्जायते।

## प्रसाददगुणः

प्रसादगुणस्य सन्दर्भे मम्मटाचार्येण उक्तं यत् –

**शुष्केन्धाग्निवत् स्वच्छजलवत्ससहसैव यः। व्याप्नोत्यन्यत प्रसादोऽसौ सर्वत्र विहितस्थितिः।।**[9]

अर्थात् शुष्के इन्धनेऽस्मिन् यत् अग्निवत् भवति, स्वच्छजले यत् चित्ते सहजताम् उत्पादयति, तेषु सर्वेषु रसेषु यः तिष्ठति सः एव प्रसादगुणः। प्रसादगुणस्य अभिव्यञ्जकवर्णाः तावत् –

**श्रुतिमात्रेण शब्दात्तु येनार्थप्रत्ययो भवेत्। साधारणः समग्राणां स प्रसादो गुणः मतः।।**[10]

मम्मटाचार्यस्यानुसारेण प्रसादगुणस्योदाहरणं यथा –

**परिम्लानं पीनस्तनजघनसङ्गादुभयतः, तनोर्मध्यस्यान्तः परिमिलनमप्राप्य हरितम्।**

**इदं व्यस्तन्यासं श्लथभुजलताक्षेपवलनैः, कृशाङ्ग्याः सन्तापं वदति विसिनीपत्रशयनम्।।**

अर्थात् दीर्घस्तननितम्वयोः सम्पर्केन शिथीलितः मे शरीरम्। अपि च वाह्यभ्यां निर्बलत्वं दृश्यते। तद्वत् विसिनीपत्रे शयनकृशाङ्गी कामिन्या सन्तापं जनयति।

प्रस्तुतोदाहरणेऽस्मिन् श्रवणमात्रेण अर्थस्य प्रतीतिर्जायते। अतः एतत् प्रसादगुणेन युक्तं भवति। एवं रूपेण मम्मटाचार्येण त्रिगुणस्य सम्यक् प्रतिपादनं कृतम्।

## उपसंहारः

अत्र मम्मटाचार्यदिशा यत् गुणाः वर्तन्ते तेषां सर्वेषां गुणानां लक्षणम्, अभिव्यञ्जकवर्णाः, उदाहरणम् इत्यादयस्य सम्यग्रूपेण उपस्थापनं वर्तते। एवं रूपेण सूक्ष्मातिसूक्ष्मं मम्मटाचार्यस्य गुणिविवेचनं स्वीकृत्य सर्वमपि तथ्यं पत्रेऽस्मिन् स्थापितवान् मया।

## पादटिप्पणी

1. का.प्र.८.७६ । 2. का.सू.१.२.७. । 3. का.प्र.८.६६ । 4. का.शा.१.१२ । 5. का.प्र.८.८८ । 6. का.प्र.८.६६ ।
7. का.प्र.८.६९ । 8. का.प्र.८.७४ । 9. का.प्र.८.६९ । 10. का.प्र.८.७६ ।

## संकेताक्षरसूची

का. सू. – काव्यालङ्कारः सूत्रवृत्तिः

का. शा. – काव्यानुशासनम्

का. प्र. - काव्यप्रकाशः

## सहायकग्रन्थसूची

**काव्यालङ्कारसूत्रवृत्तिः** – केदारनाथ शर्मा, चौखम्बा अमरभारती प्रकाशन, वाराणसी ।

**काव्यानुशासनम्** – श्रीहेमचन्द्रः, कृष्णदास अकादमी, वाराणसी ।

**काव्यप्रकाशः** – मम्मटाचार्यः, आचार्यविश्वेश्वर, ज्ञानमण्डलप्रकाशनम्, वाराणसी ।

**काव्यप्रकाशः** – मम्मटाचार्यः, वामनाचार्यः झलकीकरटीका, पूना ।

**Dr. Nilamadhab Pradhan**
Guest Faculty
Department of Sanskrit
Rama Devi Women's University
Vidya Vihar, Bhubaneswar
Odisha-751022
Contact No. : 9140106176
E-mail : nilamadhab2025@gmail.com

**********

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# "ओमिति ब्रह्म" - एका समीक्षा

**Dr. Ranjita Goswami**
Associate Professor.
Department of Sanskrit.
Arya Vidyapeeth College (Autonomous)
Guwahati- 787016, Assam
Contact No. : 7399110778
E-mail : goswamiranjita1974@gmail.com

## शोधसारः

वैदिकपरम्परानुसारं वेदाः पवित्रतमत्वेन प्राचीनतमत्वेन च परिगणिताः ग्रन्थराशयः इति सर्वेषां हार्दम् । तस्याः श्रुतेः तत्त्वरूपेण ॐकारः परिगणितः । तस्यैव ॐकारस्य **प्राणान् सर्वान् परमात्मनि प्रणाययतीति व्याख्यानादपरो नाम प्रणवः** । अयम् प्रणवशब्दः साक्षाद् ब्रह्मणो वाचकः, तदुक्तम् पतञ्जलिना - " **तस्य वाचकः प्रणवः** " । वाच्यवाचकयोरभेदत्वादयं शब्दोऽपि साक्षाद् ब्रह्मरुपः । तदुक्तम् प्रश्नोपनिषदः ओंकारसम्बन्धिनि प्रश्नस्योत्तरे भगवता पिप्पलादेन " **तस्मै स होवाच एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोङ्कारः । तस्माद् विद्वानेतेनैवायतनेनैकतरमन्वेति** " इति । महर्षिः पिप्पलादः " **रामेति द्यक्षरं नाम मानभङ्गपिनाकिनः**" इतिवद् ओम् इत्यक्षरस्य लक्ष्यभूतेन ब्रह्मणा साकन्तादात्म्यमैक्यञ्च साधयन् ॐशब्दस्य ब्रह्मरुपत्वं प्रतिपादयति । यद्यप्ययम् ॐ शब्दोऽविच्छेदोऽविभक्तः सनातनो ब्रह्मरुपः, तथापि सामान्यदृष्ट्या यदि विचार्यते, तर्हि ॐशब्दः अ.उ.म. इत्येतेषामक्षरत्रयाणां सम्मिलितरूपो वर्तते । तत्र माण्डूक्योपनिषदि एतेषामक्षरत्रयाणामकारोकार- मकाराणां क्रमेण जागरितस्थाने वैश्वानरः, स्वप्नस्थानस्तैजसः, सुषुप्तस्थानः प्राज्ञः, इत्येवं रूपेण वर्णितमस्ति । छान्दोग्योपनिषदि अस्य ॐकारस्य छान्दोग्योपनिषदि " **समान उ एवाऽयं चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद् वा एतमिममगुं चोद्गीथमुपासीत** " इतिकृत्वा प्राणसूर्यरूपाभ्यां वर्णनम् अस्ति ।

## विश्लेषणम्

वेदाः भारतीयपरम्परायाम् प्रचीनतमाः पवित्रतमाश्च ग्रन्थराशयः इति सर्वेषां मतम् । मान्यतायामस्यां भारतीयायां संसारस्य यानि ज्ञानविज्ञानानि स्मृतिशास्त्राणि च वर्तन्ते, तेषां सर्वेशामुद्भवस्थानन्तु वेदा एव इत्यत्र नास्ति सन्देहः । अत एवाह मनुः - **वेदोऽखिलो धर्ममूलम् स्मृतिशीले च तद्विदाम् । आचारश्चैव साधूनाम् आत्मनस्तुष्टिरेव च** [1] ॥ एतं मनोर्वचनमाश्रित्य कथ्यते यत् ' श्रुतिमूलाः स्मृतयः प्रमाणमिति " । एतादृशीनां श्रुतीनां परमतत्वेन ॐकारो निगद्यते, तस्यैव ॐ कारस्य अपरो नाम प्रणवः । अयम् ओम्काररूपः प्रणवः साक्षाद् ब्रह्मणो वाचकोऽस्ति । तदुक्तम् भगवान् पतञ्जलिः "तस्य वाचकः प्रणवः" अर्थात् तस्य ब्रह्मणो वाचकः ॐमिति । गोपथ-ब्राह्मणानुसारं ब्रह्मा सृष्टिरचनायाः प्रारम्भे सर्वप्रथमः ॐ कारस्यैव साक्षात्कृतवानिति, अत्रैव ॐकारस्य " अध्यात्ममात्म भैषज्यमात्म कैवल्यमोङ्कारः" इति । अर्थाद् ॐकारः अध्यात्मनः आत्मभैषज्यस्य आत्मकैवल्यस्य रूपोऽस्ति । न केवलं गोपथे, अपितु गीतायाम् भगवान् श्रीकृष्णः स्वयमेव ब्रवीति " **ओमित्येकाक्षरं ब्रह्म**"[2] इति । यद्यप्ययम् ॐ शब्दोऽविच्छेदोऽविभक्तः, सनातनो ब्रह्मरूपः, तथापि सामान्यदृष्ट्या यदि विचार्यते, ॐ शब्दः **अ .उ .म.** इत्येतेषामक्षरत्रयाणां संमिलितरूपः, अस्य स्वरूपविषये वैशिष्ट्यपूर्वकं साङ्गोपाङ्गत्वेन व्याख्यायन् तत्र माण्डूक्योपनिषदि प्रोक्तम् यत् सः परब्रह्मः स्वनाम्ना अभेदत्वात् त्रिभिर्मात्राभिर्युक्तः ॐकाररूपः एव । तास्तिस्रो मात्राः अ उ म इति , एतस्स्तिस्रो मात्रैव परब्रह्मणः त्रयः पादाः वर्तन्ते , अतः पादमात्रयोर्मध्ये कश्चन एकोऽभेदः सम्बन्धोऽ स्ति । तदुक्तम् माण्डूक्योपनिषदि - "**सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकारश्चेति** "[3] । तासु त्रिमात्रासु प्रथमा मात्रा विद्यते अकारश्चेति । यथा इह लोके सर्वेषु स्थूलजगद्रूपेष्वस्मासु शरीरेषु वैश्वानररूपेण सः परमात्मा व्याप्तः सन् विराड्रूपेणास्मिन् जगति सर्वप्रथमप्रादुर्भूतत्वात् सर्वेषामाद्यप्यस्ति, तथैवायमकारोऽपि सर्वेषु लोकेषु विद्यमानानि यान्यप्यक्षराणि विद्यन्ते, तेषु सर्वेष्वर्थ-बोधकेषु शब्देषु व्याप्तोऽस्ति । स्वरो वा व्यञ्जनः स्यात्, कोऽपि शब्दोऽकाररहितो न भवति । अतो वैश्वानरेण सहैक्याद् यथा ब्रह्मणो

वैश्वानरः प्रथमपादः, तथैवायमकारोऽपि ब्रह्मणः प्रथमपादः । अतः यः पुरुषः इत्थम्भूतेन वैश्वानराकारयोरैक्यं विज्ञाय तमुपासते स सर्वानिष्टपदार्थान् सम्प्राप्य अन्ते ब्रह्मलोके महीयते । तदुक्तम् माण्डूक्योपनिषदि " **जागरितस्थाने वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादिमत्त्वाद्वाऽऽप्नोति ह वै सर्वान्कामानादिश्च भवति, य एवं वेद** [4] " । ब्रह्मरूपात्मकस्य ॐकारस्य द्वितीया मात्रा 'उ ' इति वर्तते, अयमुकारः अकारात् श्रेष्ठः, अकारमकारयोर्मध्ये पठनादस्य उकारस्य अकारमकाराभ्यां सह कश्चन एको घनिष्ठः सम्बन्धो वर्तते । उभयाभ्यां मध्ये स्थितोऽयमुकारः उभयस्वरूपः । अनेनैव प्रकारेण तैजसो (हिरण्यगर्भः) वैश्वानरादुत्कृष्टः, तथैव वैश्वानरप्राज्ञयोर्मध्यगतत्वादयन्तैजसो वैश्वानरप्राज्ञसम्बन्ध्यपि वर्तते । अतः वैश्वानरोकारयोस्साम्यत्वाद्यथा वैश्वानरो ब्रह्मणो द्वितीयपादस्तथैव उकारोऽपि द्वितीयपादः । तदुक्तम् माण्डूक्यो पनिषदि " **स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद** [5]" । परब्रह्मणो नामात्मकस्य ॐकारस्य तृतीया मात्रा मकार इति । सः म् कारो मा धातुना निष्पन्नः, मा धातोरर्थः मापनमिति । अयं म् कारः अकार - उकारयोरन्तरेणोच्चरितो भवति अतः अकार - उकारयोर्द्वयोरेव (मापः) अर्थावत्रैव समाहितौ भवतः । अर्थात् कथनस्येदन्तात्पर्यं यदयं म् कारः ओष्ठस्थानीयः, यदा अस्योच्चारणं विधीयते, तदा मुखस्य पिधानम् भवति, तेन पिधानेन अकारोकारौ तत्रैव विलीनौ भवतः, अतोऽयं द्वयोर्मात्रयोर्विलापकः । अनेनैव रीत्या सुषुप्तस्थानीयकारणजगतः अधिष्ठाता प्राज्ञोऽपि सर्वज्ञः । स्थूलम् , सूक्ष्मः , कारणञ्च, एतास्त्रयः अवस्थाः, एतासु त्रिषु अवस्थासु स्थितस्यास्य जगतः ज्ञाताऽपि वर्तते । कारणजगतः एव सूक्ष्मस्य स्थूलजगतश्च उत्पत्तिर्जायते एवं तत्रैव लयोऽपि भवति । इत्थं रीत्या मकारस्य कारणजगतः अधिष्ठातुः प्राज्ञस्य च समत्वात् मकाररूपः तृतीयपादः एव ब्रह्मणः तृतीयपादोऽस्ति । यो मनुष्यः मकारस्य प्राज्ञरूपपरब्रह्मणः ऐक्यञ्जानाति तथा मकारस्य एतं स्वरूपं जानाति सः भवबन्धनान्मुक्तो भवतीति । तदुक्तम् माण्डूक्योपनिषदि " **सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतिर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद** "[6] ।

अनेनैव रीत्या तैत्तिरीयोपनिषद्यपि ॐमिति शब्दस्य ब्रह्मणा साकमैक्यम् प्रदर्शयन् निगदितम् यद् अयं ॐशब्दः परमात्मनो नामास्ति, भगवतो नामापि भगवत्स्वरुपः एव भवतीति कृत्वाऽयं ॐशब्दः साक्षाद् ब्रह्मरुपः । तदुक्तम् तैत्तिरीयोपनिषदि " **ओमिति ब्रह्म,ओमितीदं सर्वम्** "[7] । इदं प्रत्यक्षेण दृश्यमानं सर्वं जगद् ॐकारस्यैव स्थूलरूपं विद्यते । अन्यदपि ॐ इत्ययं शब्दः अनुकृतिः अर्थादनुमोदनस्य सूचकः । यदा मनुष्येण कस्यापि कथनस्यानुमोदम् करणीयम् भवति, तदा ब्रह्मणो नामात्मकरुपस्य ॐकारस्योच्चारणं विधाय तस्यानुमोदनम् करोति, इदम् प्रसिद्धम् वर्तते अथवा यदा शिष्यः गुरुम् किमपि श्रावयितुं वाध्येतुम् प्रार्थयति, तदानीं वक्ता ॐकारमुच्चार्यैव प्रारभते, तदुक्तम् तैत्तिरीयोपनिषदि " **ओमित्येतदनुकृतिर्हि स्म वा अप्यो श्रावयत्येश्रावयन्ति** "[8] । साम्नो गायकाः अपि सामगानारम्भे प्रथमन्तावद् ॐइत्येतत् शब्दस्य सम्यग्ज्ञानं विधाय सामगानम् प्रकुर्वन्ति । यज्ञकर्मसु शंसनरुपकर्मकर्तारः ऋत्विजोऽपि ॐ इत्येतं शब्दमुच्चार्य शस्त्रानामर्थात् तद्विषयकमन्त्राणां पाठमारभन्ते । यज्ञस्याध्वर्युः नामकः ऋत्विगपि ॐइति शब्दमुच्चार्य प्रतिगारमन्त्राणामुच्चारणं करोति, तदुक्तन्तैत्तिरीयोपनिषदि " **ओमिति सामानि गायन्ति। ओम् शोमिति । शस्त्राणि शंसन्ति । ओमित्यध्वर्युः प्रतिगरं प्रतिगृह्णाति । ओमिति ब्रह्मा प्रसौति । ओमित्यग्निहोत्रमनुजानाति । ओमिति ब्राह्मणः प्रवक्ष्यन्नाह ब्रह्मोपाप्नवानीति ।ब्रह्मैवोपाप्नोति ।** [9] "

"**ओमित्येतदक्षरम्** " [10] इत्यदिभिर्मन्त्रैस्समारभ्यमाणायां छान्दोग्योपनिषदि ॐ इतिशब्दः ' उद्गीथ ' इति नाम्ना प्रतिपाद्यते । तस्यैव ॐरूपात्मकस्योद्गीथस्योपासनया मनुष्यः कर्मबन्धनान्विमुच्य मुक्तिं प्राप्नोतीति कारणेन मनुष्यैस्तस्योपसना कर्तव्या इति । तदुक्तम् छान्दोग्योपनिषदि "**ओमित्येतदक्षरमुद्गीथमुपासीत, ओमित्येह्युद्गायति तस्योपव्याख्यानम्**" [12], इति । उद्गीथशब्दमित्थं व्याख्यातन्तत्रैव यद् उद्गीथशब्दघतकीभूतः उत्शब्दः प्राणस्य बोधकः, यतो हि प्राणादेव मनुष्योत्तिष्ठतीति । " गी " इति शब्देन वाणी बोधिता भवति, अत एव वाणी गिरा इत्यनेनापि सम्बोध्यते । 'थ' कारस्यार्थोऽन्नो वर्तते, यतो हि अन्नेषु सर्वे जीवाः स्थिताः भवन्ति इति भावः । तदुक्तम् छान्दोग्योपनिषदि " **अथ खलु उद्गीथाक्षराणि उपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदं सर्वं स्थितम्** "[13] । अस्यैव ग्रन्थस्य द्वितीयखण्डे ॐकारस्याध्यात्मिकोपासनायाः विधिवद्वर्णनम् विद्यते । तत्रेदं प्रसिद्धमस्ति यदङ्गिरा ऋषिः प्राणमेव प्रतीकं कृत्वा ओंकाररूपं परमात्मानमुपासितवानिति तत्रैव व्याख्यातम् ।

अतः लोके जनाः ओंकारम् 'अङ्गिरसः ' उपास्यत्वेन स्वीकुर्वन्ति । यथा प्राणः सर्वेषामङ्गानाम् पोषकः, तथैवायम् (अङ्गिरसः) ॐकारोऽपि समस्तानामङ्गानां पोषकः । अत एव बृहस्पतिरपि प्राणरूपेणास्यैवोद्गीथस्योपासनाम् कृतवानिति तत्रैव स्पष्टम् तदुक्तम् छान्दोग्योपनिषदि **"तेन तं ह बृहस्पतिरुद्गीथमुपासाञ्चक्रे एतमु एव बृहस्पतिं मन्यन्ते वाग्घि बृहती तस्या एव पतिः "**[14] । वाण्याः अपरनाम बृहती अपि विद्यते, प्राणः तस्यैव पतिः रक्षकः, बृहत्याः पतिः = बृहस्पतिः इति कृत्वा केचन जनाः प्राणमेव बृहस्पतिरिति स्वीकुर्वन्ति तदुक्तम् छान्दोग्योपनिषदि **" तं हाङ्गिरा उद्गीथमुपासाञ्चक्रे एतमु एवाङ्गिरसं मन्यन्ते अङ्गानां यद् रसः** [15]" । ॐकाररुपात्मकोद्गीथस्य प्राणस्य ईदृशं महत्वं जानन् यः पुरुषस्तस्योद्गीथस्योपासनां कुरुते, सः निस्सन्देहेन ओम्काररुपोद्गीथस्य गानेन स्वकीयान् सर्वान् मनोभिलषिताप्राप्तुं समर्थो भवतीति । तदुक्तम् - **छान्दोग्योपनिषदि " स य एतदेवं विद्वानक्षरं प्रणौत्यदेवाक्षरं स्वरममृतमभयं प्रविशति, तत्प्रविश्य यदमृता देवास्तदमृतो भवति ''**[16] ।

अस्योपनिषदस्तृतीये खण्डे ॐकारस्य दैविकोपासनायाः वर्णनमस्ति, यस्सूर्यः इदं भूर्भुवःस्वन्तेजसा व्याप्तङ्करोति, तस्यैवोद्गीथरूपेणोपासना कर्तव्याI पुरस्तत्रैव भगवतो भाष्करस्योद्गीथरूपेण व्याख्यानम् कुर्वन् वर्ण्यते यदयं विभ्राडुदितस्सन् प्रजायाः कल्याणार्थमन्नाद्युत्पत्तीनामुद्देश्येनोद्गानं विधत्ते, तासाम् प्रजानामुन्नतये कारणम् भवति, अत एव दिवाकरः ॐ काररूपोद्गीथः । एतावदेव न ,अपितु अयं भाष्करः उदितो भूत्वा 'भूर्भूवःस्वः' इत्येतल्लोकत्रयस्य अन्धकारं भयञ्च नाशयन् सर्वेषां कल्याणाय सदैव प्रयतते, तादृशमुदगीथरूपात्मकस्य भगवतो दिवाकरस्य महिमानं सम्यग्विज्ञाय यो जनः तमुपासते, सः जन्मबन्धनान्विमुच्य मुक्तिपथे समापतति । तदुक्तं छान्दोग्योपनिषदि " **अथाधिदैवतं य एवाऽसौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्यः उदगायति । उद्यंस्तमोभयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद** " [17] । पुनस्तस्यैवोद्गीथस्य प्राणेन सहोपमीय कथ्यते यदिमौ प्राणसूर्यौ समौ स्तः इति, यतो हि यथा प्राणः उष्णो भवति, तथैव सूर्योऽपि उष्णो वर्तते, अतः उद्गीथरूपात्मकौ प्राणसूर्यौ एकधर्मावलम्बिनौ, यतो हि यथा सूर्यः उष्णस्तथैव प्राणोऽपि उष्णः । एतादृशमेव प्राणं मनुष्याः 'स्वरः' ( क्रियाशक्तिसम्पन्नः ) एवं 'प्रत्यास्वरः' (अन्यान् क्रियाशक्तिप्रदाता) इत्येताभ्यां द्वाभ्यामेव नामाभ्यामाह्वयन्तीति कृत्वा अनयोः प्राणसूर्ययोरुद्गीथरूपेनोपासना कर्तव्या इति । तदुक्तं छान्दोग्योपनिषदि " **समान उ एवाऽयं चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद् वा एतमिमममुं चोद्गीथमुपासीत** " [18]इति । यो वायुं निःश्वासमाध्यमेन बहिर्निक्षिपति, सः प्राणपदाभिधेयः । यः वायुं शरीरान्ते नयति, सोऽपानः, तथैव प्राणापानयोर्यः सन्धिः, सो व्यानपदेन निगद्यते, तदुक्तं छान्दोग्योपनिषदि " **अथ खलु व्यानमेवोद्गीथमुपासीत, यद्वै प्राणिति स प्राणो यदपानिति सोऽपानः । अथ यः प्राणापानयोः सन्धिः, स व्यानो यो व्यानः स वाक् । तस्माद् प्राणन्ननपानन्वाचमभि व्याहरति** "[19] । यः व्यानः सा एव वाणी, या वाणी स ऋक्पदाभिधेयः । अत एव मनुष्याः प्राणापानयोर्व्यापारमकृत्वा हि वेदानां ऋचायाः सम्यगुच्चारयन्ति, जनाः यां ऋचामुच्चारयन्ति सैव सामः, यः सामः सोद्गीथः । अत एव मनुष्याः प्राणापानयोः क्रियां विहाय यथा वेदसम्बन्धिनीं ऋचामुच्चारयन्ति, तथैवोद्गीथस्याप्युच्चैर्गानं कुर्वन्तीति भावः । उद्गीथशब्दनिष्ठानि यानि त्रीणि अक्षराणि विद्यन्ते, तद्वाच्यपरमात्मानः उपासना कर्तव्येति तत्त्वम् । इत्थम्भूतेभ्यः त्रिभ्योऽक्षरेभ्यः समन्वितमुद्गीथशब्दवाच्यं ॐकाररूपं परमात्मानं सम्यज्ज्ञात्वा उपासते, तदर्थं वाणी स्वकीयं सम्पूर्णरहस्यं प्रकटीकरोति, अर्थात् तत्समक्षं सम्पूर्णानां वेदानां तात्पर्यं स्वतः समुद्भूतं भवति, तथा सः सर्वाः भोगसामग्र्यः प्राप्तिपूर्वकं तस्योपभोगशक्तिरपि प्राप्नोति । तदुक्तम् - छान्दोग्योपनिषदि " **या वाक्सर्क्तस्मादप्राणन्ननपानन्नृचमभिव्याहरति यर्क्तत्साम तस्मादप्राणन्नन पानन्साम गायति यत्साम स उद्गीथस्तस्मादप्राणन्ननपानन्नुद्गायति** " [20] । अनेनोपर्युक्तव्याख्या नेनेदं सिद्ध्यति यदयम् ॐकारः, सः साक्षाद् ब्रह्मरूपः, प्रणवपदाभिधेयः, उद्गीथरुपश्च वर्तते, अस्माद् एव सृष्टेरारम्भः अत्रैव विलीनोऽपि भवति । **इत्यलम्**

**निष्कर्षः** . **"ओमित्येकाक्षरं ब्रह्म"** इति श्रीमद्भगवद्गीतारीत्या उत वा " **ओमिति ब्रह्म, ओमितीदं सर्वम्** " इति तैत्तिरीयोपनिषद्यनुसारं शब्दार्थयोरभेदत्वादयं ॐ शब्दः साक्षाद् ब्रह्मरुपः, इदं प्रत्यक्षेण दृश्यमानं सर्वं जगद् ॐकारस्यैव स्थूलरूपं विद्यते । यद्यप्ययं ओम् शब्दः अविच्छेदः अविभक्तश्च, तथापि स्थूलदृष्ट्या अ उ म् इत्येतेषामक्षरत्रयाणां सम्मिलितरूपः । तदुक्तम् माण्डूक्योपनिषदि **"सोऽयमात्माध्यक्षरमोङ्कारोऽधिमात्रं पादा मात्रा मात्राश्च पादा अकार उकारो मकारश्चेति "** । तत्रत्या अकाररुपा प्रथमा मात्रा जागरितस्थाने स्थितस्य वैश्वानरस्य बोधकः, तदुक्तम् माण्डूक्योपनिषदि **"जागरितस्थाने वैश्वानरोऽकारः प्रथमा मात्राऽऽप्तेरादिमत्त्वाद्वाऽऽप्नोति ह वै**

**सर्वान्कामानादिश्च भवति, य एवं वेद"** । उकाररूपा द्वितीया मात्रा स्वप्नस्थाने स्थितस्य तैजसः बोधकः उक्तञ्च माण्डूक्योपनिषदि " **स्वप्नस्थानस्तैजस उकारो द्वितीया मात्रोत्कर्षादुभयत्वाद्वोत्कर्षति ह वै ज्ञानसन्ततिं समानश्च भवति नास्याब्रह्मवित्कुले भवति य एवं वेद** " । मकाररुपा चतुस्संख्याका मात्रा सुषुप्तस्थाने स्थितस्य प्राज्ञस्य बोधकः । निगदितञ्च माण्डूक्ये **"सुषुप्तस्थानः प्राज्ञो मकारस्तृतीया मात्रा मितेरपीतिर्वा मिनोति ह वा इदं सर्वमपीतिश्च भवति य एवं वेद " ।** यदा मनुष्येण कस्यापि कथनस्यानुमोदम् करणीयम् भवति, तदा ब्रह्मणो नामात्मकरुपस्य ॐकारस्योच्चारणं विधाय तस्यानुमोदनम् करोति, इदम् प्रसिद्धम् वर्तते अथवा यदा शिष्यः गुरुम् किमपि श्रावयितुं वाध्येतुम् प्रार्थयति, तदानीं वक्ता ॐकारमुच्चार्यैव प्रारभते, तदुक्तम् तैत्तिरीयोपनिषदि " **ओमित्येतदनुकृतिर्हि स्म वा अप्यो श्रावयत्येश्रावयन्ति** " । **"ओमित्येतदक्षरम्** " इत्यदिभिर्मन्त्रैस्समारभ्यमाणायां छान्दोग्योपनिषदि ॐ इतिशब्दः ' **उद्गीथ** ' इति नाम्ना प्रतिपाद्यते । स एव उद्गीथ ब्रह्मणः प्रतिपादकः । स एव पञ्चप्राणरूपेण जीवान् धारयति, स एव सूर्यत्वेन तपते, अत एवोक्तं छान्दोग्योपनिषदि" **अथाधिदैवतं य एवाऽसौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्यः उदगायति । उद्यंस्तमोभयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद** " । **इत्यलम्** ॥

## सन्दर्भग्रन्थसूची

1. मनुस्मृतिः - 2/6 । 2. आर्षवचनम् । 3. पातञ्जलयोगसूत्रम् - 1/27 । 4. श्रीमद्भगवद्गीता - 8/13 ।
5. माण्डूक्योपनिषद्- मन्त्रसंख्या -08 । 6. माण्डूक्योपनिषद्- मन्त्रसंख्या -09 । 7. माण्डूक्योपनिषद्- मन्त्रसंख्या -10 ।
8. माण्डूक्योपनिषद्- मन्त्रसंख्या -11 । 9. तैत्तिरीयोपनिषद्- अनुवाकः -08 । 10. तैत्तिरीयोपनिषद्- अनुवाकः -08 ।
11. तैत्तिरीयोपनिषद्- अनुवाकः -08 । 12.छान्दोग्योपनिषद्- 1/1/1 । 13. छान्दोग्योपनिषद्-1/1/1 ।
14.छान्दोग्योपनिषद्- 1/3/6 । 15. छान्दोग्योपनिषद्- 1/2/11 । 16. छान्दोग्योपनिषद्- 1/2/10 ।
17. छान्दोग्योपनिषद्- 1/4/5 । 18. छान्दोग्योपनिषद्- 1/3/1 । 19. छान्दोग्योपनिषद्- 1/3/2 ।
20. छान्दोग्योपनिषद्- 1/3/3 । 21.छान्दोग्योपनिषद्- 1/3/4 ।

**********

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# नैषधे उपनिषद्-भावना

**Tumpa Jana,**
Assistant Professor, Department of Sanskrit
Narajole Raj College, Narajole, Daspur-721211
Paschim Medinipur, West Bengal
Contact No. : 9933482016
E-mail : tumpanrc@gmail.com

श्रीहर्षस्य 'नैषधचरितम्' वृहत्त्रय्यामन्तर्गतमन्यतमं महाकाव्यम्। महाकविः श्रीहर्षः बहुग्रन्थानां रचयिता। परन्तु तेषु ग्रन्थेषु 'नैषधचरितम्' सर्वाधिकं जनप्रियम्। अस्य काव्यस्य कथावस्तु महाभारतस्य वनपर्वस्य नलोपाख्यानम्। श्रीहर्षः इदं नलचरितमाश्रित्य द्वाविंशसर्गे नैषधचरितं विरचितम्। ग्रन्थोऽयं श्रृङ्गाररसेन पूर्णः। तथापि तत्र महाकविः विषयवस्तुवर्णनच्छलेन अनेकशास्त्राणां सिद्धान्तानि सन्निवेशानि। एतेन ग्रन्थस्य काव्यिकमर्यादा विन्दुमात्रं न विघ्निता। वरं काव्यस्य गुरुत्वं वर्धितम्। तस्मात् नैषधचरितमवलम्ब्य प्रसिद्धा उक्तिः - "तावद्भा भारवेर्भाति यावन्माघस्य नोदयः। उदिते नैषधे काव्ये क्व माघः क्व च भारविः"।।

एतस्मात् परम्परागतश्लोकात् सहजतया निष्कर्षं कर्तुं शक्यते यत् संस्कृतकाव्यजगति नैषधचरितस्य विशेषमर्यादा वर्तते। अतः काव्यस्यास्य अध्ययनेन सहृदयः पाठकः काव्यरसास्वादनेन सह अन्यविविधशास्त्राणामपि ज्ञानं लभते। एतस्मात् कारणात् विद्वन्मण्डलेषु प्रचलिता उक्तिः-'नैषधं विद्वदौषधम्'। नैषधे उपस्थितानां विविधशास्त्राणां मध्ये वेदशास्त्रमन्यतमम्।

वेदशास्त्रं प्रधानतः मन्त्र-ब्राह्मण-आरण्यक-उपनिषद्भिः सम्पूर्णम्। नैषधचरिते तु एतेषां चतुर्णां वेदांशानां परिशीलनं दृश्यते। परन्तु अध्ययनेऽस्मिन् केवलं उपनिषद्भागस्य उपस्थापनं मुख्यमुद्देश्यम्। वेदशास्त्रस्य उपनिषद्भागः ज्ञानकाण्डस्य अन्तर्गतः। यद्यपि आरण्यकमपिज्ञानकाण्डस्यअन्तर्भूक्तम्। तथापि ज्ञानकाण्डस्य पूर्णधारणा उपनिषत्सु प्राप्यते। उपनिषत्सु प्रधानतः आत्मविद्या तथा ब्रह्मविद्या आलोचिता। नैषधकारः श्रीहर्षः तस्य ग्रन्थे काव्यिकसरसतोत्पादनेन सह उपनिषदां गभीरज्ञानानि प्रविष्टवान्। तस्मात् सहृदयपाठकाः अल्पायासेन तानि ज्ञानानि अर्जितुं सक्षमाः भवन्ति। नैषधकारेण द्वितीयसर्गस्य प्रारम्भे एव ब्रह्मणः स्वरुपम् उल्लिखितम्। अत्र दृश्यते नलेन धृतः हंसः मुक्तः पश्चात् तस्य अनुभूतिः प्रकाश्यते एवम्प्रकारेण-

"अधीगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः। वचसामपि गोचरो न यः स तमानन्दमविन्दत द्विजः"।।[1]

श्लोकस्यास्य अर्थः अयं यत् मोचनादनन्तरं स हंसः यः आनन्दं लभते सः आनन्दः विष्णोः ब्राह्मणस्य मोक्षप्राप्तिवत् भाषायाः अगोचरः। अर्थात् तम् आनन्दं वर्णयितुम् अशक्य इत्यर्थः। वस्तुतः श्लोकेऽस्मिन् नलेन सह ब्रह्मणः साम्यं दर्शितम्। अतः हंसः अवदत् नलात् तस्य मुक्तिः तथा मोक्षः अत्यन्तं आनन्ददायकः,यः आनन्दः वाक्येन वर्णयितुम् असम्भवः।स आनन्दः न केवलं वाक्यस्य अगोचरः, अपि च मनसः अविषयः,यत् श्लोकस्थित-अपिशब्देन सूच्यते। तस्मात् टीकाकारेण नारायणेन तस्य नैषधीयप्रकाशे प्रोक्तम्- 'अपिशब्दान्मनसोऽप्यगोचरमानन्दं ब्रह्मस्वरूपं प्राप्नोति'। एतेन सूच्यते यत् मुक्तिः वा मोक्षप्राप्तिः वा ब्रह्मस्वरूपं वा आनन्दजनकम्,यत् च वाग्मनसोः अगोचरम्। श्रीहर्षस्य एवम्प्रकारं वचनम् उपनिषदां बहुत्र दृश्यते। यथा,तैत्तिरीयोपनिषदि प्राप्यते-यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ,आनन्दं ब्रह्मणो विद्वान् न विभेति कदाचन'(२/४/१),आनन्दो ब्रह्मेति व्याजनात्'(३/६/१);मुण्डकोपनिषदि कथितम्- 'आनन्दरुपममृतं यद् विभाति'(२/२/७);केनोपनिषदि भणितम्-'येन्मनसा न मनुते येनाहुर्मतो मतम्'(१/४/५);कठोपनिषदि कथ्यते- तमेव भान्तं अनुभाति सर्वं तस्य भाषा सर्वमिदं विभाति'(२/२/१५),नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा'(२/३/१२)। अतः प्रायः सर्वोपनिषदः वक्तव्यं यत् ब्रह्म आनन्दस्वरूपम्,तत् च आनन्दं वाग्मनसोः अगोचरमिति।

नैषधचरितस्य एकादशसर्गे श्रीहर्षेण स्वयंवरसभायामागता नलानुरागी दमयन्ती उपनिषदा सह उपमिता। यथा-

"सानन्तानाप्य तेजःसखनिखिलमरुत्पार्थिवान्दिष्टभाजश्चित्तेनाशापुषस्तान्सममसमगुणान्मुञ्चती गूढभावा।
पारेवाग्वर्तिरूपं पुरुषमनु चिदम्भोधिमेकं शुभाङ्गी निःसीमानन्दमासीदुपनिषदुपमा तत्परीभूय भूयः"।।[2]

श्लोकस्यास्य अर्थः-यथा रहस्यमयी शुभाङ्गैः युक्ता उपनिषद् पृथिव्यादिनवपदार्थं गुणकर्मादिकं निषिध्य वाग्मनसोः अगोचरम्,चैतन्यमयं असीमानन्दयुक्तं,परमपुरूषम् एकमात्रं अद्वैततत्त्वमेव प्रतिपादयति;तथैव दमयन्ती अपि स्वयंवरसभां आगतान् विविधगुणयुक्तराज्ञः देवताः च परित्यज्य ब्रह्मतुल्यं नलं पाप्तर्थम् आनन्दवशतः भृशं तत्परोऽभवत्।श्लोकेऽस्मिन् उपनिषदः बहुविधं तथ्यं सन्निवेशितम्।यथा, उपनिषद् गुढभावा अर्थात् परमरहस्यमयी।एतावत् उक्तिः उपनिषदां बहुत्र प्राप्यते-'य इमं परमं गुह्यम्'(कठोपनिषद्,१/३/१७);'वेदान्ते परमं गुह्यं पुराकल्पे प्रचोदितम्'(श्वेताश्वतरोपनिषद्,६/२२)।श्रीहर्षस्य ब्रह्मणः एकमेवाद्वितीयतत्त्वं प्रायः सर्वोपनिषदः मूलतत्त्वम्।तस्मात् छान्दोग्योपनिषदि प्राप्यते-'तत्त्वमसि'(६/८/७),'एकमेवाद्वितीयं ब्रह्म'(६/२/१);वृहदारण्यकोपनिषदि दृश्यते-'अहं ब्रह्मास्मि'(१/४/६), 'स वा एष महानज आत्मा'(४/४/२५),'नेहनानास्ति किञ्चन'(४/४/१९);माण्डूक्योपनिषदि वर्तते-'अयमात्मा ब्रह्म'(२) इति।श्लोकस्यास्य व्याख्यायां मल्लिनाथेन तस्य जीवातुटीकायाम् उपनिषदः एवम्प्रकारोक्तिः उल्लिखिता-'...एकमेवाद्वितीयम्','नेति नेति'..."।तदतिरिक्तं श्रीहर्षः अत्र दमयन्तीं जीवात्मारुपेण नलं च परमात्मारुपेण अकल्पयत्।यतः परमात्मनः ब्रह्मणः वा गुणानि नले एव आरोपितानि। यथा-'सत्यं ज्ञानमनन्तं ब्रह्म'(तै.उ.२/१/१),'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञास्व तत् ब्रह्मेति'(तै.उ.३/१/१),'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह'(तै.उ.२/४/१),'आनन्दो ब्रह्मेति व्याजनात्'(तै.उ.३/६/१), 'आनन्दरुपममृतं यत् विभाति'(मु.उ.२/२/७),'येन्मनसा न मनुते येनाहुंमतो मतम्'(के.उ.१/४/५),'नैव वाचा न मनसा प्राप्तुं शक्यो न चक्षुषा'(क.उ.२/३/१२)।नारायणः तस्मात् तस्य टीकायामुक्तवान् यत्-'यतो वाचो निवर्तन्ते इत्यादिश्रुतिप्रामाण्याद्वागगोचरस्वरुपम्'। श्रीहर्षेण उपनिषदां प्रतिपादितानि 'तत्त्वमसि','स वा एष महानज आत्मा','अहं ब्रह्मास्मि' इति महावाक्यानि उल्लिखितानि सप्तदशसर्गे कलेः वक्तव्यमाध्यमेन।वस्तुतः अत्र कलिः उपनिषदाम् एतानि महावाक्यानि उपहसितवान्-

"जनेन जानतास्मीति कायं नायं त्वमित्यसौ। त्याज्यते ग्राह्यते चान्यदहो श्रुत्यातिधूर्तया"।।[3]

टीकाकारेण नारायणेन श्लोकस्यास्य व्याख्यायां भणितम्-"अतिधूर्तया नितरां परवञ्चनपरया 'तत्त्वमसि' इति 'स वा एष महानज आत्मा' इत्यादिश्रुत्या प्रयोजककर्त्र्या कायम् 'अस्मि' इति..."।

वृहदारण्यकोपनिषदि आत्माविषये मैत्रेय्याः जिज्ञासायां याज्ञवल्क्येन प्रोक्तं यत् आत्मनः दर्शनं श्रवणमनननिदिध्यासनैः सम्भवम्-'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेय्यात्मनो।वा अरे दर्शनेन श्रवनेन मत्या विज्ञानेनेदं सर्वविदितम्'(२/४/५)। आत्माविषये याज्ञवल्क्यस्य इदम् अभिमतं दृश्यते नैषधस्य तृतीयसर्गे।तत्र दमयन्ती हंसं निकषा नलविषये तस्याः मानसिकावस्थां वर्णयितुम् आह-अन्यैः मया नलकथा श्रुयते, भ्रमवशतः दृश्यते सर्वदा च ध्यायते-

"श्रुतश्च दृष्टश्च हरित्सु मोहाद् ध्यातश्च नीरन्ध्रितबुद्धिधारम्। ममाद्य तत्प्राप्तिरसुव्ययो वा हस्ते तवास्ते द्वयमेव शेषः"।।[4]

श्लोकेऽस्मिन् सूच्यते यत् दमयन्त्या नलप्राप्तेः साधना ब्रह्मतुल्यमेव।तस्मात् टीकाकारः नारायणः निगद्यते यत्-"अथ च श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।मत्या च सततं ध्योय एते दर्शनहेतवः"। मुण्डकोपनिषदानुसारम् आत्मनः दर्शनकारी जनः इच्छामात्रं सर्वं प्राप्नोति- "यं यं लोकं मनसा संविभाति विशुद्धसत्त्वः कामयते यांश्चकामान्।

तं तं लोकं जयते तांश्च कामांस्तस्मात्मज्ञं ह्यर्चयेद् भूतिकामः"।।[5]

अस्यैव संकेतं दीयते श्रीहर्षेण तृतीयसर्गे।तत्र वर्तते नलः दमयन्त्याः विरहेण कामार्तः सन् शीघ्रमेव प्रियावार्तावहनकारिणः हंसस्य आगमकामना अकरोत् ,तदा तस्मिन् क्षणे एव स हंसः उपस्थितवान्-

"परवति!दमयन्ति!त्वां न किञ्चिद्वदामि द्रुतमुपनम किं मामाह सा शंस हंस।

इति वदति नलेऽसौ तच्छशंसोपनम्रः प्रियमनु सुकृतां हि स्वस्पृहाया विलम्बः"।।[6]

अत्र हि नलः आत्मसाक्षात्कारी। तस्मात् तस्य इच्छामात्रं काम्यवस्तुहंसः उपस्थितरासीत्।

श्रुतिवाक्यानुसारं मृतस्य मनः चन्द्रे प्रविशति। तस्मात् श्रीहर्षेण प्रोक्तम्-

"किमसुभिर्गलितैर्जड!मन्यस्ये मयि निमज्जतु भीमसुतामनः। मम किल श्रुतिमाह तदर्थिकां नलमुखेन्दुपुरा विबुधस्मरः"।।[7]

अत्र दमयन्ती अवदत् मरणात् अनन्तरं तस्याः मनः चन्द्रे प्रविशति इति वेदवाक्यं तस्याः क्षेत्रे न प्रयोज्यम्। अर्थात् तस्याः मनः चन्द्रे न प्रविश्य चन्द्रमुखस्य नलस्य मध्ये गच्छति। टीकाकारः मल्लिनाथः तस्य टीकायां स्पष्टम् उक्तवान् यत्-"यत्रास्य पुरुषस्याग्निं वागस्येति वातं प्राणश्चक्षुरादित्यं मनश्चन्द्रं दिशः श्रोत्रं पृथिवीं शरीरमाकाशमात्मौषधीर्लोमानि वनस्पतीन् केशा अप्सु रोहितं च रेतश निधीयत' इति श्रुतिप्रामाण्यादिति भावः"।।

छान्दोग्योपनिषदि उद्यते मृतजनः क्रमानुसारेण मास-पितृलोक-आकाश-चन्द्रान् प्राप्नोति-'मासेभ्यः पितृलोकं पितृलोकादाकाशमाकाशा-चन्द्रमघमेषासामो राजा तद्देवानामन्नं तं देवा भक्षयन्ति'(५/१०/४)।सममेव वचनं वृहदारण्यकोपनिषदि दृश्यते। तत्रोक्तं-'मासेभ्यः पितृलोकं पितृलोकाचन्द्रं ते चन्द्रं प्राप्यान्नं भवन्ति ताँस्तत्रदेवा। यथा सोम राजानमास्यायस्वापक्षीस्वेत्यवमेनाँस्तत्र भक्षयन्ति'(६/२/२६)। उपनिषदः इयं वाणी श्रीहर्षेण द्वाविंशसर्गे सन्ध्यावर्णनायाम् उल्लिख्यते-

"तानीव गत्वा पितृलोकमेनमरञ्जयन् यानि स जामदग्न्यः। छित्वा शिरोऽस्राणि सहस्रवाहोर्विस्राणि विश्राणितवान् पितृभ्यः"।।[8]

श्लोकेऽस्मिन् उक्तम्-जमदग्नेः पुत्रः परशुरामः अर्थात् जामदग्न्यः सहस्रार्जुनस्य मस्तकछेदनं कृत्वा तेनैव शोणितेन पितृलोकान् उद्दिश्य तर्पणं कृतवान्, येन कारणेन शोणितः पितृलोके अर्थात् चन्द्रे प्रविश्य तं चन्द्रं रक्तिमवर्णम् अकरोत्। तस्मात् मल्लिनाथेन भणितम्-'चन्द्रो वै पितृलोकः इति श्रुतेः'।

अतः दृश्यते यत् उपनिषद् विषये श्रीहर्षस्य प्रगाढज्ञानं तथा श्रद्धा आसीत्। तस्मात् तेन अतीव सयत्नम् उपनिषदः तत्त्वं तस्य ग्रन्थे सन्निवेशितम्। एतेन काव्यस्य काठिन्यं न उत्पद्यते,वरं तत् काव्यं ज्ञानसमुद्रः अभवत्। अतः नैषधविषये 'नैषधं विद्वदौषधम्' इति उक्तिः यथोपयुक्ता एव।।

**पादटिप्पणी**

1. नैषधे,२/१ । 2. नैषधे,११/१२९ । 3. नैषधे, १७/५४ । 4. नैषधे, ३/८२ । 5. मुण्डकोपनिषद, ३/१/१० । 6. नैषधे,३/१३४ । 7. नैषधे,४/५२ । 8. नैषधे,२२/४८ ।

**अनुशीलितग्रन्थपञ्जी-**

शास्त्री,देवर्षि सनाढ्य(सम्पा.). *नैषधीयचरितम्.*चौखम्वा कृष्णदास एकाडेमी.२०१३.

शर्मा,शिवदत्त. *नैषधचरितम्.* लखनऊ. उत्तर प्रदेश संस्कृत संस्थान.१९९८

शुक्ल.डॉक्टर रामबहादुर. *नैषधीयचरितम् की शास्त्रीय मीमांसा.*दिल्ली.ईस्टर्न बुक लिंकर्स.२००५

पन्त.मोहनदेव. *नैषधीयचरितम्(प्रथमः सर्गः).*दिल्ली. मोतीलाल बनारसीदास.१९९७

शुक्ल. डॉक्टर चण्डिकाप्रसाद. *नैषध परिशीलन.*इलाहाबाद.हिन्दुस्तान एकाडमी.१९९२

झा,देवनारायण. *नैषध समीक्षा.*नाग पावलिशार्स.दिल्लीः

द्विवेदी,श्री महावीरप्रसाद. *नैषधचरितचर्चा.*लखनउःगंगा ग्रन्थागार.१९३३.

**********

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# भक्तिमार्गेषु मनोरक्षासूत्रम् – एकमध्ययनम्

**लोपामुद्रा गोस्वामी**, शोधच्छात्रा, आसाम

**प्राक्कथनम् -**

**विद्या हि का ब्रह्मगतिप्रदा वा बोधो हि को यस्तु विमुक्तिहेतुः । को लाभ आत्मावगमो हि यो वै जितं जगत्केन मनो हि येन ।।** [1]
मनसः नियन्त्रणं कठिनतमं वर्तते । व्यक्तिगतजीवने वा व्यवसायिकजीवने वा भवतु मनुष्याः कष्टं प्राप्नुवन्ति, असंयतचित्तकारणात् । सर्वाः समस्याः मनसा जायन्ते, तस्मिन् उत्पद्यमानकामैः । मनसो नियन्त्रणेन जीवने पूर्णसिद्धिं प्राप्तुं शक्यते । मनोनियन्त्रणं विना जीवने कोऽपि शान्तिम् आनन्दञ्च न अवाप्नोति । मनः एव मानवान् अस्मिन् लोके बध्नाति । मनः अविवेकेन कल्पयति यत् आत्मा अस्मिन् शरीरे निरुद्ध अस्ति । अतः आत्मानं बन्धने अनुभूयते । मनः जीवात्मना सह सम्यक् तादात्म्यं कृत्वा अहम् इति अनुभवति, अतः बन्धने अस्मि इति चिन्तयति । तस्माद् अस्माकं मनः अधिकतया अस्थिरम् असहयोगी चञ्चलञ्च भवति । अमुष्यां पृथिव्यां ते एव मोक्षलोकं प्राप्स्यन्ति ये कामैः अशुद्धवासनाभिः परिपूर्णं चित्तरूपनागं नियन्त्रणं करिष्यन्ति । मानवाः सुखं तदा एव प्राप्स्यन्ति यदा मनसि विचारशून्यता भविष्यति । अतएव उच्यते **मन एव मनुष्याणां कारणं बन्ध-मोक्षयोः** [2] । यदा मनसि विषयाणां प्रवाहः न वहति, तदा मनुष्याः शान्ताः सुखीनश्च भविष्यन्ति । मनसः पक्षद्वयं वर्तते, विवेकपक्षः कल्पनापक्षश्च । विवेकपक्षे मनः निरुध्य आत्मनं विजिग्य मोक्षं प्राप्नोति । कल्पनापक्षे संसारेणैव बध्नाति । अतएव संसारे मनुष्याः आत्मनः स्वरूपमज्ञात्वा आत्मनं सुखी-दुःखी इति मन्यन्ते । अतएव भारतीयदर्शनेषु पाश्चात्यदर्शनेषु च मनसः व्यापकचर्चा कृता पण्डितैः । मनोविज्ञानं भारतीयदर्शनस्य अविच्छेद्य अङ्गो वर्तते । यतोहि मनसो नियन्त्रणेन एव दुःखनिवृत्तिः भवति, तस्माद् आनन्दस्वरूपस्थितिः भवति । पूर्ववत् आधुनिककालेऽपि मनसः नियन्त्रणे वैज्ञानिकाः विचारं कुर्वन्तः सन्ति । यतोहि अतिसम्प्रति मनसः अव्यवस्थिततत्वात् मनोरोगाणां वृद्धिः जायते । अतएव तेषां निरामये मनोचिकित्सकाः विविधाः उपायाः प्रदर्शितवन्तः । परन्तु आधुनिकाः मनोचिकित्सकाः चिन्तयन्ति यत् मनोरोगाणाम् उपशमनं सम्भाव्यते । परन्तु औषधादिसेवनेन रोगाणाम् आत्यन्तिकनिवृत्तिः न भवति । अर्थात् प्रशमनस्य रोगस्य पुनरुत्पत्तिः भवितुं शक्यते । परन्तु प्राच्ये मनसः अतिक्रमणे सति मनोस्वास्थ्यं सम्यक् भवितुम् अर्हति इति चिन्तयति ।

**ओशो वदति – चित्तमेव रोगमूलम् । अतएव चित्तम् अतिक्रम्य यदा परतत्त्वानां चिन्तनं चलति तदा एव मनुष्याः चित्तरोगात् बहिः आगन्तुं शक्नुवन्ति । समाहितचित्तयुक्ताः मनुष्याः शान्ताः सुखीनश्च भवन्ति** ।[3] तद्विपरीतं नियतचित्तप्रवाहाः दुःखदायकाः सन्ति । अतएव प्राच्यमनीषिणः मनोरोगस्य समूले निरामये भिन्नानि सोपानानि आलोच्यन्ते । तानि सोपानानि मनकेन्द्रीभूतानि सन्ति । अर्थात् मनसा एव मनसः विकारत्वम् एतानि साधनानि साधयन्ति । यथा मलीनं वस्त्रं मलीन-पृथिवीमात्रेण साधनेन विशोधन्ति बुद्धिमन्तः, यथा नागदंशविषं तस्य भक्ष्यविषयप्रतिषेकेन निष्कासयन्ति, यथा लोहम् अन्यलोहेन विच्छिदन्ति, तद्वत् जीवस्यापि विवेकं विकस्य विषमचित्तमोहान् एकान्तमनसा नाशं कुर्युः इति । प्रायशः सर्वेषु दर्शनेषु मनसः स्वरूपत्वं, तस्य नियन्त्रणस्य प्रयोजनीयत्वं, तस्य निरोधमार्गस्य आलोचना दृश्यते बहुधा । तेषु योगादिक्रिया तथा चित्तविशुद्ध्यर्थं नित्य-नैमित्तिक-उपासनादिकर्मणां प्रतिपादनं दर्शनेषु प्रतिपाद्यते । एतानि कर्माणि मनोरोगनिरामये बाह्यिकसाधनानि वर्तन्ते । मनोस्वास्थ्यरक्षणे कानिचन आन्तरिकसाधनानि अपि वर्तन्ते यानि साधनानि चित्तमलदूरीकरणे, तस्य व्यापारञ्च निरोधयति, स्थिरञ्च करोति । तानि यथा – नित्य-अनित्यवस्तुनां विवेकः, ईश्वरस्य ध्यानं, ईश्वरे भक्तिः, वैराग्यस्य भावः, सन्तोषस्य भावः, सत्संगतिः इत्यादयः । तेषु एकः प्रधानमार्गः वर्तते भक्तिमार्गः । साधकाः केवलम् अनेन मार्गेण अपि मनसः व्यवस्थापयितुं तथा सच्चिदानन्देश्वरस्वरूपं प्राप्तुं शक्यन्ते । अतएव एषः मार्गः सर्वैः समादृतः ।
विश्वकल्याणचिन्तनम्, राष्ट्रहितम्, आत्मसमर्पणभावः, सर्वकर्मणाम् ईश्वरार्पणम्, सन्तुष्टिभावः, ईश्वरव्यतिरेकेषु अनित्यवस्तुषु विरागभावः, ईश्वरगुणैः स्वव्यक्तित्वविकाशादि-सर्वविधोत्कृष्टमूल्यानां विचारः वर्तते । तस्माद् आधुनिकसमस्यानां समाधाने तथा च मनोस्वास्थ्यरक्षणे भक्तिमार्गः कथं कार्यं करोति तदेव लक्ष्यं पत्रमिदम् आवहति ।

**शोधप्रविधिः -**

शोधकार्यमिदं मौलिकशोधप्रविधिना प्रवर्तिष्यते । अत्र भक्तितत्त्वेषु मनोविज्ञानपक्षस्य अध्ययनसमये व्याख्यात्मकपद्धतिमाधारीकृत्य प्रवर्तते । उपलब्धप्राथमिकद्वितीयस्रोतसामाधारेण कार्यमिदं सम्पादयिष्यते ।

**भक्तितत्त्वम् –**

भक्तिशब्दः भारतीयपरिप्रेक्षे महल्लक्ष्यम् आवहति । भिन्नजनैः भिन्नशब्दैः भक्तिशब्दस्य परिभाषा कृता । भज्-धातुना सह क्तिन्प्रत्ययसंयोगे सति भक्तिशब्दस्य निष्पत्तिः भवति । यस्य अर्थोऽस्ति – प्रीतिः, विश्वासः, उपासना, पवित्रता- इत्यादयः । श्वेताश्वेतरोपनिषदि भक्तिशब्दः एतादृशेषु अर्थेष्वेव प्रयुज्यते । यथा – **यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ... ।**[4]

पुनः नारदभक्तिसूत्रेऽपि उच्यते –

**सा त्वस्मिन् परमप्रेमरूपा अमृतस्वरूपा च । यल्लब्ध्वा पुमान् सिद्धो भवति, अमृतो भवति, तृप्तो भवति ।** [5]

अर्थात् इष्टं प्रति प्रेम एव भक्तिशब्देन वयं व्याख्यायामः, यया पुमान् परमलक्ष्यं मोक्षं लब्धुं शक्नोति । भक्तिशब्दस्य अर्थः वयं समर्पणभावेऽपि ग्रहीतुं शक्नुमः । यस्मात् पुंसाम् आन्तरिकविकासः भवति । भगवद्गीतायाम् उच्यते यत् – मोक्षप्रापणाय त्रयः पन्थानः वर्तन्ते । ते यथा – ज्ञानमार्गः, कर्ममार्गः पुनः भक्तिमार्गः । एतेषु भक्तिमार्गः कर्मज्ञानभ्यामपि श्रेष्ठः वर्तते । यतोहि अत्र भक्तिः साधनरूपा, साध्यरूपा स्वयं फलरूपा इति उच्यते । नारदीयभक्तिसूत्रे उच्यते तदेव – **सा तु कर्मज्ञानयोगेभ्योऽप्यधिकतरा । स्वयं फलरूपेति ब्रह्मकुमाराः ।**[6] पुनः शाण्डिल्यसूत्रे भक्तेः संज्ञा प्रदीयते – **सा परानुरक्तिरीश्वरे ।।**[7] पुनः योगसूत्रे – **प्रणिधानं तत्र भक्तिविशेषविशिष्टमुपासनं सर्वत्रियाणामपि तत्रार्पणम् । विषयसुखादिकं फलभनिच्छन् सर्वाः क्रियास्तस्मिन् परमगुरावर्षयति ।** [8]

**भक्तिमार्गेण मनोस्वास्थ्यरक्षणम् –**

**अशोमतानुसारं प्राच्ये मुक्तिगामी द्वे विधी वर्तेते । एकः विधिः मस्तिष्कप्रधानः, अपरः हृदयप्रधानः भावोन्मुखो वा ।**[9]

भक्तिः द्वितीयपथगामिनी अस्ति । यः पन्था श्रद्धा-विश्वास-प्रेमस्वरूपोऽस्ति । तत्र प्रेम भक्तेः प्रथमचरणमस्ति । द्वितीयचरणम् – समर्पणभावः । समर्पणभावादेव व्यक्तेः अहंकाररोगः दूरीभवति । एषः अहंकारः केवलं भक्तिमार्गेण सहजतया दूरीगच्छति, अन्यथा न । यतोहि व्यक्तिः यदा प्रेम्नि भवति तदा एव अपरं स्वस्य उपरि मन्यते । यदि एषा प्रीतिः ईश्वरे भवति, तर्हि सा भावना मुक्तिं दास्यति । यतोहि अहंकारः एव बन्धमूलः । लोक-परलोकप्राप्तिषु अहंकार एव मनुष्यानां विरोधीतत्त्वमस्ति । अहंकारपात्रं कदापि जीवने सर्वप्राप्त्यनन्तरमपि पूर्णतां न प्राप्नोति । धन-यशप्राप्त्यनन्तरादपि मनुष्याः अतृप्ताः एव सन्ति । अहंकारप्रभावाद् जीवनं मरुस्थले परिवर्तनं भवति, तत्र अहंकारः मृगतृष्णात्वेन कार्यं करोति । असन्तोष-ईर्ष्या-लोभ-क्रोधादयः अहंकारस्यैव फलानि सन्ति । तस्मादेव मोहान्धाः आधुनिककाले धन-यशादिमृगतृष्णायाः पृष्ठे धावित्वा अतृप्ता-असन्तुष्टाः सन् मनोरोगीनः जायन्ते । अतएव अहंकारदूरीकरणार्थे विषयसुखाद्यनित्यभोगानां निःसारत्वं दर्शयितुं सर्वदा प्रयत्नरताः सन्ति भारतीयदर्शनपरम्पराः । तेषु एकः उत्तममार्गोऽस्ति–भक्तिमार्गः । अनेन मार्गेण चित्तस्य शुद्धीकरणं भवति । परन्तु भक्तिरपि कामनारहितं स्यात् तदा एव परमपदगामिनी भवति । सा भक्तिः ईश्वरेऽपि भवितुम् अर्हति, अथवा गुरौ, पित्रोः, मानवोपासनायाञ्च । कस्मिञ्चिदपि ईश्वरत्वबुद्ध्या यदि उपासनां करिष्यन्ति भक्ताः, तदा मुक्तिः प्राप्यते । भक्तिमार्गे ईश्वरसमर्पणेन मस्तिष्कभारः दूरीभवति । यदा सर्वकर्मणां फलानाञ्च ईश्वरे एव समर्पणं कृत्वा भक्ताः कार्ये नियोजिताः भवन्ति । तदा एव फलपरिमाणं विचिन्त्य चिन्ता अपि न चलति । भक्त्या एव तस्य मनसि अहं कर्ता इति यः अध्यासः आसीत् सः अपि दूरीभवति । क्रमात् संसारविषयसागरात् वैराग्यभावः अपि भवति । तस्मात् सर्वविधविषयभोगात् मनः कूर्मवत् संहरति, सन्तोषभावम् उदेति । मनसि तृप्तिः सन्तुष्टिश्च आगमिष्यति । पुनः भक्तिः नवधा विद्यते । यथा- श्रवणं, कीर्तनं, स्मरणं, पादसेवनं, अर्चनं, वन्दनम्, दास्यभावः, सख्यभावः आत्मनिवेदनञ्च । तत्र श्रवण-कीर्तन-स्मरणादि-मार्गाः भक्तानां चित्तशुद्धये तथा ईश्वरगुणैः भक्तमनसः परिष्करणे, गुणधारणे च मुख्यतया कार्यं कुर्वन्ति । यथा- भृङ्गीकीटः अन्यं कीटं यदि दंशयति तर्हि सः अपरः कीटः भृङ्गीवत् आचरति, तद्वत् ईश्वरस्य गुरोः वा गुणानां श्रवण-कीर्तन-स्मरणादिप्रक्रियया भक्ताः अपि ईश्वरत्वं प्राप्तुं शक्यन्ते । पुनः सत्संगतिः किं न करोति ।

अतएव श्रवणादि-भक्तिमार्गाः मनसः विचारप्रवाहं अवरुध्य सदसतोः मध्ये सन्मार्गम् अन्वेषयित्वा मनसः असन्तोषत्वम् अवरोधयति । पुनः कीर्तनेन गीतेन वा अपि मनस्तापस्य प्रशमनं भवति । एते सर्वे मार्गाः योगस्य अष्टाङ्गिकमार्गवत् एव साधनसोपानानि सन्ति । पुनः अपराः ये खलु मार्गाः सन्ति पादसेवनं, अर्चणं, वन्दनं, दास्यभावत्वादि तानि कर्ममार्गवत् चित्तशुद्धिः करोति मीमांसादिदर्शनवत् । अन्तिमे दास्यभावः, सख्यभावश्च आत्मसमर्पणभावमेव परिदर्शयतः । यः मार्गः अपि मनसः तापप्रभावं, विश्रृंखलत्वं निरामयति ।

प्रेम्नः स्वरूपं प्रत्येकेषु मनुष्येषु विद्यमानाः वर्तन्ते । प्रेमाणं विना मनुष्याः जीवितुं न शक्यते । मनसः स्वभाव एव अस्ति यत् सः कस्मिश्चिद् वस्तुनि रमते । सः कस्यचिद् धने भवति, कस्यचिद् पुत्र-पत्न्यादिषु, कस्यचिद् पार्थिववस्तुषु । परन्तु मनः कुत्रचित् रमते एव । परन्तु यदा तन्मनः पार्थिववस्तु परित्यज्य ईश्वरे रमते तदा तस्य मनसः कलुषता दूरीभवति, मनुष्याः मुक्तिपथि अग्रेसरन्ति, यावत् तस्य ईष्टदेवतायां श्रद्धा-विश्वास-प्रेमादिना दृढता भवति, तावद् तस्य पार्थिववस्तुषु वैराग्यभावम् आयाति । सः अपि ईश्वरीयगुणेन अभिव्यञ्जितो भूत्वा प्रेमस्वरूपः भवति ।

### परिशिष्टः –

ईश्वरस्य द्विविधा उपासना पण्डितैः स्वीकृता । ते यथा – सगुणोपासना, निर्गुणोपासना च । तयोः निर्गुणोपासनायां निराकारब्रह्मणोः स्वरूपावाप्तौ मनः निविशते । उत सगुणोपासनायाम् ईश्वरस्य कश्चिदपि रूपं स्वीकृत्य तस्मिन् परतत्त्वे मनोनिवेशनस्य अभ्यासः चलति । उभयविधसाधनायां मनसः एव उपचारत्वं चलति । परन्तु प्राथमिकावस्थायां तु साक्षात् निर्गुणोपासनया मनसः संस्कारत्वं कठिनतमं वर्तते । अतएव सगुणब्रह्मोपासना एका उत्कृष्टा शैली वर्तते मोक्षमार्गस्य । सा सगुणोपासना उत्तरोत्तरकाले अर्वाचीनदार्शनिकाः भिन्नतया प्रदर्शितवन्तः । यथा – स्वामीविवेकानन्दमते – दरिद्रसेवा एव ईश्वरे भक्तिः अस्ति । उच्यते गीतायामपि– **दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्** [10] इति । पुनः अन्ये आचार्याः अपि ईश्वरस्य परागुणानाम् आराधनां कृतवन्तः, पुनः अन्ये शंकरदेवः माधवदेवादि-असमवास्तव्याः आचार्याः अपि आसन्, ये वैष्णवाचार्याः ईश्वरे दास्यभावत्वं स्थापित्वा परमानन्दं प्राप्तवन्तः । वस्तुतस्तु अहमेव श्रेष्ठः इति अहंकारभावदूरीकरणे भक्तिमार्गः उत्कृष्टतमः । पुनः मनुष्याः स्वस्य जीवने एव दुःखादिकं दृष्ट्वा आत्मबलं परित्यज्य आत्महननादिमार्गमपि परिगृह्णन्ति मनसः अव्यवस्थितत्वात् । परन्तु भक्तिमार्गे भगवतः जीवनचरित्रादिनां श्रवण-कीर्तनादिना भक्ताः तन् मनोबलं पुनरुज्जीवन्ति । इतोऽपि केवलम् ईश्वरस्य अस्तित्वमेव सत्, तद्भिन्नम् अखिलं जगत् मिथ्यादिभावः अपि भक्तिमार्गेण भक्ताः सुकरतया लभ्यन्ते । पुनः भक्तिमार्गस्य यानि खलु सोपानानि सन्ति, तानि अपि सुलब्धानि । अन्यमार्गवत् तत्र अधिकाः उपायाः न वर्तन्ते । केवलम् ईश्वरे कामनारहितसर्वसमर्पणभाव एव भक्तिमार्गे साधनोपायः ।

अतएव भक्तिमार्गः आधुनिकसमाजेऽपि बहुप्रचलितः प्रसिद्धश्च । उत भक्तिमार्गः अनुशासन-सामाजिकजागरण-विश्वकल्याणादिभावनाः अपि जागरयति भक्तहृदि ।

## पादटिप्पणी

1. आदिशंकराचार्यः, वेदान्तस्तोत्रसंग्रहः, पृ. 18
2. https://upanishads.org.in/otherupanishads/76/4/14
3. ओशो, शरीर और तंत्र, पृ. 47
4. श्वेताश्वेतरोपनिषद्, पृ. 249
5. नारदभक्तिसूत्रम्, 1. 2. 3.

6 तत्रैव, 30

7. शाण्डिल्यसूत्रम्,1.2
8. योगसूत्रम्, समाधिपादः, 23सूत्रम्
9. ओशो, शरीर और तंत्र, पृ. 59
10. http://hitopadesha-subhashita.blogspot.com/2016/05/hitopadesha-1.15.html

## सन्दर्भग्रन्थसूची -

### प्राथमिकस्रोतांसि -

1. ओशो, शरीर और तंत्र, हिन्द पॉकेट बुक्स, 2019
2. जगदीशचन्द्र मिश्र, भारतीय दर्शन, चौखम्बा सुरभारती प्रकाशन, 2016
3. आदिशंकराचार्यः, वेदान्तस्तोत्रसंग्रहः, राजाराम भास्कर पानवलकर, ऑनेस्टी कंपनी, मुंबई, 1933
4. श्वेताश्वेतरोपनिषद्, गीताप्रेस, गोरखपुर
5. नारदीय भक्तिसूत्र एवं शाण्डिल्य भक्तिसूत्र, गीताप्रेस, गोरखपुर

### आन्तर्जालीयस्रोतांसि -

- https://www.hindisamay.com/content/11819/1/%E0%A4%B8%E0%A5%8D%E0%A4%B5%E0%A4%BE%E0%A4%AE%E0%A5%80-%E0%A4%B5%E0%A4%BF%E0%A4%B5%E0%A5%87%E0%A4%95%E0%A4%BE%E0%A4%A8%E0%A4%82%E0%A4%A6-%E0%A4%B5%E0%A5%88%E0%A4%9A%E0%A4%BE%E0%A4%B0%E0%A4%BF%E0%A4%95%E0%A5%80-%E0%A4%AD%E0%A4%95%E0%A5%8D%E0%A4%A4%E0%A4%BF%E0%A4%AF%E0%A5%8B%E0%A4%97.cspx
- https://hi.wikipedia.org/wiki/%E0%A4%AD%E0%A4%95%E0%A5%8D%E0%A4%A4%E0%A4%BF
- http://literature.awgp.org/akhandjyoti/2010/December/v1.13
- https://www.shiveshpratap.com/sanskrit-subhashitani-shlokas-on-mind-mann-with-hindi-meaning/amp/



**Loopamudra Goswami**
Research Scholar
Kumar Bhaskar Varma Sanskrit & Ancient Studies University
Dhamdhana Road, P.O. : Nalbari- 781337, Assam
Contact No. : 7896748106
E-mail : loopamudragoswami03@gmail.com


**********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# सामाजिक-उपन्यासेषु बङ्किमचन्द्रस्य जीवनदृष्टिः परिचयश्च
# (An introduction to Bankim Chandra's outlook on the life in his social novels)

अनुसन्धाता
**तरुणशीटः**, तिरुपति, आन्ध्रप्रदेश
मार्गदर्शकः
**डा. ए. सच्चिदान्दमूर्ति**, तिरुपति

**अमूर्तसारः**

ऐतिहासिक रोमान्स लेखनानन्तरं बङ्किमचन्द्रः 'विषवृक्षः', 'इन्दिरा', 'युगलगुरिया', 'चन्द्रशेखरः', 'राधारानी', 'राजनी', 'कृष्णकान्तेर उइल' इत्यादयः सामाजिक-उपन्यासः लिखितवान् । 'चन्द्रशेखर' उपन्यासे आङ्ग्लवणिजस्य मीरकाशिम इत्यनेन सह संघर्षस्य कथा ऐतिहासिकपृष्ठभूमिरूपेण सक्रियः अस्ति, परन्तु अत्र बङ्गलाजनानाम् सामाजिकं पारिवारिकं च जीवनं मुख्यं केन्द्रं भवति। बङ्किमचन्द्रः चन्द्रशेखर-शैवलिनी-केन्द्रित-भारतीय-दाम्पत्-जीवनस्य आदर्शं स्थापयितुम् इच्छति स्म । 'विषवृक्षः', 'कृष्नकन्तेरउइलच बङ्किमचन्द्रस्य उत्तमसामाजिकपारिवारिक उपन्यासाः सन्ति। एतयोः उपन्यासयोः बङ्किमचन्द्रः वैवाहिकव्यवस्थायाः अन्तः पश्यति । यस्मिन् दिने नागेन्द्रनाथः विधवा कुन्दनन्दिनी इत्यस्याः प्रेम्णि अभवत् तस्मिन् दिने दाम्पत्यप्रेमभूमौ विषवृक्षबीजं रोपितम् । नागेन्द्रनाथस्य रूपजमोहः सूर्यमुख्या शापितः अस्ति। विषवृक्षभक्षणेन कुन्दनन्दिनीमृत्युः, नागेन्द्रनाथस्य पुनरुत्थानम्। 'चन्द्रशेखर' उपन्यासे अपि प्रेमप्रिया शैवलिनी प्रतापस्य स्नेहात् चन्द्रशेखरस्य समस्तं हृदयं दातुं असमर्था अस्ति। 'कृष्णकन्तेर उइल' बङ्किमचन्द्रस्य वैवाहिक-आदर्श-विषये सर्वोत्तमः पारिवारिक-उपन्यासः अस्ति । परिचर्चित उपन्यासस्य भ्रमर-गोविन्दलाल-रोहिणी 'विषवृक्षस्य सूर्यमुखी-नागेन्द्र-कुन्दनन्दिनी' इव। गोविन्दलालस्य रोहिण्या सह पलायनं, पतिव्रतभ्रमरस्य परित्यागः च उपन्यासे शापितः विकृतः च अस्ति। 'चन्द्रशेखर',विषवृक्ष '', 'कृष्णान्तेर उइल' इति ग्रन्थेषु बङ्किमचन्द्रः भारतीयजीवनदर्शनस्य उपरि विजयं प्राप्तुं प्रयतितवान् । सः पाश्चात्यसमाजस्य प्रेमजीवनस्य मनमानायाः विरुद्धः अस्ति । अस्य सामाजिकसङ्गतिः कृते केचन तं 'आदर्शवादी' इति वक्तुम् इच्छन्ति । यद्यपि बङ्किमचन्द्रः आदर्शवादी आसीत् तथापि कलानिर्माणे तस्य उपलब्धयः निर्विवादाः सन्ति ।

### बङ्किमचन्द्रस्यपरिचयः

बङ्किमचन्द्र चट्टोपाध्यायः बङ्गलाभाषायाः प्रथमः सफलः उपन्यासकारः अस्ति । सः बङ्गलाभाषां सुन्दरं मधुरं च कृतवान् । सः रवीन्द्रनाथटगोरस्य साहित्यसृष्टेः मार्गं सज्जीकृतवान् । सः न केवलं उपन्यासान्, अपितु विविधसमस्यानां, विचाराणां च विषये अनेके लेखाः लिखितवान् । 'बङ्गदर्शन' पत्रिकायाः प्रकाशनं प्रबन्धनं च तस्य अक्षयप्रतिभासु अन्यतमम् अस्ति । सः पाश्चात्यशिक्षायां सुशिक्षितः आसीत्, कलकत्ताविश्वविद्यालयस्य प्रथमः स्नातकः आसीत् । सः वृत्तौ आसीत् । उपदण्डाधिकारी। सः बङ्गस्य विभिन्नेषु मण्डलेषु चिरकालं यावत् एतत् पदं धारयति स्म । तस्मिन् च सः १४ उपन्यासाः अनेके लेखाः पुस्तकानि च लिखितवान्। अयं निर्भयः उच्चपदस्थः साक्षरः च नीलकरः कृषकान् अत्याचारात् रक्षितवान् तथा च विविधविषयाणां कठोर आलोचनां कर्तुं न लज्जितवान् ।

उत्तर २४ परगनामण्डलस्य नैहाटी-नगरस्य कांठालपा-नगरे १८३८ तमे वर्षे जूनमासस्य २७ दिनाङ्के अस्य जन्म अभवत् । तस्य पिता यादवचन्द्रः आसीत् । मातुः नाम दुर्गासुन्दरी । १८९४ तमे वर्षे एप्रिल-मासस्य ८ दिनाङ्के तस्य मृत्युः अभवत् ।

### उपन्याससाहित्येषु बङ्किमचन्द्रः

बङ्किमचन्द्रस्य उपन्यासमाध्यमान बङ्गलासामाजिकजीवनस्य अद्वितीयरूपेण परिवर्तनं जातम्। तस्य उपन्यासे जीवनस्य जटिल उतार-चढावस्य शोभायात्रा बाङ्गलादेशस्य पारिवारिकसामाजिकजीवनात् गृहीता अस्ति। तस्य सामाजिक-पारिवारिक-उपन्यासस्य भाषा गतिशीला ध्वनिमया च अस्ति ।बङ्किमचन्द्रस्य उपन्यासे अतीतानां उपन्यासानाम् इव सूक्ष्मविश्लेषण-विविधता हृदयस्य न स्यात्।, भवतु रवीन्द्रनाथस्य वा शरत्चन्द्रस्य उपन्याससदृशं मनोविज्ञानं नास्ति, तथापि बङ्किमचन्द्रस्य उपन्यासेषु कल्पनाविस्तारः, जटिलसूक्ष्म-

विश्लेषणं मानवजीवनस्य रत्नाः उपेक्षितुं न शक्यन्ते।तस्य उपन्यासेषु विश्लेषणपद्धतेः अभावात्, अवास्तविकतायाः, रोमान्टिककल्पनायाः कृते, बहवः जनाः तस्मै उपन्यासकारस्य स्थितिं ददति। प्रायः प्रत्येकस्य उपन्यासस्य केन्द्रप्रेरणा स्त्रियाः प्रेम वा देशभक्तिः वा। बङ्किमचन्द्रः वस्तुतः भौतिकवादी नास्ति, सः सुप्रसिद्धसमाजशास्त्रीयमण्डलेषु यात्रां करोति। नहि सः असामाजिकप्रेमम्, मनुष्यस्य नित्यं रूपतृष्णां, सौन्दर्यस्य भावः, च निराकर्तुं शक्नोति स्म, परन्तु सः तत् एकमेव सत्यं न मन्यते स्म आदर्शवादी बङ्किमचन्द्रः परिवारस्य दाम्पत्यजीवनस्य च व्यभिचारं महत्तरस्य दिशि गन्तुं प्रयतितवान् अस्ति।

बङ्गलासाहित्यक्षेत्रे उपन्यासकारस्य बङ्किमचन्द्रस्य प्रतिभाशालिनी मनीषी बङ्किमचन्द्रस्य विद्वान् भूमिका न नकारणीया। सः न केवलं उपन्यासस्य अग्रणीः अस्ति। सः महान् प्रतिभायाः स्मरणीयः व्यक्तित्वः अस्ति। घटनानां कथानकस्य शिल्पः अस्ति , चरित्रनिर्माण-विधिः, भाव-गहनता, अभिव्यक्ति-व्यञ्जकता, रूप-रसयोः आश्चर्यजनक-संयोगेन तस्य उपन्यासाः उत्कृष्टतायाः स्थितिः प्राप्ता अस्ति ।तस्य विशिष्टां कृतं मानवता-अनुसरणस्य परम-वैभवेन सह संयोजितम् अस्ति ।तस्य व्यक्तित्वस्य बलं प्रतिबिम्बितम् अस्ति।सः न केवलं श्रेष्ठः कलाकारःअपितु महान् कलाकारः।बङ्गला उपन्यासस्य जन्म पूर्णता च तस्य हस्ते अस्ति।बङ्किमचन्द्रः उपन्यासस्य सर्वेषु पक्षेषु बङ्गलासाहित्यस्य सर्वोत्तमः उपन्यासकारः अस्ति।तेन अनेकाः उपन्यासाः लिखिताः – दुर्गेशानन्दिनी, कपालकुण्डला, चन्द्रशेखर, राजसिंह, आनन्दमथ, देवी चौधुरानी इत्यादयः । 'वन्देमातरम्' इति सङ्गीतं तेन एव रचितम्। बङ्किमचन्द्रेण बङ्गीयपाठकानां कृते यत् अवशिष्टं तत् ऐश्वर्यम् इति वक्तुं सम्यक् ऐश्वर्या इति न ।

**दूरादायश्चक्रनिभस्य तन्वी तमालतालीवनराजिनीला । आभाति वेला लवणाम्बुराशेर्धारानबद्धे कलङ्करेखा ।।**

(कपालकुण्डला ,प्रथमखण्डः)

**सामाजिक उपन्यासेषु बङ्किमचन्द्रस्य जीवनदृष्टिः**

बङ्किमचन्द्रस्य सामाजिक वा घरेलु-उपन्यासाः बन्दीप्रतिभायाः उज्ज्वलतमं पक्षं दर्शयन्ति । तस्य सामाजिक उपन्यासेषु **विषवृक्ष**(१८७६), **'राजनी'** (१८७७),**कृष्णकान्तेर उइल** (१८७८) इत्यादयः सन्ति । **'इन्दिरा'** (१८७३) **राधारानी** (१८७६) च घरेलु उपन्यासाः सन्ति : परन्तु एतयोः बङ्किमप्रतिभायाः न भवति । तस्मिन् समये बङ्किमचन्द्रस्य बाङ्गलादेशस्य सामाजिकचेतना सामाजिक उपन्यासस्य लेखनस्य पृष्ठतः सर्वाधिकं कार्यं कृतवती इति भासते। यदा सः 'विषवृक्षः' इति लिखितवान् तदा सः पूर्वं त्रयः रोमान्टिक-उपन्यासाः सम्पपितम् आसीत्, बङ्गला-साहित्ये च स्व स्थापितवान् आसीत् । तत्कालीनसामाजिकसमस्याः सामाजिकोपन्यासलेखनार्थं प्रेरिताः इव मन्यन्ते, परन्तु सामाजिकोपन्यासः सन् अपि तस्य रोमान्टिकवृत्तेः स्पष्टहस्ताक्षरं बिष्वृक्षःउपन्यासे दृश्यते । १८७३ तः १८७८ पर्यन्तं एतेषु पञ्चवर्षेषु तेनसामाजिकोपन्यासलेखनार्थं समर्पितम् । अस्मिन् सन्दर्भे उक्तं स्यात् यत् अस्मिन् काले चन्द्रशेखर-युगलङ्गुरिया इति रोमान्टिक-उपन्यासद्वयमपि रचितवान् । परन्तु तदा मनसः मूलं कार्यं कृतवती पारिवारिकजीवनस्य विग्रह-समस्या स्पष्टतया अवगन्तुं शक्यते, यदा वयं पश्यामः यत् यद्यपि चन्द्रशेखरस्य मुख्यसामग्री रोमान्टिक अस्ति तथापि पारिवारिकजीवनस्य कष्टप्रदाः संकटक्षणाः तत्र जटिलतां जनयन्ति। प्रसंगतः इदमपि स्मर्तव्यं यत् बङ्किमचन्द्रस्य सामाजिकोपन्यासः अपि अलौकिकस्य चमत्कारिकस्य वा स्पर्शात् मुक्तः नास्ति। केवलं इन्दिराकृष्णकान्तयोः इव अस्य स्पर्शस्य प्रभावात् बहुधा मुक्ताः सन्ति ।

बङ्किमचन्द्रस्य अधिकांशउपन्यासेषु ऐतिहासिकरोमान्टिकाः इति कृतम् अस्ति, परन्तु वस्तुतः राजसिंहं विहाय अन्यस्मिन् उपन्यासे इतिहासः प्रमुखं स्थानं न प्राप्तवान् । एतेषु सर्वेषु रोमान्टिक उपन्यासेषु घरेलुजीवनस्य च प्रतिबिम्बं वर्तते । परन्तु तेषां कथा आख्यानात्मकाः, वास्तविकपृष्ठभूमिसम्बद्धाः च सन्ति, अतः ते घरेलु-पारिवारिक-उपन्यासत्वेन ज्ञातुं न शक्यन्ते । श्रीपरेशचन्द्र भट्टाचार्यः स्वस्य बङ्गलासाहित्यपरिचये लिखितवान् यत् "बङ्किमचन्द्रस्य ऐतिहासिक उपन्यासानां रोमान्टिक उपन्यासानां च ऐतिहासिकपृष्ठभूमिः अस्ति चेदपि काल्पनिकः नार्नारी इत्यस्य अन्तरक्रिया, घरेलुत्वं च प्रबलम् इति स्वीकृतम्। तथापि ते एकतः इतिहासम् आकर्षयन्ति।" अपरपक्षे समकालीनपारिवारिककथानां कल्पना।" प्रायः जीवनस्य प्रत्ययप्रदं चित्रणं नास्ति - अतः घरेलुजीवनकथाः कथ्यन्ते, परन्तु ते सामाजिक-घरेलु-उपन्यासरूपेण स्वीकर्तुं न शक्यन्ते। इन्दिरा आकारेण लघु, प्रकारेण च महती कथा अस्ति। उपन्याससदृशकथायाः कल्पनायाः जटिलतायाः, गभीरतायाः च अभावः अस्मिन् अस्ति ।

परिहासरसिकबङ्किमचन्द्रस्य हास्यनिर्माणक्षमता अस्य ग्रन्थस्य विलक्षणं वैशिष्ट्यम् अस्ति । बङ्किमचन्द्रः विवाहितजीवनस्य सारं दृष्ट्वा एतत् ग्रन्थं लिखितुं प्रेरितवान्; परन्तु कथायाः लघुविवरणेषु बौद्धिकप्रतिभायाः उज्ज्वलहस्ताक्षरम् अपि अस्ति । अस्य नायिका इन्दिरा अपि स्वजीवनकथायां स्वस्य बुद्धेः मन्दं तादात्म्यं त्यक्तवती । पुस्तकस्य नायिकायाः मुखेन कथा कथ्यते, बङ्किमचन्द्रेण इन्दिरायाः रोमान्टिकहृदयस्य सर्वं माधुर्यं स्वकलायां गृहीतम् इति भाति। जीवने कापि समस्या नास्ति, परन्तु जीवने एतादृशं सुन्दरं चित्रं वर्तते। अयं लघु उपन्यासः बङ्गलासाहित्ये नवीनतां आनीतम्।

बङ्किमचन्द्रस्य प्रथमः सामाजिकोपन्यासः "बिषवृक्षः" इति वक्तुं शक्यते। अस्मिन् उपन्यासे यथा सः प्रेमस्य समस्याप्रदः प्रश्नः उत्थापितवान् तथा नीतिशास्त्रस्य प्रश्नः तेन सह सम्बद्धः अस्ति । अस्य ग्रन्थस्य नायकः नागेन्द्रदत्तः तस्य पत्नी सूर्यमुखी च सूर्यमुखरूपेण गुणैः च बहूनां महिलानां अग्रणीः अस्ति । परन्तु तस्मिन् दिने कुण्डं दृष्ट्वा प्रभावितः नागेन्द्रदत्तः तां विवाहं कृत्वा स्वकुटुम्बे विषवृक्षस्य बीजानि स्वयमेव रोपितवान् । हिरेणदेवेन्द्रौ च तस्य वृक्षमूले अधिकं विषं प्रसारितवन्तौ। अस्य हीरकस्य देवेन्द्रस्य च उपस्थित्या कथा क्लिष्टा अस्ति। सिद्धान्तवादी बङ्किमः जीवनकलाप्रभावेण कुण्डस्य सहानुभूतिम् अकरोत्, परन्तु अवैधप्रेमदण्डेन कुण्डं मृत्युनान्धकारे धकेलितवान् । बङ्किमचन्द्रः वदति यत्- **विषवृक्षः नानाफलं ददाति। नागेन्द्रनाथे उत्पन्नं विषं मानसिकं, देवेन्द्रनाथे उत्पन्नं फलं मुख्यतया शारीरिकम् आसीत् । असंयमः न शरीरं सर्वेषु फलप्रदम् । देवेन्द्रनाथस्य शरीरे आसीत् ।**कथायां केषाञ्चन चमत्कारिकघटनानां योजनेन अस्य उपन्यासस्य कलात्मकगुणः नष्टः अभवत् ।

'राजनी' बङ्किमचन्द्रस्य उत्तम-उपन्यासेषु अन्यतमः अस्ति । रजनी इत्यस्याः भूमिकायां बङ्किमचन्द्रः स्वयमेव अवदत् यत् सः आङ्ग्ल-उपन्यासकारस्य लिटनेन लिखितस्य **लास्ट डेज आफ् पोम्पेई** इत्यस्य उपन्यासस्य निदिया नाम्नी फुलवाली इत्यस्याः चरित्रस्य अनुसरणं कृत्वा उपन्यासस्य नायिकायाः आदर्शं कृतवान् ।यद्यपि बङ्किमः स्वयमेव अस्य पुस्तकस्य उद्देश्यम् उक्तवान् तथापि कलासृष्टेः कृतिषु शाश्वतं स्थानं प्राप्तवान् । बङ्किमचन्द्रः अस्मिन् उपन्यासे वक्तुम् इच्छति यत् रूपं न दृष्टं चेदपि मनुष्यस्य मनसि रूपस्य तृष्णा स्वाभाविकी एव भवति, यथा रूपस्य स्पर्शः मनुष्यस्य मनसि अपि प्रेम्णः उद्बोधनं करोति। अस्मिन् उपन्यासे, अन्धयुवतीयाः मनोवैज्ञानिकविश्लेषणे बङ्किमस्य प्रतिभायाः कालातीतरूपं प्रकाशते। रजनी इत्यस्याः प्रेम्णः हृदयस्य मधुरता, लवङ्गलाट् इत्यस्य प्रेम-जगति तीव्रः द्वन्द्वः, अमरनाथस्य आत्मत्यागपूर्णः पुरुषत्वः बङ्किमस्य प्रतिभायाः अद्भुताः सृष्टयः सन्ति। अस्मिन् उपन्यासे ग्रामस्य तीव्रतायाः सामाजिकनीतिसङ्घर्षस्य च कलात्मकरूपेण अतुलनीयं चित्रं प्राप्नुमः । तेजस्विनी लबङ्गलता अमरनाथं सामाजिकतया अनुमोदितेन सहजतया इच्छति स्म, न तु चोरस्य कलङ्कितरूपेण अमरनाथं। तस्य प्रेमस्य एषा स्थिरता एव अस्मान् मोहयति। अस्य उपन्यासस्य लक्षणं त्रयाणां मुख्यपात्राणां मुखे उत्तम-पुरुषे कथनम् अस्ति ।

'कृष्णकान्तेर उइल' इति बङ्किमचन्द्रस्य महान् उपन्यासः । सामाजिकजीवनस्य एका समस्या अस्य उपन्यासस्य विषयः अस्ति । बङ्गलासाहित्यसामाजिक उपन्यासस्य आधारः अपि अस्मात् 'कृशकान्तेर उइल' इत्यस्मात् एव अस्ति । कृष्णकान्तेर उइलपत्रे बङ्किमः स्वप्नलोकं त्यक्त्वा यथार्थजगति अवतरति, देशस्य दूरदर्शितायाः व्याप्तिम् परित्यज्य, सः स्वस्य परितः जगतः जटिलतां स्वीकुर्वति। अस्मिन् उपन्यासे बङ्किमचन्द्रस्य अलौकिकस्य रोमान्टिकप्रस्तुतिः सर्वथा अनुपस्थिता अस्ति, अपि च मनस्तम्भस्य परस्परविरोधी रूपं तादृशं कलात्मकसिद्धौ प्रकटितं यत् बङ्गलासाहित्योपन्यासस्य क्षेत्रे मार्गदर्शकस्य भूमिकां स्वीकृतवती अस्ति। स्त्रीरूपं पुरुषजीवनस्य दैवम्, कथं पुरुषं दुर्गमदुःखदमार्गे कर्षति, कथं पुरुषजीवनं सर्वविनाशकशून्यतायाः महता शोकेन पूरितं भवति इति अस्य उपन्यासस्य प्रतिरूपम्। परन्तु बङ्किमचन्द्रः यूरोपीयदुःखदघटनानां मध्ये भारतीयजीवनस्य आश्वासनप्रदं विवरणं समयं निर्धारितवान् अस्ति। प्रचारस्य अनन्तरम् अपि नायकस्य गोविन्दलालस्य अधिकानि भ्रमाः प्राप्ताः । भ्रामरः स्त्रीव्यक्तित्वस्य दृष्ट्या बङ्गलासाहित्यस्य स्मरणीयः पात्रः अस्ति । रोहिण्याः चरित्रस्य तुलना वास्तविकजीवनस्य इच्छाप्रामाणिकतायाः दृष्ट्या न भवति। बङ्किमः समाजशास्त्रीयदृष्ट्या पिस्तौलशूलेन रोहिणीं मारितवान्, परन्तु कलाकारः बङ्किमः रोहिण्याः चरित्रे स्वस्य जीवनशक्तिं प्रवाहयित्वा अमरः अभवत् कथायाः नाटकीयविकासः, बाह्यशक्तयः पात्राणां च परस्परसम्बन्धस्य सूक्ष्मदृष्टिः, गहनविश्लेषणं, दृश्यानां प्रतीकात्मकं सङ्गतिः, कथनस्य तीक्ष्णवास्तविकता इत्यादीनां दृष्ट्या 'कृशकन्तेर उइल' अद्यापि बङ्गला उपन्याससाहित्ये अनुसरणीयं प्रतिरूपं वर्तते ।

राधा- रानीयां जीवनसमस्यानां चित्रणं नास्ति, यत् अस्ति तत् केवलं सामान्यजगतः सरलप्रेमकथा एव।

**निष्कर्षः**

सामाजिक उपन्यासविमर्शस्य अन्ते अस्माभिः बङ्किमचन्द्रस्य सामाजिकचेतना अवगन्तुं शक्यन्ते। बङ्किमचन्द्रस्य सहानुभूतिपूर्णस्य कलाकारस्य मनः अपि तस्य जीवनस्य गहनज्ञानं तदा अवगन्तुं शक्यते यदा सः मनुष्य-मनुष्यस्य प्रेम्णः अत्यन्तं करुणापूर्वकं साक्षात्कारं कृतवान् तथा च स्वस्य चरित्रचित्रणद्वारा सः आन्तरिकजगतः शाश्वतसन्देशं बाङ्गलादेशस्य तृषितहृदयेषु प्रसारितवान्। स्त्रीपुरुषयोः अस्य शाश्वतप्रेमस्य आश्रयेण सः सामाजिकसमस्यानां अपि सम्बोधनं कृतवान् । यथा सः प्रेम्णः अदम्यशक्तिं ज्ञातवान् तथा तथा विधवात्वस्य अतृप्तं प्रेमतृष्णां साकारं कर्तुं न संकोचम् अकरोत् । अत्र स एव जीवनस्य सच्चिदानन्दकारः । परन्तु तस्य कलाकारमनः कदाचित् नीतिशास्त्री-मनसः पराजयं स्वीकृतम् अस्ति। मनीषी- श्रेष्ठ बङ्किमचन्द्रः स्वैच्छिकसामाजिकशिक्षकस्य भूमिकातः निवृत्तः न अभवत्, अतः सः बृहत्तरस्य समाजस्य हितस्य विषये चिन्तनं कर्तुं न शक्तवान् । तस्य कलात्मकता किञ्चित् दुर्बलम् अपि तस्य एतत् कठोरताम् आचरितव्यम् आसीत् । सः रोहिणीं प्रति पूर्णतया सहानुभूतियुक्तः सन् न केवलं समाजस्य आरोग्यार्थं तां क्रूररूपेण वधं कर्तुं संकोचम् न अकरोत् । परन्तु तदपि अवश्यमेव वक्तव्यं यत् यद्यपि तस्य मनसि समाजशास्त्रीयः रूढिवादः आसीत् तथा च तस्य प्रभावः कदाचित् तस्य उपन्यासानां कलात्मकगुणं क्षीणं करोति स्म तथापि सः मूलतः कलाकारः एव आसीत् सच्चः कलाकारः च इति नाम्ना सः पूर्णजीवनभावेन स्त्रीपुरुषप्रेमम् अवगम्य तत्कालीनसाहित्यस्य सामग्रीं करोति।

**उपयुक्तग्रन्थसूची-**


- चट्टोपाध्याय शचीशचन्द्र, बकिमजीवनी, कलिकाता, एस. चक्रवर्ती, 1931.
- चट्टोपाध्याय. बकिमचन्द्र, बङ्किमरचनाबली, कलिकाता, साहित्य सदन, 1965, 2 खण्ड।
- जाना० मनोरञ्जन, बङ्किमचन्द्रेर दृष्टिते नारी, कलिकाता, ए.मुखार्जी, 1950.
- सरकार. अजयचन्द्र, बकिमचन्द्रेर भाषा, कलिकाता, 1949.
- सेन० सुकुमार, बाङ्ग्ला साहित्येर इतिहास, 5 सं कलिकाता, इस्टार्ण पाबलिसार, 1963, खण्ड-2,।



मार्गनिर्देशकः
**डॉ० ए० सच्चिदानन्दमूर्ति**
सहाचार्यः , शिक्षाशास्त्रविभागः
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः

अनुसन्धाता
**तरूणशीटः**
शोधछात्रः, शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः
तिरुपतिः
Mob- 8100322461
E-mail : tarunshit1990@gmail.com


**********

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# सर्वशास्त्रसम्मतस्य सृष्टितत्त्वस्य अद्वैतदिशा विवेचनम्

**Dr. Supriya Pal,** West Bengal

**शोधसारः**

दृश्यमिदं जगत् कैः कैः तत्वैः निर्मितम्, किञ्च सृष्टेः उत्पत्तिः कदा अभूत्, कथञ्च अभूत्, प्रलयो वा कदा भविष्यति ? इत्यादि प्रश्नाः प्राचीनकालादेव मनुष्याणां मनसि विद्यते । एतेषां प्रश्नानां यथार्थम् उत्तरं अद्यापि न प्राप्यते । तत्र वैज्ञानिकाः प्रतिपादयन्ति यत् सृष्टिः अणु-परमाणोः संयोगेन अभवत् । परन्तु अध्यात्मशास्त्रे एतन्न स्वीक्रियते, ते वदन्ति यत् अणु-परमाणुतः सूक्ष्मं तत्त्वं विद्यते तद् ब्रह्म आत्मा वा कथ्यते । तत्र ते प्रमाणत्वेन कठोपनिषदः मन्त्रमिदं दर्शयन्ति - " अणोरणीयान्महतो महीयान् ..." इति । ब्रह्म स्वमायया एव अस्य जगतः निर्माणं करोति । अर्थात् ब्रह्मैव जगतः निमित्तकारणं किञ्च उपादानकारणम् । एतदेव अस्य शोधपत्रस्य विषयः ।

**कूटशब्दाः**

वेदसम्मता सृष्टिः, पुराणेषु सृष्टिरहस्यम्, न्यायवैशेषिकसम्मतं सृष्टितत्त्वम्, सांख्यसम्मता सृष्टिः, उपनिषदि सृष्टितत्त्वम्

" को अद्धा वेद क इह प्रवोचत कुत अजाता कुत इयं विसृष्टिः । अर्वाग्देवा अस्य विसर्जनेनाथा को वेद यत आबभूव ॥ " [1]

इति प्रश्नः तु वेदे दृश्यते एव । अर्थात् ऋत वैदिककालादेव मनुष्यानां मनसि सृष्टिविषये जिज्ञासा आसीत् । तत्र बहुत्र सृष्टिविषये वर्णना कृता । सृष्टिविषये जिज्ञासायाः समाधानं ऋग्वैदिककालादारभ्य बहुषु पुराणादिषु यथाशक्यं वर्णितम् । तत्र सर्वशास्त्रसम्मतं सृष्टितत्त्वम् अद्वैतदिशा प्रतिपादनमेव अस्य शोधपत्रस्य प्रधानम् उद्देश्यम् । तत्र आदौ सदसतोः सृष्टिः अभवत् ततः पृथिव्यादीनाम् । पुराणादिषु वयं पश्यामः यत् सृष्ट्यादौ जगदिदं तमसावृतमासीत् इति । तदुक्तं भविष्यपुराणे –

" जगदासीत् पुरा तात तमोभूतमलक्षणम् । अविज्ञेयमतर्क्यं च प्रसुप्तमिह सर्वशः ॥ " [2]

पुराणेषु अपि दृश्यते यत् अस्याः सृष्टेः आदिशक्तिर्भवति परब्रह्म । यतोहि आदौ जगदिदं तमसावृतम् आसीत् । अतः तस्य विज्ञाने कोऽपि उपायः नासीत् । तस्मात् तदविज्ञेयम् अतर्क्यं वा वक्तुं शक्यते । अधुना वेदसम्मता सृष्टिविषये उच्यते –

## वेदसम्मता सृष्टिः

सृष्टिप्रक्रियायाः विवेचनं सर्वप्रथमं ऋग्वेदस्य पुरुषसूक्ते किञ्च नासदीयसूक्ते प्राप्यते । सर्वप्रथमं आदिपुरुषात् विराट् उत्पद्यते । ततः अधिष्ठातारूपेण पुरुषः स्वात्मानं सृष्ट्वा जगतः अग्रे किञ्च पृष्ठे अतिक्रमति । देवाः ऋषयः च पुरुषरूपहविना यज्ञं सम्पादितवान् । ततः पक्षिणां किञ्च वन्यपशूनाम् उत्पत्तिः भवति । तस्मात् यज्ञात् सामादिनां उत्पत्तिः भवति । [3] तस्मात् पुरुषात् मनसः चन्द्रमा, किञ्च चक्षोः सूर्यः, मुखात् इन्द्रः, तथा अग्नेः प्राणात् वा वायुः उत्पद्यते । तच्च –

" चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादिन्द्रश्च अग्निश्च प्राणाद्वायुरजायत ॥ " [4]

किञ्च अस्यैव पुरुषस्य नाभितः अन्तरिक्षं, शीर्ष्णौ द्यौः किञ्च पद्भ्यां भूमिः तथा श्रोत्रात् दिशः उत्पद्यते । एवंरूपेण लोकानां रचना अभवत् । तथा चोक्तम् –

"नाभ्यां असीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत । पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोका अकल्पयन् ॥" [5]

किञ्च नासदीयसूक्ते सृष्टेः रचयिता ईश्वरः इत्युक्तम् –

" इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न । यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद ॥ " [6]

अथर्ववेदेन अपि परमात्मा एव समस्तपदार्थानां मूलमिति स्पष्टिकृतम् । तच्च –

" अया विष्ठा जनयन्कर्वराणि स हि घृणिरुरुर्वराय गातुः । स प्रत्युदैद्धरूणं मध्वो अग्रं स्वया तन्वातन्वमैरयत ॥ " [7]

अनेन सह सृष्ट्यारम्भस्य एवमपि वर्णनम् उपलभ्यते यत् सृष्ट्यादौ जगदिदं न सदासीत् न च असत् । अर्थात् सृष्ट्यारम्भे केवलं शून्यमेव आसीत्, तद्विहाय किमपि नासीत् । तदेव ऋग्वेदे उक्तम् –

"नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यत् । किमावरीवः कुहकस्य शर्मन्नम्भः किमासीत् गहनं गभीरम् ॥ " [8]

तैत्तिरीयब्राह्मणे अपि अस्य समर्थनं कृतं यत्- " न द्यौरासीत् । न पृथिवी । नान्तरिक्षम् । तदसदेव सन्मनोकुरुत स्यामिति ।"[9] किञ्च शतपथब्राह्मणानुसारं सर्वप्रथमं असदेव आसीत् । ततः सद्रूपेण परिणामः अभवत् । अनन्तरं कदाचित् अण्डरूपेण परिणामः भवति। तत्पुनः भागद्वयेन विभक्तम्, द्यौपृथिवीरूपेण च । एवमेव यत् किमपि उत्पद्यते तत् सूर्यः एव, सैव ब्रह्म । तस्मादेव उक्तम् - "स य एतमेवं विद्वानादित्यं ब्रह्मेत्युपास्ते।" [10] शतपथब्राह्मणानुसारं सृष्ट्यारम्भे इदं जलरूपेण आसीत् । तत्र एकम् अण्डं जातम्, ततः एकः पुरुषः एवंक्रमेण सृष्टेः विस्तारः अभवत् । तच्चोक्तम्–

"आपो ह वा इदमग्रे सलिलमेवास । ता अकामयन्त कथं नु प्रजायेमहि इति । ता अश्राम्यमन् । तास्तपोऽतपयन्तः । तासु तपस्तप्यमानासु हिरण्यमयाण्ड सम्बभूव । सम्बत्सरस्य बेला यावत् । पर्यप्लवत । ततः सम्वत्सरे पुरुषः समभवत् । सः प्रजापति।।" [11]

परन्तु तैत्तिरीयोपनिषदि वर्णितः सृष्टिक्रमः अत्यधिकः सुव्यवस्थितः । तच्च–

"तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः । आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्याः ओषधयः । ओषधीभ्य: अन्नम् । अन्नात्पुरुषः। "[12] इति

## पुराणेषु सृष्टिरहस्यम्

दृश्यमिदं जगत् कैः कैः तत्वैः निर्मितम्, किञ्च सृष्टेः उत्पत्तिः कदा अभूत्, कथञ्च अभूत्, प्रलयो वा कदा भविष्यति ? इत्यादीनां रहस्यात्मकप्रश्नानां यथार्थम् उत्तरम् उपलब्धुं पुराणानामेव पारायणं कतर्व्यम् । पुराणेषु सृष्टिप्रकरणम् अतिगहनं विद्यते । तत्र पुराणेषु सृष्टेः चातुर्विध्यम् उक्तम् । तद्यथा - प्राकृतिकी सृष्टिः, ब्राह्मी सृष्टिः, मानससृष्टिः, मैथुनीसृष्टिश्च । तत्र प्रकृत्या स्वभावेन या सृष्टिः भवति सा प्रथमा प्राकृतिकी सृष्टिः । अर्थात् ब्रह्मप्रकृतौ अव्यक्तावस्थातः व्यक्तावस्थायाम् अधिगतायाः सृष्ट्या ब्रह्मणः ईक्षणातः या सृष्टिः सा एव प्रथमा सृष्टिः । ततः ब्रह्मणः सकाशात् द्वितीया ब्राह्मी सृष्टिः । ततः प्रजापतिभिः देवदानवमानवादीना विस्तीर्णा तृतीया मानसी सृष्टिरुच्यते । तदनन्तरं स्त्रीपुरुषसंयोगजन्या चतुर्थी मैथुनी सृष्टिः उत्पद्यते । सर्वसमर्थोपि ब्रह्मा प्रथमं मनसा एव सृष्टिं करोति, या मानसी सृष्टिरिति कथ्यते । ब्रह्मसमाना अनेके महर्षय: अपि सन्ति, ये मानसीसृष्टिकर्तुं प्रभवन्ति । तदुक्तं श्रीमद्भागवते –

"भगवद्ध्यानपुतेन मनसान्यांस्तदाऽसृजत् । सनकञ्च सनन्दञ्च सनातनमथात्मभू ॥

सनत्कुमार च मुनीन् निष्क्रियानूर्ध्वरेतस । तान् बभासे स्वभू पुत्रान् प्रजा, सृजत पुत्रका ॥" [13]

पुराणेषु सृष्टेः बहवः प्रकाराः वर्णिताः विद्यन्ते । यत्र केवलस्य अन्नमयकोषस्य विकाशः भवति सा अज्ञानयुक्ता प्रकाशहीना स्थावरसृष्टिः । किञ्च स्वेदजाण्डजादिनां द्वितीया सृष्टिः, तत्र प्राणमयमनोमयविज्ञानमयकोषाणां विकाशः भवति । तृतीया सृष्टिः भवति भोगयोनीनां देवादीनाम् । किञ्च मनुष्याणां चतुर्थी सृष्टिः । तत्रैव पञ्चकोषाणां पूर्णो विकाशः भवति । कलियुगे तपः शक्तेः ह्रासाद् उपर्युक्तानां सृष्टीनां प्रबाहः न चलति । तत्र केवलम् अवशिष्टा भवति मैथुनीसृष्टिः एव ।

## न्यायवैशेषिकसम्मतं सृष्टितत्त्वम्

साम्यावस्थापन्नस्य त्रिगुणात्मकस्य गुणक्षोभाद् अहं तत्त्वं किञ्च ततः अहङ्कारः, अहङ्कारात् एकादशेन्द्रियपञ्चतन्मात्रा-पञ्चमहाभूतानां सम्भवः सर्ग उच्यते – "अव्याकृत गुणाक्षोभान् महतस्त्रिवृतोहमः । भूतमात्रेन्द्रियार्थानां सम्भवः सर्ग उच्यते ॥ " [14]

श्रीमद्भागवतानुसारं परब्रह्म स्वमायया एव ब्रह्माण्डस्य निर्माणं कृतवान् –

"स वा एतस्य संद्रष्टुः शक्तिः सदसदात्मिका । मायानामगहाभागयेदं निर्ममे विभुः ॥" [15]

काणादगौतमाः एवं मन्यन्ते यत् परमाणुरेव प्राथमिकस्य कार्यस्य नियतम् उपादानं कारणम् । यतोहि क्षुद्रात् महतः आरम्भः इति दृश्यते । तेषां मते परमाणुद्वयस्य परस्परसंयोजेन प्राथम्येन द्यणुकं उत्पाद्यते । द्यणुकोयं परमाणोः सावयवं कार्यम् । एवं क्रमेण त्र्यणुकं, चतुरणुकस्य आरम्भः भवति । अनेन प्रकारेण गिरिसमुद्रादेः सकलसावयवस्य सृष्टिः भवति । एवं परमाणोः द्यणुके उत्पन्ने जाते तस्य परमाणोः रूपरसगन्धस्पर्शादयः विशेषगुणाः[16] तस्मिन् द्यणुके सजातीयान् अपरान् रूपरसादीन् विशेषगुणान् रभन्ते । एवं कारणसकलानां गुणाः एव स्व-स्वकार्येषु गुणक्रियादीनारभन्ते । यद्यपि कारणस्य सामान्यगुणः कदाचित् तस्य कार्ये विजातीयगुणमारभते, तथापि कारणस्य विशेषगुण न कदापि तस्य कार्ये विजातीयगुणमारभते ।

यदि स्यादेतत् तर्हि नीलकपालात् पीतघटस्य रक्तसूत्राच्च पीतपटस्यारम्भो भवेत् व्यवहारदशायान्तु एतन्न दृश्यन्ते । अतः कारणस्य विशेषगुणाः कार्येषु समानजातीयान् विशेषगुणान्तरान् आरभन्ते इति न्यायवैशेषिकाः ॥ [17]

**सांख्यसम्मता सृष्टिः**

त्रिगुणात्मिकायाः प्रकृतेर्महानुत्पद्यते महतोऽहङ्कारो जायते तस्मात् शब्द-स्पर्श-रूप-रस- गन्धतन्मात्राणि एकादशेन्द्रियाणि चाविर्भवन्ति पञ्चतन्मात्रेभ्यश्च आकाश-वायु- तेजोऽनिल पृथिवीनामकानि पञ्च महाभूतान्युत्पद्यन्ते ।तत्र शब्दतन्मात्रादाकाशं शब्दगुणकमुत्पद्यते । शब्दतन्मात्रसहितात् स्पर्शतन्मात्रात् शब्दस्पर्शोभयगुणको वायुरुत्पद्यते । शब्दस्पर्शतन्मात्रसहितात् रूपतन्मात्रात् शब्दस्पर्शरूपगुणकं तेज उत्पद्यते । शब्दस्पर्शरूपतन्मात्रसहितात् रसतन्मात्रात् तद्गुणिकाः शब्दस्पर्शरूपरसवत्य आप उत्पद्यन्ते । शब्दस्पर्शरूपरसतन्मात्र सहिताद् गन्धतन्मात्रात् शब्दस्पर्शरूपरसगन्धवती पृथिवी उत्पद्यते । एवंक्रमेण पूर्वपूर्वानुप्रवेशेनैकद्वित्रिचतुष्पञ्चगुणकान्याकाशादीनि पृथ्वीपर्यन्तानि पञ्च महाभूतानि जायन्ते । यथा चोक्तम् –

"प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडषकः । तस्मादपि षोडशकात् पञ्चभ्यः पञ्च भूतानि ॥" इति [18]

"पुरुषस्यदर्शनार्थं कैवल्यार्थं यथा ..." इत्यनुसारं जगतः सृष्टिः प्रकृतिपुरुषयोः संयोगेन भवति । जगतः उपादानभूता प्रकृतिः अनादिः अस्ति । तस्मादेव रागद्वेषादिसंसारस्य उत्पत्तिः भवति । पञ्चमहाभूतानां तथा इन्द्रियादिनां विषयः प्रकृतिः एव इन्द्रियादिनाम् उपादानकारणम् । किञ्च बुद्धिः, अहङ्कारः, आकाशम्, वायुः, अग्निः, जलम्, पृथिवी, पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, किञ्च मनसः अपि उत्पत्तिः प्रकृतितः एव भवति ।[19] सांख्यमतानुसारं इयं सृष्टिः प्रकृतिपुरुषयोः संयोजनेन एव भवति । अस्मिन् प्रसङ्गे डा. राधाकृष्णनमहोदयेन उक्तम्–

"The whole world even according to it due to the self direction of the absolute In to subject and object Purush and Prakriti. "

## उपनिषदि सृष्टितत्त्वम्

वेदान्तदर्शने उपनिषदि च वर्णितं सृष्टितत्त्वं खलु विज्ञानसम्मतम् । सांख्यानुसारं सर्वप्रथमं महत्तत्त्वम् अभिव्यक्तमिति तु शङ्कराचार्येण अपि स्वीक्रियते । परन्तु आचार्येण सांख्योक्तं महत्तत्त्वम् अवैदिकमिति शङ्कितम् । कारणं सांख्योक्तं महत्तत्वं स्वाधीनं परन्तु आचार्यमते तन्न भवितुमर्हति । अतः तेन महानात्मा इत्युच्यते । किञ्च अन्यत्र प्राणः हिरण्यगर्भः इत्यपि उच्यते । श्रुतौ अपि अस्य उल्लेखः प्राप्यते । तद्यथा– "अन्नात् प्राणः", [20] " एतस्माज्जायते प्राणः "[21] इत्यादयः । अयं प्राणः अव्यक्तशक्तेः प्रथमो विकाशः । तत्र आचार्येण कठोपनिषद्भाष्ये उक्तं यत् – "अव्यक्तात् यत् प्रथमं जातं हैरण्यगर्भतत्वं बोधाबोधात्मकं महानात्मा"[22] इति । किञ्च मुण्डकोपनिषद्भाष्ये अपि बीजाङ्कुरदृष्टान्तवदेतत् समर्थ्यते । अत एव अव्यक्तशक्तिः सर्वप्रथमं हिरण्यगर्भरूपेण वायुरूपेण अभिव्यक्ता । तैत्तिरीयभाष्येपि उक्तं यत् सूर्यचन्द्रादयः आधिदैविकाः पदार्थाः वायौ प्रलीयन्ते । वायुना ब्रह्मसर्वविधानां पदार्थानां संहर्ता । "परिम्रियन्ते अस्मिन् देवा इति परामरो वायुः । वायुराकाशेनानना इति आकाशं वाय्वात्मानम् उपासीत् ।" [23] "प्रसिद्ध आकाशः प्राणेन... व्याप्तः", "अस्मिन्नाकाशे प्राणः उप्तः" इत्यादयः शङ्काचार्येण स्वभाष्ये कथितम् । जागरिते च पुनः प्राणाद् अभिव्यक्तानि सन्ति । श्रुतिषु वायोः प्राणस्य वा यद् कथनं दृश्यते तदेव स्पन्दनमात्रमिति । अतः स्पन्दनमेव हिरण्यगर्भः इति शाङ्करमतम्। अस्मात् स्पन्दनात् एव चन्द्रसूर्यादयः अभिव्यक्ताः भवन्ति ।[24] अतः गम्यते यत् अव्यक्तशक्तिरनन्तस्य आकाशस्य एकदेशे सर्वप्रथमे स्पन्दनरूपेण अभिव्यक्ता । वस्तुतः स्पन्दनमिदम् अव्यक्तशक्तेः प्रथमः सूक्ष्मविकाशः । सांख्यमतेन इदमेव महत्तत्वमिति । कठोपनिषदः शाङ्करभाष्ये उच्यते यत् हिरण्यगर्भः बोधात्मकः अबोधात्मकः च । अर्थात् हिरण्यगर्भः ज्ञानात्मकः, क्रियात्मकश्च । वेदान्तमते न कोऽपि पदार्थः चेतन्यशून्यः । अस्मिन् जगति यावत् प्रकारं ज्ञानं क्रिया च प्रकाशिता, हिरण्यगर्भ एव तेषां समष्टिबीजम् । मुण्डकोपनिषदानुसारम् अक्षरात् एव जगतः उत्पत्तिः भवति । तत्र ऊर्णनाभिद्रष्टान्तेन तद्दर्शयति–

"यथोर्णनाभिःसृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति। यथासतः पुरुषात्केशलोमानितथाक्षरात्सम्भवतीह विश्वम् ॥"[25] इति

किञ्च ईशावास्योपनिषदि अपि "ॐ ईशावास्यमिदं सर्वं "[26] इत्यादिना मन्त्रेण ब्रह्मणा एव जगत् व्याप्तमिति दर्शितम् ।उपरि वर्णितानां सर्वशास्त्रसम्मतसृष्टितत्वानां विश्लेषणं कृत्वा एवं प्राप्यते यत् अस्य जगतः सृष्टिप्रक्रिया ब्रह्म किञ्च तस्य मायया प्रकृत्या वा सम्पन्ना ।

अर्थात् ब्रह्मैव अस्याः सृष्टेः निमित्तं किञ्च उपादानकारणम् इति । एवं तु सर्वैः अपि स्वीक्रियते परन्तु ते भिन्नमार्गं अनुसरन्ति । तदेव मया अस्मिन् शोधप्रबन्धे यथामति निरूपयितुं यत्नो कृतः । इति दिक् ।

**पादटिप्पणी**

1. ऋग्वेद.–१०/१२९/०६ । 2. भवि.पु.सृष्टिवर्णनम् –०९ । 3. ऋग्वेद.– १०/९०/०५-०९ । 4. ऋग्वेद. – १०/३१/१२ ।
5. ऋग्वेद. – १०/९०/१४ । 6. ऋग्वेद. – १०/१२९/०७ । 7. अथर्ववेद.–०७/०३/०१ । 8. ऋग्वेद. – १०/१२९/०१ ।
9. तै.ब्रा.– ०२/०२ । 10. छा.उप. । 11. शत.ब्रा. । 12. तै.उप.– ०१/०१/०१ । 13. श्रीमद्भागवत महापुराण ।
14. भा.पु.– ११/०७/११ । 15. भा.पु.– ०३/०५/२५ । 16. प्र.पा.भा.( चौखम्बा संस्करण. ) –पृ. – २०,१६४,६३
17. प्र. पा. भा.( चौखम्बा संस्करण. ) – पृ. –१६८ । 18. सां.का.- २१ । 19. सां.का.- २२ । 20. मु.उप.– ०१/१/०८
21. मु.उप.–०२/०१/०३ । 22. मु.उप.– ०१/०१/०८-०९ । 23. ऐ.आ.– ०२/०२ । 24. कठ.उप.– ०१/०३/१० ।
25. मु.उप.– ०१/०१/०७ । 26. ई.उप.- ०१

**सन्दर्भसूची**

*Aitareya-Āraṇayaka*: Ed. with Commentary of Sāyana. T. Shastri. Pune: Anandashram, 1959.

*Aitareya-Brāhmaṇa*: Trans. A.B. Keith. *Rigveda Brāhmaṇas*. Ed. C.R. Lanman. Delhi : Motilal banarasidass, 1981 (2nd edition). (Harvard Oriental Series. Vol.-25)

*Aitareya-Āraṇayaka*: Trans. A.B. Keith. Anecdcdote Oxoniensia. Oxford: Oxford University,

*Brahma-Sūtra Śāṅkara bhāṣya*: Ed. with Commentary of Bhāṣyaratnaprabhā of Govindānanda. Bhāmatī of Vācaspati Miśra and Nyāyannirṇaya of Ānandagiri. J.L. Shastri. Delhi : Motilal Banarasidass, 1996. (rpt.)

*Chāndogya Upaniṣad*: Ed. and Beng. Trans. Swami Gambhirananda. Upaniṣad Granthāvalī. [Vol.-II]. Kolkata: Udbodhan Karyalay, 1986 (8th edn.)

*Principal Upaniṣads*: Trans. S. Radhakrishnan. Delhi: Oxford University Press, 1989. (Centenary Edn, Oxford, 1953)

*Ṛgveda Saṁhitā*: Trans. R.T.H. Griffith. *Hymns of the Ṛgveda*. [Vol. I-II]. Varanasi: Chowkhamba Sanskrit Series office, 1971 (5th edn.) (The Chowkhamba Sanskrit Series No. 35)

**Dr. Supriya Pal**
Assistant Professor,
Department of Sanskrit,
Bankura University, Bankura, West Bengal- 722155
Mobile: +91-7001724645
E-mail : supriyapalsans@gmail.com

**********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# श्रीमद्वेङ्कटनाथप्रणीत-प्रह्लादविजयमहाकाव्यमातृकायाः अध्ययनम्

**Priyanka Moharana**
Ph. D. Scholar
National Sanskrit University, Tirupati -517501, Andhra Pradesha
Contact No. : 6372501080
Email- priyanka.mna@gmail.com

**Dr. Bharath Bhushan Rath**
Assistant Professor, Dept. of Sahitya
National Sanskrit University, Tirupati -517501
Mobile no-8897426243
Email- paramatmabharat@gmail.com

**पीठिका–**

प्राचीनभारतस्य महानसंस्कृति गौरवञ्च प्राचीन पाण्डुलिपिषु निहितमस्ति। प्राचीन मातृकाणामुपरि शोधकार्यं सम्प्रति महानोपादेतां प्रतिभाति। सर्वकारीय सर्वेक्षणेन ज्ञायते यत् भारते प्रायः ५,००००००० परिमिताः मातृकाः विभिन्नेषु मातृकासंग्रहालयेषु विद्यते। अतः मातृका सम्पत्ति प्राचीन भारतस्य ज्ञानगौरव रूपेण सुप्रतिष्ठितमासीत् । यद्यपि अस्माकमग्रजाः मातृका संग्रक्षणे वहुप्रयत्न कृता परन्तु विभिन्न विषयेषु अप्रकाशित वहुमूल्य सहस्र पाण्डुलिपि भारतभूखण्डे तथा विदेशेषु विभिन्न संग्रहालयेषु लभ्यते। मातृकाणां संग्रक्षणे जनानां अज्ञानता, पर्यावरण परिवर्ततम् तथा विभिन्न समस्या काराणात् वहुमूल्य मातृका विनष्टः जातम् । पाण्डुलिप्यपध्यस्ते तस्योपरि शोघकार्यं न कर्तुं शक्यते। ज्ञानस्य अमुल्य रत्नोऽयं अपायावस्थायां गच्छति। अतः अप्रकाशिता मातृकाणामोपरि शोधकार्यं कृत्वा तस्य प्रकाशने संरक्षणे च मया काचित् प्रयासं अत्र कृता। अप्रकाशित प्रह्लादविजयमातृका संस्कृतसाहित्ये महत्वपूर्णं स्थानम् अवहति। तस्मात् प्रह्लादविजयमहाकाव्यमातृकायाः पर्यालोचनात्मकम् विश्लेषणम् अत्र विहितमस्ति।

**बीजाक्षराणि–**

प्रह्लादविजयमहाकाव्यम्, श्रीमद्वेङ्कटनाथ, महाकाव्यम्, पाण्डुलिपि

**प्रस्थावना-**

महाकाव्यं हि संस्कृतसाहित्यजगति सर्वोत्कृष्टं रत्नम् । संस्कृतमहाकाव्यजगति महाकाव्यस्य विकाशः कदाप्रभृत्यभूदिति तु न पार्यते निश्चयेन वक्तुम्। एतावदेव निश्चितं यत् महर्षिः वाल्मीकिर्हि लौकिकसंस्कृतसाहित्यस्य आदिकविरादिकाव्यञ्च रामायणम्। ततः प्रवृत्ति संस्कृतसाहित्ये नैकानि महाकाव्यानि विरचितानि। तत्रापि प्रसिद्धतया पञ्च महाकाव्यानां ग्रहणं विद्वद्भिः क्रियन्ते एव। तानि पञ्च महाकाव्यानि भवन्ति – रघुवंशम्, कुमारसम्भवम्, किरातार्जुनीयम्, नैषधीयचरितम्, शिशुपालवधञ्चेति।

विशेषतः संस्कृतसाहित्ये विविधशास्त्राणाम् अङ्गतया वह्व्यः कृतयः वर्तन्ते । तासु कृतिषु काश्चन पुस्तकाकारेण प्रकाशिताः काश्चन सम्प्रत्यपि ताडपत्रेषु पाण्डुलिपिरूपेण संरक्षिताः। समयस्य प्रभावात् अनेके पाण्डुलिपयः विनष्टाः । यत्र महता परिश्रमेण अस्माकं पूर्वजाः शास्त्राणि लिखितवन्तः। अतः संरक्षितानां पाण्डुलिपिनां सुरक्षा अस्माभिरेव कर्त्तव्या।

**विषयः –**

अखिलसंस्कृतसाहित्ये बहुमूल्यग्रन्थाः मातृकागारे अप्रकाशिताः विराजन्ते। अतः अप्रकाशितमहाकाव्यानां रक्षाकरणार्थं मया कथञ्चित् प्रह्लादविजयमहाकाव्यस्य उपलब्धमातृकाणां संग्रहः कृतः। प्रह्लादविजयमिति पौराणीकं महाकाव्यं श्रीमद्वेङ्कटनाथ नाम प्रतिभाशालि

कवीश्वरेण निरमायि। प्रह्लादविजयमहाकाव्यं सम्प्रति लोके प्रचारशैथिल्येन अकालमृत्युमुपयाति इत्यहमस्य रक्षणे परिकरं बध्नामि। अयं ग्रन्थस्तु अप्रकाशितः। अपि तु मातृकारूपेण मातृकागारे संरक्षितः। मातृकागारे केवलं मातृकारूपेण स्थितानां बहुमूल्यग्रन्थानां परिप्रकाशार्थं तथा संस्कृतसाहित्ये महाकाव्यानां रक्षाकरणार्थं मया उपलब्धमातृकाणाम् आधारेण शोधकार्यं प्रस्थावितम्।

महाकाव्येऽस्मिन् प्राचीनप्रमाणशास्त्राणां, पुराण-इतिहास-काव्यादीनां च वाक्यान्युद्धृतानि। तेषु च पुराण-इतिहास-काव्यादिषु भगवद्पुराणम्, विष्णुपुराणं तथा पद्मपुराणप्रभृतिषु श्लोकसंग्रहः दरीदृश्यते। श्रीमद्वेङ्कटनाथेन लिखितमिदं महाकाव्यं सहृदयविदुषां दृष्टिगोचरो भवितुमर्हतीति प्रयास।

प्रह्लादविजयमहाकाव्यम्-संस्कृतसाहित्यसर्जनापरम्परायां विरचितेषु संस्कृतमहाकाव्येषु प्रह्लदविजयमहाकाव्यस्य स्थानम् स्वतन्त्रम्। पाण्डित्यप्रयोगपटुः श्रीमद्वेङ्कटनाथः पुराणमाश्रित्य भक्तप्रवरस्य प्रह्लादस्य चरित्रमाधारीकृत्य प्रह्लादचरितं विरचितवान्। महाकाव्यमिदं सहृदयहृदयं रञ्जयति इति नास्ति विप्रत्तिपत्तिः। प्रह्लादविजयं हि सर्वविधिलक्षणोपेतम् महाकाव्यम्। अत्र हि षड्विंशति सर्गाः उपलभ्यन्ते। भागवद्पुराणम् तथा विष्णुपुराणप्रभृतिषु प्रह्लादस्य भगवत्प्राप्तिवृत्तान्तमादाय निबन्धमिदं महाकाव्यम्। अत्र कलापक्षापेक्षया भावपक्षमेव समधिकं पुष्णाति। ग्रन्थादौश्रीमद्वेङ्कटनाथः निर्विघ्नपरिसमाप्त्यार्थं विहितं प्रणामादिकं ग्रन्थस्य उत्कृष्टत्वं दर्शयति। -

श्रीभारते भागवते च बिष्णु धर्मोत्तरे वैष्णवमात्स्ययोश्च। श्रीनारसिंहेऽप्यथ नारदीये कौर्मे पुराणेषु तथाऽपरेषु ॥

प्रह्लादमुद्दिश्य कथाः प्रवृत्ताः यास्तास्समाहृत्यतदानुपूर्व्या । श्लोकांश्च तानेवसुसङ्गतार्थं संयोज्यमोदं विदुषां करिष्ये ॥

**प्रह्लादविजयमहाकाव्यस्यमातृकापरिचयः**

प्रह्लादविजयमहाकाव्यस्य एकादशमातृकाः उपलभ्यन्ते इति मातृकासंग्रहालयेभ्यः प्रकाशितानां विवरणात्मकग्रन्थसूचीनां (NCC)अवलोकनेन ज्ञायते। ते यथा-

- Adyar. D. V. 1206(Inc),
- GOML.MD. 12200. MT. 5651
- Burnell 159b,
- ORI Mysore N. D VI. 17604. 17605.
- TCD (Curator's Office Library- Trivandrum). 1470(Inc),
- TD. Vol-XXVII. 3696.
- Traverse University. 8587.
- T. 294. Trivandrum Curator IV.27

| मातृका क्रमाङ्क | प्रथममातृका | द्वितीयमातृका | तृतीयमातृका | चतुर्थमातृका |
|---|---|---|---|---|
| विषयः | प्रह्लादविजयम् | प्रह्लादविजयम् | प्रह्लादविजयम् | प्रह्लादविजयम् |
| कर्ता | श्रीमद्वेङ्कटनाथः | श्रीमद्वेङ्कटनाथः | श्रीमद्वेङ्कटनाथः | श्रीमद्वेङ्कटनाथः |
| मातृकासंख्या | N.D.VI. 17604 | M.D. 12200 | M.T. 5651 | TD Vol-XXVII. 3696 |
| मातृकाप्राप्तिस्थानम् | ORI Mysore | GOML | GOML | Tanjore Maharaja Serfoji's Sarasvati Mahal Library Tanjore |
| लेखनसामग्री | तालपत्रम् | तालपत्रम् | तालपत्रम् | तालपत्रम् |
| लिपिः | ग्रन्थलिपिः | ग्रन्थलिपिः | ग्रन्थलिपिः | ग्रन्थलिपिः |

ORI हस्तलिपिमातृकाग्रन्थालये N. D VI. 17604.17605इति मातृकाद्वयमुपलभ्यते इति दर्शितम्। परन्तुN. D VI. 17604. इति एका मातृका ग्रन्थालये उपलब्धम्। GOMLमातुकाग्रन्थालये MD. 12200. MT. 5651इति मातृकाद्वयम् उपलब्धम्। एताषु निर्दिष्टामातृकाषु उपलब्धाः मातृकाः यथा- GOML. MD. 12200. MT. 5651तथाORI Mysore- N. D VI. 17604, TD. Vol-XXVII. 3696इति मया अत्र शोधकार्येस्वीकृता। शोधकर्मणि स्वीकृता मातृका केवलं ग्रन्थलिप्यां तालपत्रे लिखिता वर्तते। सर्वाः मातृकाः संपूर्णाः सन्ति।

**निष्कर्षः–**

अप्रकाशितानां ग्रन्थानां स्थितिः केवलं पुस्तकशालासु असूर्यपश्यावस्था वर्तते। तेषां क्रमशः प्रकाशनं अध्ययनम् तथा सुरक्षा अवश्यं कर्तव्यम्। महान् कवि वेङ्कटनाथः विरचितं प्रह्लादविजयमिति महाकाव्यं मातृकारूपेण केषुचित् दक्षिणभारतीयग्रन्थालयेषु शोभते। तदपि प्रह्लादविजयमातृका ग्रन्थलिप्यां वर्तते। अतः समाजे महाकाव्यस्यास्य परिचयः भवतु इति धिया देवनागरीलिप्याम् अस्य संपादनं कर्तुं ममाभिलाषः।

**संदर्भ ग्रन्थ सूची–**

1. Das, Dr. Srinirudha (1978), New CatalogusCatalogorum. Vol- XIII, University of Madras. Chennai.

2. Sastri, P.P.S (1929), Descriptive Catalogue on Sanskrit Manuscripts, Vol.VI, Tanjore Maharaja Serfohi's Sarasvati Mahal Library, Tanjore, Sri Vani Vilas Press, Srirangam.

3. Krishnamacharya, V. (1947), Descriptive Catalogue on Sanskrit Manuscripts. D Vol. V, Adyar Library and ResearchCenter, Adyar,

4. Kupapuswamisastri S., A Descriptive catalog of the Sanskrit manuscript, Government Oriental Manuscript Library,Chennai.

5. Murti, Dr. P. Srirama (1972), Contribution of Andhra to Sanskrit Literature, Andhra University.

7. Basavalingayya, MS (1987), Descriptive Catalogue on Sanskrit Manuscripts in the Govt. Oriental Librsry, Vol.VI, The ASST SU PDT, Govt Branch Press.

*********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# शङ्करप्रवर्तितस्य अद्वैतवादस्याधारेण विवरणप्रस्थाने श्रीमद्भगवद्गीतायाः प्रभावस्य उपयोगिता

**शिखा सरकार सिकदारः**, पश्चिमबंगाल

**शोधसारः**

प्रस्थानमित्यनेन श्रुतिप्रस्थानं, न्यायप्रस्थानं तर्कप्रस्थानं वा स्मृतिप्रस्थानञ्चेत्येतत् प्रस्थानत्रयमेव प्रसिद्धम्। परं प्रस्थानशब्देन आकरग्रन्थस्य अवबोधनत्वात् कश्चित् आकरग्रन्थ एव प्रस्थानमित्यनेनाभिहितः भविष्यति। अद्वैतवेदान्तशास्त्रे प्रस्थानद्वयमित्यनेन विवरणप्रस्थानं भामतीप्रस्थानमेव च अभिहितम्। सर्ववेदैरपि विविधप्रकारेण पृथग् पृथग्रूपेण वा गीतायाः ज्ञानमिदं वर्णितम्। न्यायसङ्गतब्रह्मसूत्रवचनैरपि तद् निरूपितम्। वादरायणाचार्येण वहुविचाराणां संक्षेपरूपेण पञ्चपञ्चशत्यधिकपञ्चशतसूत्रसमन्वितः ब्रह्मसूत्रग्रन्थः रचितः। परमेतेषां सूत्राणां संक्षिप्तकरणात् अर्थवहुलत्वाच्च भाष्यटीकादिग्रन्थव्यतीतमेतेषां सूत्राणामर्थः दुरूहविषयः। ब्रह्मसूत्रमवलम्ब्य रचितानां टीकाग्रन्थानामन्यतमा पञ्चपादिका पञ्चपादिकाविवरणनाम्नी टीका चेति। यस्याध्यात्मस्योपलब्धेः अन्तर्दृष्टेश्च प्रकाशाय ब्रह्मसूत्रग्रन्थोऽयं विरचितस्तत् सर्वेषाम् उपलब्धेरयोग्यः। अस्योपलब्धिविषये श्रीमद्भगवद्गीता एव नः सहायः। यानि दार्शनिकतत्त्वानि अध्यात्मजीवनसृष्टेः निमित्तं सहायस्वरूपाणि भविष्यन्ति, ब्रह्मसूत्रे तेषां दार्शनिकतत्त्वानां सन्निवेशोऽस्ति। श्रीमद्भगवद्गीता एतेषां दार्शनिकतत्त्वानां सारोद्धारं कृत्वा स्वात्मशिक्षयात्तीकृतवती। अतः गीतामवलम्ब्य ब्रह्मसूत्राणां तेषां भाष्यटीकादीनाञ्च अर्थाः अस्माकमनुधावनं करणीयाः। अपिच वेदान्तविषये श्रीमद्भगवद्गीता स्वयमेका प्रामाण्यग्रन्थरूपेण परिचिता।

**कूटशब्दाः** विवरणप्रस्थानम्, श्रीमद्भगवद्गीता, ब्रह्मसूत्रम्, वेदान्तशास्त्रः, उपनिषद्।

**मूलप्रबन्धः**

उपनिषदेव 'वेदान्त'-शब्दस्य मुख्यार्थः। परमस्यार्थवोधस्य सहायभूता श्रीमद्भगवद्गीता ब्रह्मसूत्राणि च 'वेदान्त'-शब्दस्य गौणार्थः। प्रसङ्गेऽस्मिन् वक्तुं शक्यते यत्, वेदान्तशास्त्रं प्रस्थानत्रयेण विभक्तम्। श्रुतिप्रस्थानं, तर्कप्रस्थानं न्यायप्रस्थानं वा स्मृतिप्रस्थानं चेति प्रस्थानत्रयम्। उपनिषदेव वेदान्तस्य श्रुतिप्रस्थानम्। उपनिषदः श्रुतार्थस्य ब्रह्मसूत्रेषु तद्भाष्यटीकादिषु च विभिन्नतर्कैर्विचारितत्वाद् ब्रह्मसूत्रं वेदान्तस्य तर्कप्रस्थानं न्यायप्रस्थानं वा। तर्कैर्विचारितार्थः श्रीमद्भगवद्गीतादिषु अध्यात्मशास्त्रेषु आलोचनात् पुनः पुनः स्मृतौ उदेति, स्थैर्यं च लभत इत्यतः श्रीमद्भगवद्गीता खलु वेदान्तस्य स्मृतिप्रस्थानम्। साधारणतया 'वेदान्त'शब्देन ब्रह्मसूत्रमेव बोध्यते। ब्रह्मानन्दसरस्वतीमहोदयैरुक्तानि शास्त्राणि अपि ब्रह्मसूत्रमूलकानि ये अद्वैतवेदान्तस्य प्रधानग्रन्थाः। परमेतेषां ग्रन्थानामतिरिक्ताः वेदान्तसारः, वेदान्तपरिभाषा, चित्सुखी, अद्वैतसिद्धिः, खण्डनखण्डखाद्यम् ग्रन्थसमूहानां व्यतिरेकेन अद्वैतमतं निष्क्रियं भविष्यति। शङ्कराचार्यस्य प्रधानशिष्येण सुरेश्वराचार्येण वा अद्वैतवादस्य विचारतत्त्वस्य सम्प्रसारणमतीव स्पष्टरूपेण कृतम्। शङ्करोत्तराचार्याणां सुरेश्वराचार्यस्य सिद्धान्तेन चानुप्राणितो भूत्वा पद्मपादाचार्येण पञ्चपादिका इति टीका रचिता। पुनश्च प्रकाशात्मयत्याचार्येण पञ्चपादिकाग्रन्थमवलम्ब्य पञ्चपादिकाविवरणम् इति टीका रचिता, या विवरणप्रस्थानमित्यनेन परिचिता। पञ्चपादिकाविवरणव्यतिरेकानि पञ्चपादिकाग्रन्थमवलम्ब्य टीकादीनि यथा- स्वामी अमलानन्दस्य पञ्चपादिकादर्पणम्, आनन्दपूर्णविद्यासागरस्य पञ्चपादिकाटीका, नृसिंहाश्रमस्य वेदान्तरत्नकोषः, आत्मस्वरूपस्य प्रबोधपरिशोधिनी, विज्ञानात्माचार्यस्य तात्पर्यद्योतनी इत्यादीनि। पुनश्च पञ्चपादिकाविवरणम् इति टीकामवलम्ब्य रचिताः उपटीकाः यथा- सर्वज्ञविष्णुभट्टस्य ऋजु-विवरणम्, अखण्डानन्दस्य तत्त्वदीपनम्, चित्सुखाचार्यस्य तात्पर्यदीपिका, नृसिंहाश्रमस्य भावप्रकाशिका इत्येताः ग्रन्थाः अपि विवरणप्रस्थानस्य अन्तर्भूक्ताः। एवंप्रकारेणैव शङ्करोत्तरपर्याये अद्वैतवेदान्तस्याधारेण विवरणप्रस्थानस्य प्रारम्भोऽभवत्।

**ब्रह्मणः स्वरूपविषये श्रीमद्भगवद्गीतायाः प्रभावः-**

गीतायां श्रीकृष्णः एव परमतत्त्वरूपेण, अविनाशिरूपेण, जीवनस्य उच्चतमलक्ष्यरूपेण च वर्णितः[1]। स एव परमसत्, अर्थात् अव्यक्तः, अविनाशी, विभुरूपः, अपरिवर्तनशीलः, गतिरहितः एकरूपविशिष्टश्च सत्ता [2]। गीतायां यद् अक्षरब्रह्म [3] पुरुषोत्तमश्चेति[4] नाम्ना अभिहितं,

तदेव परब्रह्मणः तत्त्वं विवरणप्रस्थाने प्रतिपादितम्। श्रीमद्भगवद्गीतायामुपलब्धानां तत्त्वानां पारमार्थिकसत्यमेव तेषां चरमतत्त्वम्।

**मायातत्त्वविषये श्रीमद्भगवद्गीतायाः प्रभावः–**

श्रीमद्भगवद्गीतायां केवलं श्लोकचतुष्टयेन मायाशब्दोऽयं प्रयुक्तः। प्रथमतः, भगवता श्रीकृष्णेण उक्तं यत्, अहं जन्मरहितः, अविनश्वरस्वभावः सर्वभूतस्य च ईश्वररूपेण स्वप्रकृतेः कार्याध्यक्षरूपेण च परिचालयित्वा स्वात्मनो मायया एव आत्मनः सृष्टिं करोमि। इत्यर्थात् वास्तविकरूपेण अहं जन्मरहितः [5]। द्वितीयतः त्रिगुणात्मिका माया तेन स्वात्मनः एव दैवीमायारूपेण वर्णिता। एतस्याः मायायाः अतिक्रमणम् अतिदुष्करम्। ये जनाः श्रीकृष्णमाश्रिताः ते एव केवलं मायातिक्रमणे समर्थाः[6]। तृतीयतः, मूढः, नराधमः, पापी असुरभावापन्नाः च जनाः यस्मात् भगवतः श्रीकृष्णस्य शरणं न याति तस्मात् मायया तेषां जनानां ज्ञानं ह्रियते [7]। चतुर्थतः, श्रीकृष्णः स्वात्मनः त्रिगुणात्मिकामायया आवृतत्वात् सर्वान् निकषा न प्रकटीभूतः भवति। अतः तस्य अव्ययं, जन्मरहितं प्रकृतस्वरूपम् अज्ञानाच्छन्नमूढजनाः न ज्ञातुं शक्नुवन्ति [8]। इत्यस्मात् श्रीमद्भगवद्गीतानुसारेण माया खलु ईश्वरस्य शक्तिः, न स्वतन्त्रा। यतः अज्ञजनैः अनाद्यविद्यावशात् सच्चिदानन्दमयम् एकमद्वितीयञ्च ब्रह्म नोपलब्धम्। अतो नित्य-शुद्ध-ब्रह्मचैतन्ये यद् जीवभावः बोधगम्यः भवति, असौ मिथ्या अविद्याकलुषितश्चेति। एतस्याः अविद्यायाः एव नामान्तरं खलु माया। परं विषयेऽस्मिन् पद्मपादाचार्येण प्रकृतिः, अव्याकृतम्, अग्रहणम्, अव्यक्तं, तमः, कारणं, लयः, शक्तिः, निद्रा, अक्षरादिशब्दाः मायायाः समानार्थकशब्दरूपेण प्रयुक्ताः[9]। सर्वेषां जीवानां प्रकाशात्मयत्याचार्येण एका अविद्या एव स्वीकृता [10]। परं प्रधानस्य अविद्यायाः एकत्वेऽपि अवस्थाभेदेन सा अनेकरूपा। इत्यस्मात् यस्य अविद्या विनष्टा भवति, स एव केवलं मुक्तिलाभे समर्थः। अपिच तत्र वर्णिता योगमाया दैवीमाया चेत्येतत् मायाद्वयमेव विवरणप्रस्थानस्य अध्यासपर्याये आलोचितायाः मायायाः आवरणं विक्षेपश्चेत्येतेन शक्तिद्वयेन सह सदृशम्।

**जीवतत्त्वविषये श्रीमद्भगवद्गीतायाः प्रभावः –**

शङ्कराचार्येण जीवः परमात्मनः प्रतिविम्बेन सह आभासरूपेणापि स्वीकृतः[11]। आभासः खलु छाया। पारमार्थिकरूपेण जीवः खलु ब्रह्मस्वरूपम्। अतोऽविकृतब्रह्मैव शरीरभेदेन पृथक् पृथग्जीवरूपेण विद्यमानम्[12]। विषयेऽस्मिन् शङ्कराचार्येण जीवब्रह्मणोरभेदस्य स्वीकृतत्वेऽपि उपाधिभेदेन उभययोः भेदोऽपि आलोचितः। सुरेश्वराचार्येण आभासवादस्य आलोचनाप्रसङ्गेणोक्तं यत्, अन्तःकरणं खलु अविद्यायाः कार्यम्। यतः ईश्वरोऽविद्यायां प्रतिविम्बितः चैतन्यरूपः जीवश्चान्तःकरणे प्रतिविम्बितरूपचैतन्यम्-

*अविद्याकार्यबुद्धिस्थप्रत्यगाभासरूपवत्। वोद्धेत्यादिसमुत्थानं भण्यते परमात्मनः॥*[13]

तस्मात् प्रतिविम्बं यथा विम्बादभिन्नभूतत्वात् सत्यं, तथैव विम्बरूपब्रह्मणः प्रतिविम्बरूपजीवः अभिन्नभूतत्वात् सत्यरूपम्। केवलं प्रतिविम्बस्य पृथगवभासः विपर्ययस्वरूपता वा मिथ्या। अतः प्रतिविम्बरूपजीवस्य ब्रह्मात्मना सत्यं ब्रह्मणश्च केवलं जीवस्य पृथगवभासः विपर्ययस्वरूपता वा मिथ्या[14]। श्रीमद्भगवद्गीतायां वर्णितस्य प्रतिविम्बवादस्य समर्थकाः श्लोकाः यथा- *विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत्* [15], *रजसि प्रलयं गत्वा कर्मसङ्गिषु जायते* [16] *यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः*[17] इत्यादयः। अपिच तत्र आभासवादस्य समर्थकाः श्लोकाः यथा- *सर्वथा वर्तमानोऽपि स योगी मयि वर्तते* [18], *असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च* [19] इत्यादयः। इत्यस्मात् प्रमाणितं यत्, विवरणप्रस्थाने श्रीमद्भगवद्गीतायाः सुस्पष्टप्रभावः विद्यते।

**जगत्तत्त्वविषये श्रीमद्भगवद्गीतायाः प्रभावः-**

अद्वैतवेदान्तानुसारेण जगत् खलु ब्रह्मणः विवर्तः, न परिणामः। अस्य नामरूपात्मकजगतः आश्रयः अधिष्ठानं वा ब्रह्म। पुनर्ब्रह्मणो नित्यसत्तारूपभूतत्वात् एतद् जगदपि सत्यरूपेण प्रतिभातम्। अज्ञानवशात् रज्जौ येन सर्पस्य भ्रमज्ञानस्योत्पत्तिः भवति, तेनैव ब्रह्मणि अविद्यावशात् मिथ्यारूपजगत्प्रपञ्चस्यापि भ्रमज्ञानस्योत्पत्तिः भवति। पुनः रज्जौ दृश्यमानस्य सर्परूपभ्रमज्ञानस्योपादानं यथा रज्जुः तथैव मिथ्याजगत्प्रपञ्चस्य आश्रयः खलु सर्वाधिष्ठानरूपं ब्रह्म। एवंप्रकारेण रज्जुः यथा भ्रमज्ञानवशतः विकृता न भवति तथैव जगत्प्रपञ्चस्य भ्रमज्ञानवशात् ब्रह्म अपि विकृतं न भवति। समग्रजगदिदं विवर्तवादानुसारेण मायाकल्पितं मिथ्या चेति। वेदान्तपरिभाषाग्रन्थानुसारेण

उपादानसमानसदृशकार्यं परिणामः विवर्तश्च उपादानविषमसदृशकार्यम्[20] । विषयेऽस्मिन् श्रीमद्भगवद्गीतायामुक्तं यत्, ईश्वरस्याधिष्ठानवशादेव अज्ञानरूपप्रकृत्या स्थावरजङ्गमात्मकजगदिदं सृष्टम्। अत ईश्वरस्य अध्यक्षरूपेण विराजितत्वादेव जगत् वहुधा परिवर्तते[21]। तत्त्वमिदं विवरणप्रस्थाने विवर्तवादेन परिणामवादेन च व्याख्यातम्।

### मोक्षतत्त्वविषये श्रीमद्भगवद्गीतायाः प्रभावः-

मोक्षः खलु मनुष्यजीवनस्य अन्तिमलक्ष्यः। इत्यर्थात् जीवब्रह्मणोः एकत्वोपलब्धिरेव मोक्षः। श्रीमद्भगवद्गीतानुसारेण ज्ञानयोगः कर्मयोगश्च एतदुभय एव मोक्षप्रदः। तत्र भगवता श्रीकृष्णेण उक्तं यत्, यः इन्द्रियं, मनः, बुद्धिञ्च स्वायत्तीकृतवान्, यः इश्वरस्य मननेन संन्यस्तसंकल्पो यश्च इच्छारहितः, भयरहितः क्रोधरहितः, स एव मुक्तपुरुषः[22]। विवरणसम्प्रदायस्य मतानुसारेण जीवब्रह्मणोरभेदरूपं तत्त्वज्ञानम् एकत्वज्ञानमेव वा मोक्षस्य मुक्तिलाभस्य वा उपायविशेषः। पुनस्तत्त्वज्ञानलाभस्य साधनस्वरूपं खलु श्रवणं, मननं निदिध्यासनञ्चेति। विषयेऽस्मिन् प्रकाशात्मयत्याचार्येण उक्तम्, आत्मसाक्षात्कारविषये श्रवणं खलु अङ्गिरूपं, मननं निदिध्यासनञ्च अङ्गरूपम्[23]।

### उपयोगिता-

मनुष्याणां सर्वज्ञानशक्तिनाञ्च आधारः खलु परमात्मा। तस्मात् आधारात् ज्ञानं शक्तिञ्च संगृह्य मानवाः ज्ञानवन्तः शक्तिवन्तश्च भवन्ति। आसक्तिशून्यहृदयेन परस्परसाहचर्यं, आदान-प्रदानञ्च वर्धते। तस्मात् न केवलं स्वहिताय स्वस्य परिवारहिताय च समाजस्य कल्याणाय वापि मनुष्याः उद्बुद्धाः भवन्ति। अनेन कर्मणा बन्धनं न भवति। कर्मजीवने श्रीमद्भगवद्गीतायां वर्णितोपदेशप्रयोगेन मनुष्याणां गूढं पशुत्वं अन्तर्निहितं भूत्वा देवत्वं प्रस्फुटितं भवति। तत्र प्रदत्तेनोपदेशेन जातीयजीवने नर-नारायणभावेन अनुप्राणिता भूत्वा सर्वे मनुष्याः यथार्थविश्वभ्रातृप्रेम्ना आबद्धाः भविष्यन्ति। अद्वैतदर्शने आलोचितेषु जीवब्रह्मविषयेषु प्रधानः वर्णनीयविषयः खलु येन जीवेन सर्वभूताः उपलभ्यन्ते तेनैव अन्तरे बहिश्च ब्रह्मरूपमनुभूतम्। अस्यानुभव एव अहिंसायाः प्रधानमन्त्रः। अस्य अहिंसाभावस्य अभावेनैव जीवाः सत्कर्मणि आनन्दिताः भवितुं न शक्नुवन्ति। हिंसाप्रवृत्तेः मुक्तेरुपायः खलु श्रीमद्भगवद्गीतायां वर्णितस्य उपदेशस्य व्यावहारिकरूपेण प्रयोगः कार्यः। ईश्वरः एव जीवरूपं धारयित्वा सर्वेषु प्राणिषु प्रविष्टः इत्यनेन ज्ञानेनापि अहिंसाभावस्य प्रतिष्ठा भविष्यति। मानवसम्पदां यद् असाधारणं विज्ञानं अद्वैतदर्शने उपनिषद्सु च गठितं तत् श्रीमद्भगवद्गीतायां वास्तवरूपं प्रयोगमुखं तात्पर्यरूपं लक्षनिर्देशरूपञ्च लभ्यते। अतएव श्रीमद्भगवद्गीतायां मानवीयविकाशलाभस्य परिपूर्णतालाभस्य च विज्ञानरूपेण अस्माकं उपलब्धिः कर्तव्या। मनुष्याणां जीवनं प्रति आध्यात्मिकतां प्रति च एवं गीतायाः दृष्टिभङ्गेः सर्वग्राहिता लक्षणीया।

### तथ्यसूत्राणि

1. *अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम्। यं प्राप्य न निवर्तन्ते तद्धाम परमं मम॥* - श्रीमद्भगवद्गीतायाम्, ८।२१
2. *ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते। सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्॥* - श्रीमद्भगवद्गीतायाम्, १२।३
3. अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते। भूतभावोद्भवकरो विसर्गः कर्मसंक्षितः॥ - श्रीमद्भगवद्गीतायाम्, ८।३
4. *वमेतद् यथात्थ त्वमात्मानं परमेश्वर। द्रष्टुमिच्छामि ये रूपमैश्वरं पुरुषोत्तम॥* - श्रीमद्भगवद्गीतायाम्, ११।३
5 *अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया॥* - श्रीमद्भगवद्गीतायाम्, ४।६
6. *दैवी ह्येषा गुणमयी मम माया दुरत्यया। यायेव ये प्रपद्यन्ते मायामेतां तरन्तिते॥* - श्रीमद्भगवद्गीतायाम्, ७।१४
7. *न मां दुष्कृतिनो मूढां प्रपद्यन्ते नराधमाः। माययापहृतज्ञाना आसुरं भावमाश्रिताः॥* - श्रीमद्भगवद्गीतायाम्, ७।१५
8. *नाहं प्रकाशः सर्वस्य योगमाया समावृतः। मूढोऽयं नाभिजानाति लोको मामजमव्ययम्॥* - श्रीमद्भगवद्गीतायाम्, ७।२५
9. *येयं श्रुतिस्मृतीतिहासपुराणेषु नामरूपमव्याकृतमविद्या माया प्रकृतिरग्रहणमव्यक्तं तमः कारणं लयः शक्तिर्महासुप्तिर्निद्रा-क्षरमाकाशमिति च तत्र तत्र वहुधा गीयते...।*– पञ्चपादिकायाम्, पृ-२०

10. *ननु कर्तृत्वभोक्तृत्वरागद्वेषसुखदुःखादयोप्यात्मनि स्वयंप्रकाशा इति बौद्धप्राभाकराः कल्पयन्ति। नैतद्युक्तम्। तेषां द्रव्यत्वे वहुप्रकाशगुणकल्पनया तद्विशिष्टात्मप्रकाशकल्पनादात्मन एवैकं प्रकाशगुणं परिकल्प्य तदन्वयादितरेषां प्रकाशकल्पनाया लघीयस्त्वात्।* - पञ्चपादिकाविवरणे, पृ-९८-९९

11. *आभास एव च एष जीवः परस्यात्मनो जलसूर्यकादिवत्प्रतिपत्तव्यः, न स एव साक्षात्, नापि वस्त्वन्तरम्।* - ब्रह्मसूत्रशाङ्करभाष्ये, २।३।५० *जीवो हि नाम देवताया आभासमात्रम्-* छान्दोग्योपनिषदि शाङ्करभाष्ये, ६।३।२

12. *तत्सृष्ट्वा तदेवानुप्राविशत्।* - तैत्तिरीयोपनिषदि, २।६।१ *अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवानीति।* - छान्दोग्योपनिषदि, ६।३।२

13. वृहदारण्यकोपनिषद्भाष्यवार्तिके, २।४।४२७

14. *विम्बादिव प्रतिविम्बं न ब्रह्मणो वस्त्वन्तरम्, किं तु तदेव तत्, पृथगवभासविपर्ययस्वरूपतामात्रं मिथ्या इति दर्शयितुम्।* - पञ्चपादिकायाम्, पृ-१०४

15. श्रीमद्भगवद्गीतायाम्, १०।४२

16. श्रीमद्भगवद्गीतायाम्, १५।१५

17. श्रीमद्भगवद्गीतायाम्, ७।३

18. श्रीमद्भगवद्गीतायाम्, ६।३१

19. श्रीमद्भगवद्गीतायाम्, १३।१४

20. *परिणामो नामोपादान-समसत्ताक-कार्यापत्तिः। विवर्तो नामोपादान-विषमसत्ताक-कार्यापत्तिः।* - वेदान्तपरिभाषायाम्, पृ-८५-८६

21. *मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्। हेतुनानेन कौन्तेय जगद्विपरिवर्तते॥* - श्रीमद्भगवद्गीतायाम्, ९।१०

22. *वुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च। शब्दादीन् विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥*
*विविक्तसेवी लघ्वाशी यतवाक्कायमानसः। ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः॥*
*अहंकारं वलं दर्पं कामं क्रोधं परिग्रहम्। विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते॥* - श्रीमद्भगवद्गीतायां, १८।५१-५३

23. .. *मनननिदिध्यासनाभ्यां फलोपकार्यङ्गाभ्यां सहश्रवणं नाम अङ्गि विधीयते इति।* - पञ्चपादिकाविवरणे, पृ-३०

**Sikha Sarkar Sikdar**
M.A & M.Phil in Sanskrit
Specialization- Philosophy
Affiliation- Burdwan University
Assistant Professor
Department of Sanskrit
Galsi Mahavidyalaya, Galsi
Purba Burdwan, West Bengal
Pin- 713406,
Mob No- 8597299700
Email ID- sikha.sarkar.sikdar2013@gmail.com

**********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# वामनरीतितत्त्वे चार्वाकदर्शनसादृश्यसन्धानम्

**भास्कर दासः**, पश्चिमबङ्गाल

**संक्षिप्तसारः–**

दर्शनशास्त्रस्य अन्यतमं प्रधानं तत्त्वं हि आत्मतत्त्वम् । आत्मनः अस्तित्वं प्रायः सर्वैः दार्शनिकैः स्वीकृतम् । यद्यपि तत्र आत्मनः आधारविषये दार्शनिकेषु मतानैक्यं विद्यते । यथा चार्वाकदार्शनिकाः शरीरमेव आत्मारूपेण मन्यन्ते । एतदपि सत्यं यत् न केवलं दर्शनशास्त्रे आत्माविषये आलोचना अस्ति , काव्यशास्त्रेऽपि आत्मविषये विस्तृतं विवरणं विद्यते । यद्यपि काव्यशास्त्रे आत्मनः स्वरूपप्रसङ्गे पण्डितानां मध्ये मतपार्थक्यं विद्यते । तथापि तै सर्वैः आत्मनः अस्तित्वविषये प्रायशः साम्यं प्रदर्शितम् । तन्मध्ये वामनोऽन्यतमः येन रीतेरात्मत्वं प्रतिष्ठितम् ।मम शोधप्रबन्धे मया वामनरीतितत्त्वेन सह चार्वाकदर्शनस्य सादृश्यसन्धानं करिष्यते।

**शब्दसंकेतः–** रीतिवादः , काव्यात्मा , देहात्मवादः , चार्वाकदर्शनम् , गुणः ।

आत्माशब्दः मूलतः दर्शनशास्त्रस्य विशेषत उपनिषदः आलोच्यविषयः । यद्यपि प्रायः सर्वेषु दर्शनशास्त्रेषु आत्मतत्त्वं प्राधान्येन आलोचितम् चार्वाकदर्शनमपि न तद्बर्हिर्भूतम् । चार्वाकदर्शने केवलं स्थुलशरीरतः सुक्ष्मशरीरस्य मनः पर्यन्तमालोचनं विद्यते । तदतिक्रम्य शरीरातिक्रम्य वा आत्मनः सन्धानं तैः न कृतम्।शरीरमेव आत्मेति स्वीकृत्य आत्माशरीरयोर्मध्ये पार्थक्यं निरूपयितुमसमर्थास्ते । यद्धवतु विषयेऽस्मिन् व्याख्यया प्रयोजनं नास्ति । दर्शनशास्त्रवद् साहित्यशास्त्रेऽपि काव्यतात्त्विकाः काव्यमध्ये आत्मनः सन्धानं कृतवन्तः । यथा मानवशरीरमध्ये आत्मा हि सारभूतः तद्वद् साहित्यशास्त्रेऽपि आत्मा प्राणप्रदः तथा काव्यजीवितः । तत्र वामनाचार्येण सर्वादौ काव्यालंकारसूत्रवृत्त्याख्ये स्वग्रन्थे आत्मनः अस्तित्वविषये उच्यते । तत्पूर्ववर्तिनः आचार्याः आत्माविषये किमपि नोक्तवन्तः किन्तु ते आत्माशब्दं नोल्लिख्य काव्यस्य प्राणविषये स्वमतं प्रकाशयन्ति स्म । यथा आद्याचार्येण भरतेन काव्यस्य आत्मारूपेण रस एव स्वीकृत किन्तु तेन आत्माशब्दः न प्रयुक्तः । अस्य काव्यात्मनः स्वरूपप्रसङ्गे आलंकारिकानां मध्ये मतपार्थक्यं विद्यते । तत्र केचन रसमेव काव्यात्मारूपेण तथा केचन गुणालंकारमेव काव्यात्मारूपेण व्यवस्थापितवन्तः । ततः क्रमेण रीति-रस-ध्वनि-वक्रोक्ति-औचित्यादयः काव्यात्मारूपेण निर्धारिताः । तदनुसारेण रसादि- षड्प्रस्थानस्यापि आविर्भावो भवति । किन्तु मम्मटविश्वनाथादिभिः बहुभिः आचार्यैः रस एव काव्यात्मारूपेण प्रतिष्ठापितः । तन्मध्ये रीतेरात्मत्वविषये अधुना समासेन आलोच्यते । वामनेन स्वग्रन्थे रीतेरात्मत्वं स्वीकृत्य उच्यते – 'रीतिरात्मा काव्यस्य'।।[1] इति ।

एतद् अनस्वीकार्यं यत् काव्यालंकासूत्रवृत्तिप्रणेता वामनः सर्वादौ आत्मशब्दं प्रयोज्य रीतिर्हि काव्यात्मारूपेण विद्यते इति निरूपयति । नाट्यशास्त्रमध्येऽपि संक्षिप्तरूपेण रीतेः बीजं निहितमस्ति । ततः परवर्तीकाले दण्डिनापि रीतेः स्वरूपमुल्लिख्य तस्य वैदर्भ्यादिभेदः प्रतिपाद्यते । तथापि वामनेन रीतिः तथा गुणमध्ये पारस्पारिकसम्पर्कं संस्थाप्य पृथग्रूपेण रीतिसम्प्रदायस्य माहात्म्यं प्रतिष्ठाप्यते । तन्मतानुसारेण विशिष्टा पदरचना हि रीतिपदवाच्या । तथाहि उक्तं –

'विशिष्टा पदरचना रीतिः । विशेषो गुणात्मा' ।[2] इति ।

अनेन प्रकारेण काव्ये गुणमाहात्म्यमपि तेन दृढतया प्रतिष्ठापितम् । अर्थात् वामनोक्त्या एतद् स्पष्टं यत् काव्यस्यात्मा रीतिः , रीतेरात्मा हि गुणः । इदं रीतिपदं विश्लिष्य कामधेनुटीकाकारेण उच्यते यत् 'रीणन्ति गच्छन्ति अस्यां गुणा इति'[3] । अर्थात् गुणाः रीतिमध्ये एव सन्निविष्टा भवन्ति । एतदेव संक्षेपेण वामनस्य रीतिवादः । ततः वामनमतिरिच्य अमृतानन्दयोगिनापि पुनः रीतिर्हि काव्यस्यात्मा इति मतं प्रतिष्ठाप्यते । ततः पश्चात् शौद्धदनिना तस्य अलंकारशेखरेऽपि रीतिर्हि काव्यजीवितम् इति कथितम् । तथाहि तेन निगदितं-

"रीतिरुक्तस्तथा मुद्रा वृत्तिः काव्यस्य जीवितम्" ।।[4] इति ।

अत्र दर्शनीयं यत् यदि वामनस्य रीतिवादः चार्वाकदर्शनस्य आधारेण विवेचनं कुर्मः तर्हि तत्र उभयमध्ये अत्याधिकं साम्यं द्रष्टुं शक्यते ।

चार्वाकदार्शनिकाः देहात्मवादिनः । तेषां मतानुसारेण चैतन्ययुक्तं शरीरमेव आत्मा ।शङ्कराचार्येणापि ब्रह्मसूत्रस्य शाङ्करभाष्यस्य प्रस्तावनामध्ये अस्यैव चार्वाकमतस्य मूलभावः स्पष्टीक्रियते । तथाहि –

"तत्रैवं लोकायतिका मन्यन्ते । भूतचतुष्टयसंघातात्मकं चेतनं शरीरमेवात्मा, न तु शरीरातिरिक्ते आत्मनि किञ्चित्प्रमाणमुपलभ्यते , प्रत्यक्षमेकमेव खलु प्रमाणम् । अनुमानाद्यदिनोत्पात्तिकं तु ज्ञानं पुनः पुनर्विभाव्यमानं प्रत्यक्षात्मकतां प्राप्नुवदेव प्रमाणम्"[5]।।इति ।

प्रत्यक्षवादी चार्वाकः अवयवसंस्थानमेव आत्मारूपेण उपस्थाप्य शरीरस्य विद्यमानं यावत् आत्मनः अस्तित्वं स्वीकरोति । शरीरविनाशेन आत्मनोऽपि विनाशो भवति इति मन्यते। अनुरूपप्रकारेण वामनमतं हि– यथा रेखामाध्यमेन चित्रस्योत्पत्तिर्भवति तद्वद् वैदर्भ्यादि- रीतित्रयेन काव्यं समाविष्टं भवति । वाक्यस्यास्य तात्पर्यं हि यथा चित्रमध्ये रेखानां अपनोदनेन विनाशेन वा समग्रस्य चित्रस्यापि विनाशं भवति तद्वद् काव्यमध्ये रीतेरभावे काव्यत्वस्यापि विनाशो भवति । यद्यपि एतदपि सत्यं यत् इतः पूर्वं यत् मया दर्शितं तस्याधारेण एनं वक्तुं न शक्यते यत् रीतेरात्मत्वप्रतिष्ठापने अस्य चार्वाकदर्शनस्य महद्वदानमस्ति । तथापि मतद्वयं यथार्थरूपेण पर्यालोचनं कृत्वा द्रष्टुं शक्नोमि यत् अत्र द्वयोर्मध्ये बहुलांशे साम्यता अस्ति ।

चार्वाकदार्शनिकाः जडवादिनः । चार्वाकानां नये शरीरं वस्तुतः जडपदार्थः । एकः विशिष्टप्रकारमाध्यमेन जडशरीरमध्ये चैतन्यस्योत्पत्तिर्भवति । विषयोयं स्पष्टीकरणार्थं चार्वाकानां मतं हि यथा किण्वान्नानां संगठनेन मादकशक्तेरुपत्तिर्भवति तद्वद् भूतानां संगठनेन चैतन्यस्योत्पत्तिर्भवति [6] । रीतिरपि शरीरवद् जडतत्त्वम् । तथा गुणानां काव्यमध्ये अवस्थानात् काव्यत्वस्य सञ्चारो भवति । यद्यपि मम शोधप्रबन्धे अलंकारशास्त्रार्थज्ञाने दर्शनशास्त्रस्य सापेक्षत्वमेव दर्शनीयम्, तथापि अत्र रीतेरात्मत्वविषये दर्शनशास्त्रस्य सापेक्षता अस्ति न वेति विषये संशयः विद्यते । परन्तु मतद्वयं यथार्थतया पर्यालोचयित्वावक्तुं शक्नोमि यत् मतद्वयोर्मध्ये सादृश्यता अस्ति ।

येन प्रकारेण चार्वाकदार्शनिकाः शरीरमेवात्मारूपेण स्वीकुर्वन्ति तद्वद् वामनाचार्येणापि रीतिरेव काव्यस्यात्मा इति मत्वा अन्यस्य तत्त्वसर्वस्य अप्रधानरूपेण वर्णनं क्रियते । तेन वक्रोक्तिमध्ये अविवक्षितवाच्यध्वनेः समावेशः क्रियते , अपि च कान्तिगुणमध्ये रसस्य सन्निवेशनं कृतम् । तत्कारणाय तेनोक्तं – 'सादृश्याल्लक्षणा वक्रोक्तिः' ।।[7] इति ।

वामनाचार्येण रीतिमध्ये गुणः अनिवार्यरूपेण निवेशितः , एवं तत्र अलंकारः गुणातिशयकारणरूपेण कल्प्यते । सौन्दर्यमलंकार इत्युक्त्वा तेन गुणस्यालंकारत्वं परिस्फुरितं क्रियते येन दण्डिनः अलंकारलक्षणेन सह साम्यं भवति । अनेन प्रकारेण दण्डिकृतोऽलंकारः काव्यशोभायाः धर्मः तथा वामनस्य अलंकारः गुणात्मकरचनारीतेरुत्कर्षकः । अतोऽत्र रीतिरङ्गी तथा अलंकारः अङ्गम् । तन्मते रीतेः क्षेत्रमधिकांशतया अलंकारादेव व्यापकः । यद्भवतु रीतेरात्मत्वं स्वीकृत्य वामनेन प्रकृतपक्षे काव्यशरीरमेव आत्मारूपेण कल्प्यते । अतः वामनोऽपि देहात्मवादी इति कल्पयितुं शक्यते ।

आत्माविषयकचार्वाकमतस्य कटु समालोचनं अन्यैः भारतीयदार्शनिकैः कृतम् । तद्वद् काव्यशास्त्रेऽपि अन्ये आलंकारिकाः रीतिमेव काव्यस्यात्मारूपेण न समुद्घोषयन्ति । तत्कारणं हि यदि काव्यशास्त्रे रीतेरात्मत्वं स्वीकुर्मः तर्हि रसादिमुख्यतत्त्वानानि उपेक्षितानि भवन्ति । रीतिरात्मत्वप्रसङ्गे असङ्गतिं दर्शयित्वा आनन्दवर्धनेनोच्यते यत् अस्फुटरूपेण प्रतीतस्य ध्वनितत्त्वस्य प्रकृष्टरूपेण व्याख्याकर्तुमसमर्थाः वामनादयः आचार्याः रीतितत्त्वस्य प्रचलनं कृतवन्तः । तथाहि ध्वन्यालोके उच्यते –

"अस्फुटस्फुरितं काव्यतत्त्वमेतद्यथोदितम् । अशक्नुवद्भिर्व्याक्तुं रीतयः संप्रवर्तिताः" ।।[8] इति ।

अनेन प्रकारेण वक्तुं शक्यते यत् वामनस्य रीतितत्त्वेन सह चार्वाकदर्शनस्य देहात्मवादस्य सामता विद्यते । यद्यपि अत्र एतदपि

उल्लेख्यं यत् विषयेऽस्मिन् शास्त्रद्वयोर्मध्ये सापेक्षता नास्ति तथापि द्वयोर्मध्ये सादृश्यं दृष्ट्वा तयोर्मध्ये सम्पर्कस्थापनं कर्तुं शक्यते । अतः रीतितत्त्वे चार्वाकदर्शनस्य सामतानुसन्धानं सार्थकम् ।

## पादटिप्पणी

1. काव्यालंकारसूत्रवृत्तिः , सूत्रसंख्या –५ , पृष्ठासंख्या –१८
2. काव्यालंकारसूत्रवृत्तिः , सूत्रसंख्या –७ , पृष्ठासंख्या –१९
3. काव्यालंकारसूत्रवृत्तिः , कामधेनुटीका , पृष्ठासंख्या –१९
4. अलंकारशेखरः , द्वितीयमरीचिः , प्रथमसूत्रम्
5. ब्रह्मसूत्रशाङ्करभाष्यम् ( निर्णयसागरः ) , भूमिका
6. किण्वादिभ्यः मदशक्तिवद् चैतन्यमुपजायते ।। इति । (सर्वदर्शनसंग्रहः , पृष्ठासंख्या –४ )
7. काव्यालंकारसूत्रवृत्तिः ।
8. ध्वन्यालोकः , तृतीयोद्योतः , ४६

## सहायकग्रन्थाः


१. वामनः , १४१५ , काव्यालंकारसूत्रवृत्तिः , सम्पादकः – श्रीअशोककुमार-वन्द्योपाध्यायः , संस्कृत पुस्तक भाण्डारः ।

२. माधवाचार्यः , २०१६ , सर्वदर्शनसंग्रहः , स्मपादकः – सज्जितकुमार-साधुखाँ , सदेशः , कोलकाता - ७००००६ ।

३. केशवमिश्रः , १९२३ , अलंकारशेखरः , सम्पादकः – पण्डितशिवदत्तः , पाण्डुरङ्ग जावाजि , बोम्वाइ ।

४. आनन्दवर्धनः , २०१८ , ध्वन्यालोकः , स्मपादकः – लोकमणि-दाहालः , भारतीय विद्या प्रकाशन , दिल्ली ।

५. मम्मटः, २०२१ , काव्यप्रकाशः , सम्पादकः – ड. श्यामापद भट्टाचायथः , संस्कृत वुक डिपो ।

६. भारतीय दर्शनम् , २००७ , सम्पादकः – ड. समरेन्द्र भट्टाचार्यः , वुक सिण्डिकेट प्राइभेट् लिमिटेड, कोलकाता ।

७. शङ्करः , १९९३ , ब्रह्मसूत्रम् , स्मपादकः – श्रीकृष्णपन्त-शास्त्री-साहित्याचार्यः , अच्युतग्रन्थमाला कार्यालयः , काशी ।



**VASKAR DAS**

PH.D SCHOLAR , DEPARTMENT OF SANSKRIT

GUIDE NAME – HAREKRUSHNA PATTAJOSHI

ASSISTANT PROFESSOR AT RAMAKRISHNA MISSION VIDYAMANDIRA , BELUR MATH, HOWRAH .

RAMAKRISHNA MISSION VIDYAMANDIRA ,

BELUR MATH .HOWRAH , 711202 , WEST BENGAL .

Contact No. : 9144398359

EMAIL ID – das98vaskar@gmail.com


**************

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# भट्टिमहाकाव्यस्य द्वितीयसर्गे लुङ्-लकाराणां प्रयोगः

**Sajal Mondal**
Ph.D Scholar
Department of Sanskrit
Patliputra University, Patna
Old Bypass Road, Kankarbagh, Patna-800020, Bihar
Contact No. : 9641751513
Email – mondalsajal89@gmail.com

भूमिका - भट्टिकाव्यम् महाकविना भट्टिना विरचितं महाकाव्यम्। रावणवध इति अस्य नामान्तरं वर्तते। वस्तुतः रावणवधकाव्यम् इत्येव तस्य प्रकृतं नाम।काव्येऽस्मिन् भगवतः रामचन्द्रस्य जन्मनः लंकेश्वररावणस्य वधपर्यन्तं कथा समुपवर्णिता। महाकाव्येऽस्मिन् संस्कृतसाहित्यस्य द्वयोः महत्परम्परयोर्यथा रामायणस्य पाणिनीयव्याकरणस्य च सुष्ठु मिश्रणं दृश्यते।कलाविज्ञानयोः मिश्रणमेतदिति वक्तुं शक्यते। सृष्टेः गौरवं व्यञ्जयन् भट्टिः स्वयमेव उक्तवान् यत् व्याकरणज्ञानविहीनपाठकानां कृते मम एषा सृष्टिः नास्ति। एतत् काव्यम् भाष्यस्य साहाय्येन एव अवगन्तुं शक्यते। तेजस्वी विद्वान् विनोदाय, व्यवहारिकपद्धत्या व्याकरणस्य कठिननियमैः विवेकशीलस्य छात्रस्य परिचयार्थं च रचितम् अस्ति।

व्याकरणे भूतार्थस्य द्योतनार्थं विविधमार्गाः सन्ति। यथा लिट्-लङ्-लुङ्-क्तवतु-क्त-प्रभृतयः प्रत्ययाः अतीतार्थद्योतकाः भवन्ति। तत्र सामान्यातीतं लुङा एव बोध्यते। अत्र प्रयोगसुविदततया महाकविना भट्टिना विविधानां धातूनां लुङि कर्तरि कर्मणि भावे वा प्रयोगः कृतोऽस्ति। भट्टिकाव्ये प्रथमप्रकीर्णकाण्डे लक्षणरूपे द्वितीये वर्गे प्रयुक्तानां केषाञ्चन लुङ्प्रयोगानां पाणिनीयदिशा प्रक्रिया अत्र उपस्थाप्यते।

**अदृक्षत**[1] –भ्वादिगणीयात् परस्मैपदिनः सकर्मकात् अनिटः दृशिर् प्रेक्षणे इति धातोः कर्मणि भूतार्थे लुङि इति सूत्रेण लुङि लकारे प्रथमबहुवचने झप्रत्यये दृश्+झ इति स्थिते च्लि लुङि इति सूत्रेण च्लि-प्रत्यये, दृशः शलन्तत्वात् शल इगुपधादनिटः क्सः इति च्लेः स्थाने प्राप्तस्य क्सादेशस्य न दृशः इति प्रतिषेधात् तन्निषेधे,सिजादेशे दृश्+स्+झ इति स्थितिर्जायते। ततश्च आत्मनेपदेष्वनतः इति सूत्रेण झस्य स्थाने अत् इत्यादेशे दृश्+स्+अत्+अ इति निष्पन्नम्। लिङ्सिचावात्मनेपदेषु इति सिचः कित्त्वात्, पुगन्तलघूपधस्य च इति प्राप्तस्य गुणस्य क्ङिति च इति निषेधो भवति। ततश्च व्रश्चभ्रस्जसृजमृजयजराजभ्राजच्छशां षः इति शकारस्य षकारे, सकारे परे षकारस्य षढोः कः सि इति ककारे दृक्+स्+अत इति जाते, ककारात् परस्य अपदान्तस्य आदेशस्य सिचः सकारस्य आदेशप्रत्यययोः इति मूर्धन्यादेशे षकारे, लुङ्लङ्लृङ्क्ष्वडुदात्तः इति अडागमे अदृक्षत इति रूपं सिद्ध्यति।

**अश्रोषत**[2] – भ्वादिगणीयात् परस्मैपदिनः सकर्मकात् अनिटः श्रु श्रवणे इति धातोः कर्मणि भूतार्थे लुङि प्रथमबहुवचने झप्रत्यये, च्लि लुङि इति सूत्रेण च्लि-विकरणे, च्लेः सिच् इति च्लेः स्थाने सिचि श्रु+स्+झ इति स्थितिर्जायते। स्थितावस्यां सिज्रूपे सार्वधातुके परे सार्वधातुकार्धधातुकयोः इति सूत्रेण श्रु इत्यवयवस्य उकारस्य गुणे ओकारे श्रो+स्+झ इति स्थिते, आत्मनेपदेष्वनतः इति झकारस्य स्थाने अत् इत्यादेशे, ओकाररूपादिणः परस्य सस्य आदेशप्रत्यययोः इति मूर्धन्यादेशे षकारे, आद्यन्तौ टकितौ इति परिभाषया परिष्कृतेन लुङ्लङ्लृङ्क्ष्वडुदात्तः इति सूत्रेण अडागमे सर्ववर्णमेलने अश्रोषत इति रूपं सिद्ध्यति।

**आघ्रायि**[3]– आङ् इति उपसर्गपूर्वकात् भ्वादिगणीयात्, परस्मैपदिनः, सकर्मकात् अनिटः घ्रा गन्धोपादाने घ्राणे च इति धातोः भूतार्थे कर्मणि लुङि प्रथमैकवचने त-प्रत्यये आ+घ्रा+त इति स्थिते च्लि लुङि इति च्लि-विकरणे, च्लेः स्थाने भावकर्मणोः इति चिणि आ-

घ्रा+इ+त इति स्थिते, णिति परे आतो युक् चिण्कृतोः इति धातोः युगागमे चिणो लुक् इति तप्रत्ययस्य लुकि आघ्रायि इति रूपं सिद्ध्यति।

**अध्यापिपत्**[4] – अध्येतुं प्रैरिष्ट इति विग्रहे अदादिगणीयात् आत्मनेपदिनः सकर्मकादनिटः अधिपूर्वकात् इङ् अध्ययने इति धातोः हेतुमति च इति णिचि अधि-इ+इ इति स्थितेणिचः णित्त्वात् अचो ञ्णिति इति धातोरिकारस्य वृद्धौ ऐकारेएचोऽयवायावः इति सूत्रेण प्राप्तम् आयादेशम् बाधित्वा क्रीङ्जीनां णौ इति ऐकारस्य आत्त्वे अधि-आ+इ इति स्थिते अर्तिह्रीब्लीरीक्नूयीक्ष्माय्यातां पुग्णौ इति पुगागमे अधि-आ+प्+इ इति यणि निष्पन्नस्य अध्यापि इत्यस्य सनाद्यन्ता धातवः इति धातुसंज्ञायां कर्तरि भूतार्थे लुङि प्रथमैकवचनविवक्षायां तिपि, इतश्च इति इकारस्य लोपे, आटश्च इति आडागमे, अधि-आ+आपि+त् इति स्थितौ, च्लि लुङि इति लुङि, णिश्रिद्रुस्रुभ्यः कर्तरि चङ् इति चङि, चङि इत्यनेन अजादित्वात् प इत्यस्य द्वित्वे, सन्वल्लघुनि चङ्परेऽनग्लोपे इति सन्वद्भावात् सन्यतः इति इत्वे अधि-आ+आपि+प्+अ+त् इति सर्ववर्णमेलने अध्यापिपत् इति रूपं सिद्ध्यति।

**अपूपुजन्**[5] –चुरादिगणीयात् उभयपदिनः सकर्मकात् सेटः पूज पूजायाम् इति धातोः सत्यापपाश... इत्यादिना सूत्रेण स्वार्थे णिचि निष्पन्नस्य पूजि इत्यस्य भूतार्थे कर्तरि लुङि, प्रथमबहुवचनविवक्षायां झिप्रत्यये, लुङ्लङ्लृङ्क्ष्वडुदात्तः इति अडागमे, झिप्रत्ययस्य झोऽन्तः इति अन्तादेशे इतश्च इति इकारस्य लोपे अ+पूजि+न्त् इति स्थितिर्जायते। ततश्च च्लि लुङि इति च्लिप्रत्यये, च्लेः स्थाने णिश्रिद्रुस्रुभ्यः कर्तरि चङ् इति चङादेशे चङि इति धातोः प्रथमस्यैकाचः द्वित्वे अ+पूज्+पूजि+अ+अन्त् इति स्थितिर्जायते। पूर्वोऽभ्यासः इति प्रथमस्य अभ्याससंज्ञायां, हलादिः शेषः इति अभ्यासस्य आदेर्हलः शेषे, णौ चङ्युपधाया ह्रस्वः इति उपधायाः ऊकारस्य ह्रस्वे अ+पू+पुज्+अ+अन्त् इति स्थिते संयोगान्तस्य लोपः इति प्रत्ययतकारस्य लोपे, अतो गुणे इति अकारयोर्गुणे सर्ववर्णमेलने अपूपुजन् इति रूपम्।

**प्रत्यग्रहीष्टाम्**[6]–प्रतिपूर्वकात् क्र्यादिगणियात् उभयपदिनः सकर्मकात् सेटः ग्रह उपादाने इति धातोः भूतार्थे कर्तरि लुङि प्रथमद्विवचनविवक्षायां तसि तसः स्थाने तस्थस्थमिपां तान्ततामः इत्यनेन तामादेशे, लुङ्लङ्लृङ्क्ष्वडुदात्तः इति अडागमे अ+ग्रह्+ताम् इति स्थिते च्लि लुङि इति लुङि, लुङः स्थाने च्लेः सिच् इति सिचि, सिचः वलादित्त्वात् आर्धधातुकस्येड् वलादेः इति इडागमेऽनुबन्धलोपे ग्रहोऽलिटि दीर्घः इति इकारस्य दीर्घे अ+ग्रह्+ई+स+ताम् इति स्थिते ईकारोत्तरस्य सकारस्य इण्कोः इत्यधिकारस्थितेन आदेशप्रत्यययोः इत्यनेन मूर्धन्यादेशे षकारे, तकारस्य च ष्टुना ष्टुः इति टकारे अग्रहीष्टाम् इति रूपम्। प्रतिपूर्वकस्य तस्य प्रत्यग्रहीष्टाम् इति रूपं साधु।

**अवोढम्**[7] – भ्वादिगणीयात् उभयपदिनः द्विकर्मकात् अनिटः वह प्रापणे इति धातोः भूतार्थे कर्तरि लुङि मध्यमपुरुषद्विवचनविवक्षायां परस्मैपदसंज्ञके थसि, लुङ्लङ्लृङ्क्ष्वडुदात्तः इति अडागमे, तस्थस्थमिपां तान्तन्तामः इति तम् इत्यादेशे, च्लि लुङि इति च्लि-विकरणे, च्लिस्थाने च्लेः सिच् इति सिजादेशे, वदव्रजहलन्तस्याचः इति वृद्धौ अ+वाह्+स्+ताम् इति स्थितिर्जायते। हकाररूपात् झलः परस्य सकारस्य तकाररूपे झलि परे झलो झलि इति लोपो जायते। हो ढः इति हकारस्य झलि परे ढकारे, झषस्तथोर्धोऽधः इति तकारस्य धकारे, ष्टुना ष्टुः इति धकारस्य च ढकारे, ढो ढे लोपः इति प्रथमढकारस्य लोपे, ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यनेन अकारस्य दीर्घे प्राप्ते अपवादत्वेनसहिवहोरोदवर्णस्यइति वह्-धातोः सकारात् परस्यआकारस्यओकारादेशे अवोढम् इति रूपं सिद्ध्यति।

**अभाषिषाताम्**[8] – भ्वादिगणीयात् आत्मनेपदिनः सकर्मकात् सेटः भाष व्यक्तायां वाचि इति धातोः भूतार्थेकर्तरि लुङि प्रथमपुरुषद्विवचने आतामि, अडागमे, च्लि लुङि इति च्लौ, च्लिस्थाने च्लेः सिच् इति सिचि, अ+भाष्+स्+आताम् इति स्थितिर्जायते। सिचः आर्धधातुकत्वात् वलादित्वाच्च आर्धधातुकस्येड्वलादेः इति इडागमे अभाषि+साताम् इति स्थिते, आदेशप्रत्यययोः इति सिचः सकारस्य मूर्धन्यादेशे षकारे अभाषिषाताम् इति रूपम्।

**प्रत्यवादीत्**[9] – भ्वादिगणीयात् परस्मैपदिनः सकर्मकात् सेटः वद व्यक्तायां वाचि इति धातोः भूतार्थे कर्तरि लुङि प्रथमैकवचने तिपि, इतश्च

इति इकारस्य लोपे, अडागमे, च्लि विकरणे, च्लिस्थाने सिचि, अ+वद्+स्+त् इति स्थितिर्जायते। वदव्रजहलन्तस्याचः इति धात्व-वयवस्य अकारस्य वृद्धौ आकारे, आर्धधातुकस्येड्वलादेः इति सस्य इडागमे, तकारस्य अपृक्त एकाल्प्रत्ययः वदव्रजहलन्तस्याचः इति धात्ववयवस्य अकारस्य वृद्धौ आकारे, आर्धधातुकस्येड्वलादेः इति सस्य इडागमे, तकारस्य अपृक्त एकाल्प्रत्ययः इत्यनेन अपृक्तत्वात्, अस्तिसिचोऽपृक्ते इति ईडागमे आद्यावयवे, इट ईटि इति सिचः सकारस्य लोपे अ+वाद्+इ+ई+त् इति स्थितौ, पूर्वत्रासिद्धम् इति सलोपस्य असिद्धत्वात् दीर्घसन्धौ अप्राप्ते, सिज्लोप एकादेशे सिद्धो वाच्यः इति अकः सवर्णे दीर्घः इति दीर्घे अवादीत् इति रूपम्। प्रतिपूर्वकात्तस्य प्रत्यवादीत् इति रूपम्।

**अध्यकारिष्महि**[10] – तनादिगणीयात् उभयपदिनः सकर्मकात् सेटः डुकृञ् करणे इति धातोः भूतार्थे कर्मणि लुङि, उत्तमपुरुषबहुवचने आत्मनेपदसंज्ञके महिङ्-प्रत्यये, अडागमे, च्लिप्रत्यये, च्लिस्थाने च्लेः सिच् इति सिचि, अ+कृ+स्+महि इति स्थितिर्जायते। ऋकारस्य सार्वधातुकार्धधातुकयोः इति गुणे अकारे, उरण् रपरः इति रपरत्वे निष्पन्नस्य कर् इत्यस्य अकारस्य अतो ल्रान्तस्य इति वृद्धौ आकारे सिचः सकारस्य आदेशप्रत्यययोः इति मूर्धन्यादेशे षकारे निष्पन्नस्य अकारिष्महि इत्यस्य अधि इत्युपसर्गपूर्वकस्य अध्यकारिष्महि इति रूपम्।

**निरास्थत्**[11]–दिवादिगणीयात् परस्मैपदिनः सकर्मकात् सेटः पुषादेः असु क्षेपणे इति धातोः भूतार्थे कर्तरि लुङि, प्रथमैकवचने तिप्रत्यये, इतश्च इति इकारस्य लोपे लुङ्लङ्लृङ्क्ष्वडुदात्तः इति अडागमे प्राप्ते अजादित्वात् आटश्च इति आडागमे आद्यावयवे आ+अस्+त् इति स्थितिर्जायते। च्लि लुङि इति च्लि-विकरणे, धातोरस्य पुषादित्वात् च्लिस्थाने सिचं प्रबाध्य पुषादिद्युताद्यॢदितः परस्मैपदेषु इति सूत्रेण अङि आ+अस्+अ+त् इति स्थितौ अस्यतेस्थुक् इत्यनेन थुगागमे अन्तावयवे आस्थत् इति रूपं जायते। निर् इत्युपसर्गपूर्वकस्य तस्यैव निरास्थत् इति रूपं जायते।

**आञ्जिहत्**[12]–भ्वादिगणीयात् आत्मनेपदिनः सकर्मकात् सेटः अहि गतौ इति धातोः प्रयोजनकव्यापारे प्रेषणादौ वाच्येऽर्थे हेतुमति च इति णिचि अह्+इ इति स्थिते, धातोरस्य इदित्त्वात् मिदचोऽन्त्यात् इति परिभाषया परिष्कृतेन इदितो नुम् धातोः इति नुमि, नस्य च नश्चापदान्तसय झलि इति अनुस्वारे, अंहि इति णिजन्तधातोः सनाद्यन्ता धातवः इति धातुसंज्ञायां भूतार्थे कर्तरि लुङि प्रथमैकवचनविवक्षायां ति-प्रत्यये, इतश्च इति तकारोत्तरस्य इकारस्य लोपे धातोः अजादित्वात् आडागमे आ+अंहि+त् इति स्थिते णिश्रिद्रुस्रुभ्यः कर्तरि चङ् इति चङि, णेरनिटि इति णिलोपे,द्वित्वनिमित्ते अचि अङि परे अचः इलोपरूपः आदेशः स्थानिवत् स्यात् द्वित्वे कर्तव्ये इत्यर्थकेन द्विर्वचनेऽचि इत्यनेन सूत्रेण सन्वल्लघुनि चङ्परेऽनग्लोपे इति धातोः सन्वद्भावात् सन्यङोः इति सूत्रेण अजादेर्द्वितीयस्य इति नियमेन तथा नन्द्राः संयोगादयः इति सूत्रकृतनियमेन हिशब्दस्यैव द्वित्वे आ+अंहि+ह्+अ+त् इति स्थितेकुहोश्चुः इति अभ्यासहकारस्य चुत्वे गुणत आन्तर्यात् झकारे अभ्यासे चर्च इति जश्त्वे जकारे आटश्च इति वृद्धौ, आञ्जिहत् इति रूपं सिध्यति।

**औजिहताम्**[13]–भ्वादिगणियात् आत्मनेपदिनः सकर्मकात् सेटः ऊह वितर्के इति धातोः प्रेषणार्थे हेतुमति च इति णिचि ञ्णिचि च इति वृद्धौ निष्पन्नस्यऔहि इत्यस्य सनाद्यन्तेन धातुत्वात् कर्तर्यर्थे भूते लुङि, अजादित्वात् आडागमे, प्रथमद्विवचनविवक्षायाम् आतामि आ+औहि+आताम् इति स्थितिर्जायते। च्लिविकरणे णिश्रिद्रुस्रुभ्यः कर्तरि चङ् इति चङि, णेरनिटि इति णिलोपे, द्विर्वचनेऽचि इत्यनेन सूत्रेण सन्वल्लघुनि चङ्परेऽनग्लोपे इति धातोः सन्वद्भावात् सन्यङोः इति सूत्रेण अजादेर्द्वितीयस्य इति नियमेन हि इत्यस्य द्वित्वे आ+औहि+ह्+अ+आताम् इति स्थिते कुहोश्चुः इति अभ्यासहकारस्य चुत्वे गुणत आन्तर्यात् झकारे अभ्यासे चर्च इति जश्त्वे जकारे आटश्च इति वृद्धौ, औजिहताम् इति रूपं सिध्यति।

**आर्दिदत्**[14] – चुरादिगणीयात् उभयपदिनः सकर्मकात् सेटः अर्द हिंसायाम् इति धातोः सत्यापपाश… इत्यादिना सूत्रेण स्वार्थे णिचि

निष्पन्नस्य आर्दि इत्यस्य भूतार्थे कर्तरि लुङि प्रथमैकवचने परस्मैपदसंज्ञके तिप्रत्यये इतश्च इति इकारस्य लोपे, आटश्च इति आडागमे, आ+आर्दि+त् इति स्थितिर्जायते। च्लि लुङि इति लुङि, च्लिस्थाने चङि, णिलोपे, द्विर्वचनेऽचि इत्यनेन सूत्रेण सन्वल्लघुनि चङ्परेऽ-नग्लोपे इति धातोः सन्वद्भावात् सन्यङोः इति सूत्रेण अजादेर्द्वितीयस्य इति नियमेन दि इत्यस्य द्वित्वे आ+आर्दि+द्+अ+त् इति स्थिते आटश्च इति वृद्धौ आर्दिदत् इति रूपं सिद्धम्।

**आर्चीत्**[15] – भ्वादिगणीयात् उभयपदिनः सकर्मकात् सेटः अर्च पूजायाम् इति धातोः कर्तरि भूतार्थे लिङि प्रथमैकवचनविवक्षायां तिपि, इतश्च इति इकारलोपे, अजादित्वात् आडागमे आद्यावयवे आ+अर्च+त् इति स्थितिः। च्लि लुङि इति च्लौ, च्लिस्थाने च्लेः सिच् इति सिचि आर्धधातुकस्येड्वलादेः इति सस्य इडागमे, तकारस्य अपृक्त एकाल्प्रत्ययः इत्यनेन अपृक्तत्वात्, अस्तिसिचोऽपृक्ते इति ईडागमे आद्यावयवे, इट ईटि इति सिचः सकारस्य लोपे आ+अर्च+इ+ई+त् इति स्थितौ, पूर्वत्रासिद्धम् इति सलोपस्य असिद्धत्वात् दीर्घसन्धौ अप्राप्ते, सिज्लोप एकादेशे सिद्धो वाच्यः इति सिचो विद्यमानत्वात्, अकः सवर्णे दीर्घः इति दीर्घे आर्चीत् इति रूपम्।

**अगात्**[16]–अदादिगणीयात् परस्मैपदिनः सकर्मकात् अनिटः इण् गतौ इति धातोः भूतार्थे कर्तरि लङि, इणो गा लुङि इति इङः गा इत्यादेशे, अडागमे, प्रथमैकवचनविवक्षायां तिपि, इतश्च इति इलोपे अ+गा+त् इति स्थितर्जायते। ततश्च च्लि लुङि ति च्लिप्रत्यये, गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु इति सिज्लोपे सर्ववर्णमेलने अगात् इति रूपं सिद्धम्।

**उपसंहारः** – पाणिनीयदिशा लुङ्-लकारे रूपाणि किञ्चित्क्लिष्टानि सन्तीति कृत्वा तथा आर्धधातुकत्वात् क्लिष्टरूपात् अस्य प्रयोगः नाधिकतया क्रियते लोके। परन्तु महाकविना भट्टिना अस्य यथायथ प्रयोगं कृत्वा श्लाघ्यतां गतः विदुषाम्।

अत्र प्रबन्धे अस्माभिः दृष्टम् विलक्षणानां धातूनां ग्रहणं तेन कृतम्, यत्र विशेषसूत्राणि उपयुक्तानि सन्ति। यथा – अद्क्षत इत्यत्र षढोः कः सि, आघ्रायि इत्यत्र आतो युक् चिण्कृतोः, अध्यापिपत् इत्यत्र सन्वल्लघुनि चङ्परेऽनग्लोपे इति सन्वद्भावस्य, अवोढम् इत्यत्र सहिवहोरोदवर्णस्य, प्रत्यवादीत् इत्यत्र वदव्रजहलन्तस्याचः, निरास्थत् इत्यत्र अस्यतेस्थुक्, आञ्जिहत् इत्यत्र कुहोश्चुः इत्यादीनां विशेषसूत्राणां प्रयोगेन साधितानि रूपाणि तैः उदाहरणरूपेण प्रस्तुतानि। यानि नितान्तं श्लाघनीयानि इति शम्।

## पादटिप्पणी

1. भट्टिकाव्यम्, 2.10 । 2. तत्रैव । 3. भट्टिकाव्यम्, 2.10 । 4. तत्रैव, 2.29 । 5. तत्रैव, 2.26 । 6. भट्टिकाव्यम्, 2.26 ।
7. तत्रैव, 2.27 । 8. तत्रैव । 9. भट्टिकाव्यम्, 2.28 । 10. तत्रैव, 2.34 । 11. तत्रैव, 36 । 12. भट्टिकाव्यम्, 40 ।
3. तत्रैव, 2.41 । 14. तत्रैव, 2.42 । 15. भट्टिकाव्यम्, 2.45 । 16. तत्रैव, 2.46 ।

*********

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# प्रभुपादस्य श्रीलजीवगोस्वामिनो दृष्टौ रसः- एकं समीक्षात्मकमध्ययनम्

**अमल कुमार कर**
सहकारी अध्यापक, पश्चिमबंगाल

**शोधसारः**

रसं विना साहित्ये विषयस्य नास्ति सारवत्ता। रसो नाम भावास्वादनम्। अस्य रसस्य आस्वादनेन परितृप्तिर्लभ्यते चेत् रसदृष्टिः सार्थकी भवति। साहित्यविदः नवरसेषु कञ्चिदेकं रसमङ्गित्वेन अन्यांश्च रसान् अङ्गत्वेन स्वीकुर्वन्ति। यतो हि मनुष्यजीवने या कापि घटना जायते तस्याः सर्वस्या अपि निगूढतत्त्वं साहित्यिकैरेव उपस्थापितं भवति। ते जानन्ति यत्पाठकस्य क्वाग्रहः। परन्तु वैष्णवसाहित्ये किञ्चिदन्यथा अस्य रसस्य व्याख्या कृता। वैष्णवमते सर्वेऽपि रसाः भक्तिरसे मिलिताः सन्तः एकीभूताः भवन्ति। मुख्यगौणभेेदेनायं रसो द्विविधः। सर्वोऽपि रसः श्रीकृष्णविषयकः। स एवालम्बनस्थायिभावविभावानुभावादिः। भगवत्सन्दर्भकारो जीवगोस्वामी तु एतेषु वैष्णवेषु मध्ये अन्यतमः प्रभुपादः। तस्मिन् सन्दर्भग्रन्थे अन्तिमः सन्दर्भः प्रीतिसन्दर्भः। तत्रैतेषां रसानां रमणीयं व्याख्यानं सर्वान् मोहयति। भगवान्कृष्णः भगवत्तायाः पूर्णतमो विकाशः। कृष्णप्रीतिर्गरीयसी। कृष्णभक्तेषु प्रीतेः चरमविकाशः। तस्मात् अन्यभगवत्स्वरूपाणां प्रीतिरसात् कृष्णप्रीतिरसः श्रेष्ठः। किञ्च, शान्तदास्यसख्यवात्सल्यमधुराणां पञ्चरसानामुत्तरोत्तरं श्रेष्ठाः सन्ति।

**कूटशब्दाः** - रसः, मुख्यरसः, गौणरसः, भगवत्प्रीतिः, भक्तिरसः

## उपद्धातः

रसस्तावत् मानसः आस्वादमय अवस्थाविशेषः। संस्कृतसाहित्ये नवरसाः सन्ति - शृङ्गारः हास्यः करुणः रौद्रः वीरः भयानकः बीभत्सः अद्भुतः शान्तः च[1]। भगवत्प्रीतेः वैशिष्ट्यं च रसः। श्रीकृष्णस्य अलौकिकं कार्यमवलोक्य तत् श्रीकृष्णप्रभावनिष्पन्नमिति ज्ञात्वापि ते मन्यन्ते यत् कार्यमिदं कारणान्तरात् समुत्पन्नम्। इदमेव तेषां प्रीतेर्वैशिष्ट्यम्। वैष्णवसाहित्ये रसस्य मुख्यगौणरूपौ द्वौ भेदौ स्तः। भगवत्प्रीतिमयो रसस्तु पञ्चविधः - शान्तो ज्ञानमयः, दास्यो भक्तिमयः, वात्सल्यः वत्सलमयः, मैत्रीमयः तथा उज्ज्वलो मधुररसः। उक्तं च - "भगवत्प्रीतिमयरसः पञ्चधा प्रीतेर्भेदपञ्चकेन। ते च ज्ञानभक्तिमयवत्सलमैत्रीमयोज्ज्वलाख्याः क्रमेण ज्ञेयाः॥"[2]

एतेषां पञ्चरसानां स्थायिभावाः अन्यभावाश्रयभूताः तथा नियताधाररूपेण स्थिता इमे मुख्याः। तस्मात् एतेभ्यः स्थायिभावेभ्यः सञ्जातः शान्तादिरसाः अपि मुख्याः। परन्तु अद्भुतादिरसानां विस्मयादिस्थायिभावाः भगवत्प्रीतिसम्बन्धेन भागवतरसान्तर्भुक्ताः तथा कदाचित् उपस्थिता भवन्तीति ते न नियताधाराः। तस्मादिमे गौणाः। अद्भुतहास्यवीररौद्र भयानकबी- भत्सकरुणाः सप्त गौणरसाः। उक्तं च
"ते च अद्भुतो हास्यवीरौ च रौद्रो भीषण इत्यपि। बीभत्सः करुणेश्चित गौणाः सप्तरसाः स्मृताः॥"[3]

## अद्भुतरसः

सप्तसु गौणरसेषु अन्यतमो भगवत्प्रीतिमयः अद्भुतरसः। अस्यालम्बनविभावस्तु अलौकिकक्रियादिभिः विस्मयविषयः श्रीकृष्णः, विस्मयाधाराः कृष्णात्मीयजनाः, उद्दीपनविभावस्तु कृष्णस्य विस्मयचेष्टा, अनुभावः नेत्रविस्तारादिः, व्यभिचारिभावः आवेगहर्षजाड्यादिः स्थायिभावः श्रीकृष्णप्रीतिमयो विस्मयश्च। श्रीलजीवगोस्वामी प्रभुपादः श्रीभागवतात् दृष्टान्तं दत्तवान् -

"चित्रं वतैतदेकेन वपुषा युगपत्पृथक्। गृहेषु द्व्यष्टसाहस्रं स्त्रिय एक उदावहत्"[4]

## हास्यरसः

भगवत्प्रीतिमयो हास्यरसः। चेष्टावाक्यवेषविकृतिविशेषैः भगवत्प्रीतिमयस्य हास्यस्य विषयः श्रीकृष्णः, हास्याधाराः श्रीकृष्णात्मीयजनाः। किञ्च, यदि कदाचित् चेष्टादिविकृतिविशेषैः श्रीकृष्णस्य प्रियाप्रिया जनाः हास्यविषया भवन्ति तर्हि हास्यहेतुः प्रीतिविषयः स श्रीकृष्णः एव प्रधानावलम्बनभूतः। तस्मात् हास्योऽपि श्रीकृष्णमवलम्ब्यैव समुपस्थितः। केवलं हास्यांशस्य विषयतया तस्य विकृताः प्रियाप्रियाः बहिरङ्गालम्बनभूताः। हास्यरसस्योद्दीपनविभावस्तु हास्यजनकस्य श्रीकृष्णस्य तत्प्रियाप्रियाणां वा चेष्टावाक्यवेषादिविकृतयः।

अनुभावस्तु नासोष्ठविशिष्टगण्डस्पन्दनादिः। व्यभिचारिभावस्तु हर्षालस्यावहित्थादिः, स्थायिभावश्च श्रीकृष्णप्रीतिमयो हासः। सा च हासरतिः स्वविषयानुमोदनात्मकः उत्प्रासात्मको वा चित्तविकाशः। अस्य रसस्य दृष्टान्तः-

"इत्थं स्त्रीभिः सभयनयनश्रीमुखालोकिनीभि- र्व्याख्यातार्था प्रहसितमुखी न ह्यपालब्धुमैच्छदित्यन्तम्"[5] इति।

## वीररसः

भगवत्प्रीतिमयश्चापरो रसः। धर्मदयादानयुद्धरूपेण उत्साहरूपः स्थायी चतुर्विध इति वीररसोऽपि चतुर्विधः। धर्मवीररसस्य विषयालम्बनस्य श्रीकृष्णस्य कृते धर्मानुष्ठानवाञ्छारूपस्य धर्मोत्साहस्य कश्चित् विषयो नास्तीति स प्रीतिमयरूपेणैव धर्मवीररसविषयो भवति। तस्याधाराः भक्ताः, उद्दीपनविभावस्तु सच्छास्त्रश्रवणादिः, अनुभावो विनयश्रद्धादिः, व्यभिचारिभावो मतिस्मृतिः, स्थायिभावश्च भगवत्प्रीतिमयो धर्मोत्साहः। तस्योदाहरणं तु - "क्रतुराजेन गोविन्द राजसूयेन पावनीः। यक्ष्ये विभूतिर्भवतस्तत् सम्पादय नः प्रभो॥"[6]
दयावीररसोऽपि भगवत्प्रीतिमयः। तत्र सर्वभूतविषयिणी या दया समुत्पन्ना यया सर्वे तदीयत्वेन अवगम्यन्ते तद्दयावशीभूतः सन् आत्मोत्सर्गेण यः तृप्तिं साधयितुमिच्छति तादृशो दीनवेशाच्छन्नः निजरूपः श्रीकृष्णः दयावीररसविषयः।तादृशदयाया आधारो भक्तः। उद्दीपनविभावः दैन्यार्तिव्यञ्जनादिः, अनुभावः आश्वासवाक्यं, व्यभिचारिभाव औत्सुक्यमतिहर्षादिः, स्थायिभावश्च भगवत्प्रीतिमयो दयोत्साहः। किञ्च, दानवीररसः बहुप्रदरूपेण समुपस्थितदुर्लभवस्तुत्यागेन सम्पद्यते। यो जनः कृष्णसन्तोषाय हठादेव सर्वस्वं ददाति स बहुप्रदः। तत्रोद्दीपनविभावस्तु सम्प्रदानदर्शनादिः, अनुभावः वाञ्छातिरिक्तदानस्मितादिः, व्यभिचारिभावः वितर्कौत्सुक्यादिः, स्थायिभावश्च कृष्णप्रीतिमयदानोत्साहः। किञ्च, समुपस्थितदुर्लभवस्तुत्यागात्मकस्य दानवीररसस्य आलम्बनं श्रीकृष्णः, आधारो भक्तः, उद्दीपनं कृष्णालापस्मितादिः, अनुभावः त्यागोत्कर्षवर्णनदार्ढ्यम्, सञ्चारिभावश्च प्रचुरधैर्यम्। अन्तिमस्तु युद्धवीररसः। तत्र योद्धा भगवतः प्रियतमः, युद्धप्रवृत्तिहेतोः प्रत्येकं योद्धा तस्यैव मित्रम्। किन्तु श्रीकृष्णो यदा विपक्षस्य प्रतियोद्धा भवति तदा भक्तानां श्रीकृष्णस्य प्रीतिमयप्रबलयुद्धेच्छारूपोत्साहविषयरूपेण आलम्बनत्वं सर्वतोभावेन सिद्धं भवति।

## रौद्ररसः

अयमपि भगवत्प्रीतिमयो रसः। अस्यालम्बनः कृष्णप्रीतिमयः, क्रोधविषयः श्रीकृष्णः, आश्रयाश्च तस्य प्रियजनाः। यदि क्रोधविषयाः श्रीकृष्णहिताः श्रीकृष्णाहिताः निजाहिता वा भवन्ति तर्हि हास्यरसः तथा वीररसवत् तत्प्रीतिविषयः श्रीकृष्ण एव प्रधानालम्बनभूतः। अन्यस्तु क्रोधांशबहिरालम्बनभूतः केवलम्। प्रमादादिहेतोः श्रीकृष्णात् सख्याः अतिशयानिष्टे जाते सति सखीक्रोधविषयः श्रीकृष्णो भवति तथा वध्वादेः कृष्णसङ्गमे अवगते सति वृद्धादीनां क्रोधविषयः श्रीकृष्ण एव भवति। भक्तस्य अहितकारी दैत्यादिः कृष्णस्य क्रोधविषयो भवति। उद्दीपनविभावस्तु क्रोधविषयस्य अवज्ञादिः, अनुभावः हस्तनिष्पेषणादिः, व्यभिचारी आवेगादिः, स्थायी च कृष्णप्रीतिमयक्रोधः। कृष्णस्य क्रोधविषयत्वम् अनिष्टकारिणामित्यत्र दृष्टान्तः -

"ततः पाण्डुसुताः क्रुद्धा मत्सकेकयसृञ्जयाः। उदायुधः समुत्तस्थुः शिशुपालजिघांसवः॥"[7]

## भयानकरसः

भगवत्प्रीतिमयो रसः अयमपि। अत्रालम्बनः स यः कृष्णमुत्पीडयितुमिच्छति। तस्मात् यत् प्रीतिमयं भयं तस्य विषयः श्रीकृष्णः आश्रयश्च श्रीकृष्णात्मीयजनः। किञ्च, यः भक्तः स्वसम्बन्धेन कृष्णविच्छेदं जनयति तस्मात् यत् भयं तथा अपराधशून्येन लाञ्छितात् कृष्णात् यत् भयं तत्तद्भयविषयः भक्तः स्वयं चेदपि हास्यादिरसवत् कृष्णस्य प्रीतिविषयत्वात् स एव मूलावलम्बनम्। अत्र भयस्य यत्कारणं स उद्दीपनविभाव एव भवति। भयं स्वविषयं चेत् यः विषयः स एव भक्त आश्रयः। उद्दीपनविभावस्तु भीषणभ्रूकुट्यादिः, अनुभावः मुखशोषादिः, व्यभिचारी च चापल्यादिः। स्थायिभावस्तु कृष्णप्रीतिमयं भयम्। बहुषु दृष्टान्तेषु एकं तु कृष्णं प्रति दारुणोत्पीडनाभिलाषात् भयम्। देवक्या उक्तं कृष्णं प्रति -

"जन्म ते मय्यसौ पापो माविद्यान्मधुसूदन। समुद्विजे भवद्धेतोः कंसादहमधीरधीः॥"[8]

अत्र श्रीकृष्णो विषयालम्बनम् इति स भयहेतुरुक्तः, न तु स भयकारक इति हेतोः।

### बीभत्सरसः

अयमपि भगवत्प्रीतिमयो रसः। अन्यं प्रति जुगुप्सा घृणा वा भगवत्प्रीतिमयी। श्रीकृष्ण एव प्रीतिविषयः। तस्मात् जुगुप्सारतेरपि श्रीकृष्ण एव मूलालम्बनविषयः। श्रीकृष्णस्य प्रियजनाः तदाश्रयाः। जुगुप्सामात्रस्य विषयः अन्यो जनः तत्र बहिरालम्बनविषयः। तत्रोद्दीपनम् अमेध्यतादि, अनुभावः निष्ठीवनादिः, व्यभिचारिभावश्च विषादादिः। स्थायिभावो नाम भगवत्प्रीतिमयी जुगुप्सा। तस्य दृष्टान्तः - "त्वक्श्मश्रूरोमनखकेशपिनद्धमित्यादिकं श्रीरुक्मिणीवाक्यमेव"[9] इति।

### करुणरसः

भगवत्प्रीतिमयं यत् प्रेम तेन निष्ठाप्राप्तिविषयतया गम्यते इति प्रीतिमयकरुणाविषयः श्रीकृष्णः, आश्रयः तत्प्रियजनः, उद्दीपनं कृष्णस्य कर्मगुणरूपादि, अनुभावः मुखशोषविलापादिः, व्यभिचारी जाड्यनिर्वेदादिः, स्थायिभावश्च कृष्णप्रीतिमयः शोकः। यदि भगवत्कृपाशून्यो जनः अन्यजनशोचनीयो भवति तर्हि तद्विषयेऽपि प्रीतिमतो जनस्य भगवत्प्रीतिमयस्य करुणरसस्योदयो भवति। पक्षे यदि कृष्णः विस्मयाद्याश्रयो भवति तर्हि तत्सर्वमपि कृष्णप्रीतिमये चित्ते सञ्चारितं भवति। तदापि भगवत्प्रीतिमयस्य अद्भुतरसस्योदयो भवति –

"अन्तर्ह्रदे भुजभोगपरीतमारात्कृष्णं निरीहमुपलभ्य जलाशयान्ते।
गोपांश्च मूढधीषणान् परितः पशूंश्च संक्रन्दतः परमकश्मलमापुरार्ता॥"[10]

### शान्तरसः

अयं ज्ञानभक्तिमयो रसः। अस्य स्थायिभावः शान्तरतिः। विषयालम्बनभूतः स्फूर्तिमान् चतुर्भुजो नारायणः, आश्रयालम्बनभूतश्च भगवल्लीलागतः शान्तभक्तः। शान्तरसे द्विविधालम्बनमध्ये अयं श्लोकः वर्णितः - "एवं तदेव भगवानरविन्दनाभः स्वानां विबुध्य सदतिक्रममार्यहृद्य"[11] इति। अत्रेदं समुल्लेख्यं यत् भगवत्प्रीतिमान् नास्ति चेदपि परब्रह्मनिष्ठः जनः शान्तरसाश्रयो भवितुं नार्हति। यथा श्रीशुकदेवः जन्मन एव ज्ञाननिष्ठः निर्गुणब्रह्मसमाधिमग्नश्चासीत्। तदा भगवत्प्रीतेः सद्भाव एव नासीत्। परं भगवल्लीलाकृष्टः सन् श्रीमद्भागवताध्ययनमकरोत् भगवत्प्रीतिमांश्च सञ्जातः। तदा प्रभृति स शान्तरसालम्बनभूतो जातः। शान्तरसे उद्दीपनानि तु भगवतः गुणक्रियाद्रव्याणि। गुणः सच्चिदानन्दसान्द्राङ्गत्वसदास्वरूपसम्प्राप्तत्वभगवत्त्वपरमात्मत्वविभुत्वादिः द्रव्यं च महोपनिषज्ज्ञानिभक्तपाद-रजस्तुलस्यादि। अनुभावश्च भगवद्गुणप्रशंसानामोच्चारणादिः।

### दास्यरसः

दास्यरसो नाम कर्मसमर्पणम्। स्थायिभावो दास्यरतिः विषयालम्बनं च श्रीकृष्णः। तस्याधारः श्रीकृष्णलीलागतः स्वगुणगरीयान् भृत्यगणः। वस्तुतस्तु द्विविधः आविर्भाव एवालम्बनम्- श्रीकृष्णस्य परमेश्वराकारः श्रीमन्नराकारश्च। अङ्गसेवकः पार्षदः प्रेष्यः इति त्रिविधः भृत्यवर्गः। एतेषु त्रिषु मध्ये श्रीकृष्णस्य प्रियतरः अपेक्षितश्चास्ति अङ्गसेवकः। सौन्दर्यं सौकुमार्यादिगुणाः शयनभोजनादिक्रियाः तत्सेव्यवस्तु तदुच्छिष्टादिद्रव्यम् इत्येतानि सर्वाणि दास्यरसोद्दीपनानि। श्रीकृष्णेन सह मिलितावस्थायां दासवर्गस्य स्वस्वकर्मतत्परता अत्रानुभावः। दास्यरसस्य अन्यतमो भागः आश्रयभक्तिरसः। अनेन सह हर्षगर्वधृत्ययोगक्लमव्याधयः अनुभावाः।

### सख्यरसः

सख्यरसो नाम मैत्रीरसः। तत्र स्थायिभावः सख्यरतिः, विषयालम्बनं श्रीकृष्णः, श्रीकृष्णलीलान्तःपातीनि मित्राणि सुदामश्रीदामार्जुनादीनि आश्रयालम्बनानि। मित्रं द्विविधम् - सुहृत् सखा च। येषां परस्परं निरुपाधिकोपकारः रसिकतामयी प्रीतिश्च तिष्ठतः ते सुहृदः भीमसेनद्रोपद्यादयः। येषां च सहविहारशालिनी प्रणयमयी प्रीतिस्तिष्ठति ते सखायः अर्जुनश्रीदामविप्रादयः। भागवतमते गोकुले श्रीदामादिगोपबालकाः श्रीकृष्णसुहृदः। द्रव्यात्मकोद्दीपनं तु वसनभूषणशङ्खचक्रश्रृङ्गवेणुयष्ट्यादि, कालात्मकोद्दीपनं गोचरणवनभोजनमल्लक्रीडादि। सख्यरसस्य सञ्चारिभावे दृष्टान्तस्तु भीमायाः मातुलेयालिङ्गनम्। अत्र हर्षो नाम सञ्चारी वर्तते।

**वात्सल्यरसः**

वात्सल्यरसे वात्सल्यस्थायिभावः। अत्र भक्तभगवतोर्मध्ये मातृपितृसन्तानसम्बन्धः। कृष्णः सन्तानः भक्तश्च माता पिता वा। भागवतस्य किञ्चिदुदाहरणं प्रदातुं शक्यते - "तन्मातरौ निजसुतौ घृणया पङ्काङ्गरागरुचिरावुपगुह्यदोर्भ्याम्।

दत्त्वा स्तनं प्रपिवतोः स्म मुखं निरीक्ष्य मुग्धस्मितात्पदरशनं ययतुः प्रमोदम्॥"[12]

लाल्यरूपेण स्फूर्तिमान् वात्सल्यविषयः श्रीकृष्णः, वात्सल्याधारः पित्रादिरूपगुरुवर्गः, तत्र नराकारः कृष्ण एवालम्बनभूतः। गुरुवर्गे वसुदेवदेवकीकुन्त्यादयः भक्त्यादिमिश्रो वत्सलः तथा यशोदानन्दतत्तुल्यवयस्काः गोपगोपिकादयः शुद्धवत्सलाः। उद्दीपनविभावः कौमार्यवयरूपस्मितहासचापल्यादिः। स्तम्भाद्यष्टसात्त्विकाः वात्सल्ये प्रकाशिताः।

## मधुर उज्ज्वलो रसो वा

अत्र मधुरभक्तिरसविषये भक्तभगवतोः सम्बन्धः कान्तकान्तासम्बन्धतुल्यः। भगवान् कान्तः भक्तश्च कान्ता। अत्र शान्तः कृष्णनिष्ठदास्यं सेवा सख्यं संकोचाभावः वात्सल्यं लालनं पालनमित्येतत् सर्वमपि अस्ति। स्थायिभावो मधुरतिः। अयम् उज्ज्वलरसरूपेण प्रोक्तः अस्ति। अस्मिन् रसे कान्तरूपेण स्फूर्तिमान् श्रीकृष्णः विषयालम्बनभूतः। तत्प्रेयस्यः तस्य आश्रयालम्बनभूताः। स्वकीयपरकीयभेदेन कृष्णप्रेयसी द्विविधा। रुक्मिणी नाम स्वीया कान्ता। परमस्वीया अपि राधिका व्रजदेव्यश्च प्रकटलीलायां परकीयारूपेण प्रतीयमानाः सन्ति।

वस्तुतो जीवगोस्वामिप्रभुपादमते भक्तिमयरसः शान्तभक्तिः आश्रयभक्तिः दास्यभक्तिः प्रशयभक्तिरिति भेदेन चतुर्विधः। आश्रयभक्तिरसस्यालम्बनं तु पालकरूपेण स्फूर्तिमान् आश्रयभक्त्याश्रयः श्रीकृष्णः। आश्रयालम्बनं तल्लीलान्तःपाती परमपाल्यः परिकरवर्गः। वस्तुतस्तु कृष्णलीलान्तःपातिनः परमपाल्यगणस्य समीपे श्रीकृष्ण एवालम्बनम्। अन्यत्र श्रीवैकुण्ठस्थस्य परमपाल्यस्य समीपे श्रीमन्नराकारप्रधानः परमेश्वराकारः आलम्बनभूतः। पाल्यगणो द्विविधः - जगत्प्रपञ्चकार्यभूतः अधिकारिगणो बहिरङ्गभूतः तथा श्रीकृष्णस्य चरणच्छायैव येषां जीवातुः ते अन्तरङ्गभूताः। अन्तरङ्गपाल्यगणश्च त्रिविधः - सामान्यो जनः, श्रीयदुपुरवासी, श्रीमद्व्रजपुरवासी च। कृष्णः परमेश्वररूपेण येषामालम्बनभूतः तेषां समीपे सृष्टिस्थित्यादिकर्तुः अधोक्ताः क्रियाः मिश्रविश्वरूपदर्शनादयः क्रियारूपा उद्दीपनविभावाः, नराकारालम्बनकारिणां कृते तु कृष्णस्य परपक्षदलनस्वपक्षपालनसदयावलोकनादयः क्रियारूपा उद्दीपनविभावाः सन्ति। द्रव्यरूपोद्दीपनविभावास्तु कृष्णस्य शङ्खचक्रगदापद्मशार्ङ्गधन्वस्त्रादिभूषणस्थानपदाङ्गभक्तादयः। अनुभावः श्रीकृष्णसम्बन्धेन वासः, कृष्णस्य प्रभावादिमयगुणनामकीर्तनादिकं, शान्तरसस्य अनुभावाश्च तिष्ठन्ति। सञ्चारिणस्तु योगे हर्षगर्वधृत्य-योगक्लमव्याधयः। अत्र स्थायिभावो नाम आश्रयभक्तिनाम्नी भगवत्प्रीतिः यथा - "भवाय नस्त्वं भव विश्वभावन त्वमेव माताथ सुहृत् पतिः पिता"[13] इति।

प्रशयभक्तिरसे विषयालम्बनभूतः श्रीकृष्णः लालकरूपेण स्फूर्तिं प्राप्य अस्य विषयो भवति। अत्रापि तस्याविर्भावो द्विविधो भवति - परमेश्वराकारः नराकारश्च। इमौ द्वौ अस्याश्रयभूतौ एतदालम्बनरूपेण लाल्यवर्गः त्रिविधः - ब्रह्माद्याश्रयः परमेश्वराकारः, श्रीमद्दशाक्षरमन्त्रध्यानेन ये गोपाः दृश्यन्ते तेषामाश्रयः श्रीमन्नराकारः, श्रीद्वारकाजातलाल्यगणस्याश्रय उभयविधरूपः। गुणस्तु भक्तानां स्वविषये श्रीकृष्णवात्सल्यस्मितदृष्ट्यादिः तत्कीर्तिबुद्धिबलादिपरममहत्त्वं च। अनुभावो नाम बाल्यकाले मधुरवाक्येन श्रीकृष्णमुद्दिश्य यथेच्छं विविधप्रश्नकरणं, तमुद्दिश्य प्रार्थनं, तदङ्गुलिबाह्वाद्यवलम्बनेन अवस्थितिः, तत्क्रोडे उपवेशनं, तच्चर्विततताम्बुलग्रहणादि च। सात्त्विकभावो नाम स्तम्भादिसमुदयः। व्यभिचारिभावस्तु हर्षगर्वादिः, स्थायिभावश्च प्रशयभक्त्याख्या दास्यरतिः। बाल्ये प्रशयभक्तिमतां लाल्यत्वाभिमानमयत्वनिबन्धनः यः प्रशयबीजदैन्यांशो वर्तते तेषां स्थायिभावः प्रशयभक्तिरिति नाम्नाभिधीयते।

अन्ते रसरूपेण परिणता प्रीतिरेव परमानन्दस्वरूपा। अस्मादेव रसमयत्वात् श्रुतिः "रसो वै सः" इति भगवद्विषये निर्देशमकरोत्। तल्लाभेन जीवः अभीष्टपरमानन्दं लभते इत्युल्लेखः कृतः। अतो रसास्वादः ब्रह्मानन्दानुभवापेक्षया श्रेष्ठः।

**परिशीलितग्रन्थसूची**

१. वन्द्योपाध्यायः, अशोककुमारः (सम्पा.), प्रीतिसन्दर्भः, संस्कृतपुस्तकभाण्डार, कोलकाता - २०१०

२. मुखोपाध्यायः, महुया, गौडीयनृत्यम्, दि एशियाटिक सोसाइ, कोलकाता – २०००

३. घोषः, शम्भुनाथः अनिन्दिताघोषश्च, कत्थकनृत्येर रूपकथा, आदिनाथ ब्रादार्स, कोलकाता - १९७९
४. गोस्वामी, विमलकृष्णः काननविहारिगोस्वामी च (सम्पा.), समग्रषड्सन्दर्भः, संस्कृत बुक डिपो, कोलकाता - २०२०
५. श्रीलराधाविनोदगोस्वामी (सम्पा.), भागवतपुराणम्, गिरिजा, कोलकाता - १९९५
६. शास्त्री, हरिदासः (सम्पा.), प्रीतिसन्दर्भः (हिन्दी), गदाधरगौरहरिप्रेस, मथुरा - १९५६
७. दश, पूर्णप्रज्ञः (सम्पा.), प्रीतिसन्दर्भः (आङ्गलम्), रासविहारिलाल एण्ड् सन्, मथुरा - २००७
८. गोस्वामी, राधाविनोदः (सम्पा.), भागवतपुराणम्, कोलकाता – १९९३

## पादटिप्पणी

1. "शृङ्गारहास्यकरुणरौद्रवीरभयानकाः। बीभत्साद्भुतशान्ताश्च नवनाट्यरसाः स्मृताः॥" शुभङ्करः - सङ्गीतदामोदरः

2. प्रीतिसन्दर्भः - १५८ कारिका । 3. प्रीतिसन्दर्भः - १५८ कारिका । 4. भागवतपुराणम् - १०/६९/२ ।

5. प्रीतिसन्दर्भः - २२/१५८, भागवतपुराणम् - १०/८/२० । 6. प्रीतिसन्दर्भः - १६१ कारिका, भागवतपुराणम् - १०/७२/३ ।

7. भागवतपुराणम् - १०/७४/२६, १६७ कारिका । 8. भागवतपुराणम् - १०/३/२६, १६९ कारिका ।

9. भागवतपुराणम् - १०/६०/४३, १७२ कारिका । 10. भागवतपुराणण् - १०/१६/१८, १७२ कारिका ।

11. प्रीतिसन्दर्भः ९२ कारिका, भागवतपुराणम् - ३/१५/३७ । 12. भागवतपुराणम् - १०/८/१७

13. भागवतपुराणम् - १/११/६, प्रीतिसन्दर्भः २०४ कारिका

**Amal Kumar Kar**
Assistant Professor,
Department of Sanskrit
Alipurduar Mahila Mahavidyalaya
Alipurduar-736121, West Bengal
Contact No. : 9735645025
Email: kar.amalkumar@gmail.com

***********

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# पश्य मृगो धावति इति बोधे मुख्यविशेष्यविचारः

**Tapas Khanra**
Ph.D. Research Scholar at CTSTS
Indian Institute of Technology Bombay
Mumbai – 400076, Maharashtra
Mobile: 7908546669
Email: tapaskhanra1998@gmail.com

लेखसारः - चतसृषु प्रमासु अन्यतमा हि शाब्दी प्रमा। तत्करणभूतशब्दजन्यं ज्ञानं वाक्यार्थज्ञानं शाब्दबोधो वेत्युच्यते। अत्र शब्दशब्दः परस्परान्वितार्थप्रतिपादकपदसमूहात्मकवाक्यबोधकः। एवं च परस्परान्वितार्थप्रतिपादकानेकपदार्थसंसर्गावगाहि ज्ञानं शाब्दबोधः। शाब्दबोधे तस्मिन् भासमानेषु अनेकेषु अप्रधानीभूतपदार्थेषु एकः इतराविशेषणीभूतः पदार्थः भासते, स एव मुख्यविशेष्यः। तत्र प्रकृते ***पश्य मृगो धावति*** इति बोधे कः पदार्थः मुख्यविशेष्यतया भासते इति वैयाकरणन्यायमतसमीक्षणेन इदानीं समुपस्थाप्यते -

**1. उपोद्घातः-**

पदशास्त्रे हि व्याकरणे पदं द्विविधम् - सुबन्तम्, तिङन्तं च। पदसमूहः वाक्यमिति नैयायिकाः, एकतिङ् वाक्यमिति वैयाकरणाः। वाक्यात् शब्दैर्वा अर्थस्य बोधः शाब्दबोधः। तथाहि शब्दे वाक्ये वा उच्चरिते तस्मात् कश्चिद् बोधो जायते स एव जायमानो बोधः शाब्दबोधो वाक्यार्थबोधो वा इत्युच्यते। अर्थात् वाक्यघटकानां पदानां येऽर्थाः भवन्ति तेषां संसर्गम् अवगाहमानं ज्ञानं शाब्दबोधः। तस्मिन् बोधे विषयभूतेषु पदार्थेषु कश्चित् मुख्यविशेष्यतया भासते, अन्ये च पदार्थाः विशेषणतया भासन्ते। तत्र कः मुख्यविशेष्यतया भासते इति जिज्ञासायां धात्वर्थो व्यापारो मुख्यविशेष्यतया भासते इति वैयाकरणाः।

इयं हि शाब्दबोधस्य प्रक्रिया न्यायमीमांसाव्याकरणशास्त्रेषु विस्तरेण विचारिता। प्राधान्येनास्मिन् पत्रे व्याकरणन्यायमतयोः समीक्षणपूर्वकं प्रस्तुतिः विधीयते। यद्यपि उभयोरपि मतेन बोधाकारस्तु समानः तथापि शाब्दबोधप्रक्रियायां तेषां सिद्धान्तेषु मतभेदा दरीदृश्यन्ते। तथाहि सर्वैरपि यथा फलं व्यापारश्च पदार्थत्वेन अङ्गीक्रियते, परन्तु तत्र व्यापारवाचकं फलवाचकं च किमिति निर्णये मतानैक्यं परिलक्ष्यते। तथैव वाक्यार्थबोधे एकः मुख्यविशेष्यः अवश्यं स्वीक्रियते सर्वैः, परन्तु तत्र कः मुख्यविशेष्यतया भासते इत्यत्र विवदन्ते शास्त्रविदः। तद्धि प्रकृते ***पश्य मृगो धावति*** इति वाक्ये उभयोः मतयोः कः ज्यायान् इति प्रतिपाद्यते।

**2. शाब्दबोधसामग्री**

वाक्यार्थज्ञानं प्रति पदार्थज्ञानस्य कारणत्वं स्पष्टमेवोक्तमस्ति। पदार्थत्वं च पदजन्यप्रतीतिविषयत्वम्। शाब्दप्रमायां पदज्ञानं करणं, पदार्थज्ञानं व्यापारः, शाब्दबोधो भवति फलमिति निगदितमस्ति विदुषा विश्वनाथपञ्चाननभट्टाचार्येण

***पदज्ञानं तु करणं द्वारं तत्र पदार्थधीः शाब्दबोधः फलं तत्र वृत्तिधीः सहकारिणी।*** इति

तत्र शाब्दबोधं प्रति पदार्थज्ञानम् अर्थात् पदजन्यपदार्थोपस्थितिः व्यापारः इत्युक्ते सति तयोः कार्यकारणभावस्य स्वरूपं किमिति जिज्ञासायामुच्यते, तत्पदजन्यतद्विषयकशाब्दबोधं प्रति तत्पदजन्यतद्विषयकोपस्थितिः कारणमिति। तस्य परिष्कृतं स्वरूपं भवति - तत्पदजन्यतद्विषयकशाब्दबोधं प्रति तत्पदनिष्ठवृत्तिज्ञानाधीनतद्विषयकोपस्थितिः कारणमिति। किञ्च, आकाङ्क्षा-योग्यता-आसत्ति-तात्पर्याणि शाब्दबोधस्य सहकारिकारणानि।

एवं च तिङन्तस्थले नैयायिकाः प्रथमान्तार्थमुख्यविशेष्यकबोध इति, वैयाकरणास्तु धात्वर्थमुख्यविशेष्यकबोधः इति वदन्ति। तत्र प्रकृते धातुरिति कः पदार्थः? धात्वर्थश्च कः विवक्षितः ? इति प्रतिपाद्यते।

अत्र पाणिनीयतन्त्रानुसारं धातुत्वं हि भूवादयो धातवः, सनाद्यन्ता धातवः इति सूत्राभ्यां निर्दिष्टं पारिभाषिकमेव बोध्यम्। फलं तदनुकूलव्यापारश्च धात्वर्थः इति नागेशः। अत्र भट्टोजिदीक्षितः प्राह –

***फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः, फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।।*** इति

अत्र *फलव्यापारयोः धातुः* इत्यस्यार्थो भवति फलनिरूपितवाचकतावान् धातुः, अथ च व्यापारनिरूपितवाचकतावान् धातुः इति। *आश्रये तु तिङः स्मृताः* इत्यस्यार्थो भवति आश्रयनिरूपितवाचकत्ववन्तः तिङः स्मृताः इति। अर्थात् व्यापाराश्रयकर्तृनिरूपितवाचकतावन्तः तिङः, अथ च फलाश्रयकर्मनिरूपितवाचकतावन्तः तिङः भवन्ति। एवं च भूषणसारग्रन्थे चत्वारो हि तिङर्थाः कर्ता, कर्म, संख्या, कालः इति कौण्डभट्टेन उक्ताः सन्ति। *फले प्रधानं व्यापारः* इत्यस्यार्थो भवति फलनिरूपितप्राधान्यवान् व्यापारः इति। तथा च, *तिङर्थस्तु विशेषणम्* इत्यंशस्य अर्थो भवति तिङर्थः कर्ता कालश्च वृत्तित्वसम्बन्धेन व्यापारे विशेषणं भवति। तिङर्थः संख्या कर्तृप्रत्यये कर्तरि कर्मप्रत्यये कर्मणि विशेषणं भवति। तिङर्थः कर्म फले विशेषणं भवति, फलं च अनुकूलत्वसम्बन्धेन व्यापारे विशेषणं भवति। एवं व्यापारो हि इतराविशेषणीभूततया प्रधानपदार्थत्वेन भासते इति कृत्वा धात्वर्थव्यापारस्यैव तिङन्तस्थले मुष्यविशेष्यतया भानमिति वैयाकरणसिद्धान्तः।

**1. धात्वर्थमुख्यविशेष्यकशाब्दबोधे प्रमाणानि -**

**निरुक्तम्** - *"भावप्रधानमाख्यातम्"* इति निरुक्तकारयास्कवचनम्। आख्यातपदेनात्र तिङन्तमुच्यते। तिङन्ते धात्वर्थस्य प्राधान्यं भवति इत्यर्थः। प्राधान्यं च स्ववाचकधातुप्रकृतिकप्रत्ययनिरूपितमेव। तथा च भावप्रधानत्वं नाम तिङर्थनिष्ठप्रकारतानिरूपितविशेष्यताशालि भावप्रतिपादकत्वमिति बोध्यम्।

**महाभाष्यम्** - *क्रियाप्रधानमाख्यातं भवति* इत्युक्तं पतञ्जलिना *प्रशंसायां रूपप्* ५.३.६६ इति सूत्रभाष्ये

**न्यायभाष्यम्** - *प्रकृतादर्थादसम्बद्धार्थमर्थान्तरम्* इति सूत्रे भाष्यकृता *क्रियाकालयोगाभिधायि आख्यातम्, धात्वर्थमात्रं च कालाभिधानविशिष्टम्* इत्युक्तम्। *ते विभक्त्यन्ताः पदम्* इति सूत्रे न्यायवार्तिककारेणापि *क्रियाकालयोगाभिधायि क्रियाप्रधानम् आख्यातम्* इत्युक्तमस्ति। तेन प्राचीननैयायिकानामपि धात्वर्थमुख्यविशेष्यकबोधः अभिमत इति ज्ञायते।

परन्तु अस्ति नियमः - *प्रकृतिप्रत्ययौ सहार्थं ब्रूतः, तयोः प्रत्ययार्थस्यैव प्राधान्यम्* इति। यत्र प्रकृत्यर्थप्रत्ययार्थयोः सहैव प्रतीतिरिष्टा तत्र प्रकृत्यर्थापेक्षया प्रत्ययार्थ एव प्राधान्यम् आवहति। यथा पच्धातोः ण्वुलप्रत्यये पाचक इति पाककर्ता इत्यर्थे रूपम्, ण्वुलः कर्तरि विधानात् तस्यार्थस्य तद्धात्वर्थाश्रयस्य प्राधान्यम्। प्रत्ययवाच्यस्यैव अर्थस्य प्राधान्यम्। न तु प्रत्ययद्योत्यस्यापि अर्थस्यापि। तेन अजा इत्यत्र न टाप्, प्रत्ययद्योत्यस्य स्त्रीत्वस्य प्राधान्येन पशुविशेषवृत्तिस्त्रीत्वमिति स्त्रीत्वविशेषपशुः इति वा बोधः। तस्मादत्र एवं ज्ञेयम् - प्रकृतिप्रत्यययोरित्यादिनियमः उत्सर्गनियमः। नियमस्यास्य *भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि* इति यास्कवचनम् अपवादः। तस्मात् तिङन्तस्थले भावस्य धात्वर्थस्यैव प्राधान्यं बोध्यमिति अग्रे स्पष्टीभविष्यति।

**2. धात्वर्थमुख्यविशेष्यकबोधः - व्याकरणमतम्**

वैयाकरणैः व्यापारमुख्यविशेष्यकशाब्दबोधः स्वीक्रियते। तत्र फलं व्यापारश्च धात्वर्थः। तथाहि प्रकृते ***रामः वनं गच्छति*** इत्यत्र वनपदोत्तरवर्तिद्वितीयायाः आश्रयः (कर्म) अर्थः। तत्र अभेदेन वनस्य अन्वयः। कर्मणः स्वनिष्ठकर्मतानिरूपकत्वसम्बन्धेन धात्वर्थे फले संयोगे अन्वयः। गच्छति इत्यत्र तिपः कर्ता अर्थः। तत्र रामस्य अभेदेन अन्वयः। कर्तुश्च धात्वर्थे व्यापारे स्वनिष्ठकर्तृतानिरूपकत्वसंबन्धेन अन्वयः। तथा च रामाभिन्नकर्तृकः वनाभिन्नकर्मकः वर्तमानकालिकः संयोगानुकूलव्यापारः इति धात्वर्थमुख्यविशेष्यकबोधः।

**3. प्रथमान्तार्थमुख्यविशेष्यकबोधः - न्यायमतम्**

नैयायिकैरपि नव्यैः फलं व्यापारश्च धात्वर्थः इति स्वीक्रियते। ते नैयायिकाः धात्वार्थम् आख्यातार्थं प्रति, आख्यातार्थं च प्रथमान्तार्थं प्रति विशेषणमिति स्वीकृत्य प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधं स्वीकुर्वन्ति। लकाराणां कृतावेव शक्तिः, नतु कर्तरि। आख्यातार्थे कृतिरूपे धात्वर्थो विशेषणं भवति। प्रथमान्तार्थे कर्तरि आख्यातार्थः कृतिः विशेषणम्। तेन हि सर्वत्र शाब्दबोधे प्रथमान्तार्थस्य प्राधान्यम्।

तथाहि उक्तवाक्ये ***रामः वनं गच्छति*** इत्यत्र द्वितीयायाः कर्मत्वम् अर्थः। तत्राधेयतासम्बन्धेन वनस्य अन्वयः। कर्मत्वस्य निरूपकत्वसम्बन्धेन धात्वर्थफले अन्वयः। आख्यातस्य कृतिरर्थः। तत्र अनुकूलतासम्बन्धेन धात्वर्थव्यापारस्य अन्वयः। कृतेः आश्रयतासम्बन्धेन प्रथमान्तार्थे रामे अन्वयः। वननिष्ठकर्मतानिरूपक-उत्तरदेशसंयोगानुकूलकृतिमान् रामः इति प्रथमान्तार्थमुख्यविशेष्यकबोधः।

**3. पश्य मृगो धावति इत्यत्र वैयाकरणानामभिप्रायः**

वैयाकरणास्तु प्रथमान्तार्थमुख्यविशेष्यकबोधं न स्वीकुर्वन्ति। कारणं हि वैयाकरणनये - पश्य मृगो धावति इत्यादौ मृगकर्तृकं धावनमिति दृशिक्रियायाः कर्म भवति, प्रधानं च तत्र दृशिक्रिया एव। तथाहि मृगकर्तृकधावनकर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमित्येवं शाब्दबोधः वैयाकरणनये। तत्र गृगो धावति इत्यत्र विशेष्यभूतधावनरूपार्थवाचकस्य धावति इत्यस्य कर्मत्वेऽपि प्रत्ययान्तत्वेन प्रातिपदिकत्वाभावात् ततः न द्वितीया। मृग इत्यस्य तु प्रातिपदिकत्वेऽपि प्रकृतधातुवाच्यक्रियान्वयित्वाभावात् अप्राधान्यात् तस्मात् न द्वितीया।

**1. प्रथमान्तमुख्यशाब्दबोधे दोषाः**

नैयायिकानां तु - पश्य मृगो धावति इति वाक्यात् अन्यदेशसंयोगानुकूलधावनानुकूलकृतिमन्मृगकर्मकं प्रेरणाविषयीभूतं यद्दर्शनं तदनुकूलकृतिमान् त्वम् इति शाब्दबोधः। परन्तु एवं बोधे स्वीकृते सति विशेष्यभूतार्थवाचकमृगशब्दस्य प्रातिपदिकत्वात् दृशिक्रियाकर्मत्वात् च द्वितीयापत्तौ धावन्तं मृगं पश्य इतिवत् पश्य मृगं धावति इति अनिष्टप्रयोगः आपद्येत। पश्य मृगं धावति इति प्रयोगे तु मृगस्य द्वितीयाविभक्त्यन्तत्वेन धावतेः प्रथमाभिन्नविभक्तिसामानाधिकरण्यात् अप्रथमासमानाधिकरणे प्रथमेतरविभक्त्यन्तसमानाधिकरणे शतृशानचोः नित्यत्वात् पश्य मृगो धावति इति प्रयोगस्य विलये सति धावन्तं मृगं पश्य इत्यापत्तेः प्रकृतप्रयोग एव न स्यादिति भावः। यद्युच्यते, तम् इति कर्म अध्याहृते, धावनानुकूलकृतिमान् मृगः इति एकः बोधः, तत्कर्मकदर्शननिरूपिताश्रयतावान् त्वम् इति अपरो बोधः। तथा सति तु भाष्यसम्मतैकवाक्यताभङ्गापत्तिः। तत्र हि भाष्ये पश्य मृगो धावति इत्यत्र मृगकर्तृकोत्कटकधावनं दृशिक्रियायां कर्म। प्रधाना दृशिक्रिया तत्र धावनक्रियायाः कर्मत्वेन अन्वेति इत्युक्त्वा एकवाक्यता प्रदर्शिता। तमिति अध्याहृते तु तत्र वाक्यद्वयं स्यादिति दोषः।

**2. अत्र प्रमाणानि**

**महाभाष्यम्** - पचति भवति इत्यत्र पचिक्रियाकर्तृका सत्ता इति बोधः। *पच्यादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति* इति भूवादिसूत्रभाष्यात् तदर्थलाभः। त्वं पचसि भवति इत्यस्य त्वदभिन्नाश्रयनिष्ठपाकाभिन्नाश्रयिका भवनक्रिया इति बोधः। नैयायिकोक्तरीत्या प्रथमान्तार्थस्य मुख्यत्वे तु अयं शाब्दबोधः न सम्भवति। त्वं पचसि भवति इत्यत्र भवसि इत्यापत्तिः, युष्मदर्थस्यैव प्राधान्येन भवतिक्रियायाः कर्तृत्वापत्तिश्च। वैयाकरणमते तु पाकक्रियाया एव प्राधान्यात् भवति इति प्रथमपुरुषोपपत्तिः। तेन शाब्दबोधे क्रियाया एव प्राधान्यं नतु प्रथमान्तार्थस्य इति सिद्ध्यति।

**महाभाष्यप्रदीपः** - *कर्तृकर्मभावेन क्रिया आख्यातवाच्यक्रियया सम्बध्यत एव - भवति पचति, पश्य मृगो धावतीति। करणादिभावेन तु न सम्बध्यते। तथा प्रयोगादर्शनात्।* इति।

**वाक्यपदीयम्** - *सुबन्तं हि यथानेकं तिङन्तस्य विशेषणम्। तथा तिङन्तमप्याहुस्तिङन्तस्य विशेषणम्।।*

**4. नैयायिकैः स्वमतसमर्थने युक्तिप्रदर्शनम्**

नैयायिकाः विशिष्टार्थवाचकस्य धावति मृग इति वाक्यस्य कर्मत्वेऽपि पृथक् मृग इत्यस्य प्रातिपदिकत्वाभावात् न द्वितीया इत्युक्त्वा द्वितीयपत्तिरूपदूषणं परिहरन्ते। तदित्थम् - उत्तरदेशसंयोगानुकूलोत्कटधावनानुकूलकृत्याश्रयः मृगः इति विशिष्टार्थस्य वाचकं मृगो धावति इति वाक्यं यद्यपि दृशिक्रियायाः कर्म तथापि कृत्तद्धितसमासाश्च इति सूत्रस्थसमासग्रहणेन वाक्यस्य प्रातिपदिकाभावासम्पादकत्वनियमात्, केवलमृगस्य प्रातिपदिकसम्भवत्वे अपि कर्मत्वपर्याप्तवाचकत्वाभावात् कर्मणि द्वितीया इति द्वितीयायाः अप्राप्तिरेव।

**5. नैयायिकमतनिराकरणम्**

पूर्वोक्तरीत्या द्वितीयापत्तिवारणं न सम्भवति। तथाहि अनभिहिते इति अधिकारसूत्रप्रघट्टके अभिधानं च तिङ्कृत्तद्धितसमासैः इति एतत्परगणनप्रत्याख्यानपरभाष्यरीत्या द्वितीयापत्तिः अस्त्येव। तथाहि - कटं भीष्मं कुरु इत्यादौ विशेष्यकटशब्दात् उत्पन्नद्वितीयया कर्मत्वस्य उक्तत्वात् विशेषणीभूतभीष्मशब्दात् द्वितीया न स्यात्। अतः परिगणनं भाष्ये कृतम्। तत्प्रत्याख्यानं कृतं च सर्वकारकाणां

साक्षात्स्वाश्रयद्वारा वा अरुणाधिकरणन्यायेन भावनान्वयस्वीकारात्।अत एवोक्तं भाष्ये कटोऽपि कर्म, भीष्मादयोऽपि इति। तत्र द्वितीयया कटनिष्ठकर्मत्वोक्तावपि भीष्मत्वादिगुणविशिष्टकर्मत्वानुक्तेः तस्मात् द्वितीया इति तात्पर्यम्। उभयोः पश्चात् परस्परम् अन्वयस्तु विशेष्यविशेषणभावेन। एवमेव एतादृशान्वयः अरुणाधिकरणे - *अरुणया पिङ्गाक्ष्या एकहायिन्या सोमं क्रीणाति* इत्यत्र क्रयणक्रियायां मीमांसकैः स्वीकृतः वर्तते। एवञ्च प्रथमं क्रियायां सर्वेषाम् अन्वयः स्फुटमुक्तं पश्चात् विशेष्यविशेषणभावेन परस्परम् अन्वयः प्रतिपादितः वर्तते।

तस्मात् महाभाष्योक्तरीत्या मीमांसकारुणाधिरणन्यायरीत्या च प्रतिपादितत्वात् धावति मृग इति उभयोः अनयोः दृशिक्रियाकर्मत्वे धावतीत्यस्य प्रातिपदिकत्वाभावात् द्वितीयोत्पत्तेः अभावेऽपि मृगशब्दात् द्वितीया दुर्वारा एव। शाब्दिकमते तु धावनक्रियाविशेषणत्वेन इतरार्थे निराकाङ्क्षत्वात् मृगशब्दान्न द्वितीया। तार्किकमते तु विशेष्यार्थवाचकात् मृगशब्दात् द्वितीया अवश्यम्भाविनी इति ज्ञेयम्।

**6. पश्य मृगो धावति इत्यत्र नैयायिकाभिमतम्**

पश्य मृगो धावति इति प्रकृतवाक्यस्थले एभिः नैयायिकैः वैयाकरणानुसारेण मृगकर्तृकधावनकर्मकं दर्शनम् इति बोधस्तु अवश्यं स्वीक्रियते। पश्य मृगो धावति इत्यत्र नैयायिकमतेन यद्यपि एकवाक्यत्वं न उपपद्यते तथापि स्वमतसमर्थनाय पन्थाः दृश्यते। नहि सर्वत्र प्रथमान्तार्थमुख्यविशेष्यक एव बोध इति नियमः तेषां मते। यथोक्तं हि गदाधरभट्टाचार्यैः व्युत्पत्तिवादे - "अत एव यत्र विशेष्यवाचकसमानविभक्तिकपदं निपातपदं वा नास्ति, तत्र प्रथमान्तार्थस्य विशेष्यभासकसामग्र्यभावात् असौ मुख्यविशेष्यतयैव भासते।" इति। तेन चैत्रः इत्यादौ समानविभक्तिकपदान्तरासत्त्वे प्रथमान्तार्थस्य चैत्रादेः विशेष्यभासकसामग्र्यभावात् चैत्रादिः विशेष्यतयैव भासते । एवमेव पचति इत्यस्मात् पाकानुकूला भावना इति भावनामुख्यविशेष्यकबोधः, रामेण सुप्यते इत्यस्माच्च रामकर्तृकः स्वापः इति धात्वर्थमुख्यविशेष्यकबोधः नैयायिकैः स्वीक्रियत एव। तेन पश्य मृगो धावति इत्यत्र तु धात्वर्थव्यापारमुख्यविशेष्यकबोधः इति नैयायिकानामपि स्वीकृतिरिति नास्ति काचिदपि विप्रतिपत्तिरिति ममाशयः।

**7. उपसंहारः -**

शाब्दबोधो नाम शब्दजन्यं ज्ञानम्। तत्र एकस्मिन् वाक्ये प्रयुज्यमानेषु बहुषु पदेषु किं मुख्यविशेष्यम्, किं विशेषणम्, किञ्च अवान्तरविशेषणमिति विचारणीयं भवति। तत्र वैयाकरणाः नैयायिकाश्च भिन्नसरणिम् आश्रयन्ते। परन्तु समेषां तत्र शाब्दबोधरूपं फलं समानतया एव अभिप्रेतमस्ति। नहि काचित् विलक्षणता बोधे परिलक्ष्यते। मतानैक्यं केवलं बोधप्रक्रियावर्णने एव दरीदृश्यते अस्माभिः। तत्रापि क्वचित् साम्यम्, क्वचिच्च वैषम्यम्, नतु सर्वत्र इति अवश्यं बोध्यम्। तथाहि - तिङन्तासमभिव्याहारस्थले प्रथमान्तार्थविशेष्यकबोध एव सर्वैः स्वीक्रियते इति साम्यं निश्चप्रचम्। तिङन्तसमभिव्याहारस्थले तु - नैयायिकैः प्रथमान्तार्थमुख्यविशेष्यकः, वैयाकरणैः व्यापारमुख्यविशेष्यकः च बोधः इति स्वीक्रियते।

एवं हि तत्र तत्र विद्वद्भिः अनुभवानुसारिव्युत्पत्तिबलात् कुत्र किंविशेष्यकबोधः उचितः इति निर्णेयमिति। तदेवं वदति अस्माकम् आचार्यः पाणिनिः - *प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वात्* इति। तस्यायं भावः - प्रधानं प्रत्ययस्यार्थ इति वचनं न कार्यम्, अर्थस्य तथा बोधस्य अन्यप्रमाणत्वात् व्युत्पत्त्यनुसारित्वादित्यर्थः।

व्याकरण-न्यायमतयोः तुलना

| विषयः | वैयाकरणाः | नैयायिकाः |
|---|---|---|
| धात्वर्थः | फलम्, व्यापारश्च | फलम्, व्यापारश्च |
| आख्यातार्थः | कर्ता कर्म, संख्या, कालः | कृतिः, संख्या, कालः |
| अन्वयप्रकारः | फलं कालश्च व्यापारे, संख्या कर्तरि कर्मणि वा, कर्ता व्यापारे विशेषणम् | फलं व्यापारे, संख्या कर्तरि कर्मणि वा, व्यापारः कालश्च कृतौ, कृतिः कर्तरि विशेषणम् |

| | | |
|---|---|---|
| शाब्दबोधप्रकारः | व्यापारमुख्यविशेष्यकः | प्रथमान्तार्थमुख्यविशेष्यकः |

**आकरग्रन्थाः**


- श्रीनागेशभट्टः, परमलघुमञ्जूषा (भावप्रकाशिका-बालबोधिनी-संस्कृतहिन्दीव्याख्योपेता), सम्पा. डॉ. जयशङ्करलाल त्रिपाठी, चौखम्बा कृष्णदास अकादमी, वाराणसी, 2017 (पञ्चमसंस्करणम्)
- शाब्दबोधमीमांसा, एन. एस. रामानुज ताताचार्यः, पांडिचेरी फ्रेंच इंस्टीट्यूट, राष्ट्रियसंस्कृतसंस्थानम्, 2005 (प्रथमो भागः)
- विश्वनाथपञ्चाननभट्टाचार्यः, न्यायसिद्धान्तमुक्तावली (प्रभाव्याख्योपेता), व्यासप्रकाशन, वाराणसी, 1990
- कौण्डभट्टः, वैयाकरणभूषणसारः (सावित्रीहिन्दीव्याख्योपेतः), सम्पा. डॉ. आद्याप्रसादमिश्रः,
- सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1989


***************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# आगमविभागनिरूपणपूर्वकतन्त्रोक्तविषयविवरणम्

एस्. पि. दयानन्दः, शोधच्छात्रः, मैसूरु, कर्नाटक

**पीठिका-**

आगतं पञ्चवक्त्रात् गतं च गिरिजामुखे । मतञ्च वासुदेवस्य तस्मात् आगममुच्यते ॥ इति आगमपदस्यार्थः । शिवोदितं सिद्धान्ताख्यं शैवतन्त्रमिति प्रोक्तं एतत् सर्ववेदार्थरूपत्वात् सदा वेदवत् प्रामाण्यम् इति सिद्धान्तशिखामणौ आगमाविभागः एवं निरूपितम् । कथितं च एतत् यद् विद-ज्ञाने इति विद् धातुनिश्पन्नस्य वेदशब्दस्य ज्ञानमर्थः इति । एवं गत्यर्तकः गम्लृ धातुनिष्पन्नस्य आगमसमर्थः । अर्थात् परंपरात् आगतोऽयम् आगम इत्यवगम्यते ।

आगमा बहुधा प्रोक्ताः शिवेन परमात्मना । शैवं पाशुपतं सोमं लाकुळं चेति भेदतः ॥
तेषु शैवं चतुर्भेदंतन्त्रं सर्वविनिश्चितम् । वामं च दक्षिणं चैव मिश्रं सिद्धान्तसंज्ञकम् ॥
शक्तिप्रधानं वामाख्यं दक्षिणं भैरवात्मकम् । सप्तमातृपरं मिश्रं सिद्धान्तं वेदसम्मतम् ॥
वेदधर्माभिधायित्वात् सिद्धान्ताख्यः शिवागमः । वेदबाह्यविरोधित्वात् वेदसम्मत उच्यते ॥
वेदसिद्धान्तयोरैक्यम् एकार्थप्रतिपादनात् । प्रामाण्यं सदृशं ज्ञेयं पण्डितैरेतयोः सदा ॥ (सिद्धान्तशिखामणिः, ५.९. ९-१३)

शिवः आगमा बहुधा इति प्रोक्ता, शैव पाशुपत सोम, लाकुळः च इति भेदतः । तेषु चतुर्भेदं शैवं, तन्त्रं चतुर्भेदं सर्वविनिश्चितम् । वामं च दक्षिणं च एव मिश्रं सिद्धान्तसंज्ञिकम् । वामाख्यं शक्तिप्रधानं, दक्षिणं भैरवात्मकं च । मिश्रं सप्तमातृपरं सिद्धान्तं वेदसम्मतम् इत्यादिना सुस्पष्टमेव सर्वेषां नास्तिकानाम् आस्तिकानाञ्च आगमानां विभागः कृतः । एवं सौर-गाणपत्यादितन्त्राण्यपि श्रूयन्ते । किञ्च पाञ्चरात्रागमाः १०८, शाक्तागमाः ६४, उपतन्त्राणि ३२७, शैवतन्त्राणि २८, उपतन्त्राणि १२७, ऐष्णवतन्त्राणि ७५, उपतन्त्राणि २०५, इत्यादिप्रभेदाश्च श्रूयन्ते ।

**आगमानां कालः-**

आगमसंस्कृतिसत्तायाः समयनिर्णये चिकीर्षते- सिन्धूपत्यकायां "हरप्पा-मोहेञ्जोदारो" भूखननोपलब्धस्य प्रागैतिहासिकसंस्कृतिसूचकस्य वस्तुजातस्य परिशीलने च एवं विज्ञायते- यत् शैवागमपरंपरायाः सत्ताः इतः पूर्वं पञ्चसहस्रवर्षपूर्वा इति ।यद्यपि आगमोक्तस्य भाषाशैल्यादिकस्य पर्यालोचने तद्गताचारपरिशीलने च आगमानामर्वाचीनत्वं सुस्पष्टम्; तथाप्यागमिकी संस्कृतिः प्राचीनाः यतः पाञ्चरात्रागमोक्ता पूजापद्धतिः क्रि. पू. द्वितीयशतककालिकत्वेन ज्ञायमानस्य महाभारतस्य शान्तिपर्वणि १५ तमेऽध्याये निरूपिता । किञ्च क्रि.पू. पञ्चमशतककालिकत्वेन निर्दिश्यमानाः । भगवद्गीतायां पाञ्चरात्रागमोक्तं वासुदेवमहत्वं दृश्यते । पाञ्चरात्राणां 'सात्वत' संज्ञा तु ऐतरेय-शतपथब्राह्मणयोः निरूपिता । अन्यञ्च भगवद्गीतायां शैवागमोदिता बहवो विषयाः यथाश्रुतं निबद्धाः । एभिः कारणलापैः पाञ्चरात्रागमाः क्रिस्तोः पूर्वं चतुर्दशशतकात् पूर्वजा इत्यवगम्यते । डा. एस्. सि. नन्दीमठ महोदयास्तु 'पाञ्चरात्रागमेषु शैवागमानां प्रस्तावो दृश्यते, परन्तु वैष्णवागमानामुल्लेखः शैवागमेषु नास्ति' इत्यतः शैवागमाः वैष्णवागमापेक्षया प्राचीनतराः इत्यवदन् । अत एव शैवागमाः कनिष्ठं द्विसहस्रवर्षपूर्वम् आसन्निति भूतपूर्वराज्यपालाः श्रीरङ्गनाथदिवाकरमहोदयाः लिलिखुः । क्रि. श. पञ्चमशतकीयासु काञ्चीशिलालेखासु २८ शैवागमानाम् उल्लेखो दृश्यते ।

भगवद्गीतायां पाञ्चरात्रागमोक्ता वासुदेवमहत्वम् उच्यते । पाञ्चरात्राणां 'सात्वत' इति संज्ञा ऐतरेय, शतपथब्राह्मणेऽपिच उक्तम् । पुनः भगवद्गीतायां शिवागमेषु निरूपितानेकविषयाः यथाश्रुता अक्तम् । एतादृश इत्यादि कारणेन पाञ्चरात्रागमाः क्रिया चतुर्दशशतमानेऽपि पूर्वतमम् इति मन्यते । अयं विषयः मल्लादि सूर्यनारायणशास्त्रीविरचितसंस्कृतवाङ्मयचरित्रमु' ग्रन्थे पृष्टसंख्या ७१ उल्लिखितम् । डा. एस्. सि. नन्दीमठ महोदयः एवंरीत्या उक्तम्- पाञ्चरात्रागमेषु शिवागमानां प्रस्तापः अस्ति । परन्तु वैष्णवागमानाम् उल्लेखः शैवागमेषु नास्तीति । तत् कारणेन शैवागमाः वैष्णवागमानां प्रति प्राचीनम् इति वक्तुं शक्यते ।

**काञ्चीशिलाशासनेषु शिवलिङ्गधारिणां राज्ञां प्रस्तावः ।**

विदितचरमेवैतत् यत् क्रिस्तादनन्तरं प्रथमशताब्द एव महामाहेश्वराणां जङ्गवपुङ्गवानां शैवाचार्याणां मठः श्रीशैलमहाक्षेत्रे आसीदिति विद्वद्भिराद्रियते । क्रि.श. १५० समये शिवभक्ताग्रेसराः "भारशिव"वंशीयाः राजानः शिवलिङ्गधारिण आसन् । यतस्तदानीन्तन-शिलालेखेषु "अंसभारसन्निहितशिवलिङ्गोद्वहनशिवपरितुष्टसमृत्पादितराजवंशानां" इत्यादिका उल्लेखा दृश्यन्ते ।

### शैवागमपरंपरा-

आगमग्रन्थरचनायाः अर्वाचीनत्वेऽपि तत्संप्रदायस्य प्राचीनत्वमुपपादितम् । स्वयमागमशब्दार्थ एव तेषां परंपरागतत्वं पिशुनयति । भगवद्गीतोक्तध्यात्मविद्या यथा भगवता विवस्वते , ततः मनवे, तत् इक्ष्वकवे इत्यादिपरंपरया आगताः तथैव आगमपरंपरापि उपदिष्टा । अनया दिशा कामिकादिवातुलान्ता अष्टाविंशत्यागमा इथं निर्दिश्यन्ते । क्रि.श. ५ तनु शतमानस्य कश्चिशिलाशासनेषु अष्टाविंशति शिवागमानां नामानि अस्ति । तेषां नामानि एवं वर्तते । कामिक-योगज-चिन्त्य-कारण-अजित-दीप्त-सूक्ष्म-सहस्र-सुप्रभ-अंशुमत्-विजय-निश्वास-स्वायंभुव-अनल-मार-रौरव-मुकुट-विमल-चन्द्रज्ञाना-बिम्ब-ललित-प्रोद्गीत-सिद्ध-सन्तान-सर्वोक्त-पारमेश्वर-किरण-वातुला इति । उक्तं च मुद्रितमृगेन्द्रागमभूमिकायाम्- कामिकं योगजं वाथ तथाचिन्त्यश्च कारणम् । अजितं दीप्तसूक्ष्मौ च सहस्रश्च तथांशुमान् ॥ सुप्रभेदस्तथा ह्येते शैवाः संपरिकीर्तिताः ॥ इति ॥ किं चात्र कामिकस्य त्रय उपभेदाः उक्ताः- नारसिंहं च वक्त्रारं भैरवोत्तरमेव च । नारसिंहाख्यमेवैतन्मृगेन्द्रमिति कथ्यते ॥ इति ।

अत्र प्राथमिकाः दशागमाः "शैवागमा" इति, अवशिष्टाः आगमाः "रुद्रागमा" इति कथ्यन्ते । तत्र शैवागमा: वारत्रयं, रुद्रागमा द्विवारं च पुनर्ग्रथिता इति ज्ञायन्ते । तत्र प्रथमः कामिकः पूर्वं प्रणवाय, ततः त्रिकालाय, त्रिकालात् हराय वारत्रयं कथित इत्यनुश्रूयन्ते । एवमन्येऽपि शैवागमाः तथैव । रुद्रागमेषु विजयागमः प्रथमतः रुद्राय, ततः परमेशाय इति द्विरावृत्तः ।

इत्यंशोक्त पाञ्चरात्राद्यागमेष्वपि आवृत्तिर्दृश्यते । अत एव सुप्रभेदे विस्तृतात् ग्रन्थान्तरात् संगृहीता "आकुञ्चिता वृत्तिः" इत्युक्तम् । किञ्च तत्र तत्र "सारात् सारतरः" इत्याद्युल्लेखाः इममेवार्थं समर्थयन्ति ।

### आगमोक्ता विषयाः-

आगमेषु क्रिया, चर्या, योगः, ज्ञानं (विद्या) इति पादचतुष्कं विद्यते । अद्योपलभ्यमानेष्वागमेषु केचन पादा न विद्यन्ते । तदुक्ता विषया अत्र सङ्गृह्यन्ते-

### क्रियापादः-

अस्मिन् पादे देवालयानां संस्थापनं, मूर्तिरचना, तत् प्रतिष्ठादयो विषयाः प्रतिपादिताः । सुप्रभेदे कामिकादिषु च देवतागाररचनाविचाराः, सुविपुलमुपलभ्यते । निसर्गरमणीये पवित्रोद्देशे देवतायतानि स्थापयितव्यानि । तत्र प्रथमतः क्षेत्रं कर्षणादिना संस्कृत्य व्रीह्यादि बीजान्यवोप्य, वर्धितेषु व्रीह्यादिषु तान् पशुपक्षिभ्यो वितीर्य, ततस्तत्रालयनिर्माणं कार्यम् । शुभेऽहनि शङ्कुं संस्थाप्य विध्युक्तं बलिहरणादिकमाचरेत । यद्यप्यालयनिर्मितिः मूर्तिपूजादिकञ्जनमनोरञ्जनायेति केषाञ्चिदाशयस्तथापि तेन शिल्पशास्त्रोज्जीवनमभूत् । शिल्पशास्त्रोद्गमे आगमा एव निदानम् । वैदिकसाहित्ये प्रायः अस्य नातीवावकाशः, मूर्तिपूजया आकरं आगमा एव । आगमोक्तं शिल्पशास्त्रवैभवमद्यापि एल्लोर-अजन्त-एलिके-टा-बादामी-हलेबीडु-सोमताथपुर-हम्पी-लेपाक्षीत्यादिषु विश्वविख्यातेषु देवायतनेषु गुहान्तर्देवालयेषु च दरीदृश्यते । देवालयनिर्माणे तावत् गर्भन्यास-पीठ-कण्ठ-मण्टप-प्राकारादिसूक्ष्मविषया अपि आगमेषु सम्यक् उपनिबद्धाः । विग्रहाराधनं यद्यपि न वैदिकयुगीनामिति सन्दिहन्ते संशोधकाः, तथापि तत् यास्क-पाणिन्यादिभ्योऽपि मूर्तिपूजा प्राचीनत्यवधार्यते, यतः श्रुतिषु "रा ते रुद्र शिवा तनूः" "रुद्रो वा एष यदाग्निस्तस्येते तनुवौ , घोरान्या, शिवान्या" इति मूर्तिविषयः सूचितः । उक्तं च- घोरा शिवा महेशस्य मूर्तिर्देवैः प्रकीर्तिता । नमकैः पूज्यते घोराशिवा च चमकार्चिता ॥ इति । अग्निस्वरूपाय रुद्राय द्वौ तनौ वर्तते । एकं घोरम् अन्यम् अघोरम् इति ।शिवस्य शरीरं निर्दिश्यते । इत्याद्युक्तयः भगवतः शरीरवर्णनं कुर्वन्ति । मानसि-कैकग्रतासाधनाय विना विग्रहाराधनं नास्त्यपरमुत्तमं साधनमिति स्वामीविवेकानन्दा "हिन्दूधर्मसारे" अवोचन् । विग्रहेषु चलाचलप्रभेदाः सन्ति । मूर्तयः सकलाः लिङ्गानि निष्कलानीति उच्यन्ते ।

### चर्यापादः-

पादेऽस्मिन् मानवप्रतिष्ठितानां मूर्तीनां पूजोत्सवादिप्रकाराः प्रतिपादिताः । स्नानार्चननैवेद्यादिकानांच विधानादिकं, अग्निकुण्डसमिदादीनां च निरूपणं कृतम् । आगमिकक्रियाकलापेषु शैवाग्निहोत्रस्य प्राधान्यः, न तु वैदिकाग्नेः, यतो वैदिकाग्नितः शैवाग्निः प्रशस्ततरः । दीक्षितः शैवाग्निमेवोपयुञ्जीत । पारमेश्वरतन्त्रे वीरशैवैरपि शिवदीक्षादिषु कर्माङ्गभूतहवनादिकं कर्तव्यमित्युक्तम् ।

### योगपादः-

पातञ्जलस्य योगशास्त्रस्य आगमा एव मूलमिति विद्वद्भिरभ्यूह्यते । ईशानशिवगुरु –निजगुणशिवयोगिप्रभृतयः आगमोक्तमेव योगपद्धतिम् अनुसृत्याष्टाङ्ग-योगसाधनं निरूपयन् । यम-नियम-आसन-प्राणायाम-प्रत्याहार-ध्यान-धारण-समाधि इति अष्टाङ्गयोगः अस्ति ।

**ज्ञानपादः-**

पति-पशु-पाशात्मकः त्रिकसिद्धान्तः अस्मिन् पादे प्रस्तूयते । अस्यैव भारतीयसंस्कृतिभूमिकायां प्ररूढस्य पाशुपतसिद्धान्तात्मकस्य शैवसन्तानपादपस्य बीजं षड् त्रिंशत् तत्त्वसन्दोहः । अयं च सन्दोहः परमशिवडमरुत्थितेषु माहेश्वरसूत्रेषु अभिव्यक्तः परमेश्वरास्थाने प्रमथाग्रगण्येन आचार्यनन्दिकेश्वरेण ऐदम्प्राथम्येन तद्रचितासु नन्दिकेश्वरकारिकासु षट् त्रिंशत् तत्त्वबीजानि जगत् सृष्टिमूलानीति निर्दिष्टानि । शिव-शक्ति-सदाशिव-ईश्वर-शुद्धविद्या-माया-कला-काला-अविद्या-राग-काल-नियति-पुरुष-प्रकृति-चित्त-बुद्धि-अहंकार-मनः-श्रोत्र-त्वक्-नेत्र-जिह्वा-घ्राण-वाक्-पाणि-पाद-पायु-उपस्था-शब्द-स्पर्श-रूप-रस-गन्ध-आकाश-वायु-वह्नि-जल-पृथिवी इति षट् त्रिंशत् तत्त्वपुञ्जः । एते एव जगत् सृष्टिविषये बीजरूपेण निर्दिशति । तस्यैव शैवसन्तानभूरुहस्य शाखोपशाखाः विश्वमभिव्याप्य विराजन्ते । तेषु द्वैतशैवसिद्धान्तशैव-शैवद्वैत द्वैतद्वैत-शिवविशिष्टाद्वैत-शैवविशेषद्वैतप्रमुखा यथावकाशमत्र संक्षेपतो निरूप्यन्ते ।

**उपसंहारः-**

भारतीयसंस्कृतेः आधारभूताः ग्रन्थाः वेदाः, ऋग्वेद-यजुर्वेद-सामवेद-अथर्ववेदः च इति चत्वारः स्मृतयः, इतिहासपुराणानि, आगमाः च । तत्र वेदाः साक्षात् भगवतः सकाशादेव आविर्भूताः । स्मृतयः च भगवतः प्रेरितैः ऋषिभिः मनुपराशरादिभिः ग्रथिताः । इतिहासपुराणानि च भगवतः अभिमतानुरोधेन वाल्मीकिव्यासप्रभृतिभिः समारचिताः । एवम् आगमाः अपि भगवतः एव साक्षात् जनानां मोक्षप्राप्तये उपदिष्टाःइति विज्ञायते । एवं भारतीयसंस्कृतेः मूलभूता भाषा संस्कृतभाषा । तस्यां भाषायां उपनिबद्धाः श्रुतिस्मृतिपुराणागमादयः सर्वेऽपि सर्वेषामपि जनानां कृते मोक्षमार्गप्रदर्शनायैव प्रवृत्ताः सन्ति । शैवागमेषु दीक्षाद्वारा शिवभक्ताः मोक्षं प्राप्नोति इति सम्यक् निरूपितम् । आगमाध्यनेन मानसिकस्वास्थ्यं भवति । मानसिकस्वास्थ्यं कारणेन परोपकारबुद्धिः संभवति तथा च सामाजिकस्वास्थ्यं भवति इति शम् ।

**परामर्शनग्रन्थाः**

१. आगमपरिज्ञानम्, प्रभातिलक-शंभुलिङ्ग शिवाचार्यः, पंचाचार्य प्रेस्, मैसूरु-१९८६
२. किरणागमे विद्यापाद-राजरथि शिवाचारियर् इन्ट्रनेट् डिजिटल् काफि
३. किरणागम- राजरथि शिवाचारियर् इन्ट्रनेट् डिजिटल् काफि
४. पौष्करागम-पण्डित् के. रामचन्द्र शर्मा, अध्यार लैब्ररि एण्ड् रिसर्च सेण्टर्, मद्रास-१९९४
५. वातुलशुद्धागम ज्ञानपाद, आगम अकाडेमि, मद्रास्
६. तत्त्वप्रकाश, भोजराजः
७. श्रीकण्ठभाष्यम्, श्रीकण्ठशिवाचार्यः
८. शैवसिद्धान्तपरिभाषा, कविराजशेखरसूर्यभट्टः
९. चन्द्रज्ञानागम, एम्. शिवकुमारस्वामी
१०. निगमागम संस्कृतिः, व्रजवल्लभ द्विवेदी
११. संस्कृतसाहित्येतिहासः, आचार्यः लोकमणिदहालः
१२. संस्कृतसाहित्यविमर्शः, पण्डित द्विज्येन्द्रनाथः

**एस्. पि. दयानन्दः**
शोधच्छात्रः
संस्कृत अध्ययन विभागः, मानसगङ्गोत्री,
मैसूरु विश्वविद्यालयः- 570006
मैसूरु, कर्नाटक
Contact No. : 9880642758
E-mail : spmaradi@gmail.com

*********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# आख्यातार्थनिर्णये वैयाकरणनैयायिकयोर्विरोधः

**आलोक सेन,** पश्चिमबंगाल

**उपोद्घातः**

न्यायदर्शने स्वीकृतेषु प्रमाणचतुष्टयेषु शब्दप्रमाणमन्यतमम्। एकपदार्थेण सह अपरपदार्थस्य संसर्गज्ञानं विना वाक्यगतशाब्दबोधाभावाद् बोद्धुं शक्यते वाक्यार्थज्ञाने शब्दप्रमाणस्योपयोगत्वम्। शाब्दबोधं प्रति पदज्ञानं करणं भवति। तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वमिति नियमात् पदार्थस्मरणं हि शाब्दबोधं प्रति व्यापारो भवति। यतः पदार्थस्मरणं हि पदज्ञानजन्यं पदज्ञानजन्य-शाब्दबोधजनकश्चेति युक्तं तस्य व्यापारत्वमिति। अत्रवक्तव्यं यत्पदज्ञानजन्यपदार्थस्मरणं व्यापारः इति बोध्यम्। अन्यायाः पदार्थ-स्मरणात्प्राक्पदज्ञानजन्यत्वनिवेशनाभावे प्रत्यक्षादिना पदार्थोपस्थितावपि शाब्दबोधापत्तिः स्यात्। अपि च शाब्दबोधं प्रति वृत्तिज्ञान-स्यापि सहकारिकारणत्वमस्तीति मनन्ति नैयायिकाः। तदुक्तं कारिकावलीकृता -

पदज्ञानन्तु करणं द्वारं तत्र पदार्थधीः। शाब्दबोधः फलं तत्र शक्तिधीः सहकारिणी[1] ॥इति॥

ननु केयं शक्तिरिति जिज्ञासायामुच्यते - शक्तिश्च पदेन सह पदार्थस्य सम्बद्धः। स च अस्माच्छाब्दादयमर्थो बोद्धव्य इतीश्वरेच्छारूपाइति। अत्र शब्दोत्तरपञ्चम्या जन्यत्वर्थो भवति। तस्य च धात्वर्थबोधेऽन्वयः। तव्यप्रत्ययस्य विषयताश्रयोऽर्थः। एवं चैतदर्थविशेष्य-कैतच्छब्दजन्यबोधविषयत्वप्रकारकेच्छारूपैव शक्तिः। ननु ईश्वरेच्छा शक्तिश्चेत् सा समवायेन ईश्वरे वर्तते न तु पदे। तथाहि पदे शक्त्यभावात्पदार्थबोधो न स्यात् शक्तस्येव पदार्थस्यार्थबोधकत्वनियमादिति चेन्न, इदं पदमिदमर्थं बोधयतु इत्यत्र एतदर्थविषयक-बोधजनकतात्वावच्छिन्नप्रकारतानिरूपितविशेष्यतासम्बन्धेन तादृशेच्छायाः पदे सत्त्वाद् एतत्पदज्ञानजन्यबोधविषयतात्वावच्छिन्न-प्रकारतानिरूपितविशेष्यतासम्बन्धेन तदृशेच्छायाः पदार्थे सत्त्वात् पदपदार्थयोः शक्तिः वर्तते। परन्तु कश्चन जनः नवजातस्य नाम करोति देवदत्तः। तथाहि ईश्वरेच्छायाः शक्तित्वे पुत्रादौ पित्रादिसंकेतितदेवदत्तादिनाम्नः शक्तिः न स्यात् भगवदिच्छायाः तत्राभावादिति चेन्न, आधुनिके नाम्नि शक्तिरस्ति एव, एकादशेऽहनि पिता नाम कुर्यात् इति ईश्वरेच्छायाः सत्त्वात्। तथापि पूर्वपक्षिणो मतमिदं निराकर्तुं नव्यन्यैयायिकैरुक्तम्-आधुनिकसंकेतितेऽपि शक्तिरस्त्येवइति। नव्यन्यैयायिकानां नये ईश्वरेच्छा न शक्तिः। परन्तु ईश्वरेच्छा जीवात्मेच्छा चोभयानुगतेच्छात्वजातिरेव शक्तिः। अतः पदे शक्तिरस्त्येव। ननु शक्तिज्ञानस्योपायः कः? कस्यापि पदस्य कस्मिन्नर्थे शक्तिः विद्यते इत्यादीनां प्रश्नानां समाधानं कर्तुं कथ्यते- शक्तिग्रहस्तु व्याकरणोपमानकोषाप्तवाक्यव्यावहारवाक्य- शेषसिद्धपदसान्निध्येभ्यो भवति। तदुक्तं न्यायसिद्धान्त-मुक्तावल्याम्-

शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च। वाक्यस्य शेषाद्विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः[2] ॥इति॥

अतः व्याकरणादितः शाब्दबोधो भवतीति मतं नैयायिका अपि स्वीकुर्वन्ति। तथापि कुत्रचित् नैयायिकेभ्यः गृहीतेन सिद्धान्तेन विरोधो भवति चेत्तर्हि तत्त्यज्यते। शक्तिग्रहविषये नैयायिकवैयाकरणयोर्वैमत्यमपि सुस्पष्टम्। तदैवाधस्तात् निरूप्यते–

**नैयायिकवैयाकरणयोर्विरोधः**

वैयाकरणाः कथयन्ति वाक्यस्थितानां धातुप्रकृतिप्रत्ययसमासादीनां शाब्दबोधो व्याकरणाद्भवति। धातुर्नाम भूपचादयः। प्रकृतिः निपात-रूपा प्रातिपदिकरूपा च। प्रत्ययाः स्वादितिबादिविभक्तयस्तद्धिताख्यातकृतश्च। यथा भूसत्तायां वर्तमाने लडित्यादिव्याकरणात्सत्ताद्यर्थे भ्वादिधातोः वर्तमानाद्यर्थे तिबादिप्रत्ययस्य समुच्चयाद्यर्थे चादिनिपातस्य पाककर्तृत्वाद्यर्थे पाचकादिप्रातिपदिकस्य एकत्वाद्यर्थे स्वादि-प्रत्यस्य शक्तिग्रहः। आखातस्य शक्तिग्रहविषये नैयायिकवैयाकरणयोर्विरोधऽधस्तादुपस्थाप्यते।

रामः पचति इत्यस्य वाक्यस्य नैयायिकदिशा वैयाकरणदिशा च शाब्दबोधे उभयोर्मतपार्थक्यं स्पष्टं भवति। रामः पचतीत्यत्र प्रथमान्तरामपदात् राम सु इति, पचति इत्यतः पच् ति इति प्राप्यते। यत्र राम सु इत्यतः रामनामकव्यक्तिविशेषस्योपस्थितिर्जायते, पच् इत्यतः पाकक्रियायाः, आख्याततश्च कर्तुरुपस्थितिः। वैयाकरणैराख्यातस्य कर्तर्येव शक्तिः उच्यते। तथाहि तेषां नये आख्याततः कर्तुरुपस्थितिर्जायते। 'भावप्रधानमाख्यातम्'[3] इति निरुक्तवचनाज्ज्ञायते वैयाकरणाः वाक्ये क्रियायाः प्राधान्यमङ्गीकुर्वन्ति। अतः पाकक्रियैवास्य वाक्यस्य विशेष्योऽस्ति। भर्त्तृहरिणापि वाक्ये क्रियाया एव प्राधान्यमङ्गीकृत्य उक्तम्- 'धात्वर्थो भावना सैवोत्पादना सैव च

क्रिया"[4] इति। समानपदोपात्तत्वादाख्यातगतकर्तृरूपार्थेन सह पाकक्रियायाः अन्वयो भवति। यस्य सम्बन्धः स प्रतियोगी, यस्मिन् सम्बन्धः सोऽनुयोगी इति नियमात् कर्ता प्रतियोगी पाकक्रिया चानुयोगी भवति। अनुयोगिवृत्तिधर्मस्यैव सम्बन्धत्वनियमात् कर्तृपाकयोः आश्रितत्वरूपसम्बन्धो विद्यते। राम इत्यनेन सह आख्यातलभ्यकर्तृरूपार्थस्याभेदादुभयोः अभिन्नत्वरूपसम्बन्धो विद्यते। तेन रामः पचतीत्यस्य वैयाकरणदिशा शाब्दबोधो भवति- रामाभिन्नकर्त्राश्रितपाकक्रिया, रामाभिन्नकर्तृनिष्ठपाकक्रिया वा। परन्तु नैयायिकैराख्यातस्य कृतौ शक्तिरुच्यते। प्रथमान्तपदोपस्थाप्यपदार्थोहि विशेष्यः इति वचनाज्ज्ञायते वाक्येऽस्मिन् रामो हि प्रधानो विशेष्यः।राम इत्यनेन कश्चन शरीरावच्छिन्नात्मा इति बोध्यम्। अपि च 'उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वं कर्तृत्वमि'ति कर्तृलक्षणाज्ज्ञायते कर्तृत्वं रामे एव विद्यते न तु अन्यस्मिन्। कृतिः नाम प्रयत्न एव। सा च कृतिः कर्तरि शरीरावच्छिन्नात्मनि रामे एव विद्यते, आत्मविशेषगुणत्वात्। तथाह्यत्र राम अनुयोगी भवति कृतिश्च प्रतियोगी। अतोऽनुयोगिवृत्तिधर्मस्यैव सम्बन्धत्वनियमादुभयोराश्रयत्वरूपसम्बन्धविशेषो वर्तते। समानपदोपात्तत्वात् पाककृत्योर्मध्येऽनुकूलत्वरूपसम्बन्धोऽस्ति। तथाहि नैयायिकानां नये वाक्यस्यास्य शाब्दबोधो भवति- पाकानुकूलकृत्याश्रयः रामः पाकानुकूलकृतिमान् रामो वेति। परन्तु नैयायिकाः कथयन्ति वैयाकरणमतानुसृत्य शाब्दबोधे गौरवो भवति। आख्यातस्य कर्तरि शक्तिश्चेत्तर्हि कर्ता इति शक्यो भवति शक्यतावच्छेकश्च कर्तृत्वम्। अन्यतः कृतौ शक्तिश्चेत्तर्हि कृतिरिति शक्यो भवति शक्यतावच्छेकश्च कृतित्वम्। कृतिमत्त्वं कर्तृत्वमिति नव्यन्यैयायिककृतकर्तृलक्षणे लक्षणमस्ति कृतिमत्त्वमिति।मतुबान्ताद्विहितो भावप्रत्ययः प्रकृत्यर्थं गमयति इति नियमेन ज्ञायते कृतिमत्त्वं कृतिरेव। यथा दण्डित्वं दण्डिनः दण्डः। सा च कृतिः प्रतिपुरुषभेदात्पृथक्पृथक् तथाहि अनन्तपुरुषभेदादनन्तकृत्यापत्तौ महागौरवः स्यात्। परन्तु कृतेः शक्यत्वे केनचिदविशेषितस्यैकस्यैव कृतित्वसामान्यस्य शक्यतावच्छेकतया आख्यातोपस्थाप्यत्वात् लाघवं स्यादिति नैयायिकानां मतम्। तदुक्तं शब्दशक्तिप्रकाशिकायाम् आचार्येण जगदिशतर्कालंकारमहाभागेन - "शाब्दिकास्तु चैत्रः पचतीत्यादितः पाकादिकृतिमत्तयेव तत्कर्त्रभेदेनापि चैत्रादेरन्वयस्यानुभविकत्वात् कृतिरिव कर्त्तापि तिङर्थः। कृतित्वमपेक्ष्य कर्तृत्वस्य गुरुत्वान्न तदाख्यातस्य शक्यातावच्छेदकमिति तु रिक्तं वचः, लक्षतावच्छेदके लक्षणाया इव शक्यातावच्छेदकेऽपि शक्तेरसत्त्वमते तदगुरुत्वस्याकिञ्चित्करत्वात्, एकैकात्मनिष्ठानामनन्तकृतीनां शक्यत्वमपेक्ष्य निखिलात्मनामेव कर्तृत्वेन शक्यतायां विपरीतलाघवाच्च"[5] इति।

परन्तु वैयाकरणाः नैयायिकानां मतं न स्वीकुर्वन्ति। ते कथयन्ति व्याकरणे आख्यातस्य शक्तिः कर्तर्येव वर्तते 'लः कर्माणि भावे चाकर्मकेभ्यः'(३/४/६९) इति सूत्रमेव तत्र प्रमाणम्। सूत्रस्यास्यार्थो हि लकाराः सकर्मकेभ्यः कर्माणि कर्तरि च स्युः अकर्मकेभ्यः भावे कर्तरि च। अतः लकाराः कर्तृवाच्येकर्तरि कर्मवाच्ये कर्माणि भाववाच्ये च भावे स्युः, न तु कर्तृत्वे कर्मत्वे भावत्वे । तथाहि कर्तृत्वस्य शक्यत्वे विनिगमनाभावात् कर्तरि एव शक्तिरिति चेन्न, भावप्रधाननिर्देशात् अत्र कर्तरि नाम कर्तृत्वे एवं कर्मत्वे भावत्वे च बोध्यम्। न च सूत्रे भावप्रधाननिर्देशोऽप्रामाणिक इति वाच्यम्। विषयेऽस्मिन् द्व्येकयोर्द्विवचनैकवचने (१/४/२२) इति पाणिनीयसूत्रमेव प्रमाणम्। अत्र द्व्येकयोरिति भावप्रधानो निर्देशः। शास्त्रान्तरेऽपि सूत्रेषु भावप्रधाननिर्देशो दरीदृश्यते। यथा वैशेषिकसूत्रम् - 'सदनित्यं द्रव्यम् कार्यं कारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेषः'(१/१/८) इति। अत्र सत्त्वमनित्यत्वं द्रव्यत्वं कार्यत्वं कारणत्वं सामान्यत्वं विशेषत्वमिति द्रव्यगुणकर्मणामविशेषः इति बोध्यम्। अत्र भगवता कणादेन भावप्रधाननिर्देशार्थमेव द्रव्यगुणकर्मणणामिति षष्ठ्यन्तं पदं प्रयुक्तम्।

नवीनैः वैयाकरणैस्तु आश्रयमात्र एव कर्तृकर्माख्यातयोः शक्तिः स्वीक्रियते कृत्यादिव्यापारफलयोर्धातुनैव लाभात्। आश्रयत्वञ्च अखण्डोपाधिः इति नास्ति गौरवः। उक्तञ्च वैयाकरणभूषणसारे - 'फलव्यापारयोर्धातुराश्रये तु तिङः स्मृतः' [6] इति। परन्तु आख्यातस्य आश्रयत्वरूपार्थे शक्तिग्रहे प्रथमतः 'लः कर्माणि भावे चाकर्मकेभ्यः' इति सूत्रार्थेण सह विरोधो भवति। द्वितीयतः 'स्वतन्त्रः कर्ता'(१/४/५४) इति सूत्रकृतपरिभाषाया वैयर्थ्यापत्तिर्भवति। यतो हि स्वशास्त्रे यत्र कर्तृपदप्रयोगस्तत्रायमर्थ इति ज्ञापयितुमेव परिभाषा भगवता पाणिनिना चक्रे। भावोऽयं प्रकाशयितुं रामरुद्रीकारेण प्रोक्तम् - "परन्तु 'लः कर्मणि भावे चाकर्मकेभ्यः' इत्यादिमूलभूतसूत्रविरोध एव। न च कर्तरीत्यस्याश्रयः इत्येवार्थः इति वाच्यम्। तथा सति स्वतन्त्रः कर्ता इति सूत्रकृतपरिभाषाया वैयर्थ्यापत्तेः" [7] इति। तथाहि स्वमतेन सूत्रकृन्मतस्य विरोधान्नैयायिकमतम् एव आदरणीयम्। किञ्च, कृतिमतः एव आख्यातस्य मुख्यार्थत्वात् कर्तृपदस्य लक्षणया आश्रयार्थकत्वं वाच्यमिति चेन्न, युक्तेः दौबल्यात्। तथा च वरं कृतौ एव लक्षणाकल्पनम्। यद्यपि नागेशभट्टप्रमुखा वैयाकरणा आश्रयत्वस्य

अखण्डोपाधित्वम् अङ्गीकुर्वन्ति तथापि आधारतारूपस्याश्रयत्वस्य स्वरूपसम्बन्धरूपत्वेन अननुगतत्वात् तस्य अखण्डोपाधित्वे मानाभावः। तथाहि नैयायिकैकदेशिनः आश्रयत्वस्याखण्डोपधित्वमेव न स्वीकुर्वन्ति।

वैयाकरणाः पुनः कथयन्ति अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैः इति नियमात् एतैरभिहिते तु सर्वत्र प्रथमा विभक्तिर्भवति। तथाहि चैत्रः पचतीत्यत्र आख्यातस्य अस्मत्कृतार्थग्रहणे चैत्रपदेन सह तस्य अभेदान्वये तिङा अभिहितत्वात् प्रथमा भवति। परन्तु आख्यातस्य कृतिरूपार्थग्रहणे तिङा अनभिहितत्वात् अनुक्ते कर्तरिकर्तृकरणयोस्तृतीया(२/३/१८) इत्यनेन सूत्रेण तृतीया स्यात्। तेन चैत्रेण पचतीति असाधुवाक्यप्रयोगः सर्वत्र उपयुज्यते। तथाहि वैयाकरणानां नये सूत्रगतार्थेण सह नैयायिकमतविरोधात्तन्मतमुपेक्षणीयमिति चेन्न, नैयायिकानां मते वैयाकरणैः कृतः सूत्रर्थो न सम्यगस्ति। अस्माकं नये सूत्रस्यास्यार्थो भवति- अनभिहितायां कर्तृसंख्यायां करणसंख्यायां तृतीया स्यात्। तथाहि शिशुना चन्द्रो दृश्यते, चन्द्रौ दृश्येते, चन्द्राः दृश्यन्ते इत्यादौ तिङाकर्मगतसंख्यायाः अभिहितत्वात् कर्मणि प्रथमा विभक्तिः। परन्तु कर्तुरनुक्तत्वात् शिशोरनुक्तकर्तरि तृतीया। एवं चैत्रः ओदनं पचति, चैत्रौ ओदनं पचतः, चैत्रा ओदनं पचन्ति तिङा कर्तृगतसंख्याया अभिधानात् चैत्रपदात्प्रथमाविभक्तिः। तथाहि नैयायिकाः कथयन्ति अस्मत्कृतार्थेण सह सूत्रार्थस्य नास्ति विरोधः। प्रोक्तञ्च विश्वनाथन्यायपञ्चाननेन न्यायसिद्धान्तमुक्तावल्याम् - "न च कर्तुरनभिधानाच्चैत्रादिपदोत्तरं तृतीया स्यादिति वाच्यम्। कर्तृसंख्यानभिधानस्य तत्र तन्त्रत्वादि"[7] ति।

चैत्रः तण्डुलं पचति इत्यादौ चैत्रगतसंख्या एव तिङा अभिधीयते, न तु तण्डुलगतसंख्या। एवं चैत्रेण तण्डुलः पच्यते इत्यत्र तण्डुलगतसंख्या एव अभिधीयते न तु चैत्रगतसंख्या इति नैयायिकानामाशयः। परन्तु चैत्रः तण्डुलं पचतीत्यत्र तिङा तण्डुलगतसंख्याया अपि अभिधानात् तण्डुलपदोत्तरं द्वितीया न स्यात्। एवं चैत्रेण तण्डुलः पच्यते इत्यत्रापि तिङा चैत्रगतसंख्याया अभिधानात्तत्र तृतीया न स्यादिति आशंकाया निरसनार्थं मुक्तावल्यां गदितम् - "संख्याभिधानयोग्यश्च कर्मत्वाद्यनवरुद्धः प्रथमान्त-पदोपस्थाप्यः" [8] इति। अत्र संख्याभिधानयोग्यश्च इत्यस्य आख्यातार्थसंख्याप्रकारकबोधविशेष्यताधिकरणञ्च इत्यर्थः। कर्मत्वाद्यनवरुद्धो नाम कर्मत्वादौ विशेषणत्वेनानन्वितः इति। आदिना करणत्वादिपरिग्रहः। प्रथमान्तपदोपस्थाप्यो नाम प्रथमान्तपदजन्योपस्थितिविषयः इत्यर्थः। तथा च कर्मत्वादौ विशेषणत्वेनानन्वितः प्रथमान्तपदजन्योपस्थितिविषयः च यो भवति सः आख्यातार्थसंख्याप्रकारबोधविशेष्यः इत्यर्थः। यथा चैत्रः पचति इत्यादौ चैत्रः इति पदं कर्मत्वादिनानन्वितः प्रथमान्तपदजन्योपस्थितिविषयश्चास्ति। अतः संख्याभिधानयोग्यत्वादत्र चैत्रपदोत्तरं प्रथमा। एवं चैत्रः तण्डुलं पचतीत्यत्र तण्डुलः द्वितीयार्थकर्मत्वेऽन्वितः। तथाहि तण्डुलपदस्य कर्मत्वेन विवक्षितत्वादाख्यातार्थसंख्याप्रकारबोधविशेष्यो न भवति। अतः द्वितीयान्तपदोपस्थाप्यः आख्यातार्थसंख्याप्रकारकबोधविशेष्यो न भवति। एवं च अनभिहिते कर्तरि करणे च तृतीया इत्यस्य आख्यातार्थसंख्याप्रकारकबोधविशेष्यत्वानधिकरणकर्तृकरणवाचकपदात् तृतीया भवतीत्यर्थः। अनभिहिते कर्मणि द्वितीया इत्यस्य आख्यातार्थसंख्याप्रकारकबोधविशेष्यतानधिकरण-कर्मवाचकपदात् द्वितीया भवति इत्यर्थः।

ननु प्रथमान्तपदोपस्थाप्ये आख्यातार्थसंख्यान्वयः इति स्वीकारे चैत्रः तण्डुलः पचति इति वाक्ये तण्डुलपदोत्तरं प्रथमायाः कर्मत्वादौ लक्षणया तत्रापि प्रथमान्तपदोपस्थाप्यत्वं तण्डुलस्यास्तीति तत्रापि तिङर्थसंख्याया अन्वयः स्यादिति चेन्न तण्डुलस्य प्रथमालक्ष्यार्थकर्मत्वविशेषणत्वात्कर्मत्वाद्यनवरुद्धत्वं नास्तीति न आख्यातार्थसंख्यायाः अन्वयः। अतः युक्तः कर्मत्वाद्यनवरुद्धः इति पदसन्निवेशः।

ननु कर्मत्वाद्यनवरुद्धत्वं नाम द्वितीयादिकारकविभक्त्यर्थकर्मत्वाद्यविशेषणत्वमिति भवति चेत्तर्हि चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रेऽपि संख्यान्वयः प्रसङ्ग आगच्छति। उपर्युक्ते वाक्ये इव इत्यस्यार्थः सादृश्यम्। सादृश्ये चैत्रस्य प्रतियोगितासम्बन्धेनान्वयः। सादृश्यस्य च आश्रयतासम्बेन्धेन मैत्रेऽन्वयः। आख्यातार्थकृतेः एकत्वसंख्यायाश्च आश्रयत्वेन मैत्रेऽन्वयः। धात्वर्थस्य गमनस्य कृतावनुकूलत्वसम्बन्धेनान्वयः। तथाहि शब्दबोधः - गमनानुकूलकृत्याश्रयः एकत्वाश्रयश्च चैत्रप्रतियोगिकसादृश्यवान् मैत्रः इति। अत्र मैत्रे यथा आख्यातार्थसंख्यायाः अन्वयः तथा चैत्रस्यापि प्रथमान्तपदोपस्थाप्यत्वात् कर्मत्वाद्यनवरुद्धत्वाच्च तत्र संख्यान्वयः स्यादिति चेन्न। कर्मत्वाद्यनवरुद्धः इत्यत्रकर्मत्वपदमितरपरमस्ति अनवरुद्धतत्वञ्च विशेषणतया अविवक्षितत्वमिति। तेन इतरविशेषणतया

अविवक्षिते तात्पर्यविषये प्रथमान्तपदेपस्थाप्ये आख्यातार्थसंख्यान्वयः इति फलितम्। चैत्र इव मैत्रो गच्छतीत्यत्र सादृश्यं प्रति चैत्रस्य मैत्रं प्रति सादृश्यस्य कृतिं प्रति गमनस्य मैत्रं प्रति कृतेश्च विशेषणत्वात् मैत्रः एव मुख्यविशेष्यः। अतः चैत्रस्य सादृश्यं प्रति विशेषणतया विवक्षितत्वात् इतरविशषणतयाविवक्षितत्वाभावात् न तत्र आख्यतार्थसंख्यान्वयः।

परन्तु चैत्र इव मैत्रो गच्छतीत्यत्र शाब्दबोधात्पूर्वं चैत्रे विशेषणत्वाभावात् तत्रापि आख्यातार्थसंख्यान्वयापत्तिः। तथाहि प्रथमदलस्य परिस्कृतार्थः इतरविशेषणत्वेन तात्पर्याविषयत्वमिति बोध्यम्। तेन चैत्रस्य सादृश्यविशेषणत्वेन तात्पर्यविषयत्वात् न तत्र आख्यातार्थसंख्यान्वयापत्तिः। वस्तुतः इतरपदस्यापि न विवक्षा, तद्भावेऽपि विशेषणत्वेन तात्पर्याविषयत्वमात्रेण उक्तप्रसङ्गसामाञ्जस्यात् इदमेव प्रथमदलार्थः इति ज्ञेयम्।

किञ्च, विशेषणत्वेन तात्पर्याविषयत्वे सति प्रथमान्तपदोपस्थाप्ये आख्यातार्थसंख्यान्वय इति स्वीकारेऽपि चैत्र एव पचति इत्यत्र आख्यातार्थसंख्यान्वयो न स्यात्। तथाहि - एवकारार्थस्त्रिविधः अन्ययोगव्यवच्छेदः अयोगव्यवच्छेदः अत्यन्तायोगव्यवच्छेदश्चेति। अत्र एवतकारः अन्ययोगव्यवच्छेदार्थकः। अन्यत्ववान्, योगः (सम्बन्धः), व्यवच्छेदः (अभावः) चेति अर्थत्रयम् अन्ययेगव्यवच्छेदार्थरूपैवार्थतः प्रतिभाति। अन्यत्ववतः एकदेशेऽन्यत्वे चैत्रस्य प्रतियेगितासम्बन्धेनान्वयः। धात्वर्थपाकस्याख्यातार्थकृतौ अनुकूलत्वसम्वन्धेनान्वयः। कृतेः एवकारार्थे योगे प्रतियोगितयान्वयः। व्यवच्छेदस्यान्यत्ववति आश्रयतयान्वयः। कृतेः एकत्वस्य च आश्रयतया चैत्रेऽन्वयः। तथा च - चैत्रान्यःपाकानुकूलकृतिप्रतियोगिकसम्बन्धप्रतियोगिकाभाववान् चैत्रः पाकानुकूलकृत्याश्रयः एकत्वाश्रयश्च इति वाक्यात् शाब्दबोधः। अत्र चैत्रस्य एवकारार्थेऽन्यत्वे विशेषणत्वेन तात्पर्यविषयत्वात् विशेषणत्वेन तात्पर्याविषयत्वाभावात्तत्र संख्यान्वयानुपपत्तिः इत्येको दोषः।

पुनश्च चैत्रः चैत्रं पश्यति इत्यत्र अम्पदोपस्थिते कर्मत्वे चैत्रस्याधेयतया, धात्वर्थे दर्शने कर्मत्वस्य निरूपकतया, दर्शनस्य च आख्यातार्थे कृतावनुकूलत्वेन, आख्यातार्थस्य कृतेः एकत्वस्य च प्रथमान्ते चैत्रे आश्रतया अन्वयः। तेन शाब्दबोधः –चैत्रनिष्ठकर्मता-निरूपकदर्शनानुकूलकृत्याश्रयः एकत्वाश्रयश्च चैत्र इति। अत्रापि द्वितीयार्थकर्मत्वविशेषणतया तात्पर्यविषयत्वात् विशेषणत्वेन तात्पर्याविषयत्वाभावात् कथमाख्यातार्थसंख्यान्वयः इति द्वितीयो दोषः।

प्रसङ्गस्यास्य समाधानं प्रदर्शयितुं दिनकर्यामुक्तम् - "विशेषणमात्रेण तात्पर्याविषयत्वस्य विवक्षितत्वात्" [9] इति। अतः कर्मत्वाद्यनवरुद्धः इत्यनेन विशेषणमात्रेण तात्पर्याविषयः इत्यर्थो विवक्षितः। विशेषणमात्रेण तात्पर्याविषयत्वं नाम विशेषणमात्रेण तात्पर्यविषयत्वस्याभावः। विशेषणमात्रेण तात्पर्यविषयत्वञ्च मुख्यविशेष्यत्वेन तात्पर्याविषयत्वे सति विशेषणत्वेन तात्पर्यविषयत्वमिति। तथाहि मुख्यविशेष्यत्वेन तात्पर्याविषयत्वे सति विशेषणत्वेन तात्पर्यविषयत्वस्याभावः यत्र वर्तते तत्र आख्यातार्थसंख्यान्वय इति फलितम्। तेन चैत्र एव पचतीत्यत्र चैत्रस्य एवकारार्थेऽन्यत्वे विशेषणतया आख्यातार्थकृतिविशेष्यतया च तात्पर्यविषयत्वात् विशेषणत्वमात्रेण तात्पर्यविषयत्वस्याभावः अस्तीति आख्यातार्थसंख्यान्वयोपपत्तिः। एवं चैत्रः चैत्रं पश्यतीत्यत्र द्वितीयार्थकर्मत्व-विशेषणतया आख्यातार्थकृतिविशेष्यतया च तात्पर्यविषयत्वात् विशेषणमात्रेण तात्पर्यविषयत्वस्याभावसत्त्वात् चैत्रे आख्याता-र्थसंख्यान्वयोपपत्तिः

तथात्वेऽपि चैत्र इव मैत्रो गच्छतीत्यत्र चैत्रस्य इवार्थे सादृश्ये यदा विशेषणत्वेन न तात्पर्यविषयत्वं तदा पुनः चैत्रे संख्यान्वयप्रसङ्गः। तस्माद्धेतोः कर्मत्वाद्यनवरुद्धः विशेषणत्वमात्रप्रयोजकप्रथमान्तपदानुपस्थाप्यत्वेन बोध्यम्। तस्य च विशेषणत्वमात्रप्रयोजक-प्रथमान्तपदोपस्थाप्यं यद्यत् तत्तद्भिन्नत्वमिति फलितऽर्थः। तेन चैत्रस्य विशेषणत्वमात्रप्रयोजकप्रथमान्त-पदोपस्थाप्यत्वात् विशेषणत्वमात्रप्रयोजकप्रथमान्तपदानुपस्थाप्यत्वाभावात् न आख्यातार्थसंख्यान्वयः।

अपि च तण्डुलं पचतीत्यत्र तण्डुले संख्यान्वयापत्तिर्वारणाय 'प्रथमान्तपदोपस्थाप्यः' इति पदं युक्तम्। यतो हि तण्डुलं पचतीत्यत्र शाब्दबोधो भवति - तण्डुलकर्मकपाकानुकूलव्यापारवान् तण्डुलः इति। तथाहि तण्डुलस्य अम्पदोपस्थितेः कर्मत्वे विशेषणमात्रोणान्वये तात्पर्यविषयत्वाभावात् संख्यान्वयप्रसङ्गः। परन्तु तण्डुले प्रथमान्तपदोपस्थाप्यत्वाभावात् न तत्र संख्यान्वयः। द्वितीयदलस्य प्रकारान्तरेण प्रयोजनं दर्शयितुमाह - "यद्वा धात्वर्थातिरिक्ताविशेषणत्वं प्रथमदलार्थः" [10] इति। तेन चैत्रस्य धात्वर्थातिरिक्ते

इवार्थे सादृश्ये विशेषणत्वात् नाख्यातार्थसंख्यान्वयः। एवं स्तोकं पचतीत्यत्र द्वितीयान्तपदोपस्थाप्यस्य स्तोकपदार्थस्य धात्वर्थमात्रे विशेषणत्वाद्धात्वर्थातिरिक्ते अविशेषणत्वात्तत्र संख्यान्वयापत्तिवारणाय प्रथमान्तपदोपस्थाप्यत्वमिति दलमपि योज्यमित्यलं विस्तरेण।

**उपसंहृतिः**

शक्तिग्रहविषये नैयायिकानां प्रधानप्रतिबन्धकाः हि वैयाकरणाः। तथाहि समग्रालोचनायां स्पष्टतया दृश्यते वैयाकरणैः केन प्रकारेण स्वमतमण्डनाय युक्तिप्रतियुक्तयः प्रतिष्ठापिताः। परन्तु तदपि नपर्याप्तम्। तर्कविचक्षणनैयायिकानां युक्तिप्रतियुक्तिभ्यां तेऽपि युक्तयः युक्त्याभासवत् प्रतिभासन्ते। अत्रैव नैयायिकानां विचक्षणता स्वशास्त्रीयमतसंरक्षणे इति शिवम्॥

**उल्लेखपञ्जी**


1. कारिकावली, कारिकासंख्या ८१।
2. प. हरिरामशुक्लशास्त्री (सम्पा.), न्यायसिद्धान्तमुक्तावली. पृ. २६६।
3. श्रीमुकुन्दझाशर्मा (सम्पा.), निरुक्तम् पृ ४।
4. श्रीमुकुन्दझाशर्मा (सम्पा.), निरुक्तम् पृ ४।
5. पण्डितढुण्ढिराजशास्त्री(सम्पा.), शब्दशक्तिप्रकाशिका, पृ. ४०१।
6. वैयाकरणभूषणसारकारिकासंख्या २।
7. प. हरिरामशुक्लशास्त्री (सम्पा.), न्यायसिद्धान्तमुक्तावली. पृ. २६७।
8. प. हरिरामशुक्लशास्त्री (सम्पा.), न्यायसिद्धान्तमुक्तावली. पृ. २६७।
9. प. हरिरामशुक्लशास्त्री (सम्पा.), न्यायसिद्धान्तमुक्तावली. पृ. २६७।
10. प. हरिरामशुक्लशास्त्री (सम्पा.), न्यायसिद्धान्तमुक्तावली. पृ. २६९।
11. प. हरिरामशुक्लशास्त्री (सम्पा.), न्यायसिद्धान्तमुक्तावली. पृ. २७०।



**Alok Sen,**

Ph. D. Research Scholar,

Dept. of Sanskrit & Philosophy,

Guide's Name – **Neeraj Kumar Bhargave,**

Assistant Professor,

Ramakrishna Mission Vivekananda Educational and Research Institute.

Belur Math, Howrah, West Bengal, Pin – 711202

Mobile no – 7478104737.

Email Id – vidyamandira.sen542@gmail.com


********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# संयतश्रृङ्गारे शाकुन्तलम् – एका समीक्षा

**प्रियांका दे,** शोधछात्रा, पश्चिमबंगाल

**सारः**

संस्कृतनाटकेषु रसस्य सर्वाधिकोन्मेषसिद्धये एकस्य निपुणस्य कवेः सिद्धहस्तता अपेक्षिता यस्य रचनास्पर्शेन रसस्य सद्य उन्मेषो जायते। प्रसङ्गेऽस्मिन्महाकविः कालिदासः अग्रगण्यः। तद्रचिते अत्युत्तमे अभिज्ञानशाकुन्तलमिति नाटके सः अत्यन्तसंयमेन श्रृङ्गाररसं वर्णितवान्। शोधप्रबन्धस्य मूलभागे तद्रचितसंयतश्रृङ्गारस्यैव व्याख्या कृता।

**कूटशब्दाः** - अभिज्ञानशाकुन्तलम्, श्रृङ्गाररसः, संयमः, कालिदासः

भारतीयसाहित्यशास्त्राचार्यैः काव्यं प्राधान्येन द्विधा विभक्तम् – दृश्यकाव्यं श्रव्यकाव्यं च।

**दृश्यश्रव्यत्वभेदेन पुनः काव्यं द्विधा मतम्। दृश्यं तत्राभिनेयं स्यात्।।**[1]

दृश्यकाव्यं रङ्गमञ्चे अभिनीयते। तस्मादिदं दृश्यकाव्यमित्युच्यते। अस्य नाटकप्रकरणभाणप्रसहनादयः अनेके प्रभेदाः सन्ति। खण्डकाव्य-महाकाव्यकथाख्यायिकादयः श्रव्यकाव्यानि सन्ति। दृश्यश्रव्यकाव्ययोर्मध्ये दृश्यकाव्यस्य माहात्म्यमधिकम्। यतो हि दृश्यकाव्यम् अभिनयमाध्यमेन सर्वेषां पुरतः उपस्थाप्यते। इदमधिकं सजीवं यथार्थं च भवति। सहृदयाः चक्षुःश्रोत्राभ्यां द्वाभ्यामिन्द्रियाभ्याम् अस्य ग्रहणं कुर्वन्ति। तस्मादस्य प्रभावः श्रव्यकाव्यापेक्षया अधिकः स्थायी च भवति। श्रव्यकाव्यं तु पुनः केवलं पठनयोग्यं श्रवणयोग्यं वा भवति, न तु दर्शनयोग्यम्। श्रव्यकाव्यं हृदयकमले यच्चित्रमङ्कयति तत्मानसिकं क्षणिकं च भवति, न तु मूर्तम्। श्रव्यकाव्यपाठकाले सहृदयाणां कल्पनासामर्थ्यं एकं चित्रमङ्कयति तथा परवर्ति चित्राङ्कणात्प्राक्पूर्ववर्तिचित्रं विस्मर्यते। तस्मादेव नाटकादिकं श्रव्यकाव्यापेक्षया श्रेष्ठतरमित्युच्यते । **काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला। तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्।।** [2]
तथा स देवनेत्राणां तृप्तिप्रदाता यज्ञ इति कालिदासेनोच्यते।

**देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषं रुद्रेणेदमुमाकृतव्यतिकरे स्वाङ्गे विभक्तं द्विधा।**
**त्रैगुण्योद्भवमत्र लोकचरितं नानाविधं दृश्यते नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्।।**[3]

नाटकस्येमां प्रभावोत्पादिकां शक्तिं विचार्यैव आचार्याः तदुपरि कांश्चित्प्रतिबन्धकतामर्पितवन्तः। युद्धहननादिकं, नारीपुरुषयोः प्रेमविषयिणीका चित्घटना, यच्च समाजस्य कृतेऽशोभनीयं तत्सर्वं नाट्यमञ्चे न प्रदर्शनीयम्।

**दूराह्वानं वधो युद्धं राज्यदेशादिविप्लवः। विवाहो भोजनं शापोत्सर्गौ मृत्यु रतं तथा।।**
**दन्तच्छेद्यं नखच्छेद्यमन्यद् व्रीडाकरं च यत्। शयनाधरपानादि नगराद्यवरोधनम्।।**
**स्नानानुलेपनं चैभिर्वर्जितो नातिविस्तरः।**[4]

यतो हि ता घटनाः सामान्यनरेषु शिशुमनःसु च गभीरप्रभावं विस्तारयन्ति तथा ते इदं सर्वं अनुकरणेन शिक्षन्ते। तस्मात्संस्कृतवाङ्मये नाट्यकाराः इमां व्यवस्थां सावधानतया अवलम्बन्ते तथा तेषां रचनासु प्रोक्तानि दृश्यानि स्थानं न प्राप्नुवन्ति। किन्तु श्रव्यकाव्यविषये अयं नियमः न पाल्यते।

राजशेखरेणोक्तं यत्श्रृङ्गाररसस्य ललितरचनासु कालिदासः श्रेष्ठः। कालिदासस्य श्रृङ्गाररसवर्णनम् अतीवसंयतं सुकोमलं सुरुचिपरिपूर्णं च। अत्र अश्लीलतायाः नग्नतायाः वाचिह्नमपि नास्ति।

अभिज्ञानशाकुन्तलम् इति नाट्यस्यारम्भे एव दृश्यते "**ततः वसन्तोदारसमये तस्याः उन्मादयितृ रूपं प्रेक्ष्य**"(प्रथमाङ्कः)।

इदमेवोक्त्वा अनसूया लज्जावनता सती वाक्यप्रयोगात्विरामं स्वीकृतवती। प्रसङ्गेऽस्मिन्वक्तुं शक्यते, अत्र अन्यः कविश्चेत्स-हृदयाः श्रृङ्गाररसस्य आस्वादनात्विरता न स्युः। महर्षिकण्वस्य आश्रमे शकुन्तलां दृष्ट्वैव राजा दुष्यन्तः तद्विषये आकृष्टो जातः। किन्तु आवेगवशीभूतः सन् स किमपि अयुक्ताचरणं नाकरोत्। तत्कालिकसामाजिकव्यवस्थां स्मरन्राजा दुष्यन्तः शकुन्तलया सह स्वविवाह-सम्बन्धस्य औचित्यं विचारयन्नाह–

**असंशयं क्षत्रपरिग्रहक्षमा यदार्यमस्यामभिलाषि मे मनः। सतां हि सन्देहपदेषु वस्तुषु प्रमाणमन्तःकरणप्रवृत्तयः।।**[5]

कथाप्रसङ्गे राज्ञि स्वविवाहविषये आलोचयति शकुन्तला यदा कुमारी सुलभसंकोचवशात्तत्स्थानं त्यक्तुमुद्यता जाता तदा राजा तस्य हस्तं ग्रहीतुमुद्यतोऽपि विरतो जातस्तथा अस्फुटमाह–

**अनुयास्यन् मुनितनयां सहसा विनयेन वारितप्रसरः। स्थानादनुच्चलन्नपि गत्वेव पुनः प्रतिनिवृत्तः।।**[6]

राजानं दृष्ट्वा शकुन्तला या हृदयमपि विचलितं भवति तथा तेनास्फुटमुक्तम्– **किं नु खलु इमं प्रेक्ष्य तपोवनविरोधिनः विकारस्य गमनीयास्मि संवृत्ता** ।[7] तस्याः सख्यौ अनसूया प्रियंवदे शकुन्तलाया वार्तालापे न कश्चित्शब्दः अशालीनः अयुक्तो वा नासीत्।

अभिज्ञानशाकुन्तलमिति नाटकस्य प्रधानरसः श्रृङ्गारः-

**एक एव भवेदङ्गी श्रृङ्गारो वीर एव वा। अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुवः।।**[8]

यस्य स्थायिभावः मुख्यं तत्त्वं वा आकर्षणम्। इदं च नारीपुरुषयोःपरस्परं प्रति स्वभावत एव तिष्ठति। इदमाकर्षणमेव रतिरिति उच्यते-

**रतिर्मनोनुकूलेऽर्थे मनसः प्रवणायितम्।**[9] रतिहेतोः जायमानः प्रथमहृदयविकारो भवति भावः-

**निर्विकारात्मके चित्ते भावः प्रथमविक्रिया।**[10] यस्य सूचनाशकुन्तलाया अस्मादेव वचनात्प्राप्यते-

**किं नु खलु इमं प्रेक्ष्य तपोवनविरोधिनः विकारस्य गमनीयास्मि संवृत्ता** ।[11] यदा चायं विकारः सात्त्विकादिभावैः अङ्गेषु परिस्फुटितो भवति तदा स हाव इत्युच्यते-

**भ्रूनेत्रादिविकारैस्तु सम्भोगेच्छाप्रकाशकः। भाव एवाल्पसंलक्ष्यविकारो हाव उच्यते।।**[12]

अस्याभासः दुष्यन्तस्य अनेन वचनेन प्राप्यते–

**वाचं न मिश्रयति यद्यपि मद्वचोभिः। कर्णं ददात्यभिमुखं मयि भाषमाणे।।**

**कामं न तिष्ठति मदाननसम्मुखीना। भूयिष्ठमन्यविषया न तु दृष्टिरस्याः।।**[13]

यद्ययं विकारः अतीव स्पष्टो भवति तर्हि साहेला इत्युच्यते- **हेलाऽत्यन्तसमालक्ष्यविकारः स्यात् स एव तु।**[14]

नाटकस्य तृतीयाङ्के शकुन्तलाया या अवस्था वर्णिता साहेला। कविः प्रथमाङ्केशकुन्तलायाः केवलं भावहावयोः वर्णनमकरोत्, न तु हेलायाः। राज्ञा दुष्यन्तेन यदा शकुन्तलाया विवाहः कृतः ततः प्राक्शकुन्तला कन्या आसीत्- **कन्या त्वजातोपयमा सलज्जा नवयौवना।**[15]

कन्यायाः स्वभावः लज्जा शीलता। साहित्यदर्पणकारमते शकुन्तलामुग्धा नायिका।

**प्रथमावतीर्णयौवनमदनविकारा रतौ वामा। कथिता मृदुश्च माने समधिकलज्जावती मुग्धा।।**[16]

मुग्धाया नायिकायाः शरीरे यौवनचिह्नानि प्रकटितानि भवन्ति तथा सा कामविकारमपि अनुभवति। अत्यन्तं लज्जा शीला भवति मुग्धनायिका। राजा दुष्यन्तः शकुन्तलायाः सारल्यं लज्जाशीलतां च वर्णयन्विदूषकं माधव्यमाह–

**अभिमुखे मयि संहृतमीक्षितं हसितमन्यनिमित्तकृतोदयम्। विनयवारितवृत्तिरतस्तया न विवृतो मदनो न च संवृतः।।**17

अभिज्ञानशाकुन्तलम् इतिनाटकस्य तृतीयाङ्के कविः कालिदासः शकुन्तलायाः पूर्वरागं वर्णितवान्। अस्मिन्प्रसङ्गे दर्शनादिभिः समुत्पन्नः अनुरागः एतावान्प्रकटितो भवति यत्तौ परस्परं मेलनाय उद्ग्रीवौ जातौ। शकुन्तलाया एतादृशीमस्थिरतां परिलक्ष्यतत्सख्यः राजानमुद्दिश्य एकस्य प्रेमपत्रस्य लेखनाय ताम् उक्तवत्यः। किन्तु सङ्कोचकारणात्सा न लिखितवती। तदनन्तरं काश्चन घटनाः वर्णिताः। किन्तु रङ्गमञ्चे दर्शयितुमयोग्याः असभ्याः न काश्चन घटनाः तृतीयाङ्के वर्णिताः। कालिदासः इत्थं संयतं नाटकं रचयतिस्म। यतो हि तस्य नाटकानि जनसमक्षम् अधिकं प्रदर्शयंतेस्म तथा तानि जनानां सर्वाधिकप्रियाणि आसन्। तस्मादेव सखीनां समीपे गमनकाले शकुन्तलाया मार्गम् अवरुद्धवान्राजा दुष्यन्तः। परन्तु शकुन्तला "**पौरव, रक्ष विनयम्। मदनसन्तप्ता अपि नहि आत्मनः प्रभवामि**"। इदं वचनं राज्ञः प्रवृत्तौ यां बाधाम् अजनयत्तया कदापि राज्ञो व्यवहारः उच्छृङ्खलितो न जातः।

कालिदासः सम्भोगश्रृङ्गारस्य वर्णनावसरे संयममर्यादयोः यादृशं परिचयं प्रदत्तवान्विप्रलम्भश्रृङ्गारस्य वर्णनावसरेऽपि तस्यान्यथा न जातम्। नाटकस्य षष्ठाङ्के अङ्गुरीयकप्राप्तेः परं राजा शकुन्तलां स्मरति तथा शकुन्तला वियोगेन सः अस्थिरो भवति। एतद्विहायापि तस्य पश्चात्तापो जातः। यतो हि तेन दोषशून्यया गर्भवत्या पत्न्या सह दुर्व्यवहारः कृतः। उक्तं च तेन–

**इतः प्रत्यादेशात् स्वजनमनुगन्तुं व्यवसिता मुहुस्तिष्ठेत्युच्चैर्वदति गुरुशिष्ये गुरुसमे।**
**पुनर्दृष्टिं वाष्पप्रसरकलुषामर्पितवती मयि क्रूरे यत् तत् सविषमिव शल्यं दहति माम्।।**[18]

तस्मादन्ते इदं वक्तुं शक्यते यन्नाटके रसोन्मेषः प्रधानः सर्वाधिकरम्यः साधनविषयश्च। अत एव नाट्यशास्त्रे भरतेन रसस्य प्रधानता प्रोक्ता। तेषु च रसेषु मध्ये शृङ्गारः अन्यतमः यः महाकवेः कालिदासस्य रचनासु अतीव सावलीलः मधुरः रुचिकरः सहृदयहृदयग्राही च जातः।

**अन्त्यटीका-**

1. साहित्यदर्पणम्, षष्ठ परिच्छेदः । 2. प्रचलित सूक्ति । 3. मालविकाग्निमित्रम् (1/4) । 4. साहित्यदर्पणम्, षष्ठ परिच्छेदः । 5. अभिज्ञान-शकुन्तलम् (1/20) । 6. तत्रैव (1/26) । 7. तत्रैव ( प्रथमाङ्कः) । 8. साहित्यदर्पणम्, षष्ठ परिच्छेदः । 9. साहित्यदर्पणम् (3/176) । 10. साहित्यदर्पणम् (3/93) । 11. अभिज्ञान-शकुन्तलम् प्रथमाङ्कः । 12. साहित्यदर्पणम् (3/94) । 13. अभिज्ञान-शकुन्तलम् (1/28) । 14. साहित्यदर्पणम् (3/95) । 15. तत्रैव (3/67) । 16. तत्रैव(3/58) । 17. अभिज्ञान-शकुन्तलम् (2/11) । 18. तत्रैव(6/9)

**ग्रन्थपञ्जि**

1. मुखोपाध्यायः, रमारञ्जनः, रससमीक्षा, कलकाताः संस्कृत पुस्तक भाण्डार, 2021.
2. वसु, अनिलचन्द्रः , अभिज्ञान- शकुन्तलम्, कलकाताः संस्कृत वुक डिपो, 2017.
3. भट्टाचार्य , श्रीजीवानन्दविद्यासागरः, साहित्यदर्पणम्, कलिकाताः मुखार्जी एन्ड कोम्पानि, 1900.
4. त्रिपाठी, बाबूरामः , अभिज्ञानशाकुन्तलम्, आगराः महालक्ष्मी प्रकाशन , 1681.
5. Kale, M.R. THE ABHIJNĀNAŚĀKUNTALAM OF KĀLIDĀSA , Varanasi: Motilal BanarsiDass , 1931.

**Priyanka Dey**
Ph. D. Scholar
Department of Sanskrit
Cooch Behar Panchanan Barma University
Panchanan Nagar, Vivekananda Street,
Coochbehar-736101, West Bengal
Contact No. : 9007461840
E-mail : deypriyanka436@gmail.com

***********

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# अनुबन्धलक्षणम्

**सुनील भट्टः**, शोधच्छात्रः, शृङ्गेरी, कर्नाटक

**अनुबन्धो नाम इत्संज्ञकवर्णः**[1] ।ये च आगमप्रत्ययादेशेषु इत्संज्ञकाः अनुबन्धाः वर्तन्ते, ते आगमादीनाम् अवयवाः उत अनवयवाः इति सन्देहे सति **अनेकान्ता अनुबन्धाः** इत्युक्तम् । एकान्तो नाम अवयव: इत्यर्थ: । यदि अनुबन्धानाम्अवयवत्वंस्यात्तदा आगमादीनां विधेये कुत्रचिदपि तद्दर्शनंस्यात् ।एतेषाम् अनुबन्धानान्तु कदापि दर्शनाभावात् अनवयवत्वं तावन्निश्चितम् ।

ननु अनुबन्धानामनवयवत्वे शित्, कित् इत्यादौ "शकारः इत् यस्य" इति षष्ठ्यर्थावयवावयविभावसम्बन्धद्वारकबहुव्रीहिसमासो नोपपद्येत । अत: तत्र समीपस्थे शकारककारादौ अवयवत्वारोपेण समासः कार्य:। स्वसमीपोच्चारितेऽनुबन्धे स्वनिरूपितावयवत्वमारोप्यते इति यावत् । नन्वेवं सति **वुञ्छण्कठजिलसेनि - रढञ्ण्ययफक्फञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रेक्षाश्म-सखिसङ्काशबलपक्षकर्णसुतङ्गमप्रगदिन्वराहकुमुदादिभ्यः** (०४/०२/८०)[2] इत्यत्र अनुबन्धस्य णकारस्य छकारककारयोरुभयोरपि सामीप्यात् णकारे ककारावयवत्वारोपेण तस्य णित्त्वात्, ककारे परेऽपि णित्त्वप्रयुक्तकार्यप्रवृत्ते **"आर्श्यकः"** इत्यादौ आदिवृद्ध्यापत्तिरिति चेन्न, तत्र णित्त्वप्रयुक्तकार्यं पूर्वस्य छकारस्यैव न तु परस्य ककारस्येति व्याख्यानतो निर्णयम् । अत्र व्याख्यानत्वेन **प्रमाणे द्वयसज्दघ्न-ञ्मात्रचः**(०५/०२/३७)[3] इति सूत्रमाद्रियते । अत्र हि "द्वयसच्" तथा "दघ्नच्" इत्युभयत्रापि चकार एव अनुबद्धः ।यदि अनुबन्धेषु स्वपश्चाद्वृत्तिप्रत्ययावयवत्वमप्यारोप्येत तदा "दघ्नचि" पुनश्चकारो नानुबद्धव्य: । तेन चअनुबन्धेषु स्वप्राग्वर्ति- प्रत्ययावयवत्वमेव आरोप्यत इति सिद्धम् । ननु अनुबन्धानामनवयवत्वे **हल- न्त्यम्** (०१/०३/०३)[4] इत्यत्र अन्त्यशब्दस्य अन्त्यावयववाचकत्वस्वीकारेण तदसङ्गतरिति चेन्न, तत्र अन्त्यशब्दस्य परसमीपवाचाकताभ्युपगमेन दोषोनसम्भवति ।

अनुबन्धो नाम इत्संज्ञकवर्णः । अनूपसर्गपूर्वकात् बन्धनार्थकात् **बन्ध**धातो: ( धा. सं. १५०९)[5] **कृत्यल्युटो बहुलम्** (०३/०३/११३)[6] इति कर्मणि घञ्प्रत्यय: ।अनूपसर्गोऽत्र अप्रधानवाची । बध्नातेः उच्चारणवाचकत्वम् । वस्तुतस्तु बध्नाति: बन्धनार्थे वर्तते । तथापि - **उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । प्रहाराहारविहारपरिहारवत् ॥**[7] इत्युक्तेः उच्चारणार्थकत्वम्।

अथवा **परौ भुवोऽवज्ञाने** (०३/०३/५५)[8] इति पाणिनीयनिर्देशात् धातूनामनेकार्थवाचकताभ्युपगमात् बध्नातेरेव उच्चारणार्थ-कतायामपि न क्षतिः । वैयाकरणभूषणसारेऽपि धात्वर्थनिर्णयप्रकरणे,

**सर्वनामाव्ययादीनांयावादीनां प्रसङ्गतः। न हितत्पाठमात्रेण युक्तमित्याकरे स्फुटम्॥**[9]

इति कारिका प्रस्तुता । कारिकाव्याख्यानप्रसङ्गे **"न च गतिगन्धनाद्यर्थनिर्देशो नियामकः, तस्य "अर्थानादेशाद्" इति भाष्यपर्यालोचनया आधुनिकत्वलाभात्"** इत्युक्तप्रकारेण धात्वर्थनिर्देशस्य आधुनिकत्वेन प्रायिकत्वात्अत्र बन्धधातुरेव उच्चारणार्थकः इत्यपि युक्तमेव । एवञ्च अप्रधानीभूतोच्चारणक्रियायामाचार्य: कर्ता । अप्रधानीभूतोच्चारितानाम् आगमादीनामन्ते वर्तमानानाम् उच्चारणविषयत्वं वर्तते । अत: **"आचार्यकर्तृकाप्रधानीभूतोच्चारणविषयत्वम् अनुबन्धत्वमित्यायातम्"**। अत्र अप्राधान्यं नाम **"लक्ष्यसमवायातिरिक्तकार्यसमर्पकत्वम्"**। एवञ्च **"आचार्यकर्तृकलक्ष्यसमवायातिरिक्तकार्यसमर्पकोच्चारणविषयत्वम् अनुबन्धानां"**[10] लक्षणम् । इह लक्षणे लक्ष्यसमवायातिरिक्त-कार्यसमर्पकत्वानिवेशे, आचार्यकर्तृकोच्चारणविषयत्वमात्रोक्तौ **कर्मण्यण्** (०३/०२/०१)[11] इत्यादिभि: विहिता: ये अणादय: तदवयवादी-नामकारादीनामपि आचार्यकर्तृकोच्चारणविषयत्वात् अनुबन्धत्वं स्यात् । अत: लक्ष्यसमवायातिरिक्तकार्यसमर्पकत्वनिवेशः ।

ननु हयवरडित्यादिषु माहेश्वरसूत्रेषु अकारवत् ये च वर्णा: उच्चारणमात्रप्रयोजनाः, तेषामपि आचार्यकर्तृकलक्ष्यसमवायातिरिक्त-कार्यसमर्पकोच्चारणविषयत्वात् तत्रापि प्रकृतलक्षणमतिप्रसक्तमित्यत: इत्संज्ञकेषु रूढः अनु- बन्धशब्द: इति वदन्ति ।

**"जहत्स्वार्था तु तत्रैव रूढिर्यत्र विरोधिनी"**[12]

इति सिद्धान्तादस्य रूढत्वेऽपि न क्षतिः । अन्ये तु उच्चारणार्थकेषु वर्णेषु अतिप्रस- क्तिवारणाय **इत्संज्ञाप्रयुक्तस्वनिवृत्तिव्यतिरिक्तलक्ष्यगत-कार्यसमर्पकत्वम्अनुब- न्धत्वमिति** परिष्कुर्वन्ति । तदयुक्तम्, यतः भाष्ये ,

**"प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न। आचारादप्रधानत्वाल्लोपश्च बलवत्तरः"** ॥[13] इत्युक्तम् ।

भाष्यवार्तिकेऽस्मिन् माहेश्वरसूत्रघटकानां णकारादीनाम् अनुबन्धत्वव्यवहारो दृश्यते । णादीनामनुबन्धत्वे हि **"कथमज्ग्रहणेषु न"** इति भाष्यकृतां शङ्का सङ्गच्छते । यतः अज्ग्रहणेष्वित्यत्र तु**"अचां ग्रहणं यस्मिन्निति बहुव्रीहिः"**। तत्र यच्छब्दवाच्यः अन्यपदार्थः प्रत्याहारः । णादीनां ग्रहणन्तु तत्रैव सम्भवति नान्यत्र ।यदि **"इत्संज्ञाप्रयुक्तस्वनिवृत्तिव्यतिरिक्तलक्ष्यगतकार्यसमर्पकत्वम् अनुबन्धत्व- मिति"** परिष्क्रियेत , तदा तु भाष्यकृदुक्तस्य णादौ अनुबन्धे अस्य लक्षणस्य अन- न्वयात् इदमयुक्तमेव । न हि तेषां किञ्चिदपि कार्यमस्ति । ते तु प्रत्याहारमात्रोप- योगिनः ।प्रकृतभाष्यप्रामाण्यादेव ये च विधेयघटकाः उच्चारणार्थकाः वर्णाः तेषामपि इत्सञ्ज्ञां विना निवृत्त्युपायाभावात् इत्संज्ञामूलकेन लोपेनैव निवृत्तेरिष्टत्वाच्च तेषामपि अनुबन्धत्वम् इष्टमेव।यथा **दिव उत्** (०७/०१/१२९)[14] इत्यादिभिः वि- हितानां तकारादीनाम् । तेषाम् उच्चारणसौकर्यं विना प्रयोजनान्तरं नास्ति ।

**अनुबन्धपदविचारः-**

केचित्तु "ख्यत्यात्" इत्यादौ उच्चारणार्थकेषु अकारादिषु अतिप्रसङ्गवारणाय **इत्संज्ञाप्रयुक्तस्वनिवृत्तिमत्त्वं तथैव निवृत्त्यतिरिक्तलक्ष्यगतकार्यसमर्पकत्वं च अ- नुबन्धत्व**मिति लक्षणं परिष्कुर्वन्ति।तदसत् । भाष्ये प्रत्याहारेषु अनुबन्धानां ग्रहणं कुतो न इति प्रश्ने सति **"प्रत्याहारेऽनुबन्धानां कथमज्ग्रहणेषु न"** इति श्लोकवार्तिकेन समाहितम्।

तत्र हि अनुबन्धानां वर्णसमाम्नायिकानामेव ग्रहणम् इति कृत्वा तद्बहिर्भूतेषु उच्चारणार्थकेषु वर्णेषु लक्षणप्राप्त्यभावात् अतिव्याप्तिवारणप्रयासः निष्फल एव। त- थैव तेषां लक्ष्यगतं कार्यं किञ्चिदपि नास्ति । एवं च विधेयघटकानाम् उच्चारणार्थ- कानामपि इत्संज्ञां विना निवृत्त्यभावात् इत्संज्ञकतया तेषामपि अनुबन्धत्वं स्पष्टमेव । यथा **दिव औत्** (०७/०१/८४)[15] इत्यादिषु तकारादीनाम् अनुबन्ध- त्वम् । अनूद्यमानविषये तु तेषां तकारादीनाम् उपदेशत्वाभावाल्लक्षणया उपदेशत्वे इत्संज्ञया तत्र अनुबन्धत्वम् । विधेयविषये तु लक्षणा नाङ्गीक्रियते **"न विधौ पर- शब्दार्थः"** इति भाष्यसिद्धान्तात् । अत्र लडादीनां विधेयविषयादिषु लकारादिषु वर्तमानानाम् अकारादीनां तथैव यासुडादिविधेयेषु उकारादीनां मुखसुखार्थं परिगृ- हीतानां विशेषणत्वेनापि प्रयोजनं नास्ति । अतः वह्न्यादीनाम् आनयने उपयुज्यमानानां पात्राणामिव अकस्मादेव निवृत्तिः इति मूलकाराशयः ।

**पादटिपणी**

1. पा. अ. २. पृ. सं. ७९ । 2. पा. अ. २. पृ. सं. ९१ । 3. पा. अ. २. पृ. सं. ४१ । 4. वै. सि. कौ. १. पृ. सं. ४६ ।
5. पा. अ. २. पृ. सं. १२४ । 6. वै. सि. कौ. १. पृ. सं. ३४५ । 7. पा. अ. २. पृ. सं. ६५ । 8. वै.भू. सा. १. पृ. सं. १२४ ।
9. प. शे. ३. पृ. सं. १८ । 10. पा. अ. २. पृ. सं. ५८ । 11. प. शे. ३. पृ. सं. २० । 12. व्या. म. भा. पृ. सं १३६
13. पा. अ. २. पृ. सं. १०३ । 14. पा. अ. २. पृ. सं. १२० । 15. प. शे. ३. पृ. सं. २२

**सुनील भट्टः**

शोधच्छात्रः, राजीवगान्धिपरिसरः, शृङ्गेरी, कर्नाटक

Contact No. : 9481463347, 8073685539

E-mail : kakkallisuneel@gmail.com

***********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# कात्यायनश्रौतसूत्रग्रन्थस्य स्थूलपरिचयः

**राजराजेश्वर. एन्. जोशि,** मैसूरु, कर्नाटक

सर्वधर्माणां मूलमस्ति वेदः । अत एव उक्तम्

**वेदोऽखिलो धर्ममूलं स्मृति शीले च तद्विदाम् । आचारश्चैव साधूनां धर्ममूलमिदं स्मृतम् ॥ इति ॥**

सर्वधर्ममूलभूतेऽस्मिन् वेदे, कर्मकाण्ड, उपासनाकाण्ड तथा ज्ञानकाण्ड इति विषयत्रयमधिकृत्य वर्णनं लभ्यते । वेदार्थज्ञानसम्पादनं न सुलभमिति कारणात् ऋषयः वेदाङ्गान् विरचितवन्तः । वेदाङ्गाः आहत्य षट् भवति । ते तु,

**शिक्षा व्याकरणं छन्दो निरुक्तं ज्योतिषं तथा । कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः ॥**

एतेषां वेदाङ्गानां साहाय्येनैव वेदानां अर्थकरणं सुललितं भवति । एतेषु वेदाग्ङेषु “कल्पस्य” अस्ति अतिमहत्वम् । अस्मिन् कल्पसूत्रे, (१) श्रौतसूत्रम् (२) गृह्यसूत्रम् (३) धर्मसूत्रम् तथा (४) शुल्बसूत्रमिति विभागचत्तुष्टयम् आमनन्ति विद्वज्जनाः । परन्तु तेषु चतुर्विभागेष्वपि शुल्बसूत्राणि यानि सन्ति, तानि श्रौतसूत्राणां परिशिष्टविभाग इति कारणात् कल्पसूत्रे, (१) श्रौत (२) गृह्य एवं (३) धर्मसूत्र इति मुख्यविभागाः सन्तीति अभिप्रायो वर्तते । सूत्रमित्युक्ते,

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम् । अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ॥ इति ॥**

मन्त्रब्राह्मणात्मक वेदोक्त श्रौतयागानां वर्णनं श्रौतसूत्रेषु प्राप्तुं शक्यते । लोके, श्रौतसूत्रविवरणग्रन्थाः बहवः भवेयुः, परन्तु कात्यायनविरचित श्रौतसूत्रग्रन्थस्यैव अतीव महत्वस्थानमस्ति । न केवलम् अतिमहत्वस्थानम्, अपि च अत्यधिकप्रचलितेऽपि वर्तते तथा लोकप्रियग्रन्थोऽपि वर्तते । आचार्यकात्यायनविरचितश्रौतसूत्राणाम् आधारेणैव पूज्यमार्तण्डसोमयाजिमहोदयः अपि “श्रौतमार्तण्ड” नामकं ग्रन्थं विरचयामास । कात्यायनशौतसूत्रग्रन्थस्य स्थूलपरिचयात्पूर्वं, कात्यायनसम्बन्धविचारान् अवगन्तुम् आवश्यं भवति ।

## कात्यायनसंबद्ध विचाराः

कात्यायनः "कत" गोत्रे उत्पन्नोऽयं एकः ऋषिः । कतस्य गोत्रापत्यम् इत्यर्थे यञ् प्रत्यये कृते, कात्यायनशब्दः सिद्धः । कात्यस्य अपत्यं युवा इति "फक्" प्रत्यययोगः । अनेकग्रन्थावलोकनात् प्राचीनइतिहासे त्रयः कात्यायनाः आसन्निति भाति ।

षड्गुरूशिष्यः [वेदार्थदीपिका (का.स.१।१)] वदति, यथा आश्वलायनः शौनकख्य शिष्य आसीत् ,तथैव एषः कात्यायनोऽपि शौनकस्य शिष्य एव ।

अयं शौनकः दशग्रन्थान् स्वयमेव रचयित्वा च स्वशिष्याभ्यां आश्वलायनकात्यायनाभ्यां सह केचन ग्रन्थान् विरचय्य वेदस्योद्धारं अकरोत् । वाजसनेयि प्रातिशाख्यग्रन्थकर्ता कात्यायनः एकः अष्टाध्यायीग्रन्थवार्तिककारः कात्यायनः अन्यः इत्येकस्य पक्षवादः ।

महाभाष्यकारः पतञ्जलिः कात्यायनं "कात्य , कात्यायन एवं वररुचि " इत्यादिभिः नामभिः सूचितवान् । तथैव त्रिकाण्डशेषकोषे पुरुषोत्तमदेवं कात्यायनस्य पञ्च नामानि एतानीति उक्तं यथा, मेधाजित् , कात्य , कात्यायन, पुनर्वसु तथा वररुचिरिति । भाषावृत्ति ग्रन्थेऽपि पुनर्वसुं , वररुचिरिति पर्यायनामास्तीत्यपि प्रकटितम् । कथासरित्सागर ग्रन्थे कात्यायनस्य "श्रुतधर"इत्यपरं नाम अस्तीति उक्तमस्ति । हेमचन्द्रकोषे तु कात्यायनस्य नामानि वररुचि, मेधाजित्, तथा पुनर्वसु इति दत्तानि ।

## कात्यायनस्य कालः

कात्यायनस्य पाणिनिना सह अत्यन्तनिकटसम्बन्धसत्वात्, पाणिनेः स्थितिकालविचारः कात्यायनस्य कालाविचारं निर्धारणे आवश्यकः । आर्.जी. भण्डारकर् तथा गोल्डस्टकर् महोदयाभ्यां प्रकारेण पाणिनेः कालः ई.पू.७ शतमानम् । जर्बाक् ग्रियर्सन्, लसेन्, बोटलिंक च कीथ् एतेषां मते तु पाणिनेः कालः ई.पू. चतुर्थशतमानम् । श्री वासुदेवशरण् अग्रवाल् महोदयस्य अभिप्राये पाणिनिः ई.पू. ५ शतमानस्य मध्यकाले आसीत् । परन्तु पाणिनिविचारे विदुषां मध्ये भिन्नाभिप्रायः सत्स्वपि , महाभाष्यकर्तृणः पतञ्जलमहर्षेः कालः ई.पू.१५० वर्षः इति विचारे अस्ति

एकाभिप्रायः । कीलहार्न् तथा मैकडानल एतयोः विदुषोः अभिप्राये पतञ्जलिकात्यायनयोर्मध्ये दीर्घान्तरमस्तीति कालविचारे स्वाभिप्रायं प्रकटितवन्तौ । भाषिकसामजिकसांस्कृतिकपरिवर्तनकारणं यदि २०० वर्षानामन्तरे कात्यायनपतञ्जलियोर्मध्ये अभवदिति यदि अभिप्रायः, तदा कात्यायनः चतुर्थशतमानमध्ये [अर्थात् ३५० ई.पू] आसीदिति निर्णेतुं शक्यते । अयं निर्णयः सर्वेषामपि अनुकूलम्भवति यतः केचन जानन्ति कात्यायनः नन्दमहाराजस्य मन्त्री आसीदिति । वासुदेवशरण् अग्रवाल महोदयमते तु पाणिनिकात्यायनयोर्मध्ये एकशतमानस्य अन्तरमासीदिति । युधिष्टिरमीमांसकरीत्या पाणिनिः वि.पू २८०० वर्षे तथा कात्यायनः २८०० वि.पू वर्षे आसीदिति वक्ति । परन्तु सोऽपि पाणिनिकात्यायनयोः मध्ये १०० वर्षस्य अन्तरमासीदित्येव स्वीकरोति ।

**श्रौतसूत्रग्रन्थस्य स्थूलपरिचयः–**

आचार्यकात्यायनः मन्त्र तथा ब्राह्मणग्रन्थोक्त श्रौतयज्ञान् सूत्ररूपेण ग्रन्थं विरचितवान् । स च ग्रन्थः एव लोके "कात्यायनश्रौतसूत्र" नाम्नि प्रसिद्धिं अवाप्नोत् । तत्रापि शुक्लयजुर्वेदशाखानुयायिनां सर्वेषामपि अयं ग्रन्थः श्रौतकर्मणि मार्गदर्शकग्रन्थः अस्ति । अधुना अनेकाः विद्वांसः "कात्यायनश्रौतसूत्र" ग्रन्थोऽपरि सटीकां विविध भाषायां प्रकटितवन्तः ।

वेदे तु वैदिककर्माणि पञ्चधाविभक्तानि । स एव यज्ञः पञ्चविधोऽग्निहोत्रं, दर्शपूर्णमासौ, चातुर्मास्यानि, पशुः, सोमः एवम् वर्तते । तथा च वेदे, औपासनहोमः, वैश्वदेवम्, पार्वणम्, अष्टका, मासिकश्राद्धम्, श्रवण, शूलगव इत्येवं सप्तपाकयज्ञसंस्थाः, एवमेव अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रयणम्, चातुर्मास्यानि, निरूढपशुबन्धः, सौत्रामणी, पिंडपितृयज्ञादयो दर्विहोमा इति सप्त हविर्यज्ञसंस्थाः, तथा च अग्निष्टोमः, अत्यग्निष्टोमः, उक्थ्यः, षोडशी, वाजपेयः, अतिरात्रः, अप्तोर्यामः एवं सप्तसोमसंस्थाः इत्येवं श्रौतानि तथा स्मार्तानि मिलित्वा एकविंशतिरिति उक्तानि सन्ति ।

अस्मिन् कायायनश्रौतसूत्रग्रन्थे तु २६ अध्यायाः सन्ति । सप्त हविर्यज्ञसंस्थाः, सप्त पशुसंस्थाः तथा सप्त सोमयज्ञानां विधिसहित निरूपणम् एतेषु अध्यायेषु वर्णितमस्ति । तर्हि कस्मिन् अध्याये कः विषयः इति संक्षेपरूपेण पश्यामः । वेदाध्ययनानन्तरं वेदप्रतिपादितेषु कर्मसु कः अधिकारी? इति प्रश्नस्य उत्तरं मङ्गलाचरणानन्तरं प्रथमाध्याये "अथातोऽधिकारः" इत्यनेन सूत्रेण आरभ्यते । अस्मिन् प्रथमाध्याये कर्मणां फलत्वम्, के अनधिकारिणः, प्रायश्चित्तविचाराः, यागस्वरूपनिरूपणम्, इत्यादयः अंशाः दशकण्डिकामध्ये निरूपिताः ।

द्वितीयाध्याये अष्टकण्डिकायां तथा तृतीयाध्याये अष्टकण्डिकायां दर्शपूर्णमासविचाराः प्रतिपादिताः । "पूर्वां पौर्णमासीमुत्तरां वोपवसेत्" अनेन सूत्रेण दर्शपूर्णमासनिरूपणम् आरभ्यते ।

चतुर्थाध्याये आहत्य पञ्चदश कण्डिकाः सन्ति तथा पिण्डपितृयज्ञ, आधानं तथा अग्निहोत्रनिरूपणं पश्यामः । अयं अध्यायः "अपराह्णेपिण्डपितृयज्ञश्चन्द्रादर्शनेऽमावास्यायाम्" इत्यनेन सूत्रेणारम्भो भवति ।

चातुर्मास्यविचारः, मित्रविन्देष्टि तथा दर्विहोमनिरूपणं पञ्चमाध्याये लभ्यते । अयमध्यायः "चातुर्मास्यप्रयोगः फल्गुन्याम्" अनेन सूत्रेण आरभ्यते तथा अस्मिन् अध्याये त्रयोदशकण्डिकाः सन्ति।

षष्ठाध्याये आहत्य दशमकण्डिकाः सन्ति । अस्य अध्यायस्य विचारः निरूढपशुबन्धविषयः । निरूढपशुबन्धकालः, निरूढपशुबन्धदेशः, यूपविचाराः सूत्ररूपेण दत्ताः सन्ति ।

सप्तमाध्याये, अष्टमाध्याये, नवमाध्याये तथा दशमाध्याये क्रमेण ९–९–१४ तथा ९ कण्डिकायां सोमयागविचाराः अर्थात् सोमयागस्य कालः दीक्षापक्षाः, यूपञ्छेदनकालः, दीक्षाविचाराः, औद्ग्रभणहोमः, वाग्विसर्जनम्, व्रतविचारः, अवभृथे दीक्षितनियमाः,सोमविचाराः, अग्निमन्थनम्, चमसभक्षः, इडाप्राशनम् ऋतुग्रहभक्षः इत्यादयः विषयाः प्रतिपादिताः । एकादशाध्याये ब्रह्मकर्तव्य विचाराः एककण्डिकायां उक्ताः । द्वादशाध्याये आहत्य षट्कण्डिकायां 'द्वादशाह' विचाराः सन्ति । एवमेव, सौम्यचरोः प्रचारः, पात्नीमग्रहग्रहणम्, पात्नीवतयागः, अवभृथकर्म, उदसावनीयेष्टिः, इति एतेविचाराः उक्ताः ।

त्रयोदशाध्याये गवामयनविचारः, चतुर्दशाध्याये 'वाजपेय' विचारः अर्थात् वाजपेययागः केन, कदा कार्यः?, तत्र अधिकारिणः, वाजपेयस्यादौ अन्ते च क्रियमाणकार्यम्, सप्तदशदीक्षाणां निरूपणम् अश्वनां योजनक्रमः, मधुग्रहप्रचारः, स्वर्गरोहणम् इत्येते विषयाः निरूपिताः ।

पञ्चदशाध्याये 'राजसूय' विचारः, अस्ति । "राज्ञो राजसूयोऽनिष्टिनो वाजपेयेन" इत्यनेन सूत्रेण पञ्चदशाध्यायस्य आरम्भः भवति । यः राजा वाजपेयं न कृतवान्, स राजसूययज्ञं कुर्यात् इत्यर्थः । अस्मिन् अध्याये, राजसूयिकानां चातुर्मास्यानां निरूपणम्, अपामार्गहोमः, पार्थहोमविचारः, रथविमोचनीयहोमः, सुरापावनं, सुराग्रहणम्,

सुराहोमः इत्यादयः पञ्चदशाध्याये प्राप्नुवन्ति । षोडशाध्यायादारभ्य अष्टादशाध्यायपर्यन्तं “चयनयागविचारः उक्तः ।

अत्र सर्वेषां पशूनां प्राणसंशोधनम्, उखानिर्माणप्रकारः, चितेः षड्विधत्वम्, लोगेष्टकानाम् उपधानम्, नैऋ棋तीनाम् इष्टिकानाम् उपधानम्, चितौ स्रुचोः उपधानम्, दूर्वेष्टकोपधानम्, कूर्मोपधानम्, चित्योपस्थानम्, चितेरूपस्थानम्, शतरुद्रियहोमप्रकारः, इत्यादि विषयाः सन्ति ।

नवदशाध्याये “सौत्रामणी” विषयः, विंशोऽध्याये ‘अश्वमेध’ यागसम्बन्धित विषयाः उक्ताः । तथा च होतृ-अध्वर्योः संवादः, अवभृथेष्टिः इत्यादयः विचाराः सूत्ररूपेण सूचिताः सन्ति ।

एकविंशोध्याये ‘पुरुषमेध’ विचारः द्वाविंशोध्याये तथा त्रयोविंशोध्याये ‘एकाह’ विषयः, चतुर्विंशोध्याये तथा पञ्चविंशोध्याये ‘सत्रयागनिरूपण’ विषयाः, तथा अन्तिमे षड्विंशोध्याये ‘महावीर’ तथा ‘प्रवगर्य’ निरूपण विषयाः लभ्यन्ते ।

एतादृशग्रन्थानाम् अध्ययनं न सुलभम् । परन्तु टिकाग्रन्थाः छात्राणां कृते तथा श्रौतकर्मकरणासक्तानाम् उपकाराय भवन्तीत्यत्र नास्ति सन्देहः । सर्वकारस्य कठिणानियमकारणात् अद्य अनेकश्रौतकर्मकरणम् असाध्यमस्ति । श्रुत्युक्तकर्मकरणेन समस्तलोकाय सदा मङ्गलं भवतीति स्वाभिप्रायः ।

**राजराजेश्वर. एन्. जोशि**

अतिथि उपन्यासकः,

शुक्लयजुर्वेद विभागः,

महाराज संस्कृत महाविद्यालयः,

न्यू सय्याजिराव् रोड्,

मैसूरु-५७००२४. कर्नाटक,

चरदूरवाणी-९४४९१३१२५३,९६६३३१९२५३

E-mail: rajarajeshwaranjoshi@gmail.com

**********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# पदविभागविषये यास्क-पाणिन्योः मतविमर्शः

**सुवीर दलुइः**, पश्चिम बंगाल

**संक्षिप्तिः–**

वैदिककालादारभ्यशाब्दिकवाङ्मये पदविषये चर्चा प्रचलिता। तत्र कति पदानि, कानि तानि, तस्य स्वरूपं कीदृशं, भाषायां प्रयुक्तानां शब्दानाम् अर्थवैचित्रं, इत्येते विषया वेद-वेदाङ्ग-उपनिषदादिशास्त्रेषूपलभ्यन्ते। तत्र विविधेषु विषयेषु मतसाम्यं यथा विद्यते तथैव मतवैप्यरीत्यमपि परिलक्ष्यते। शाब्दविशारदतत्परेषु प्राचार्येषु केचन पदविभागस्य प्रकारद्वयं, केचन प्रकारचतुष्टयं, केचन प्रकारपञ्चकं च स्वीकुर्वन्ति[1]। तत्र पदविभागविषये यास्क-पाणिन्योः मतवैषम्यं यथा दृश्यते तथैव केषुचित् विषयेषु मतसाम्यमपि परिलक्ष्यते। पदविभागविषये उभयोः आचार्य्ययोः किमस्ति राद्धान्तः, द्वयोः शास्त्रयोः पदविभागगतमतपार्थक्यस्य किमस्ति युक्तयः, कारणानि, तथा च भाषाविज्ञानदृष्ट्या किं प्रकारकं पदविभाजनं युक्तम् इत्येते विषयाः यथामतिः शोधप्रबन्धेऽस्मिन् उपवर्णितं वर्तते।

**प्रबन्धमूलांशः –**

निरुक्तकारेण यास्केन स्वकीये निरुक्ते पदविषये सुदृढालोचनं विहितम्। प्राचीनपरम्परामनुसृत्य वाग्व्यवहारे प्रयुज्यमानपदानां नामाख्यातोपसर्गनिपाताः इति क्रमेण चत्वारो विभागाः यास्केन अङ्गीकृताः[2]। निरुक्तकारेण या वैदिकशब्दाः समाम्नाताः, तेषां वैदिकशब्दानां नामादि क्रमेण वर्गीकरणमपि संकलितम्। वेदे प्रयुक्ताः वैदिकशब्दाः नाम-आख्यात-उपसर्ग-निपातादीनां नातिरिक्ताः इति निरुक्तकारस्याभिप्रायः। अत आदौ एतेषां वै सामान्यपरिचयप्रदानादन्तरं पदविभागविषये यास्क-पाणिन्योः मतविमर्शो विविच्यते।

**नाम –**

तत्रादौ नामविषये यास्केनोक्तं- **"सत्त्वप्रधानानिनामानि।"**प्रह्वत्वे नम्धातोः मनिन्प्रत्यये, निपातने अकारस्थाने आकारं कृत्वा नामनइति शब्दो । सत्त्वं द्रव्यमिति भाष्येस्पष्टम्। सीदति गच्छति लिङ्गसंख्यादिकमस्मिन्निति सत्त्वम्। सत्त्वशब्देन सामान्येन सिद्धवस्तु अवबुध्यते। यस्य साधनमभवत् तत् सिद्धमिति। आख्यातानि विहाय सर्वाण्येव सिद्धशब्देन परामृश्यते। सामान्यतः कस्मिंश्चिदपि नाम्नि सत्त्वं(द्रव्यम्), कालः, संख्या, कारकं इत्येते चत्वारः अर्थाः अन्तर्निहिताः भवन्ति।एतेष्वर्थेषु सत्त्वरूपमर्थं प्रधानमित्यतः सत्त्वप्रधानानि नामानीत्युच्यते।[3] यथा, पाचकः, परिव्राजकः, याजक इत्यादयो नाम्नां प्रकृष्टोदाहरणम्।

इह वक्तुं शक्यते यत्, निरुक्तादिषु प्राचीनग्रन्थेषु नामशब्देन यदुपलक्ष्यते लौकिके विशेषतः अष्टाध्याय्यादिषु व्याकरणग्रन्थेषु तत्तु सुबन्तपदमिति। सुप्तिङन्तं पदमिति[4] सूत्रयन् भगवान् पाणिनिः कृत्स्नं शब्दराशिमेव द्विधा विबभाज। अष्टाध्यायीव्याकरणे सुबन्त-तिङन्तयोः सामान्येन पदसंज्ञा विधियते। स्वौजस्...इत्यनेन सूत्रेण आहृत्य एकविंशतिः सुप्रत्ययाः प्रातिपदिकेभ्यः अनन्तरमागच्छन्ति[5]। इत्येवं प्रकृति-प्रत्ययोर्मेलनेन व्याकरणे सुबन्तपदस्य निर्माणं भवति। यथा – राम + सु = रामः। अत्रैव व्याकरणशास्त्रेण सह निरुक्तशास्त्रस्य प्राधानमन्तरम्। व्याकरणं प्रकृति-प्रत्ययसहयोगेन साधुशब्दोत्पत्तिरूपा सम्पूर्णा प्रक्रियां साधयति, अत्र शब्दानामर्थनिरूपणं गौणम्। अन्यच्च अर्थप्रधाननिरुक्तमिति। अतः केवलं मन्त्रेषु स्थितानां पदानां नामाख्यातोपसर्गनिपाताः इति क्रमेण उपदेशादनन्तरं तेषामर्थकरणं निरुक्तस्य मुख्यः कार्यम्।

**आख्यातम् –**

आङि चक्षिङ् व्यक्तायांवाचि चक्षधातोः क्त इति प्रत्येण, चक्षधातोः ख्यादेशे आख्यातपदमिदं निष्पद्यते[6] ।यास्केन स्वकीये निरुक्ते आख्यातलक्षणमुक्तं — "भावप्रधानमाख्यातम्[7]।"अत्र भावशब्देन क्रियोपलक्ष्यते। अर्थात् क्रियाप्रधानमित्याख्यातम्, इति तु निरुक्तकारस्य अभिप्रायः।आख्याते हि पचतीत्यावुच्चारिते यथा पाकादिः क्रियोपलक्ष्यते तथैव वर्त्तमानादिकालः, प्रथमादिः पुरुषः, इत्यादीनामपि बोध अनेन क्रियापदेनैव जायते। एतेष्वर्थेषु पाकरूपक्रिया प्रधानभूता, इत्यत उच्यते भावप्रधानमिति[8]। भू धातोः भाववाच्ये घञि भावशब्दो निष्पद्यते। अत्र यास्कनये भावः (क्रिया) यत्र प्रधानं भवति सैव आख्यातमिति। वस्तुतो निरुक्ते व्याप्त्यर्थे आख्यातपदं प्रयुज्यते, उपक्रमाद् अवसानमवधिः कार्यसमुदायं इह आख्यातेनाचष्टे।

पौर्वापर्येणावस्थितं उपक्रमाद् अवसानपर्यन्तं क्रियासमुदायमाख्यातमिति वक्तव्यम्। निरुक्तकारोपदिष्टेन आख्यातपदेन यदुपलक्ष्यते अष्टाध्यायीपरम्परायां तत्तु तिङन्तपदमति ज्ञायते। धातु-तिङ्प्रत्ययोर्मेलनेन प्रक्रियायां तिङन्तपदस्य साधनं भवति। यथा पचति, भवति, गच्छति। एतेषामेव तिङ्न्तपदानां प्रयोगवस्तायां सामान्येन भावः, क्रियाशब्देन वेति व्याकरणादिषुशास्त्रेषूपलक्ष्यते। व्याकणशास्त्रे द्वौ क्रियाभेदौ दृश्येते। तिङन्तक्रिया, कृदन्तक्रिया च। वाक्यपदीये अस्य नामान्तरमस्ति सिद्धस्वभावा क्रिया, साध्यस्वभावा क्रिया च। सामान्यतः तिङन्तस्थले साध्यक्रिया, कृदन्तस्थले च सिद्धस्वभावा क्रिया[9]।

**उपसर्गः –**

उप- सृज् धातोः घञि उपसर्गशब्दः व्युत्पन्नः। उपसर्गाः नामाख्यातयोः अर्थयोः विशेषं सृजन्ति। पदविभागविषये यानि चतुर्विधानि पदानि स्वीकृतानि तेषु उपसर्ग-निपातौ अन्यतमौ इति निरुक्तकारः प्रतिपादयति। उपसर्गविषये यास्कपाणिन्योः मतवैष्यमस्तीति ज्ञायते। मुख्यतो निरुक्ते यस्मिन्नर्थे उपसर्गप्रयोगो विहितो व्याकरणादिषुशास्त्रेषु तस्मात् किञ्चिद् भिन्नार्थः परिलक्षितः।पुनश्च अष्टाध्यायीपरम्परायां प्रादीनां व्यवहारवैचित्रमपि परिलक्षते। व्याकरणे प्र-परा-अभि इत्येतेषां कदाचिद् उपसर्गसंज्ञा, कदाचित् गति-कर्मप्रवचनीयत्वेन व्यवहारो वैयाकरणैः क्रियन्ते। अत्रैव शाब्दिकैः साकं निरुक्तकाराणां मतपार्थक्यम्। निरुक्तादिषु प्राचीनग्रन्थेषु तथा प्रातिशाख्येषु सर्वत्रैव उपसर्गस्य पृथक्पदत्वेन व्यवहारः परिलक्ष्यते। नामाख्याताभ्यां सह उपसर्ग-निपातौ अपि प्रधानमन्त्रशरीरत्वेनोच्यते निरुक्ते। परन्तु अष्टाध्याय्याम् उपसर्ग-निपातौ अव्ययप्रकरणान्तर्गतौ क्रियेते पाणिनिना; अस्य कारणमप्यस्ति, लौकिकप्रयोगानुसारी अष्टाध्यायी, अत्र वेदिकप्रयोगाः न्युनाः। लोके पृथकप्रयुक्तानामुपसर्गाणां व्यवहारं नास्ति। लोके उपसर्गाः सर्वदा क्रियया युज्यन्ते , अतो मूलतः लोकव्यवहारं दृष्ट्वा पाणिनिना 'उपसर्गाः क्रियायोगे' सूत्रमिदम् आरचितमिति वक्तुं युज्यते। परन्तु वेदे पृथक्प्रयुक्तानाम् उपसर्ग-निपातानां व्यवहारं बाहुल्येन प्राप्यते। एतेन सह मन्त्रार्थावबोधने एतयोः उपसर्ग-निपातयोः अर्थज्ञानमप्यावश्यकमिति कारणात् प्रातिशाख्यादिषु ग्रन्थेषु निरुक्तादिषु वेदाङ्गेषु उपसर्ग-निपातयोः पृथक्पदत्त्वेन व्यवहारं स्वाभाविकमेवेति शम्।

**निपाताः –**

प्राचीनपरम्परायां वाग्व्यवहारे प्रवर्तितमाना सुरगिरा येषु चतुर्विधेषु पदेषु विभक्ताः समासन् तेषु निपात अन्यतमः। नि - पत् धातोः 'ण'इति प्रत्ययेण निपातशब्दो व्युत्पन्नः। आचार्य्ययास्केन स्वकीये निरुक्ते निपातलक्षणनिरूपनावसरे आचार्यगार्ग्यमतमुद्धृतम्—वाक्ये निपाताः विविधेष्वर्थेषु संप्रयुज्यन्ते[10] । निरुक्तटीकारेण अचार्यगार्ग्येण उक्तिरीयं 'उच्चावचाः पदार्थाः भवन्तीति गार्ग्यः' उषित्वा स्पष्टीकृता। उच्चावचा बहुप्रकाराः इत्यर्थः[11]। निरुक्तव्याख्याकारेण लक्षणसरूपेणापि कथितं— "The particles occur various sense, both in comparative sense, in a conjunctive sense, and as expletives…[12] अर्थात् अर्थवन्ताः निपाताः, बहुप्रकारेषु अर्थेषु व्यवह्रियन्ते इत्यभिप्रायः। निरुक्ते मुख्यतः चतुर्विधेष्वर्थेषु निपातव्यवहारं परिलक्ष्यते, उपमार्थे-कर्मोपसंयोगार्थे-पादपूरणार्थे-समुच्चयार्थे चेति[13]।

अष्टाध्यायीपरम्परायां निपातस्य स्वतन्त्रपदत्त्वं नास्ति, यथा निरुक्तादिषु ग्रन्थेषु दृश्यते। अपि च अव्ययपदस्येकः अवान्तरभेदत्वेनोच्यते। पाणिनिव्याकरणे निपाताधिकारः अव्ययप्रकरणे पठितोऽस्ति। व्याकरणे अव्ययानां प्रातिपदिकत्वहेतोः सुप् प्रत्ययाः युज्यन्ते, परन्तु अस्य सुपस्य लुक् भवति[14]। वस्तुतः, अष्टाध्याय्यां "प्रागीश्वरान्निपाताः"[15] इति सूत्राद् "विभाषा कृञि"[16] इति सूत्रपर्यन्तं येषां प्रादीनां चादिनञ्च परिगणनं भवति तेषां सामान्येन निपातसंज्ञा विधियते। निपातलक्षणोक्तसत्त्वपदेन द्रव्यार्थप्रतीतिर्भवति[17]। इह वक्तुं पार्यते यत्, निरुक्तादिषु प्राचीनग्रन्थेषु निपातां यादृशाः प्रयोगाः उपलभ्येरन्, तादृशाः प्रयोगाः अर्वाचीनेषु व्याकरणादिशात्रेषु न दृश्यन्ते। अष्टाध्यायीव्याकरणपरिशीलनमाध्यमेन प्रामुख्येन ज्ञायते यत्, निपाताः अर्थद्योतकाः भवन्ति, न तु अर्थवाचकाः। प्राचीनपरम्परयां निपाताः चादयः, उपमार्थकः, कर्म्मोपसंग्रहार्थकः, पादपूरणार्थकः क्रमेण चतुर्षु अर्थेषु प्रयुक्ताः सन्तोऽपि अष्टाध्यायीपरम्परायां मुख्यतः त्रिविधेष्वर्थेष्वेव निपातव्यवहारो दृश्यते। शुद्धनिपातः, गतिः, कर्मप्रवचनीयश्चेति।"चादयोऽसत्त्वे"[18] सुत्रानुसारेण चादिगणे पठिता चादयशब्दाः, तथा प्रादयः सूत्रानुसारेण प्रादिगणे पठिताः शब्दाः व्याकरणानुसारेण शुद्धनिपाताः। यथा— च, वा, अह, एवम्, इत्यादयः। व्याकरणे निपातस्य अवान्तरभेदः गतिः।

गतिश्च[19] इति पाणिनीयसूत्राधिकारे परिगणिताः शब्दाः क्रियायोगे प्रायतः गतिसंज्ञकाः भवन्तीति वैयाकरणसिद्धान्तः। तद्यथा— प्रकृत्य, उररीकृत्य, खाटकृत्य इत्यादयः। पाणिनिव्याकरणे निपातस्येतरः भेदो भवति कर्मप्रवचनीयः।

## उपसंहृतिः –

प्राक्पाणिनिकालिकाः प्राचार्याः चतुर्प्रकाराः पदविभागाः स्वीकृतेऽपि पाणिनिना स्वकीयायाम् अष्टाध्याय्यां पदद्वयं प्रकल्प्य लाघवं कृतवान् नात्र क्वापि विप्रतिपत्तिः। अपि च भाषाविज्ञानदृष्ट्या पदविभागस्य प्रकारद्वयं युक्तमिति सर्वे अङ्गीकुर्वन्ति। अष्टाध्यायीति व्याकरणे अधिकाधिकैः सूत्रचतुष्टयैः पदसंज्ञा विधियते[20] । एतानि सूत्राणि पर्यालोच्य वक्तुं शक्यते यत् अष्टाध्यायी व्याकरणे पदं मुख्यतो द्विविधमेव। सुबन्तं तिङन्तं च; सूत्रमस्ति **"सुप्तिङन्तं पदम्[21]।"**यास्केन उपसर्ग-निपातौ यथा पृथक्पदत्वेन स्वीक्रियते अष्टाध्याय्यां न तथा, अपि च अष्टाध्याय्याम् उपसर्ग-निपातयोः अव्ययसंज्ञा भवति, पुनः पाणिना अव्ययस्य सुबन्तपदसंज्ञा विहिता। यतोहि पाणिनिव्याकरणे सर्वाणि अव्ययपदानि मूलत्वेन प्रातिपदिकसंज्ञकानि भवन्ति, एतेभ्यः सुप्रत्ययाः आवश्यकरूपेण युज्यन्ते। परन्तु एतेभ्यो विहितानां सुप्रत्ययानाम् "अव्ययादाप्सुपः[22]"इत्यनेन लुक् भवति। किन्तु वेदे पृथक्प्रयुक्तयोः उपसर्गनिपातयोः अस्तित्त्वं विद्यते। उपसर्ग-निपाताः अपिनामाख्यातमिव पवित्रवेदमन्त्रशरीरस्याविच्छेद्याङ्गत्वेन विराजते। मन्त्रार्थप्रत्ययाय एतेषां सर्वेषां भाणं मुख्यमासीदित्यत प्राचार्याः प्राचीनपरम्परायाम् उपसर्ग-निपातयोः पृथक्पदत्वेन व्यवहारं चकार इत्यनुमीयते। तदनन्तरं, भाषा यदा वैदिकात् लौकिकं प्रति अग्रसरति तदा उपसर्ग-निपातयोः व्यवहारभेदौ सञ्जातौ। तत्रादौ वाक्ये एतयोः उपसर्ग-निपातयोः पृथगस्तित्वं अन्तर्लीनं भूत्वा नामाख्यातयोः अविच्छेद्याङ्गत्वेन व्यवहारः प्रचलितः। अत्र वक्तुं शक्यते यत्, कालेन भाषायाः परिवर्तनशीलत्वात्भाषागतशब्दानाम् अर्थरूपान्तरं स्वाभाविकमेवेति शम्।

## पादटिप्पणी

1. द्विधा कैश्चित्पदं भिन्नं चतुर्धा पञ्चधाऽपि वा अपोद्धृत्यैव वाक्येभ्यः प्रकृतिप्रत्ययादिवत्।। ***वाक्यपदीय*.३.१**
2. तद्यान्येतानिचत्वारिपदजातानिनामाख्यातेचोपसर्गनिपाताश्चतानीमानिभवन्ति। ***निरुक्तम्*.१.१**
3. *निरुक्तम्*.१.९ '...नाम्नोऽपिसत्त्वाद्रव्यंसंख्यालिङ्गमित्येतेऽर्थाः। तेषांद्रव्यंप्रधानमित्यतःसत्त्वप्रधानानिनामानीत्युक्तम्।'- **निरुक्तवृत्तिः**
4. *अष्टाध्यायी*.१.४.१४
5. *अष्टाध्यायी*.४.१.१
6. चक्षिङः ख्या, *अष्टाध्यायी*. २.४.२४
7. *निरुक्तम्*.१.१
8. भावः क्रिया तत्प्रधानमाख्यातम्। आख्याते हि पचतीत्यादावुच्चारिते क्रिया प्रतीयते पाकादिः। कालो वर्त्तमानादिः। पुरुषः प्रथमादिः... *निरुक्तम्*.१.१, स्कन्दस्वामी भाष्यम्।
9. धातुरूपनिबन्धनाक्रिया साध्यत्वेन, घञादिनिबन्धना क्रिया सिद्धत्वेनोच्यते।' *वाक्यपदीय*.३.४६
10. उच्चावचेष्वर्थेषुनिपन्ति, ***निरुक्तम्*.१.४**
11. *निरुक्तम्*.१.४, **दुर्गाचार्यटीका**
12. *Nighantu&Niruktam*, by lakshmansarup, p.07
13. अप्युपमार्थेऽपिकर्म्मोपसंग्रहार्थेऽपिपदपूरणाः, ***निरुक्तम्*.१.४**
14. " अव्ययादास्पुपः", ***अष्टाध्यायी*.२.४.८२**
15. *अष्टाध्यायी*.१.४.५६
16. *अष्टाध्यायी*.१.४.९८
17. अयं सत्त्वशब्दोऽस्त्यव द्रव्यपदार्थकः।' ***महाभाष्यम्***
18. *अष्टाध्यायी*.१.४.५७

*19. अष्टाध्यायी.१.४.६०*

20. सुप्तिङन्तं पदम्(१.४.१४), नः क्ये(१.४.१५), सिति च(१.४.१६),स्वादिष्वसर्वनामस्थाने(१.४.१७)

*21. अष्टाध्यायी.१.४.१४*

*22. अष्टाध्यायी.२.४.६२*

## परिशीलिताग्रन्थावली


पाणिनिः.*अष्टाध्यायी.* वाराणसी : चौखम्बासुरभारती प्रकाशनम्, २००८.

पाणिनिः. *पाणिनीयशिक्षा.* सम्पा. मन्मोहन्-घोषः. न्यु दिल्ली : वि.के पाबलिशार्स हाउस,१९९२.

भर्तिहरिः. *वाक्यपदीयम्*(ब्रह्मकाण्डम्). सत्यनारायणशास्त्री खण्डूडि, वाराणसी :कृष्णदास एकादेमी,१९८७.

---.(पदकाण्डम्).सम्पा.रघुनाथशर्मा.वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,१९९७.

शौनकः. *ऋग्वेदप्रातिशाख्यम्*(उवटभाष्यसहितः). सम्पा. वीरेंद्रकुमार वर्मा. दिल्ली : चौखम्बा संस्कृतप्रतिष्ठानम्,१९९८.

यास्कः. *निरुक्तम्*(दुर्गाचार्यकृतः ऋज्वार्थाख्यसहितः). सम्पा. मुकुन्दः झा शर्मा. दिल्ली : चौखम्बासंस्कृतप्रतिष्ठानम्,२०१६.

---,सम्पा. अमरेश्वरठाकुरः. कलकाता : कलकाता-विश्वविद्यालयः,२०१६.

Yaska.*Niruktam*.ed.by Lakshman, Sarup .The NighantuAnd TheNirukta. Delhi :MotilalBanarsidas Publishers pvt.Limited, 2002.

Shounak.*AtharvavedaPratisakhya.* Varanasi:Chowkhamba Sanskrit Series, 2002.



**Subir Dolui,**

Ph.D. Research Scholar

Supervisor- Prof. HaridasSarkar

Department of Sanskrit

Cooch Behar Panchanan Barma University

Panchanan Nagar, Cooch Behar, West Bengal- 736101

Mob-9804942908

Email- subirdolui436@gmail.com


************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# उत्तररामचरितमिति नाटके श्रृङ्गाररसप्रयोगः

**गौतम रुइदासः**, पश्चिमबंगाल

**संक्षिप्तसार:**

रस्यते आस्वाद्यते इति रसः। रसं विना कोऽपि पदार्थो न प्रतिपद्यते। ननु केन प्रकारेण रसोऽयमुत्पद्यते? विभावानुभावव्यभिचारिभावसंयोगेन स्थायिभावात् रसोत्पत्तिर्भवति। एवमेव रस अष्टप्रकारकः, यथा – श्रृङ्गारः, हास्यः, करुणः, रौद्रः, वीरः, भयानकः, बीभत्सः, अद्भुतश्चेति। एतेष्वष्टप्रकारकरसेषु उत्तररामचरितमिति नाटके श्रृङ्गाररसप्रयोगः आलोचयिष्यामि निबन्धेऽस्मिन्। संस्कृतसाहित्ये श्रृङ्गाररसात्मकानि नैकानि नाटकानि प्राप्यन्ते। तेषु भवभूतिप्रणीते उत्तररामचरितमिति नाटके श्रृङ्गाररसप्रयोगः आलोचितो भविष्यति। यद्यपि नाटकमिदं करुणरसात्मकं तथापि तत्रातिरिक्ततया अपरेषां रसानामुल्लेखो दृश्यते। एतदर्थं मया वक्तुं शक्यते यत् नाटकमिदं श्रृङ्गाररसात्मकमपि । सैव इदानीं मदालोचनविषयतां याति।

**शब्दसंकेतः** - रसः, विभावः, अनुभावः, व्याभिचारिभावः, स्थायीभावः, श्रृङ्गाररसः, श्रृङ्गाररसप्रयोगः।

**भूमिका**

रसधातोः अच्प्रत्ययेन रसशब्दो निष्पद्यते । हरिद्रादिसंयुक्तानि विविधानि व्यञ्जनानि यथा मधुरादिनां षड्रसानां निवृत्तिं साधयन्ति, तथैव विभावादिभावानां संमिश्रणेनैव स्थायिभावः रसे पर्यवसितो भवति। किन्तु 'रसः इति कः पदार्थः'[1] इत्येवम्प्रकारेण भरतमुनिना स्वकृतस्य प्रश्नस्य समाधानरूपेण उत्तरं प्रदीयते'उच्यते आस्वाद्यत्वात्'[2] इति। पुनरपि तेन भणितं- 'कथमास्वाद्यते'[3] ? इत्थं स्वस्यैव प्रश्नस्योत्तरेकथितम् - "यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसनास्वादयन्ति सुमनसः पुरुषा"[4] इति। अर्थात् जनाः यथा नानाव्यञ्जनयुक्तान्नं भुज्यमानाः रसास्वादनं कुर्वन्ति तथैव सहृदयदर्शकाआहार्य-वाचिक-सात्त्विकाङ्गिकाभिनयैः अभिव्यक्तं स्थायिभावमास्वादयन्ति आनन्दञ्च प्राप्नुवन्ति।समासतः यः आस्वादोपयोगी स एव रसः। रसं विना किमपि कोऽपि पदार्थो न प्रतिपद्यते। तथाहि भरतमुनिना भणितम् -

"न हि रसादृते कश्चिदर्थः प्रवर्तते। तत्र विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः॥"[5] इति ।

विभावानुभावव्यभिचारिभावैः सह रसनिष्पत्तिर्भवति। इदमेव भरतस्य रससूत्रनाम्नाभिधीयते। सूत्रेऽस्मिन् भरतेन विभावानुभावव्यभिचारिभावाः पारिभाषिकशब्दरूपेण व्यवहृताः। विभावस्तु कः ? विभावशब्दस्य अर्थो हि रसानुभूतेः कारणम्। वयं कञ्चिज्जनं दृष्ट्वा क्रुद्धा भवामः, अपि च कञ्चिद् दृष्ट्वा मनसि स्नेहधारा प्रकटिता भवति, पुनः व्याघ्रादीन् दृष्ट्वा भीताः भवामः, किञ्च प्रियादर्शनेन हृदयं प्रेमाकुलं भवति, पुनः विच्छेदेन शोकोऽपि भवति, - अत्र क्रोध-स्नेहोत्पत्ति-भय-प्रेमाकुलादीनि विविधानि कारणानि विभावनाम्ना परिचीयन्ते।आलम्बनोद्दीपनभेदाद् विभावः द्विविधः। आलम्बनशब्दस्यार्थस्तावत् चित्तवृत्तेः विषयः। अस्मच्चित्ते या काचिद् वृत्तिरस्ति, सा किञ्चिद्वस्त्ववलम्ब्योद्भूता भवतीत्ययमेवालम्बनविभावः। अपि च अस्फुटस्य स्फूटीकरणम्, अर्धप्रसुप्तस्य सम्पूर्णतया जागरणम्, मुकुलितस्य प्रस्फुटनं यः परिवेशः स एव उद्दीपणविभावः। इदमेव चित्तवृत्तेः सहकारिकारणम्।

व्यवहारिकजगति अस्मद् हृदये यदा कस्यचिद्भावस्यागमनं भवति तदा अस्माद्भावविकाराद् अव्यवहितपरमेव शारीरिकविकारः परिलक्षितो भवति। यथा क्रुद्धजनस्य नेत्रे आरक्ते भवतः, नासिका स्फीता भवति, हस्तास्फालनमारभते - इत्यादयः सर्व एव क्रोधस्यानुभावस्वरूपाः। रत्यादिस्थायिभावानां कार्यं हि अनुभावः। भरतमुनिना नाट्यशास्त्रे अनुभावस्वरूपमुक्तं -

"वागाङ्गाभिनयेनेह यतस्त्वर्थोऽनुभाव्यते। वागङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः॥"[6] इति

अर्थात् नायक-नायिकयोः यान्भावान्दृष्ट्वातयोः रतिशोकादीनांभावानामुत्पत्तिर्भवति , तेभावाएवअनुभावरूपाः।अयंस्थायिभावस्यकार्यरूपः।

वाचिकाङ्गिकसात्त्विकाभिनययुक्तस्य रससमूहस्योपप्रयोगं गमनकारयितृत्वादस्य नामव्यभिचारिभावः। श्रृङ्गारात्मके मनोभावे चित्ताभिषेके सतिक्वचिद्व्रीडा, क्वचिद्आनन्दः, पुनः क्वचित्क्षुद्राक्षुद्राभावाः द्रुतवेगेनसंमिश्रिताभवन्ति।एताः भावाएवव्यभिचारिरूपाः।ततःपरं स्थायिभावः केवलं विभावानुभावव्यभिचारिभावसंयोगात् काव्यरसत्वेन नाट्यरसतया वा परिणमितो भवति। यो भावः

विरुद्धाविरुद्धभावाभ्यां कदापि न विच्छिन्नो भवति। अन्यभावांश्च समुद्रवत् स्वरूपे अन्तर्भावितान् करोति, स एव स्थायिभावः। नाट्येऽस्यअष्टौभेदा: सन्ति।

तदुक्तंमम्मटेन-

"रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा। जुगुप्सा विस्मयश्चेति स्थायिभावा: प्रकीर्तिता:॥"[7] इति।

नाट्ये यथा स्थायिभावस्यअष्टौभेदा: सन्ति, तथैव रसा अपि अष्टौ। तथाहि गदितंभरतमुनिना तदीये नाट्यशास्त्रे-

"श्रृङ्गारहास्यकरुणा रौद्रवीरभयानका:। बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसा: स्मृता:॥"[8] इति।

यथा - श्रृङ्गार:,हास्य:, करुण:, रौद्र:, वीर:, भयानक:, बीभत्स:,अद्भुतश्चेति।मम प्रकल्पो विषयो हि एतेषु अष्टप्रकारकरसेषु उत्तररामचरितमिति नाटके श्रृङ्गाररसप्रयोग:। तदर्थमधुना आलोच्यते क: कीदृश: श्रृङ्गाररस:?

**श्रृङ्गाररस:**

श्रृङ्ग-उपपदपूर्वकात् ऋ-धातो: अण्-प्रत्ययेन श्रृङ्गारशब्दस्य निष्पत्तिर्भवति। सर्वेषु रसेष्वादिभूतो हि श्रृङ्गाररसोऽयम्। पुरुषं प्रति नार्य्या: तथा च रमणीं प्रति पुरुषस्य य: सम्भोगस्पृह: स एव श्रृङ्गाररस:। स: रस: क्रीडारत्यादीनां जनक:। प्रत्येकं रसस्य पृथक् पृथक् देवता अस्ति। कस्य रसस्य सिद्ध्यर्थं कस्या: देवताया: पूजनमुचितम्, तत्तु अवश्यमेव ज्ञातव्यम्। अत्र श्रृङ्गाररसस्य देवता विष्णु:। तदुक्तं नाट्यशास्त्रकारेण - "श्रृङ्गारो विष्णुदेवत:"[9] इति।प्रत्येकं रसस्य देवताभि: सह प्रत्येकं रसस्य वर्णानामपि परिकल्पनं कृतम्। यथा अत्र श्रृङ्गाररस्य वर्णो हि श्याम:। रसाभिनयो: भिन्नवर्णेन आलोकितो भवति, येन रसपरिकल्पनं भविष्यति।

भरतपादाचार्येण नाट्यशास्त्रे श्रृङ्गाररसस्वरूपविषये कथितम् -"श्रृङ्गारो नाम रतिस्थायिभावप्रभव उज्ज्वलवेषात्मक:"[10] इति। अर्थात् रतिनामकस्थायिभावेन उज्ज्वलवेशात्मक: श्रृङ्गाररस: उत्पद्यते। लौकिकजगति कश्चित् शुभ्र: पवित्र: सुदर्शनश्च श्रृङ्गारेण सह एव उपमीयते। दृष्टान्तस्वरूपं यदि काचन रमणी उज्ज्वलवेशात्मकं परिधानं करोति तर्हि स उल्ल्वलवेशधारणकारीति वक्तुं शक्यते। यदि नायकनायिकयोर्मध्ये तुल्यभावेन आलम्वनविभावेन ग्रहणपूर्वकंपरस्परं प्रति अनुरूपस्पृहा प्रदर्शिता तर्हि परस्परं स्पृहारूपचित्तवृत्ति: रति: नाम्नाभिधीयते। पुनश्च यदि निर्जनस्थाने मिथ: आलापेन नायकनायिकयो: अन्तरे परस्परं ग्रहीतुमिच्छति, तर्हि तयोर्मध्ये रतिनामकस्थायिभावस्योत्पत्ति: भवति। अस्मात् रतिनामकात् स्थायिभावादेव श्रृङ्गाररसस्य सृजनं भवति। अधुना उत्तररामचरितमिति नाटके श्रृङ्गाररसप्रयोग: कीदृशेन प्रकारेण कृतवान् तत्तु द्रष्टव्य: विषय:।

**उत्तररामचरितमिति नाटके श्रृङ्गाररसप्रयोग:**

संस्कृतसाहित्यनभसिश्रृङ्गाररसात्मकानि अनेकानि नाटकानि प्राप्यन्ते। तेषु भवभूतिप्रणीते उत्तररामचरितमिति नाटके श्रृङ्गाररसप्रयोगमालोचयिष्यामि। नाटकस्यास्य करुणरसात्मकत्वेऽपि अनेकत्र श्रृङ्गाररसस्य प्राधान्यादिदं श्रृङ्गाररसात्मकमिति वक्तुं शक्यते। एतदर्थं मया वक्तुं शक्यते यत् नाटकमिदं श्रृङ्गाररसात्मकम्। अधुनाउत्तररामचरिते श्रृङ्गाररसस्य प्रयोगस्थलानि उदाहरणमुखेन प्रदश्यन्ते।

* उत्तररामचरितनाटकस्य प्रथमाङ्के श्रृङ्गाररसप्रयोगो दृश्यते -

अलसलुलितमुग्धान्यध्वसञ्जातखेदात् अशिथिलपरिरम्भैर्दत्तसंवाहनानि ।
परिमृदितमृणालीदुर्वलान्यङ्गकानि त्वमुरसि मम कृत्वा यत्र निद्रमवाप्ता॥[11] इति।

चित्रकुटमार्गे कालिनदीतटस्थितस्य श्यामः इति नामक वटवृक्षस्य स्मरणं प्रसङ्गे सीतां प्रति रामेण भाषितम् - सीताया: कोमलाङ्गं पथपरिश्रमेण क्लान्तम् । तस्याः श्रमकातरं क्लान्तम् अङ्गं मृणालसदृशं दुर्वले सत्यपि मनोहरशोभितम्। सीतायाः एतानि दुर्वलानि अङ्गानि रामचन्द्रः गाढालिङ्गनेन संवाहनं कृतवान् । अत्रैव सीता रामचन्द्रवक्षे परमानन्दे निद्रितवती। अत्र सीताश्रितं रतिं प्रति रामचन्द्रः आलम्बनविभावः । ततः चित्रकुटमार्गे कालिनदीतटस्थितस्य श्यामद्रुमस्य मनोरमपरिवेशः उद्दीपनविभावः । रामसीतयोः प्रेमजनोचितो वार्तालापो ह्यनुभावः। तयोरावेगश्च व्याभिचारिभावः। एवम्प्रकारेण विभावानुभावव्यभिचारिसंयोगेन रतिनामकस्थायिभावात् शृङ्गाररसस्य सृष्टिर्भवति।

- पुनः प्रथमाङ्केदृश्यते यत्–

किमपि किमपि मन्दं मन्दमासक्तियोगादविरलितकपोलं जल्पतोरक्रमेण।

अशिथिलपरिरम्भव्यापृतेकैकदोष्णो रविदितगतयामा रात्रिरेव व्यरंसीत् ॥[12] इति।

अस्मिन् श्लोके रामसीतयोः वनवासकाले तयोर्दाम्पत्यजीवनस्य सुखस्मृतिः प्रतिपादिता। गोदावरीनद्याः समीपे स्थितः प्रस्रवणपर्वते रामेणः सीतया च रात्रियापनं विहितम्। तत्र रामः सीतया सह विभिन्नविषयं वार्तालापं कृतवान्। कथितुं समये तयोः कपोलयुगलं परस्परं संलग्नं तिष्ठति। उभयोर्बाहुयुगलं गाढालिङ्गने व्यापृतम्। सुखसागरे मग्नत्वात् दीर्घकालोऽपि भावेन तृप्त्यभावात् अल्प इव प्रतिभाति। एवम्प्रकारेण सुखस्वप्ने मग्नावस्थायां वार्तालापं कुर्वन् रात्रियापनं कृतवन्तौ। अत्र रामं प्रति सीता तथा सीतां प्रति राम आलम्बनविभावः। गोदावरीनदीं निकषा स्थितः प्रस्रवणपर्वतस्य परिवेशो हि उद्दीपनविभावः। प्रेममग्नावस्थायां मोहस्वप्नौ अनुभावौ। तयोर्मध्ये आवेगो व्यभिचारीभावः। एवम्प्रकारेण विभावानुभावव्यभिचारिभावसंयोगेन रतिनामकस्थायिभावात् श्रृङ्गाररसोत्पत्तिर्भवति। अत्र रसस्तु सम्भोगविषयकः ।

- पुनश्च दृश्यते यत् प्रथमाङ्के –

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा । प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।

तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो विकारश्चैतन्यं भ्रमयति च सम्मीलयति च ॥[13] इति ।

श्लोकेऽस्मिन् रामचन्द्रः परिश्रमजनितभूतायाः सीतायाः स्पर्शजनितम् आनन्दं वर्णयति। तत्र सीतायाः स्पर्शजनिते आनन्दे उन्मत्ते सति रामेणोक्तम् - एतत् सुखं न वा दुःखम्, एषः मोहः न वा निद्रा, एषा विषक्रिया न वा उन्मत्ततेति स्थिरीकर्तुं न शक्नोम्यहम्। तथाहि रामचन्द्रोऽत्र वक्तुमिच्छति यत् सीतायाः स्पर्शेण मम चित्ते या आनन्दात्मिका अनुभूतिः जायते तमहं वर्णयितुम् असमर्थः। अत्र सीताश्रितं रतिं प्रति रामः आलम्बनविभावः । भागीरथ्याः मनोरम-प्राकृतिक-परिवेशो हि उद्दीपनविभावः । तयोः पारस्परिकः प्रेमजनोचितः आलापः अनुभावः। तयोर्मध्ये प्रेमोन्मत्तता आवेगश्च व्यभिचारिविभावः । एते विभावादिभिः मिलित्वा रतिनामकस्थायिभावात् श्रृङ्गाररसस्य सृजनं करोति ।

- अस्य नाटकस्य षष्ठाङ्केऽपि श्रृङ्गाररसप्रयोगो दृश्यते -

पुरारुढे स्नेहे परिचयविकसादुपचिते रहो विस्रब्धाया अपि सहजलज्जाजडदृशः ।

मयैवाद ज्ञातः करतलपरामर्शकलया द्विधा गर्भग्रन्थिस्तदनु दिवसैः कैरपि तया॥[14] इति।

अनेन श्लोकेन ज्ञायते रामचन्द्रसीतयोः प्रेमजनितकामना वासना चाधिकरूपेण वर्धते। अर्थात् पूर्वं परिणयकाले रामेण साकं सीतायाः यत् प्रणयोऽभवत्, अधुना तत्तु प्रणयः वर्धयति स्म एकत्रावस्थानहेतुत्वात्। सीतायाः गर्भावस्थायां रामचन्द्रः स्वहस्तस्पर्शेण बुध्यते यत् सीतायाः गर्भे यमजसन्तानो विद्यमानः । सीतायाः गर्भजातः यमजसन्तानोऽयं रामचन्द्रस्यैव औरसजातः। तथाहि निर्जनस्थाने स्थिते सत्यपि सीतायाः चक्षुः लज्जया लज्जितः। सीतायाः कृते रामचन्द्रस्य हृदि यः रतिः सः स्थायिभावः । अत्र एक अपरं प्रत्यालम्बनविभावः । तयोर्मिलनार्थं निर्जनपरिवेशः उद्दीपनविभावः । व्यभिचारी हि लज्जा । एते विभावादि संयोगेन रतिरूपस्थायिभावात् श्रृङ्गाररस उत्पद्यते।

**उपसंहारः**

यद्यपि केषुचित् दृश्यकाव्येषु अङ्गिरस एक एव भवति, तथापि तन्मध्ये अङ्गरसत्वेन अपरेषां रसानामुपस्थितिः आलंकारिकैरङ्गीक्रियते। उत्तररामचरितमिति नाटकस्य पर्यालोचनेन दृश्यते यत् अस्याङ्गिरसः करुणः। परन्तु स्वल्प-श्रृङ्गाररसस्योपस्थितिः साधारण्येन मन्यते। करुणप्रधाने उत्तररामचरिते क्वचित् क्वचित् श्रृङ्गाररसः स्पष्टतया प्रकटितः जातः। तदर्थं मया मन्मतस्य पर्यालोचनाय प्रयत्नं क्रियते इति शम्।

**तथ्यसूत्राणि –**

1. Bharata, Natyasastra of Bharata Muni (Vol.I), Edited by R.S.Nagar,P – २८६

2. तत्रैव

3. तत्रैव

4. तत्रैव

5. तत्रैव

6. तदेव –७/५

7. काव्यप्रकाश: - ४/७

8. नाट्याशास्त्रम् –६/१५

9. तदेव –६/४४

10. Bharata, Natyasastra of Bharata Muni (Vol.I), Edited by R.S.Nagar,P - 313

11. उत्तररामचरितम् –१/२४

12. तदेव –१/२७

13. तदेव –१/३५

14. तदेव –६/२८

**Goutam Ruidas**

M. Phil, Scholar

Department of Sanskrit

Jadavpur University

Vill : Telur, P.O. : Biur- 722205, P.S. : Patrasayer

Dist. : Bankura, West Bengal

Contact No. : 9775184021

E-mail : sanskritgoutam@gmail.com

********

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# अर्वाचीनस्तोत्रेषु रसविचारः

**H.V. Leelambike**
Rtd. Associate Sanskrit Professor
Mallamma Marimallappa women's
Arts and Commerce College, Mysore-570004, Karnataka
Contact No. : 9019741868
E-mail : leelambike.hv@gmail.com

प्राधान्येन भक्तिरसः एव सर्वत्र स्तोत्रेषु प्रतिपादितः । किन्तु अन्ये अपि रसाः द्योतन्ते । वस्तुतः रसो नाम न केवलं पदेनाभिधीयते । अलङ्काराणाम्, रसानां च प्रतिपादनाय वाक्यान्येव आवश्यकानि । काव्येषु प्रायः सर्वत्र अलङ्काराः वाक्यैः एव प्रोक्ता भवन्ति । तैश्च अलङ्कारैः रसाः अभिव्यक्ता भवन्ति । किन्तु स्तोत्रेषु रसानाम्, अलङ्काराणां च प्रामुख्यं न वर्तते । अत्र स्तोत्रेषु भक्तिरेव मुख्या भवति । अतः काव्येषु यथा अलङ्काराः, रसाश्च वाक्यैः उपवर्णिताः तथा स्तोत्रेषु न वर्णिताः दृश्यन्ते । अलङ्काराणाम्, रसानां च प्रतिपादनाय वाक्यानि नोपलभ्यन्ते । किन्तु अलङ्काराणाम्, रसानां च अभिव्यञ्जकानि पदानि स्तोत्रेषु तत्र तत्र उपलभ्यन्ते । अतः प्रत्येकं पदमाश्रित्यैव स्तोत्रेषु अलङ्काराणाम्, रसानां च गवेषणं कर्तव्यं भवति । अतः प्रत्येकं स्तोत्रेऽपि अलङ्काराणां रसानां च उल्लेखः कर्तुं न शक्यते, सर्वत्र भक्तिरसस्य प्राधान्यात् । किन्त्वत्र स्तोत्रेषु अलङ्काराः रसाश्च कथं निगूढतया प्रच्छन्नाः भवन्तीति किञ्चिदत्र प्रतिपाद्यते । अतः उदाहरणार्थं कानिचन स्तोतोत्राणि अत्र लेखने प्रस्तूयन्ते ।

## १. शृङ्गाररसः ।

यूनोः परस्परमनुरागः एव शृङ्गारः इति कथ्यते । भक्तिरसो नाम शृङ्गारस्यस्यैव एकः प्रकारः । भक्तस्य देवविषयिका प्रीतिस्तु भक्तिः इति कथ्यते । देवतानाम्, गुरूणाम्, ज्येष्ठानाम्, मातापित्रोश्च विषये या प्रीतिः सापि भक्तिरिति कथ्यते । भक्तस्य विषये या देवप्रीतिः, पुत्रस्य विषये या मातापित्रोश्च प्रीतिः सा वात्सल्यमिति कथ्यते । इत्थं वात्सल्यरसः, भक्तिरसश्च उभावपि शृङ्गारस्यैव अन्तर्भेदौ भवतः, प्रीत्या विना तयोरभावात् ।

उमामहेश्वरस्तोत्रे शुद्धः शृङ्गारः यथा–

नमः शिवाभ्यां नवयौवनाभ्याम् । परस्पराश्लिष्टवपुर्धराभ्याम् ॥ इति प्रथमे श्लोके वर्तते ।

द्वितीये श्लोके तु – नमः शिवाभ्यां सरसोत्सवाभ्याम् । इति ।

अत्र परस्पराश्लिष्टवपुर्धराभ्याम्, सरसोत्सवाभ्याम् इति पदद्वयेन शुद्धः शृङ्गारः वर्णितो भवति । इत्थं शृङ्गाररसः तत्र तत्र स्तोत्रेषु उपलभ्यते । अत्रैव षष्ठे श्लोके वात्सल्यरसो यथा – अशेषलोकैकहितङ्कराभ्याम् । इति । अत्र एतेन पदेन भक्तानुग्रहकारकयोः शिवपार्वत्योः वात्सल्यरसः प्रतिपादितो भवति । वात्सल्यवानेव देवः अशेषस्य लोकस्य हितं करोति । अतः वात्सल्यरसः अत्र स्पष्ट एव । एवमेव चन्द्रशेखराष्टके

षष्ठे श्लोके – श्रीमन्महेश्वर कृपामय हे दयालो । इति ।

अष्टमे श्लोके – हे विश्वनाथ करुणामय दीनबन्धो । इति ।

अत्र कृपामय ! दयालो ! करुणामय ! दीनबन्धो ! इति सम्बोधनान्तानि पदानि वात्सल्यरसोत्पादकानि, वात्सल्यरसाभिव्यञ्जकानि च वर्तन्ते । भक्तिरसस्तु सर्वेषु स्तोत्रेषु समानरूपेण वर्तते एव । भक्तिरसस्याभावे स्तोत्रमेव न सम्भवति ।

## २. वीररसः ।

दशश्लोक्यां स्तुतौ यथा –

विष्णुब्रह्मसुराधिपप्रभृतयः सर्वेऽपि देवा यदा । सम्भूताज्जलधेर्विषात्परिभवं प्राप्तास्तदा सत्वरम् ॥
तानार्ताञ्छरणागतानिति सुरान् योऽरक्षदर्धक्षणात् । तस्मिन्मे हृदयं सुखेन रमतां साम्बे परब्रह्मणि ॥१०॥

अत्र समुद्रमथनस्य उल्लेखात्, सर्वेषु देवेषु पराभूतेषु सत्सु शिव एव धर्येण विषं बुभुजे । अतः अत्र वीररसः उक्तो भवति । एवमेव – त्रिपुरान्तकः, शूलपाणिः इत्यादिभिः पदैः अपि वीररसः उक्तो भवति ।

### ३. करुणारसः ।

दयानिधे, करुणासागर, करुणाकर इत्यादिभिः पदैः करुणारसः अभिव्यज्यते । एतादृशानि पदानि स्तोत्रेषु बहुत्र उपलभ्यन्ते । यथा चन्द्रशेखराष्टके –

षष्ठे श्लोके – श्रीमन्महेश्वर कृपामय हे दयालो । इति ।

अष्टमे श्लोके – हे विश्वनाथ करुणामय दीनबन्धो । इति ।

पूर्वं इमान्येव पदानि वात्सल्यरसाभिव्यञ्जकानि इत्युक्तम् । इमान्येव पदानि करुणारसप्रतिपादकान्यपि भवन्ति ।

### ४. अद्भुतरसः ।

पञ्चाक्षरीस्तोत्रे यथा – नागेन्द्रहाराय त्रिलोचनाय । इति । नित्याय शुद्धाय दिगम्बराय । इति ।

अत्र त्रिलोचनाय,दिगम्बराय इत्यादिपदैः अद्भुतरसः प्रस्तूयते । कुतः इति चेत् प्रायः सर्वेषामपि द्वे एव चक्षुषी स्तः । अस्य चक्षुस्त्रयत्वात् अद्भुतत्वम् । एवमेव अत्र पञ्चाक्षरस्तोत्रे दिगम्बराय इति पदं चिन्तनीयम् । वस्तुतः लोके दिगम्बरशब्देन वस्त्रशून्यः इत्यर्थः कल्प्यते । दिक् एव अम्बरं यस्य सः इति । अन्यस्य वस्त्रस्य अभावात् दिगेव वस्त्रमिति भावः । इत्थं व्यवहारे यः दिगम्बरशब्दार्थः वर्तते तस्य स्वीकारे सति स्तोत्रस्य औचित्यं, महत्त्वं च न भवति । अतः दिगम्बरशब्दस्य अर्थान्तरं कल्पनीयम् । परमात्मनः शरीरस्य किं प्रमाणमिति वक्तुं न शक्यते । अमितम्, अपरिमितं वा बृहत् शरीरं भवति । तादृशस्य शरीरस्य आच्छादितं वस्त्रमपि अस्माभिः द्रष्टुं न शक्यते, सर्वत्र महतः शरीरस्यैव दर्शनात् । इत्थं वस्त्रस्य अदर्शनात् दिगेव वस्त्रमिति स्तोत्रे वर्णितम् ।

### ५. हास्यरसः ।

वस्तुतः स्तोत्रेषु हास्यरसः न भवति । किन्तु अत्रैकमुदाहरणं हास्यरसस्य विषये वक्तुं शक्यते । ये च तर्कशास्त्रपण्डिताः भवन्ति ते धूमं दृष्ट्वा वह्निमनुमिन्वन्ति । धूमसत्त्वे वह्निसत्त्वम्, वह्न्यभावे धूमाभावः इत्यादिना कार्यकारणभावेन सर्वं जगत् अनुमापयन्ति । अतः तादृशां तार्किकाणां विषये आचार्यपादाः हास्यमेव चक्रुः । यथा शिवानन्दलहर्यां षष्ठः श्लोकः –

घटो वा मृत्पिण्डोऽप्यणुरपि च धूमोऽग्निरचलः । पटो वा तन्तुर्वा परिहरति किं घोरशमनम् ॥

वृथा कण्ठक्षोभं वहसि तरसा तर्कवचसा । पदाम्भोजं शम्भोर्भज परमसौख्यं व्रज सुधीः ॥६॥

घटेऽपि मृदेव वर्तते । मृत्पिण्डेऽपि मृदेव वर्तते । अतः अत्र उपादानकारणं मृदेव इति तार्किकाणां वादः । एवमेव तन्तुभिः अन्यः पटः कः अस्ति । पटे विद्यमानाः तन्तवः यदि पृथक्क्रियन्ते तर्हि पट एव न भवति । अतः पटः पटरूपो वा ? तन्तुरूपो वा ? इति प्रश्नः । इत्थं तर्कवचसा वृथा कण्ठक्षोभं वहसि । इत्थं कण्ठक्षोभार्थं यत्नं न विधेहि । तस्मात् तर्कानुरूपात् वादात् शम्भोः पादाम्बुजसेवनमेव वरम् । अतः शम्भोः पादाम्बुजं भज । तन्मूलकं परमसौख्यं गच्छ नाम प्राप्नुहि इति भावः । सुधीः इति पण्डितमुद्दिश्य सम्बोधनम् । इत्थं तर्कपण्डितानां हास्यं कृतं आचार्यपादैः शङ्कराचार्यैः । अतः क्वचित् आचार्याणां स्तोत्रे हास्यरसोऽपि उपलभ्यते ।

### ६. भयानकरसः ।

पञ्चाक्षरस्तोत्रे प्रथमे श्लोके – नागेन्द्रहाराय त्रिलोचनाय इति वर्तते । अत्र नागेन्द्रहारशब्दः भयानकं रसं प्रतिपादयति । जीवन्तः ये सर्पाः ते एव शिवेन कण्ठे मालारूपेण धृताः वर्तन्ते । एतान् विषधरान् न कोऽपि समीपं गत्वा द्रष्टुमपि इच्छति । स्पर्शस्तु दूरापास्त एव । एवं स्थिते शिवः जीवतः सर्पान् स्वशरीरे धरति । अतः भयानकः रसः । एवमेव श्मशानवासी, त्रिपुरदहनः इत्यादीनि पदानि भयानकं रसं प्रतिपादयन्ति ।

शिवाष्टके अष्टमे श्लोके – श्मशाने वसन्तं मनोजं दहन्तम् । इत्यत्र श्मशानवासित्वप्रतिपादनात् भयङ्करत्वं सिद्धं भवति । इत्थं शिवस्य अभयवरप्रदायकत्वेऽपि वाक्येनानेन भयानकरसः अभिव्यज्यते । किन्तु शिवं शङ्करं शम्भुमीशानमीडे । इति कथनात् भयनिवारकत्वमपि कथितं भवति । अतः अत्र भयोत्पादकत्वं नास्ति, किन्तु भयानकरस एव । यथा – वेदिकायां राक्षसम्, व्याघ्रम्, सिंहं वा दृष्ट्वा बह्वीं तुष्टिमनुभवामः । किन्तु कश्चन व्याघ्रः सिंहो वा अरण्यादागत्य वेदिकां प्रविशति चेत् सर्वे भीताः सन्तः पलायन्ते । अतः वेदिकायां यत् नटनं तत् भयानकरसस्य कारणं भवति । तेन सुखानुभूतिरपि जायते ।

किन्तु साक्षात् व्याघ्रस्य सिंहस्य वा आगमनेन सुखानुभूतिः न जायते । अतः भयमन्यत्, भयानकरसोऽन्यः । अत्र स्तोत्रे भयानकत्वं किमपि नास्ति । किन्तु केवलं भयानकरस एव विलसतीति भावः ।

### ७. बीभत्सरसः ।

बीभत्सरसोऽपि स्तोत्रेषु विरलः एव । अथापि जननमरणाख्यमिदं संसारचक्रं जुगुप्सां जनयति । अतः संसारस्य विषये जुगुप्सामवाप्य एव पुरुषस्य वैराग्यं जायते । अत्र वैराग्ये हेतुः जुगुप्सा एव । अत्र उदाहरणं यथा चन्द्रशेखराष्टकम् । अस्मिन् स्तोत्रे सर्वेषु पादेषु संसारदुःखगहनाज्जगदीश रक्ष इत्युक्तम् । संसारो नाम न केवलं दुःखम् । अपि तु दुःखकाननम् इत्युक्तम् । गहनमित्यस्य काननमित्यर्थः । अस्मात् संसाररूपात् काननात् रक्ष इति प्रार्थना । इत्थं संसारस्य विषये जुगुप्सा प्रतिपादिता वर्तते । जुगुप्सायाः सत्त्वात् बीभत्सरसः इति वक्तुं शक्यते । एवमेव परमं वैराग्यं प्रतिपादयितुं यानि पदानि स्तोत्रे प्रयुक्तानि तानि सर्वाण्यपि बीभत्सरसमेव अभिव्यञ्जन्ति । वस्तुतः आत्मनिन्दा न करणीया इति [१]भगवद्गीतायामपि उक्तम् । किन्तु शिवानन्दलहर्याः पञ्चमे श्लोके – पशुं मां सर्वज्ञ प्रथित कृपया पालय विभो । इत्युक्तम् । अत्र पशुं मां पालय इति वचनेन आत्मनः पशोश्च समानता उक्ता भवति । इत्थमत्र स्वस्य विषये जुगुप्सायां जातायां पशुना सह तुलना कृता । अत्र जुगुप्सायाः सत्त्वात् बीभत्सरस एव भवति । इत्थं तत्र तत्र स्तोत्रेषु विरलतया जुगुप्साभावः, बीभत्सरसश्च दृश्यते ।

### ८. रौद्ररसः ।

रौद्ररसस्तु कोपहेतुकः । स्तोत्रेषु सर्वत्र भक्तिभावस्य प्राधान्यात् रौद्ररसः बाहुल्येन न दृश्यते । किन्तु क्वचित् उग्रः, रुद्रः, रौद्रः, कोपः इत्यादीनां पदानां प्रयोगात् रौद्ररसोऽपि वर्णयितुं शक्यते । कालभैरवाष्टके सप्तमे श्लोके – दृष्टिपातनष्टपापजालमुग्रशासनम् इत्यत्र उग्रस्य शासनं कोपेनैव कर्तव्यं भवतीति कारणोन कोपहेतुकः रौद्ररसः वक्तुं शक्यते । नवमे श्लोके – कोपतापनाशनम् इत्युक्तम् । अत्र कोपो न वर्तते । किन्तु कोपस्य शमनं कथितम् । शिवाष्टोत्तरशतनामस्तोत्रे तृतीये श्लोके – उग्रः कपाली इति प्रयोगेण रौद्ररसः कथितो भवति । स्तोत्रेषु रौद्ररसस्य उल्लेखः अल्प एव ।

### ९. शान्तरसः ।

वटुकभैरवस्तोत्रस्य ध्याने – शान्तं पद्मासनस्थं शशिधरमुकुटं पञ्चवक्त्रं त्रिणेत्रम् । इत्युक्तम् । अत्र शिवः शान्तरूपः ध्यानेन स्तुतो वर्तते । महादेवाष्टके प्रथमश्लोके– शिवं शान्तं शुद्धं प्रकटमकलङ्कं श्रुतिनुतम् – इत्यत्र शान्तशब्दस्य प्रयोगात् शान्तरसः अभिव्यज्यते इति वक्तुं शक्यते । इत्थं प्राधान्येन अष्टौ रसाः तत्र तत्र काव्येषु उपलभ्यन्ते । शान्तोऽपि नवमो रसः इति अङ्गीकारे तु नव रसाः भवन्ति । शान्तशब्दस्य प्रयोगाभावेऽपि भक्तानुग्रहकारकस्य परमात्मनः शान्तस्वरूपात् स्तोत्रेषु बहुत्र शान्तरसः वक्तुं शक्यते ।

इत्थं स्तोत्रेषु तत्र तत्र रसाः अपि अभिव्यक्ताः भवन्ति । सर्वेषु रसेष्वपि भक्तिरस एव मुख्यः । एवमेव स्तोत्रेषु तत्र तत्र – पापनाशनः, पापनाशकः, पापनिवारकः इत्यादीनि पदानि उपलभ्यन्ते । अनेन पापं केनापि नाचरणीयमिति उपदेशोऽपि लभ्यते । पापं समाचर्य पुनः पापनाशने विहितस्य यत्नस्य अनर्थकत्वात् । इत्थं स्तोत्रैः क्रियमाणः उपदेशः अपि अवधारणीयः । भक्तिरपि मुख्या । भक्त्या सहैव रसा अपि आस्वादयितुं शक्यन्ते । भक्तिरसः, वात्सल्यरसः, करुणारसः इत्येते रसा अपि भगवदनुग्रहं प्राप्तुं सहकारिकारणवत् साहाय्यं विदधतीति शम् ।

*************

[१] उद्धरेदात्मनात्मानं नात्मानमवसादयेत् । भ. गी. – अध्यायः –६.

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# मोक्षस्वरूपनिरूपणम्

**विद्वान् सतीश भट्टः**, उम्मचगि, कर्नाटक

## मोक्षं प्रति प्रवृत्तिः

लोके तु केचिदेव मुमुक्षवः मोक्षार्थं प्रयतन्ते। अन्ये सर्वे मोक्षविषये अनासक्ताः। अतः निरतिशयसुखप्राप्तिः कथं इति संशयः। अत्रोऽच्यते –यः सुखं अनुभवति स एव निरतिशयसुखं अभीप्सति। ज्ञतमेव हि सुखं प्रवृत्तेः कारणं भवति। पश्वादिभिस्तु काचित्मोक्षावस्था अस्ति इति न ज्ञायते। अतः तेषां अत्र प्रवृत्तिः कथं भवेत्। दुष्कृतकारिणां जनानां तादृशप्रवृत्तिः न स्यादेव। पश्वादीनां तिरश्चां मोक्षज्ञानं न भवत्येव। बहवः मनवाः पशुतुल्यवृत्तयः सन्ति।

**"आहारनिद्राभयमैथुनं च सामान्यमेतत्पशुभिर्नराणाम्॥ ज्ञानं तु तेषामधिको विशेषः ज्ञानेन हीनाः पशुभिः समानाः॥**[१]**"**

इतिसुभाषितानुसारेण आहारादिप्रवृत्तिः सामान्यजनानां भवति। केषाञ्चिदेव जनानां मोक्षसाधनार्थं बुद्धिः प्रवर्तते। कश्चन घटार्थी तत्साधनं दण्डचक्रादिकं न जानाति। तदा घटं प्रति तस्य प्रवृत्तिरपि न भवत्येव। तद्वत् अज्ञाते साधने प्रवृत्तिविषय एव नास्तीति कीदृशी प्रवृत्तिः स्यात्। कस्यचित्साधनज्ञानम् अस्ति, तथापि साधने नैतत्कार्यं साधयितुं शक्यमिति न यस्य बुद्धिः स्यात्, सः तत्र न प्रवर्तते। यस्य तादृशी बुद्धिः वर्तते सा यदि संशयात्मिका तस्यापि मोक्षार्थं प्रयत्नः न भवत्येव। यस्य च निश्चयात्मकं ज्ञानं तादृशः परः सहस्रेष्वेक एव मुमुक्षुः भवति। अनेककोट्यां जनेषु एक एव मुमुक्षुः भवेत्।

एतावत्पर्यन्तम् आत्यन्तिकदुःखनिवृत्तिपूर्वकं निरतिशयसुखं यः प्राप्नोति स एव मोक्षपदवीम् अरोहतीत्यर्थो लभ्यते। अत्र मोक्षस्वरूपं कीदृशं सम्भवति ? आत्यन्तिकसुखमेव मोक्षो वा आत्यन्तिकदुःखनिवृत्तिरेव वा अथवा आत्यन्तिकदुःखनिवृत्ति-पूर्वकात्यन्तिकनिरतिशयसुखमेव वा ? एवं त्रयः विकल्पाः भवन्ति। विकल्पत्रये आत्यन्तिकसुखमेव मोक्षः स्यात्। तदा तत्र आत्यन्तिकदुःखनिवृत्तिर्नास्ति तर्हि यत्र लेशतोऽपि दुःखं विद्यते तत्र कथम् आत्यन्तिकसुखत्वमित्युच्यते। यच्च निरतिशयं सुखं तदात्यन्तिकमित्युच्यते। दुःखरहितं हि सुखं दुःखसंयुक्तसुखापेक्षयातिशयं जायते। अतः स दुःखं सुखं न निरतिशयं सुखं भवति।

## मोक्षस्वरूपनिरूपणे विवादाः

मोक्षज्ञानं तु निरतिशयसुखं दुःखरहितं स्वरूपम्। तदेवोक्तं सर्वदर्शनसङ्ग्रहस्य उपोद्घाते अभ्यङ्करशास्त्रिणा उक्तम् **"आत्यन्तिकदुःखनिवृत्तिपूर्वकं आत्यन्तिकसुखमेव मोक्षः"** इति। इतरसामान्यसुखापेक्षया अधिकं सुखं किञ्चिदुःखसत्त्वेऽपि तादृश सुखस्य आत्यन्तिकत्वधर्मः न हीयते। अल्पदुःखंआत्यन्तिकसुखं प्रति कामपि न्यूनतां सम्पादयति। धनिकस्य किञ्चित्धनहानिः धनिकत्वधर्मस्य न कापि हानिः उत्पद्यते। तद्वत् अधिकसुखं यत्किञ्चिद्दुःखं न बाधते।तदेव अतिशयसुखम् अस्तु इति चेदुच्यते – अनेकाभिप्रायेण किञ्चिद्दुःखसत्त्वेऽपि आत्यन्तिकसुखस्य मोक्षत्वं वदति चेत्मैवम्। किञ्चदुःखसहितसुखं मोक्षशब्देन विवक्षितम्। मोक्षो हि मुक्तिता। दुःखाद्रहितः मुक्तो हि मोक्षशब्देन व्यपदिश्यते। अतः किञ्चिदुःखलेशसत्त्वे कथं मोक्षः ?

अथ यादृशो दुःखलेशः सन्नपि यः दुःखत्वेन न प्रतिभाति, यत्किञ्चिद्दुःखस्याप्रतिभासात्दुःखमुक्तता प्रतीयते। यथा कथञ्चित्मोक्षशब्दस्य उपपत्तिर्जायते इति चेत् अत्रोच्यते आत्यन्तिकदुःखनिवृत्यभावोऽपि आत्यन्तिकसुखस्य मोक्षत्वम्। परन्तु एतादृशमोक्षस्वरूपंद्वैतमतवादिनः वदन्ति। अद्वैतवेदान्तिनः अतिरिक्तः आत्मभेदवादिनाम् अयमाशयः।

---

१. सुभाषितमञ्जरी

**आत्मैक्यवादिमते मोक्षस्वरूपम्**

आत्मैक्यवादिमते तु आत्मभेदस्तु केवलम् औपाधिकं भवति। लोके प्रतिभासमानस्य जीवात्मनः औपाधिकत्वाङ्गीकारात्। मोक्षावस्थादशायाम् उपाधिभेदस्य असत्त्वेन तदानीम् एकस्यात्मनः ईश्वरस्य पूर्णस्वातन्त्र्यसत्त्वेन आत्यन्तिक्याःदुःखनिवृत्तेः सत्त्वान्न केवलम् आत्यन्तिकं सुखं मोक्षे सम्भवति। परन्तु एतादृशमोक्षः आत्मभेदिनां मते एव सङ्गतं भवति। आत्मैक्यवादिनां मते आत्मभेदस्तु प्रतिभासमानस्य उपाधिभेदेन भवति। मोक्षावस्थायां उपाधिभेदस्य सुतरां वक्तुमशक्यत्वेन तदानीं पूर्णस्वातन्त्र्यसत्त्वे न दुःखनिवृत्तेरपि सत्त्वेन केवलमात्यन्तिकं सुखं मोक्षावस्थायां सम्भवति। किन्तु एतादृशमोक्षस्वरूपं वेदान्तिनां मते चिज्जडयोः भेदसत्त्वेन मोक्षावस्थायाम् आत्यन्तिकसुखं न भवति। आरोपितस्य ईश्वरस्य अनुपलम्भात्सुखोत्पत्तिरेव न सम्भवति। जडवस्तूनामारोपितत्वाङ्गीकारावश्यम्भावात्। तथा आत्मभेदवादिनां मते एव आत्यन्तिकसुखमेव मोक्षः इति सङ्गच्छते।

अथ आत्यन्तिकदुःखनिवृत्तिपूर्वकम् आत्यन्तिकसुखमेव मोक्षः इतिपक्षः कया विधया सम्भवति इतिप्रश्नः उत्पद्यते। अत्यन्तिकीदुःखनिवृत्तिस्तु पूर्णस्वातन्त्र्येण जायते। पारतन्त्र्यं हि दुःखं जनयति। पारतन्त्रे लेशतो विद्यमानेऽपि दुःखं नास्तीति युक्तिर्नैव युक्तिसहा। पूर्णं स्वातन्त्र्यं परमेश्वरस्यैव। मुक्तानां भेदे हि तेषामपि ईश्वरपारतन्त्र्यम् अवश्यमेव। पारतन्त्र्यं दुःखबीजम्। यदि आत्यन्तिकसुखं मोक्षः इत्युच्यते तर्हि तादृशानां मुक्तानाम् ईश्वरपारतन्त्र्यस्य सत्त्वात्यत्किञ्चित्दुःखम् अस्त्येव। यदि तेषां सर्वेषां पूर्णस्वातन्त्र्यं स्यात्तर्हि जगद्व्यापारः ईश्वरेच्छया स्वातन्त्र्येण नियमतो न भवेत्। यदि पूर्णस्वातन्त्र्यम् उभयोरपि भवति चेत्वैमत्यं दृश्यते। यतो हि जगद्व्यापारो नियमतो दृश्यते। जगति नियमत एक तन्त्रः एव दृश्यते। अतः मुक्ताः परतन्त्रा एव स्वीकार्या भवेयुः। मुक्तानां पारतन्त्र्ये किदृशी आत्यन्तिकदुःखनिवृत्तिः स्यात् ? अत एव एकात्मवादः स्वीकर्तव्यो भवति। मुक्तात्मा ईश्वरस्वरूपो भवति। ईश्वरस्वरूपस्य स्वातन्त्र्यसद्भावात् आत्यन्तिकीदुःखनिवृत्तिः जायते। आत्यन्तिकसुखञ्च आत्मानात्मयोर्भेदे सत्येव। आत्मनः सुखञ्च शरीरसम्बन्धेन शब्दस्पर्शादिविषयसम्बन्धेन जायते। शब्दादिविषयाः आत्मभूता एव। तेषां मोक्षावस्थायां सुखोत्पादनाय स्वीकार्यत्वमेव। अतः ते विषयाः सत्या एव स्वीकार्या भवन्ति।

**श्रुतिसम्मतमोक्षस्वरूपनिरूपणम्**

वेदे "**अशरीरं वासन्तं न प्रियाप्रिये स्पृशतः**" इत्युक्तम्। वाक्यस्यास्य अयमभिप्रायः – यदि शरीररहितं प्रियविषयमप्रियविषयं न स्पृशति तदा एव मोक्षः। मोक्षावस्थायां दुःखजनकमप्रियस्पर्श इव सुखजनकप्रियस्पर्शोऽपि न भवेत्। प्रियमप्रियमुभयमपि प्रतिषेधयति। किन्तु आत्यन्तिकसुखं तथा आत्यन्तिकदुःखनिवृत्तिः मोक्षः इति पक्षद्वयस्यापि श्रुतिसम्मतिः नास्ति। इदं स्पष्टं भवति यत् आत्यन्तिकदुःखनिवृत्तिरेव मोक्षः इति श्रुतेः तात्पर्यं नास्ति। न तत्र लेशतोऽपि दुःखं वा सुखं वा। लौकिकसुखं वा दुःखं न भवेत्तदेव मोक्षः।

**Vidwan Satish Bhat, Yalavalli**
Research Scholar
Shri Jagadishprasad Jhabarmal Tibrewala Univeersity,
Vidyanagar, Jhunjhunu, Churu Road, P.O.: Churela- 333001
Jhunjhunu, Rajasthan
Contact No. : 9448008295
E-mail : satishyalavallib@gmail.com

**********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# नानालङ्कारिकनयेन रसविरोधः तत्परिहारश्च

**डा. एम्. सुदर्शन चिपळूणकरः**[1], एर्नाकुलम्, केरल

इह खलु विरिञ्चिप्रपञ्चिते निखिलेऽस्मिन् भुवने तावत् सर्वोऽपि लोकः आनन्दमन्विष्यन् तन्मार्गे प्रवर्तमानः काव्यनाट्याद्यनुसन्धानपरः समवलोक्यते । प्रवृत्तेरस्याः पराकाष्ठा एव रसदर्शनम् । दशायामस्यां सत्त्वोद्रेकात् आनन्दमयं लोकं प्रविष्टस्य जनस्य स्वान्तं रमते नितान्तं स्वदते च आनन्दम् । किन्तु सन्ति हि केचन अन्तरायाः यैः लोकः रसदर्शनतत्परोऽपि तदसमर्थः सन् नीरसतामनुभवति । प्रसङ्गेऽस्मिन् विभिन्नैः आलङ्कारिकैः विभिन्नानि उपस्थापितानि विद्यन्ते । तत्र च सामान्यस्यापि लोकस्य रसदर्शनकरणचेताः रसनिबन्धनं प्रति आदृतमनाश्च कविः तेषामन्तरायाणां परिहारे सन्ततं यत्नमादधीत इत्येवायं विचारः समुपस्थाप्यते ध्वनिकारेण । तत्र च विचारेऽस्मिन् ध्वन्यालोककारेण आनन्दवर्धनेन उक्तमस्ति यथा -

**प्रबन्धे मुक्तके वापि रसादीन् बन्धुमिच्छता । यत्नः कार्यः सुमतिना परिहारे विरोधिनाम्**[2] ॥ इति ।

एवञ्च रसं प्रति आदृतमनाः कविः रसविरोधपरिहारं कुर्यादिति आनन्दवर्धनमतम् । तर्हि क इमे रसविरोधिनः इति चेत् तत्रोच्यते -

**विरोधिरससम्बन्धिविभावादिपरिग्रहः । विस्तरेणान्वितस्यापि वस्तुनोऽन्यस्य वर्णनम् ॥**

**अकाण्ड एव विच्छित्तिरकाण्डे च प्रकाशनम् । परिपोषं गतस्यापि पौनःपुन्येन दीपनम् ।**

**रसस्य स्याद्विरोधाय वृत्यनौचित्यमेव च**[3]॥ इति ।

एवञ्च विरोधिनः रसस्य विभावादिपरिग्रहः, प्रस्तुतरसापेक्षया अन्यस्य वस्तुनः वर्णनम्, रसस्य अकाण्डे विच्छेदः, रसस्य अकाण्डे प्रकाशनम्, परिपोषं प्राप्तस्य रसस्य पौनःपुन्येन दीपनम् इतीमे रसे दोषाः इति आनन्दवर्धनमतम् ।

अन्तरायेष्वेतेषु अन्यतमोऽस्ति **विरोधिरससम्बन्धिविभावादिपरिग्रहः**। एवञ्च रसदर्शनतत्परेण कविना विरुद्धरससम्बद्धानां विभावादीनां परिग्रहः नैव कार्यः इति सामान्योऽर्थः । **ननु,** किमिदं सम्भवि? सन्ति खलु महाकविप्रपञ्चितानि काव्यानि नानारसमयानि यत्र विरोधिनोऽपि रसाः समाविष्टाः, इति चेत् , सत्यम्, विवक्षिते रसे परिपुष्टे सति, विरोधिनामपि बाध्यानां रसानां, अङ्गभावं प्राप्तानां वा विरोधिनां रसानां सत्त्वे एव तानि काव्यानि सहृदयहृदयावर्जकानि भवन्ति, नान्यथा इति मन्तव्यम् । उक्तञ्चात्र ध्वन्यालोककारेण –

**विवक्षिते रसे लब्धप्रतिष्ठे तु विरोधिनाम् । बाध्यानामङ्गभावं वा प्राप्तानामुक्तिरच्छला**[4]॥ इति ।

एवं विवक्षिते रसे परिपुष्टे सति बाध्यत्वं प्राप्तवतां विरोधिनां रसानां सत्त्वे अङ्गरूपेण निविष्टानां वा रसविरोधिनां सत्त्वे न दोषः इत्यर्थः । अत्र विशिष्य अंशत्रयमुक्तम् । रसस्य परिपूर्णतया परिपुष्टिः इति प्रथमः अंशः । द्वितीयः अंशः तावत् बाध्यत्वप्राप्तिः । तच्च बाध्यत्वं विरोधिनः रसस्य दौर्बल्यकारणेन भवितुमर्हति, तन्नाम अङ्गीरसः स्वशक्त्या विरोधिनं रसं पराजयते इत्यर्थः । तृतीयः अंशः तावत् अङ्गभावप्राप्तिः, तन्नाम विरोधिनः रसस्य अप्राधान्यप्राप्तिः । एवं एतेन स्पष्टं भवति यत् रसे परिपुष्टे सति अथवा विरुद्धरसस्य बाध्यत्वप्राप्तौ अथवा अङ्गभावप्राप्तौ तत्र विरोधी रसः भवति चेदपि सः मुख्यरसस्य परिपोषं करोति, अपि च तादृशसन्दर्भेषु विरोधिरससत्त्वं न दोषाय इति ।

**ननु,** कोऽयम् अङ्गभावः? कथं वा तस्य प्राप्तिः इति चेत्, विरोधिनोऽपि रसस्य अप्रधानतया निवेश एव रसस्य अङ्गभावः इति निष्पन्नोऽर्थः । **किन्तु,** व्यङ्ग्यमर्यादया प्रतीयमानस्य रसस्य नितान्तप्रधानता एव ननु ? कुतश्चास्य अप्रधानता ? इति चेत्, उच्यते, सत्यम् , रसस्तु मुख्य एव, परं सापेक्षमर्यादया सहृदयहृदयैः रसयोः चारुत्वं पार्थक्येनानुभूयते । तन्निबन्धना एव इयम् अप्रधानता । **परं** स्यान्नाम अप्रधानता, किं तेन ? अङ्गभावेन प्रधानभावेन वा तस्य रसस्य सत्त्वं तु अस्त्येव, किमत्र पार्थक्यम् ? अलं वृथा प्रयत्नेन इति चेत्, विरोधिनामपि रसानाम् अभिभवे सति तस्य अङ्गभावत्वं तद्गतास्वादपार्थक्यं च सहृदयहृदयवेद्यमेवास्तीति न पृथक् वक्तव्यम् । अत एव आनन्दवर्धनेन प्रोक्तम् –

**अङ्गभावं प्राप्तानां च तेषां विरोधित्वमेव निवर्तते, अङ्गभावप्राप्तिर्हि स्वाभाविकी समारोपकृता वा** इति । एवम् अङ्गभावः स्वाभाविकः समारोपकृतश्चेति द्वेधा इति स्पष्टम् । तर्हि कोऽयं स्वाभाविकः अङ्गभावः? इति चेत् तत्रोच्यते उदाहरणम् –

**तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वोः देहन्यासादमरगणनालेख्यमासाद्य सद्यः ।**

**पूर्वाकाराधिकचतुरया सङ्गतः कान्तयासौ लीलागारेष्वरमत पुनर्नन्दनाभ्यन्तरेषु**[5] ॥

अत्र कविना मरणे पदबन्धमात्रं न कृतमित्यतः अनूद्यमानत्वेनैवोपनिबन्धः कृत इत्यतश्च मरणस्य रत्यङ्गता स्वाभाविकी ।

**कोपात्कोमललोलबाहुलतिकापाशेन बद्ध्वा दृढं नीत्वा वासनिकेतनं दयितया सायं सखीनां पुरः ।**

**भूयो नैवमिति स्खलत्कलगिरा संसूच्य दुश्चेष्टितम् धन्यो हन्यत एव निह्नुतिपरः प्रेयान् रुदत्या हसन्**[6] ॥

इत्यत्र तु कोपात्, बद्ध्वा, हन्यत इत्यत्र रौद्रानुभावानां रूपकबलादारोपितानां तदनिर्वाहात् अङ्गत्वम् । एवञ्चात्र अयं समारोपकृतः अङ्गभावः । रसास्वादसमये जायमानम् एतम् अन्तरायम् आचार्यः अभिनवगुप्तः विघ्नशब्देन निर्दिष्टवानस्ति । तत्र च तेन उक्तमस्ति यथा - **लोके सकलविघ्नविनिर्मुक्ता संवित्तिरेव चमत्कारनिर्वेशरसनास्वादन भोगसमापत्तिलयविश्रान्त्यादिशब्दैरभिधीयते**[7] इति । प्रतिपत्तौ अयोग्यता, संभावनाविरहः, स्वगतत्वपरगतत्वनियमेन देशकालविशेषावेशः, निजसुखादिविवशीभावः, प्रतीत्युपायवैकल्यं, स्फुटत्वाभावः, अप्रधानता, संशययोगः इत्येवं क्रमेण ते विघ्नाः निर्दिष्टाः अभिनवगुप्तेन[8] । विभावादीनां समुचितः प्रयोगः एव एतेषां विघ्नानाम् अपाकरणे हेतुः भवति इति तन्मतम् । तत्र च तेन उच्यते - **तत्रत्यूहव्यपोहनाय प्रतिपदार्थनिष्ठैः साधारण्यमहिम्ना सकलभोग्यत्वसहिष्णुभिः शब्दादिविषयमयैरातोद्यगानविचित्रमण्डपपदविदग्धगणिकादिभिरुपरञ्जनं समाश्रितम् , येन अहृदयोऽपि हृदयवैमल्यप्राप्त्या सहृदयीक्रियते**[9] इति।

रसगङ्गाधरकारेण जगन्नाथेन तावत् स्थितिविरोधः ज्ञानविरोधः इति द्विप्रकारकौ विरोधौ प्रोक्तौ[10] । पुनश्च जगन्नाथेन रसानां मध्ये विद्यमानं वैरुध्यं निरूप्य तस्य वैरुध्यस्य तीव्रता प्रतिपादिता । तत्र च प्रोक्तं जगन्नाथेन – तत्र कविना प्रकृतरसं परिपोष्टुकामेन तदभिव्यञ्जके काव्ये तद्विरुद्धरसाङ्गानां निबन्धनं न कार्यम्[11] इति ।

एवञ्च सुकविना रसनिवेशवेलायां रसविरोधं परिहर्तुं नितान्तं प्रयत्नः विधेय इति कतिपयालङ्कारिकाणां मतानि उपस्थाप्य विरम्यते विस्तरात् ।

**1. Dr. M. Sudarshan Chiplunkar,**
Assistant Professor, School of Linguistics and Literary Studies, Chinmaya Vishwa Vidyapeeth,
Chinmaya Eswar Gurukula Campus, Adi Sankara Marg, Veliyanad, Ernakulam, Kerala – 682313,
Contact N0. : 9692920245
Email –chiplunkarsudarshan@gmail.com

2. ध्वन्यालोकः 3.17
3. तत्रैव 3.18,19
4. तत्रैव 3.20
5. तत्रैव
6. तत्रैव
7. नाट्यशास्त्रम् – अभिनवभारती – षष्ठः अध्यायः
8. तत्रैव
9. तत्रैव
10. रसगङ्गाधरः/प्रथमाननम् / रसप्रकरणम्
11. तत्रैव

***********

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# परशिवस्य भक्तानुग्रहाय दहरात्मकत्वविषयनिरूपणम्

**विद्वान् डा. के.एम्. महदेवय्यः**, मैसूरु, कर्नाटक

**भाष्यकर्तृणां परिचयः**

**पीठिका**

सुगृहीतनामधेयाः वेदान्तिशङ्करशास्त्रिमहोदयाः कर्णाटावन्यन्तर्भूत धारवाड-जिल्ला उमचगीग्रामे क्रि. श. एकोनविंशति शतकान्त्यभागे समभवन् । एते च महाभागाः साहित्यव्याकरणन्यायपूर्वोत्तरमीमांसादिशास्त्रेषु पारङ्गता भूत्वा प्रथमतः प्रातः स्मरणीयानां शिवयोगमहामन्दिरसंस्थापकानां लि. श्रीमन्निरञ्जनप्रणवस्वरूपिणां श्रीश्रीकुमारमहास्वामिनामाश्रयमुपलभ्य तत्र ग्रन्थसंशोधका आसन्नित्यनुश्रूयते । हैदराबादप्रान्ते परलीपवित्रतीर्थक्षेत्रे लोकप्रसिद्धस्य ज्योतिर्लिङ्गस्वरूपस्य वैद्यनाथेश्वरस्य पूजाधिकारविषये समुपजातब्राह्मण-वीरशैव-विवादप्रसङ्गे आहूतेषु पण्डितप्रवरेषु प्रधानस्थानभाजोऽभूवन्निति विज्ञायते । ग्रन्थकारेण विरचितकृतीनां नामानि ईशावास्योपनिषत्, केनोपनिषत्, सिद्धान्तशिखोपनिषत्, मुण्डकोपनिषत्, वीरशैवभाष्यं, ब्रह्मसूत्रवृत्ति उपक्रमोपसंहारादि षड्विधलिङ्गलक्षण -तात्पर्योपयुक्तवस्तुविषयसमर्थनार्थं इदं अधिकरणं निरूप्यते द्युभ्वाद्याधिकरणम् । तत्र च सर्वजगन्मय सर्वज्ञपरशिवब्रह्मणि समन्वयप्रकारं विशेषतया निरूपितम् । ब्रह्मणः परशिवस्य सर्वव्यापकत्वम् उपदिश्याक्षर-शब्दवाच्यत्वं अक्षरमम्बरान्तधृतेः इत्यत्र आकाशान्तधृतिः परशिवस्य इति प्रतिपादितम् । तत्र च सा च प्रशादनात्, अन्यभावव्यावृत्तेश्च तथा ईक्षतिकर्मव्यपदेशात् सः इत्यादि सूत्रत्रयात्मना शिवपदवैशिष्ट्यं प्रतिपादितम् । सम्प्रति परशिवस्य भक्तानुग्रहाय दहरत्वचिन्तनं प्रतिपाद्यते "दहर उत्तरेश्यः" इत्यादिना । तत्र श्रुतिस्मृतिपुराणादि वचनोद्बलकत्वात् इत्थं निरूप्यते । "दहर उत्तरेभ्यः" "यदिदमस्मिन् तथा" एष सर्वेश्वर एष भूताधिपतिरेष भूतपालः एष सेतुर्विधारण एषां लोकानायसम्येदाय इति च तस्मात् परमेश्वर एव अन्योन्य दहरशब्दवाच्यः इत्यादिश्रुतावन्तर्धार्यत्वेनोक्तं दहराकाशशब्दवाच्यं वस्तु परशिवलिङ्गमेव । नन्वाकाशस्य भूताकाशे प्रसिद्धत्वात् सूचीरन्ध्रादिवत् तस्य दहरत्वात् सर्वव्यापकस्यान्तः प्रविष्टत्वेन दहरवाच्यत्वं भूताकाशस्य, "यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् तदन्तस्तदन्वेष्टव्यं यद्वा विजिज्ञासितव्यम्" इत्यादिना जीवे ब्रह्मपुरमिति ज्ञायमानत्वात्, "यस्यात्मा शरीरम्" इति श्रवणात्, "वालाग्रशतभागस्य शतधा कल्पितस्य च । जीवो भागः", यथा व्याप्य जगत्सर्वं स्वभासा भाति भास्करः । तथा स्वशक्तिभिर्व्याप्य परमात्मा प्रकाशते ॥ (सिद्धान्तशिखामणिः-१८-३४)

यस्मिन् वस्तुनि भूम्यादि समस्तत्त्वानि समुद्रे बृहत्तरङ्गाः इव सम्भूय लयमायान्ति तत् परमात्मनो रूपम् ॥ पुनः प्रकारान्तरेणाहनिवारिताणवादिमलसम्बन्धं नामरूपात्मकसकलजगज्जीवनभूतं परमात्मनः स्वरूपं भूम्यादिशिवान्तसकलतत्वोपरि प्रोक्तम् ॥ अथ परमात्मा कथं प्रकाशते ? इत्यत्राह- भास्करः स्वकान्त्या जगत्सर्वं व्याप्य यथा वर्तते तथा परमात्मा घमवत्यादिस्वकीयपंचशक्तिभिः विश्वं व्याप्य प्रकाशते इत्यर्थः । तदीयजगद् व्याप्तिसाधनधूमवत्यादिशक्तिवर्णनम् तथाहि सृज्यस्य पांचभौतिकत्वात्, भूम्यां धमावत्यपरपर्यायातिरोधनशक्तिः जले पुष्टिलक्षणा पालनशक्तिः तेजसि विश्वप्रकाशकता लक्षणा सृष्टिशक्तिः, वायौ शेषता लक्षणा संहारशक्तिः नभसि व्यापकशिवैकीकरण-प्रवीणानुग्रहात्मिका विभुताशक्तिः । एवं पंचभिः विश्वं व्याप्य वर्तते इत्यर्थः । उक्तोऽयमर्थः पंचशिखाशास्त्रे-

धमावती पृथिव्यां ह्लादाऽप्सु शुची तु भास्वती प्रथते । वायौ स्पदा विम्बी नभसि व्याप्तं जगत्ताभिः ॥

धमावती तिरोधौ भास्वत्यवभासतेऽध्वनां शक्तिः । क्षोमे स्पन्दा व्याप्तौ विम्वी ह्लादा च पुष्टौ स्यात् ॥

इति रावशक्तिभिः विश्वं व्याप्य वर्तते इत्यर्थः ।

अत्र स्वकान्त्या विश्वं व्याप्य भासमानस्य सूर्यस्य यथाऽभेदः, तथा शिवाद्विश्वस्य अभेदः नाशङ्कनीयः। भूम्यादेः शक्तिरूपत्वात्।

विश्वतो भासमानोऽपि विश्वमायाविलक्षणः। परमात्मा स्वयंज्योतीरूपः जीवात्मना भवेत्॥ (सिद्धान्तशिखामणिः-१८-३५)

शक्तीनां शिवस्वभावत्वात्। नैवं सारतेजोरूपम्, किन्तु सम्बन्धमात्रम्। सर्वांशे दृष्टान्ताभावात् व्याप्तावेव दृष्टान्तः इति।

नन्वेवं विश्वव्यापकत्वेन भासमानत्वात् ईश्वरस्य विश्वविकारः कस्मात् न सम्भवति। इत्याक्षेपस्य उत्तरं वदन् परमात्मस्थलं समापयति परमात्मा विश्वस्मिन् सर्वत्र भासमानोऽपि विश्वमापाविलक्षणः विवोपादनकारणीभूतः व्योमक्तविश्वगतषडभावविकारदोषरहितःसन् सच्चिदानन्दस्वरूपेण जीवात्मनां संसारहेयबुद्धिसंपन्नानाम् ज्योतीरूपः बुद्धिप्रकाशको भवतीति।

वालाग्रशतभागेन सदृशो हृदयस्थितः। अश्नन् स कर्मफलं सर्वं आत्मा स्फुरति दीपवत्॥

इति श्वेताश्वतरश्रुत्यनुसारेण जीवस्वरूपं प्रतिपादयति वालाग्रेति। केशाग्रशतभागेन सदृशः सन् स्वर्गागतकर्मफलं भुञ्जन् सन् हृदये हृदयकमले स्थितः तिष्ठतीत्यर्थः नन्वयं चेत् शरीरैकदेशनिष्ठत्वेन "पादे मे वेदना" "शिरसि सुखम्" इति सर्वाङ्गीणचैतन्योपलब्धिः कथम्? इत्याशंक्याह- दीपवदिति। दीपस्य गृहैकदेशनिष्ठत्वेऽपि स्वप्रभया संपूर्णगृहं व्याप्य तदन्तर्गतसकलवस्तुप्रकाशत्वं यथा तद्वत् जीवस्य शरीरैकदेशनिष्ठत्वेऽपि "प्रज्ञाया शरीरं समारुह्य" इति श्रुतेः तद् बुद्धेः व्यापकत्वेन सर्वं शरीरं व्याप्य सर्वाङ्गीणचैतन्यमनुभवन् आत्मा जीवात्मा स्फुरति प्रकाशते इत्यर्थः। नन्वेवं विधं रूपं जीवस्य स्वाभाविकं किम्? इत्यत्राह- "एषोऽणुरात्मा चेतसा वेदितव्यः" इत्यादिना जीवस्य क्षुद्रपरिमाणकत्वदर्शनाद् दहरशब्दवाच्यत्वमस्तु? इति चेत्, उत्तरेभ्यः हेतुभ्यः इति शेषः। "एष त आत्मा अपहतपाप्मा विजरो विमृत्युर्विशोकोऽविजिघित्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः" इति वाक्ये शेषप्रसिद्धहेतुभ्यः। तथा च अपहतपाप्मत्वादीनां धर्माणां भूताकाशजीवयोरनुपपद्यमानत्वात् न तयोर्दहरशब्दवाच्यत्वमित्यर्थः। (तथा च उक्तं च श्रीकरभाष्ये) तद्यथेह कर्मचितो क्षीयत एवमेवामुत्र पुण्यचितो लोकः क्षीयते" इति कर्मणामनित्यफलमुपदिश्य, अथ "य इहात्मानमननुविद्या व्रजन्त्येतागश्च सत्यात् कामस्तेषां सर्वेषु लोकेष्वस्य कामचारो भवति" इति प्रकृतदहराकारास्यानन्दफलत्वव्यवस्थापनात् परमेश्वरत्वमस्य निर्दिष्टम्। तस्मात् द्यावापृथिव्यधिष्ठाना काशोपनितदहराकाशः पूर्वोक्तहेतुभ्यः परमशिव इति सिद्धम्। शिवस्यैव दहरशब्दवाच्यत्वमित्यत्रोत्तरहेतुघटकहेतुद्वयमाह- गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च"। गतिश्च शब्दश्च गतिशब्दौ, ताभ्यामित्यर्थः। "इमाः सर्वाः प्रजाः अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दति अनृतेन हि प्रत्यूढाः" इति वाक्यशेषोक्ताभ्यां दहराकाशकर्मकगतिब्रह्मलोकशब्दाभ्यां दहरशब्दवाच्यं शिवलिङ्गमेव। तथा ह्येतद्दृष्टं श्रुत्यन्तरे- "एषोऽसौ परमो हंसो (गङ्गोपनिषत) भानुकोटिप्रतीकाशो येनेदं व्याप्तम्। तस्याष्टधा वृत्तिर्भवति- पूर्वदले पुण्यमतिः, आग्नेये निद्रालस्यादयो भवन्ति, याम्ये क्रौर्यमतिः, नैर्ऋत्ये पापे मनीषा, वारुण्यां क्रीडा, वायव्ये गमनादौ बुद्धिः, सौम्ये रतिप्रीतिः, ऐशान्ये द्रव्यादानम्, मध्ये वैराग्यम्, केसरे जाग्रदवस्था, कर्णिकायां स्वप्नः, लिङ्गे सुषुप्तिः" यदा हंसो नादे विलीनो भवति, तदा तत् तुरीयमपि" (हंसोपनिषत्) इत्यत्र हृत्पुण्डरीकान्तर्वर्तिदहराकाशरूपपरशिवलिङ्गगमनं दृष्टमित्यर्थः। अत्र लिङ्गे सुषुप्तिरिति हृदयान्तर्वतः शिवस्य लिङ्गरूपत्वं द्रष्टं लिङ्गब्रह्मशब्दयोः घटकुम्भादिवत् पर्यायत्वात् प्रत्यहं सुषुप्तौ प्रजाशब्दवाच्यजीवानां ब्रह्मणि गमनं दृष्टम्। तदेव दहराकाशपदवाच्यस्य ब्रह्मत्वे लिङ्गहेतुः। ब्रह्मलोकमित्यत्रापि ब्रह्मैव लोकमित्यर्थो बोध्यः। अन्यथा महाकैलासाभिधानं ब्रह्मणः शिवस्य लोकं प्रति प्रत्यहं गमनासंभवात् "अहरहर्गच्छन्ति" इत्यस्याप्रामाण्यं स्यात्, "एष ब्रह्मलोकः सम्राडिति होवाच" इत्यादौ ब्रह्मभिन्नो लोक इत्यवगमाच्च। तथा च दहराकाशत्वान्तर्लिङ्गधारणापरपर्यायज्योतिर्लिङ्गानुसन्धानं प्रत्यहं कर्तव्यमिति। उक्तं च श्रीकरभाष्ये- लिङ्गब्रह्मशब्दयोः घट-कुम्भ-कलशादि शब्दवत् पर्यायत्वम्। दृष्टमित्यनेन प्रत्यहमनन्तरत्र प्रभाभासमानमहाकैलासाभिधानब्रह्मलोकगमनासंभवात् "ब्रह्मैव लोकः" ब्रह्मलोक-परशिवलोकः" इति कर्मधारयसमास एव ब्रह्म। अस्मिन्नर्थे अहरहर्ब्रह्मलोकगतमनमेव लिङ्गमित्यनेनोक्तम्। च शब्देन "निषादस्थपति" न्यायोऽपि कर्मधारयसमासब्रह्मणे सूचितः।

सुषुप्तौ तदभावश्च "जीवश्शङ्करतां शिवगीतायामप्युपदिश्यते । तस्माद्दहराकाशः परमशिव इति सिद्धम् । अस्मिन् अर्थे हेत्वन्तरमाह- "धृतेश्च महिम्नोऽस्यास्मिन् उपलब्धेः" । धृतेः सर्वलोकविधारकत्वात्, "अथ य आत्मा स सेतुविधृतिरेषां लोकानामसंभेदाय" इति श्रुतेः । अस्य सर्वलोकविधारणरूपस्य महिम्नोऽस्मिन् प्रकृतदहरपदवाच्ये उपलब्धेः, उपलभ्यमानत्वात् । "एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गिद्यावापृथिव्यौ विधृते तिष्ठत एतस्य वा अक्षरस्य प्रशासने गार्गि निमेषा मुहूर्ता अहोरात्राण्यर्धमासा मासा ऋअतवः संवत्सरा इति विधृता तिष्ठन्त्येतस्य वा अक्षरस्य प्रशासने गार्गि प्राच्योऽन्या नद्यः स्यन्धन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्या यां यां चा दिशनन्वेतस्य वा अक्षरस्य प्रशासने गार्गि ददतो मनुष्याः प्रशसन्ति यजमानं देवा दर्वी पितरोऽन्वायत्ताः ॥

यो वा एतदक्षरं गार्ग्य विदित्वाऽस्मिन् लोके जुहोति यजते तपस्तप्यते बहूनि वर्षसहस्राण्यन्तव देवास्य तद्भवति यो वा एतदक्षरं गार्ग्यविदित्वाऽस्मान् लोकात् प्रैति स कृपणोऽथ य एतदक्षरं गार्गि विदित्वास्मान् लोकात् प्रैति स ब्राह्मणः ॥ तद्वा तदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं श्रोत्रमतं मन्त्रविज्ञातं विज्ञातृ नान्यदतोऽस्ति द्रष्टृनान्यदतोऽस्ति श्रोतृनान्यदतोऽस्ति मन्तृनान्यदतोऽस्ति विज्ञात्रे तस्मिन्नु खल्वक्षरे गार्ग्याकाश ओतश्च प्रोतश्चेति ॥" (बृहदारण्यकोपनिषत्, ब्राह्मण ८, मन्त्रः ९, १०, ११) इत्यत्र सर्वलोकविधारणरूपमहिमा दृश्यते । स च शिवादन्यत्र न संभवतीत्यतो दहराकाशवाच्यं शिवलिङ्गमेव ॥ किञ्च "दहरोऽस्मिन् अन्तराकाशः" इत्युक्तदहराकाशवाच्यः परशिव एवेत्यत्र हेत्वन्तरमाह- प्रसिद्धेश्च । श्रुत्यन्तरे दहराकाशः परशिव एवेति प्रसिद्धेरित्यर्थः । तथा हि- "दहरं विपाप्मं परमेश्मभूतं यत्पुण्डरीकं पुरमध्यसंस्थम् । तत्रापि दहरं गगनं विशोकस्तस्मिन् यदन्तस्तदुपासितव्यम्" ॥ इत्यत्र, "हृत्पुण्डरीकं विरजं विशुद्धं विचिन्त्यं मध्ये विशदं विशोकम् । अचिन्त्यमव्यक्तमनन्तरूपं शान्तं प्रशान्तममृतं ब्रह्मयोनिम् । तदादिमध्यान्तविहीनलोकं विभुं चिदानन्दमरूपमधुत्तम् ॥ (कैवल्योपनिषत्) इत्यारभ्य "उमासहायं परमेश्वरं प्रभुं त्रिलोचनं नीलकण्ठं प्रशान्तम् । ध्यात्वा मुनिर्गच्छति भूतयोनिम्" इत्यत्रापि प्रसिद्धत्वात् । ननु दहराधिकरणे विषयत्वेन गृहीतो दहरोऽस्मिन् अन्तराकाश इति विषयवाक्येन दहराकाशशब्दवाच्यत्वं शिवस्य ज्ञायते, पूर्वोक्तसूची-रन्ध्रकैवल्यवाक्याभ्यां दहरपुण्डरीकमध्यवर्तित्वेन ज्योतिर्लिङ्गस्योपास्यत्वं प्रतीयते, तथा च विरुद्धप्रतिपादकवाक्यानाम- प्रामाण्यापत्तिरिति चेन्न, दहराकाशशब्देन चिदाकाशशक्तिरुच्यते । "आकाशशरीरं ब्रह्म सत्यात्मप्राणारामं मन-आनन्दनम्" इत्यादिना चिदाकाशशरीरत्वस्योपदेशात्, शक्तिशक्तिमतोरभेदात् । उक्तं च कूर्मे- "कैषा भगवती देवी शङ्कराएधशरीरिणी । शिवा सती हैमवती यथावद् ब्रूहि पृच्छताम्" ॥ इति प्रश्ने कूर्म आह- "रहस्यमेतद्विज्ञानं जन्तूनामेकमोचनम् । व्योमसंज्ञा पराकाष्ठा ज्ञानरूपातिलालसा ॥ स्वाभाविकी च तन्मूला प्रभा भानोरिवामला । एका माहेश्वरी शक्तिरनेकोपाधियोगतः ॥ परापरेण रूपेण क्रीडते तस्य सन्निधौ । सोऽयं करोति सकलं पश्य कार्यमिदं जगत् ॥ एका शक्तिः शिवो ह्येकः शक्तिमानुच्यते शिवः । शक्तिशक्तिमतोर्भेदं वदन्ति परमार्ततः । अभेदं चानुपश्यन्ति योगिनस्तत्वचिन्तकाः ॥ इति । तत्रैव देवीवाक्यमपि देवीवाक्यमपि- "मां विद्धि परमां शक्तिं महेश्वरसमाश्रयाम् । अनन्यामव्ययामेकां यां पश्यन्ति मुमुक्षवः ॥ अहं वै सर्वभूतानामात्मा सर्वान्तरा शिवा । शाश्वतैश्वर्यविज्ञानमूर्तिः सर्वप्रवर्तिका" ॥ इत्यादिना कूर्मपुराणे । नारायणेन- "धृतकाठिन्यवन्मूर्तिः सच्चिदानन्दलक्षणा । शिवाभिधेन सैवास्ति शिव एव हि सा सदा ॥ इति सूतगीतायां च द्वैताद्वैतात्मकशिवाद्वैतस्य प्रतिपादितत्वात्८ शिवस्य दहरात्मकत्वदहरमध्यवर्तित्वयोरविरोधात्, दहराकाशमध्यवर्तित्वेन प्रसिद्धेरित्यर्थः ॥

## उपसंहारः

च आत्मा अपहायात्मा विरजो ... इत्यादि श्रुतिवाक्यबलात् शिवभावापन्नजीवन्मुक्तशिवरूपत्वं यदि वैशिष्ट्यं व्याख्यातम् । एवं परंपरया विचार्यमाणे सति ज्ञानं वस्तुपरिच्छेदः ध्यानं तद्भावकारणम् । तस्मात् ज्ञानी महादेवे ज्ञात्युक्तो भवेत् सुधीः इत्यादिभिः भावयुकास्य ज्ञानमात्रत्वं प्रतिपाद्यते । बहुभिः प्रतिस्मृतियुक्तवचोभिश्च निरूप्यते ॥

**परामर्शनग्रन्थः**

१) अनुभवसूत्रम्- श्रीमायिदेवविरचितं विमर्शात्मकपरिष्करणं वि. डा. हेच्. पि. मल्लेदेवरु, प्राच्यविद्यासंशोधनालयः, मैसूरु ।

२) क्रियासारः-श्रीनीलकण्ठशिवाचार्यविरचितः, भागत्रयोपेतः, प्राच्यविद्यासंशोधनालयः, मैसूरु ।

३) चन्द्रज्ञानागमः- (क्रिया-चर्यापादौ) भाषानुवाद, टिप्पणीसहितः, संपादकः- पं. व्रजवल्लभद्विवेदी, प्रकाशकः- शैवभारतीशोधप्रतिष्ठानम्, जङ्गमवाडीमठम्, वाराणसी ।

४) चन्दज्ञानागमः- (क्रियापाद-चर्यापाद) आङ्ग्लभाषानुवादः, टिप्पणीसहितः, डा. रामा घोसे, संस्कृतपद्यः, एडिटेड् पं. व्रजवल्लभ द्विवेदी, प्रकाशकः- शैवभारतीशोधप्रतिष्ठानम्, जङ्गमवाडीमठम्, वाराणसी ।

५) चन्द्रज्ञानागमः- (कर्णाटभाषानुवादटिप्पणी सहितः) संपादकः अनुवादकश्च- डा. एम्. शिवकुमारस्वामी, वीरशैव अनुसन्धानसंस्थानम्, बेङ्गळूरु ।

६) महानारायणोपनिषदः- एडिटेड् शैवभाष्यम्, श्रीवृषभदेवपण्डितकृतः शैवभारती शोधप्रतिष्ठानम्, काशी ।

७) मुण्डकोपनिषत्- वीरशैवभाष्यम्, श्री उमचगि शङ्करशास्त्रिकृतं संस्कृतमूलसहितम्, प्रबोधपुस्तकप्रकटणसंस्था, मैसूरु ।

८) लिङ्गारण्यचन्द्रिका- श्रीनन्दिकेश्वरशिवाचार्यविरचितः, शिवकुमारव्याख्या सहितः, काशी ।

९) लिङ्गधारणचन्द्रिका- (कन्नड) श्री गुरुशान्तस्वामिगळु, मैसूरु ।

१०) श्रीकरभाष्यम्- श्रीपति पण्डितावार्यविरचितम्, संपुटम्. प्राच्यविद्यासंशोधनालयः, मैसूरु ।

११) श्वेताश्वतरोपनिषत्- आङ्ग्लभाषा अनुवादः, अनुवादकः-स्वामी त्यागीशानन्दः, श्रीरामकृष्ण मठम्, महिलापुरम्, मद्रास, भारत ।

१२) श्वेताश्वतरोपनिषद् वीरशैवभाष्यम्- वि. डा. टि. जि. सिद्धप्पाराध्यकृतम्, कन्नडभाषानुवादसहितम्, मैसूरु ।

१३) सिद्धान्तशिखामणिः- श्रीशिवयोगिशिवाचार्यविरचितः, श्रीकाशीनाथशास्त्रिकृतः, भावप्रकाशव्याख्या (कर्णाटकभाषा) पंचाचार्य प्रेस्, मैसूरु ।

१४) बृहदारण्यकोपनिषत्- सं. १, २ संशोधना संसत्, मेद्द कोटे ।

१५) छान्दोग्योपनिषत्- सं. १, सं. २ ।

**विद्वान् डा. के.एम्. महदेवय्यः**

प्राध्यापकः, शक्तिविशिष्टाद्वैतवेदान्तविभागः, प्रांशुपालश्च

सर्वकारीय महाराज संस्कृत महाविद्यालयः

न्यूसय्याजिराव् रोड्, मैसूरु-२४, कर्नाटक

चरदूरवाणी- 9980057563

***************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# महावाक्यार्थदर्पणदिशा आत्मतत्त्वविमर्शः

**डा. गणपति वि. हेगडे**
प्रभारी प्राचार्य, असिस्टेण्ट प्रोफेसर, अद्वैतवेदान्तविभाग
मुम्बादेवी आदर्श संस्कृत महाविद्यालय मुम्बई
भारतीय विद्या भवन, के.एम्.मुन्शी मार्ग,
गिरगांव चौपाटी, मुम्बई – ४००००७
दूरभाषा- 9482944911
ईमेल्- ganapativg@gmail.com

श्रीमता कृष्णानन्दभारतीतीर्थेन विरचितः वेदान्तशास्त्रसम्बद्धः अप्रकाशितः तालपत्रादिस्थितः 'महावक्यार्थदर्पणम्' इति ग्रन्थः एकसप्तत्युत्तरषोडशशतश्लोकघटितः (१६७१) पद्यात्मकः ग्रन्थः विद्यते । अध्यायादिविभागम् अकृत्वा नैरन्तर्येण श्लोका एव अत्र सन्निविष्टाः। अयं ग्रन्थः गुरुशिष्यसंवादात्मकः। मया अस्मिन् ग्रन्थे आत्मस्वरूपं कथं निरूपितमिति लेखनेऽस्मिन् लिख्यते । मायाकार्यतिरोहितत्वात् सूक्ष्मबुद्धिं विना आत्मस्वरूपं ज्ञातुं कष्टसाध्यमिति निरूप्यते । यथा-

सत्यमुक्तं त्वया विद्वन्मायाकार्यतिरोहितः। ज्ञातुं न शक्यते चात्मा विना बुध्या सुसूक्ष्मया[1] ॥

न कश्चिन्मन्ददृष्टीनामरुन्धत्यां तदीक्षते । सूक्ष्मधीयुक्तिकुशलः सूक्ष्मार्थं वेत्तुमर्हति[2] ॥

अस्मिन् देहे अहमितिप्रत्ययालम्बनः सकलकरणग्रामचेष्टानिदानरूपेण यः वर्तते सः एव आत्मा । यः विज्ञानमयकोशे हृदि व्योम्नि स्थितः स्वयं ज्योतिः सन् सत्ववृत्तौ दृश्यते स एव आत्मा इत्युच्यते । तदुक्तं यथा-

यो बुद्धिकोशे हृदि सत्ववृत्तिर्दृश्यते व्योम्नि सदा स्थितस्सन्। ज्योतिस्स्वयं सर्वमिदं प्रकाशयत्यलं किल प्रत्यगशेषबोद्धा[3] ॥

स्वप्नेऽपि बुद्धिरचिताखिलदृश्यजातं कर्त्रादिभेदकलितं प्रतिभासमात्रम्।

स्वज्योतिषाऽखिलमिदं प्रतिभासयन्यः पश्यत्यसङ्गचितिरक्रिय एष आत्मा[4]॥

"तस्य भासा सर्वमिदं विभाति"[5] इत्यादिश्रुत्यनुसारं यथा आत्मनः भासया एव सर्वमिदं विभाति इत्युक्तम् तथैव अस्मिन् ग्रन्थे यत्सत्तया अजडाश्च सत्तां याति इति उच्यते यथा -

स्वयं त्वनित्या अपि नित्यतां गता व्योमादयोऽमी यदनुग्रहेण। यद्भासमाश्रित्य विभान्ति नित्यं भान्वादयः प्रत्यगयं चिदात्मा[6] ॥

यत्सत्तया यात्यजडाश्च सत्तां स्फूर्तिं च यत्स्फूर्तिबलेन यान्ति। सूर्यप्रकाशेन यथा घटादयः प्रत्यञ्चमेवं त्वमवेहि विद्वन्[7] ॥

यथा राज्ञः प्रसादतः मन्त्री कार्यं कुरुते तथा आत्मनः प्रसादेव बुद्धिः कार्यं करोति । तस्मात् "मनसैवानुद्रष्टव्यम्"[8] इत्यादि श्रुत्युक्तरीत्या स्वयुक्त्या सम्यक् परिशील्य प्रत्यगात्मानं ज्ञातव्यमित्युच्यते यथा -

य इन्द्रियार्थेन्द्रियसन्निधानः सञ्जायमानाखिलबुद्धिवृत्तेः। साक्ष्यात्मनापश्यति निर्विकारस्स प्रत्यगर्थस्सदसद्विभिन्नः[9]॥

अचेतनाश्चेतनतां प्रयान्ति बुद्ध्यादयो यस्यमहाप्रसादात्। सर्वान्तरस्सर्वविलक्षणोयस्तं प्रत्यगात्मानमवेहि विद्वन्[10] ॥

बुध्यंशंभास्यमुत्सृज्यभानमात्रं परिग्रहेत्। आत्माऽवशिष्यते शुद्धबोधमात्रस्तु केवलः[11]॥

भक्ष्यस्थं यत्माधुर्यंकेवलं सैवशर्करा, अवशिष्टं तु द्रव्यं तत्पिष्टं न तु शर्करा। तद्वदत्र यद्भानं शुद्धं स प्रत्यगिष्यते। यत्तु भास्यं

सबुद्ध्यंशः। आत्मनः धर्माः केचन श्लोकेऽस्मिन् निर्दिष्टाः सन्ति यथा-

चेतनत्वं च बोद्धृत्वं सर्वज्ञत्वं च नित्यताम्। असद्रूपोह्यहङ्कारः यस्य धर्मात्स्वयं भजन्[12]॥

करोति प्राभवं तत्त्वं प्रत्यञ्चं विद्धि केवलम्। योऽहङ्कारेण विहितो मेघेनेव दिवाकरः[13]॥

अन्तःकरणोपाधिविरमे सुप्तौ बोधमात्रावशेषितः स्वयमानन्दरूपेण प्रत्यगात्मा प्रकाशते । स्वप्नसृष्टिः प्रत्यक्प्रवेशेन विभाति तस्मात् आत्मा स्वयं ज्योतिः इत्युच्यते यथा-

सुप्तौ प्रलीनसकलेन्द्रियबुद्धिवृत्तौ यश्शुद्धबोधरसमात्रतयाऽवशिष्टः।

बुद्ध्याद्युपाधिमुपगच्छति शून्यसाक्षी सन्प्रत्यगेषसुखमात्रवपुश्चिदात्मा[14]॥

एषः स्वयं ज्योतिरशेषसाक्षी निरन्तरानन्दघनोऽद्वितीयः। सुसूक्ष्मबुद्ध्याऽप्यनुरूपयुक्त्या प्रत्यञ्चमेतं स्वमवेहि साक्षात्[15]॥

यः सुषुप्तिसाक्षी, शुद्धः, चिदेकरसः, अव्ययः, सः एव प्रत्यगात्मा। बुद्ध्यादिविलये सुप्तौ शून्यमेवानुभूयते। किमात्मत्वेन विज्ञातुं सुषुप्तौ वस्तु विद्यते वा? । तस्मात् सुप्तिकालेन ज्ञातानज्ञानं न ज्ञेयं नकिञ्चन प्रतीयते। सुप्तिकाले सर्वस्यशून्यताम्प्रतीयते इति शिष्यस्य प्रश्नस्य उत्तररूपेण श्लोकः विरचितः ग्रन्थकारेण यथा-

अविद्यमानेन कथं त्वयेक्षिता सुषुप्तिकालस्थितसर्वशून्यता। परोऽपि कश्चिद्विदिताऽस्ति नात्र सतर्कतो वाऽप्यवगन्तुमिष्यते[16] ॥

त्वयैव साक्षादनुभूयमाना त्वदीयसत्तामिदमेव वक्ति। अतस्त्वमेतामनुभूय वक्षि सौषुप्तिकीं सर्वपदार्थशून्यताम्[17]॥

एषोऽहं सुखमस्वाप्सं नाहं किञ्चिदवेदिषम्। इत्येतत्प्रत्यभिज्ञानं स्वसद्भावावबोधकम्[18]॥

सुप्तिकाले यदि वेदिता आत्मा विद्येत तर्हि कस्मात्विस्फुटं ज्ञानं जागरादिव न वीक्ष्यते । ज्ञातृत्वशक्त्यभावाद्वा ज्ञातुर्वाऽप्यन्यथास्थितेः एषोऽहमहमित्यादि वेदनं नात्र दृश्यते। तार्किकाः आत्ममनः संयोगे सति ज्ञानं भवतीति वदन्ति । सुषुप्तिकाले आत्ममनः संयोगो नास्ति तस्मात् जडः एव आत्मा इति शिष्यस्य प्रश्नस्य उत्तरं यथा-

मनो वियोगेऽपि य एष आत्मा सौषुप्तिकं धर्ममवैति साक्षात्। जडो यदि स्यात्स कथं नु विन्द्याज्जडस्य नास्त्येव हि वेदितृत्वम्[19] ॥

अयं न वेत्तीति मतिस्तवास्ति चेत्स्यात्प्रत्यभिज्ञानुदयो जनानाम् । स्वापप्रबुद्धेष्वनुभूयतेऽसौ तस्मादयं बोधमयो न संशयः[20]॥

सुप्त्यादौ विषयाभावात्पश्यन्नपि न पश्यति। नासत्वमस्य नित्यत्वादजोनित्य इति श्रुतेः[21]॥

वेदान्तमते आत्मा स्वतः सिद्धः, सद्रूपः, देहेन्द्रियादिभ्यः भिन्नः वस्तुतो निर्लेपः वर्तते । आत्मैव ब्रह्म "अयमात्मा ब्रह्म"[22] इत्यादिश्रुतेः । अयमर्थः बहुत्र ग्रन्थकारेण श्लोकैः युक्तिभिः सह प्रतिपादितः वर्तते । एवं रूपेण अनेके श्लोकाः आत्मस्वरूपनिरूपणे विद्यन्ते । अस्मिन्ग्रन्थे 'तत्त्वमसिमहावाक्यनिरूपणं' विशेषरूपेण विशिष्टया शैल्या च विमृष्टम्। उत्तरमीमांसाध्येतृणां महावाक्यविषये आत्मस्वरूपविषये च विशेषावगमार्थम् अयं ग्रन्थः सहायको भवति।

## पादटिप्पणी

1. महावाक्यार्थदर्पणम्-३३७ । 2. महावाक्यार्थदर्पणम्- ३३८ । 3. महावाक्यार्थदर्पणम्- ३४५ । 4. महावाक्यार्थदर्पणम्- ३५९ ।

5. कठोपनिषत्- २-२-१५ । 6. महावाक्यार्थदर्पणम्- ३४६ । 7. महावाक्यार्थदर्पणम्- ३४७ । 8. बृहदारण्यकोपनिषत्- ४-४-१९ ।

9. महावाक्यार्थदर्पणम्- ३५१ । 10. महावाक्यार्थदर्पणम्- ३५२ । 11. महावाक्यार्थदर्पणम्- ३६४ । 12. महावाक्यार्थदर्पणम्- ३५५ ।

13. महावाक्यार्थदर्पणम्- ३५६ । 14. महावाक्यार्थदर्पणम्- ३६८ । 15. महावाक्यार्थदर्पणम्- ३७० । 16. महावाक्यार्थदर्पणम्- ३७९ ।

17. महावाक्यार्थदर्पणम्- ३८० । 18. महावाक्यार्थदर्पणम्- ३८१ । 19. महावाक्यार्थदर्पणम्- ३८७ । 20. महावाक्यार्थदर्पणम्- ३८० ।

21. महावाक्यार्थदर्पणम्- ३८१ । 22. महावाक्यार्थदर्पणम्- ३८७ । 23. महावाक्यार्थदर्पणम्- ३८८ । 24. महावाक्यार्थदर्पणम्- ३९९
25. माण्डूक्योपनिषत् -२-५-१९

**परिशीलितग्रन्थाः –**


१. महावाक्यार्थदर्पणः –कृष्णानन्दभारतीतीर्थः अड्यार ग्रन्थालयः ।

२. ब्रह्मसूत्रम् (शाङ्करभाष्योपेतम्) – मोतिलाल बनारसीदास पब्लिशन् दिल्ली, १९९८ ।

३. भगवद्गीता – गोरखपुर प्रेस २०००।

४. वेदान्तपरिभाषा – प्रो. पारसनाथद्विवेदी, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणासी २०००।

५. उपनिषद्भाष्यम् -१,२,३ - श्रीशङ्करभगवत्पादाचार्याः, श्रीदक्षिणामूर्तिमठप्रकाशन वाराणासी, २००४

६. अद्वैतसिद्धिः – श्रीमधुसूदनसरस्वती, चौखम्बा संस्कृतप्रतिष्ठान, वाराणासी १९६५ ।

७. वेदान्तसारः – श्रीसदानन्दः, चौखम्बा कृष्णदास अकाडमी वाराणासी, २००२।

८. सिद्धान्तलेशसंग्रहः –श्रीमदप्पय्यदीक्षितः, चौखम्बा कृष्णदासअकाडमी वाराणासी,२००२ ।


************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# संस्कृतवाङ्कमये वर्णितस्य विज्ञानस्य उपयोगिता

**NEEHARIKA PRADHAN**
Research Scholar of Sanskrit Department
Pondicherry University, Kalapet
Puducherry-605014
Contact No. : 9658325770
E-mail : neeharikapradhan@gmail.com

आध्यात्मिक-भोतिकभेदेन संस्कृतवाङ्कयं द्विधा विभक्तम्, आध्यात्मिकविभागे वेदाङ्गानि अन्यतमानि। भोतिकविषयेषु विज्ञानं साहित्यञ्च अन्यतमतां भजते। विज्ञाने गणितं (Mathematics) भौतशास्त्रम् (Physis), रसायनशास्त्रम् (Chemistry), जीवशास्त्रम् (Biology) उद्भिद्विद्या (Botany) चेत्यादयः परिगण्यते । साहित्यञ्च दृश्य-श्रव्य-चम्पुभेदेन त्रिविधं विज्ञानं व्याकरणे, स साहित्ये, ध्वनिविज्ञाने, चापि विद्यते । अस्मिन् सन्दर्भे संस्कृतवाङ्कमये एतेषां विज्ञानम् गुरुत्वं विधीयते यथामति।

**वैदिकगणितस्य (Mathematics) गुरुत्वम् –** गणितशास्त्रणामुत्पत्तिविषये अस्ति वाग्विवादः पाण्डितेषु । वेदाङ्गशास्त्रस्य एकस्मिन् श्लोके गणितस्य प्राधान्यं स्वीकृतं भवति ।

यथा शिखा मयूराणां नागानां मणयो यथा । तद्वद् वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितम् ।।

वेदाङ्गशास्त्राणां गणितं मूर्धनि स्थितमिति । ऋग्वेदे एकतः दशपर्यन्तं, दशानां गुणितया विविधयाः संख्यायाश्च उल्लेखो विद्यते । यजुर्वेदस्य एकस्मिन् मन्त्रे एकतः परार्ध पर्यन्तं संख्यायां गणनं विहितम् । **इमा मे अग्र इष्टका धेनवः सन्त्वेका च दश शतं च शतं च सहस्त्रं च सहस्त्रं चायुतं च नियुतं च प्रायुतं चार्वुदं च न्यर्वुदंच समुद्रश्च मध्य चान्तश्च परार्धश्चैता मे अग्र इष्टका धेनवः सन्त्वमुद्रामस्मिल्लोके इति ।** एतासां अङ्कपद्धतीनां उपयोगे लोकेव्यवहारे अस्ति । एताः अङ्कपद्धतयः 300 इशवीयतः एव भारते आसन् प्रथम आर्यभट्टस्य कालात् पाटीगणितं विरचितं । भारतीय पाटीगणितं गुणनं-भाग-वर्ग-वर्गमूलप्रभुतीनां विंशते परिकर्मणा तथा मिश्रकादिच्छायान्तानाम् अष्टानां व्यवहाराणमालोचनेन समृद्धम् । ब्रह्मगुप्तेन तदीये ब्रह्मस्फुटसिद्धान्ते विंशत्यां परिकर्मसु, अष्टासु व्यवहारेषु च अभिज्ञो जनो गणितज्ञ इत्याभिधया अभिहितम् । अपेक्षितस्य संख्याया वर्गमूलस्य घनमुलस्य प्राप्तर्थ आधुनिके गणिते व्यवहृता पद्धतिः आर्यभट्टेन अन्विष्टा यजुर्वेदसम्बन्धेषु श्रोतसुत्रेष्वपि यज्ञवेदीकादि निर्माणार्थं ग्रथिते बौधायान शूल्वसूत्रे द्वयस्य वर्गमूलं रचितम् । -प्रमाणं तृतीयेन वर्धयेत् तच्चतुर्थेन, आत्मचतुत्रिंशनोनेन सविशेषः इति । भारतीयगणितशास्त्रं वैदिकमिति निश्चयं प्रभावमः । ∏ (pie) इत्यस्य मूल्यं प्रथमेन आर्यभट्टेन निर्णीतम् अभवत् । तेन निर्णितं तावत् ∏=3.1416 इति । आधुनिकं मुल्यं खलु - ∏ 3.141626 अस्मिन् विषये आर्यभट्टीय श्लोक अस्ति – चतुराधिकं शतम् अष्टगुणं द्वाषाष्टिस्तथा सहस्त्राणाम् । आयुतद्वयविष्कम्भस्यासत्रो वृत्त परिणाहः ॥

इदानीं व्यवहृतः सिद्धान्तः तस्मात् सहस्राधिक वर्षेभ्यः पूर्वमेव वौधायनेन कात्यायनेन च निर्मित आसीत् ।

**ज्योतिषशास्त्रः-** संस्कृतवाङ्कमये खगोल शास्त्रस्य अनेक वैज्ञानिकज्ञानं दृष्टम्, यथा सुर्यः पृथिवीं च आकाश प्रदेशं धारयति।

येनमा विश्वभुवनानि तत्थुः। ततः क्षेत्रं बलमोज श्च जातम् ।। सूर्यः सर्बेषां स्वर्गपिण्डानां आकर्षण शक्तिः अस्ति । मित्रि दाधार पृथिवीमुद्यम् । मित्रः कृष्टिः।। सुर्याः सर्वदा स्थिराः न चलति । सा एव एष (आदित्यः) न कदाचनस्तमोति नोहेति।।(गोपथ ब्राह्मणः2.4.10)

सुर्यः सर्वेषां आकाशपिण्डनां मार्गः अस्ति। दीर्धावृत्ता ग्रहणस्य कारणम् ऋतवः यदा धुमकेतुसङ्घा,चन्द्र,पृथीव्याः उपग्रह अस्ति।

पृथीव्याः परिधिः परिभ्रमन् ग्रहा गुरुत्वाकर्षण संकल्पनादायः

**संस्कृतवाङ्कमये रसायनशास्त्रस्य (Chemistry) गुरुत्वम् –**

**रसशालां प्रकुर्वीत सर्वबाधा विवर्ज्यते । सर्वैषधिमये देशे रम्ये कुपसमन्विते ।।**

**यक्षत्र्यक्षसवत्त्रक्षदिग्विभागसुशोभने । नानोपकरणोपेतां प्रकारणे सुशोभिताम्।।**

**शालायाः पुर्वदिग्भागे स्थायेद्रसभैरवम् । वन्हिनकर्मणि चाग्रेये योम्य पाषाणकर्म च ।।**

**नैर्ऋत्य शस्त्रकर्मणि वारुणे क्षालनादिकम् । शोषणं वायुकोणे च वैधकर्मोत्तरे तथा ।।**

**स्थापनं सिद्धवस्तुनां प्रकृर्यादीशकोणके । पदार्थसङ्ग कार्यो रससाधनहितुकः ।।**

सुश्रुत संहितानुसारं ---- तं यिकीर्षुः शरदि गिरिसानुजं शुचिरुपोष्य प्रशस्तदेशजातम् अनुपहतं मध्यमयसं महान्तम् असितमुष्तकमधिवास्य अपरेद्युः पाटयित्वा खण्डशः प्रकल्प्य एवपाठ्य निर्वाते देशे निचितिं कृत्वा सुधाकराश्च प्रक्षिप्त तिलनालैः आदीपयेत् । अथ उपाशान्ते अग्नौ तद्भस्म पृथग्गृह्णीयात् भस्मशर्कराश्च । ततः क्षारद्रोणम् उद्रकद्रोणैः परिस्राव्य,महती कटाहे शनैः दर्व्या अवगह्यन् विभज्य पुनः अग्नौ अदिश्रयेत् । स यथा नातिसान्द्रो नातिद्रवश्च भवति मध्यमः........................................

रसार्णवग्रन्थे सुवर्ण-रोप्य-ताम्र-लौह-सीसक-जीङ्क भेदेन धातोः षड्विधत्वं वर्णितम् अस्ति ।

**सूवर्ण रजतं ताम्र तीक्ष्णं वङ्गं भुजङ्गमम् । लोहन्तु षडिविधं तच्च यथा पूर्व तदक्षयम् ।।**

रस रत्नसमुच्चयग्रन्थे सामुद्र-सैन्धव-विड्-सौवर्चल-रोमक-चुल्लिका भेदेन लवणस्य (षड् भेदाः वर्णिताः)।

**धातुविज्ञानम् (Metallurgy) -** संस्कृतग्रन्थे अस्मान् धातुविज्ञानस्य विकासे विविध ज्ञानं भवति । विवधधातुः मिश्रधातुः शुद्धधातु निष्कासनं, लोहस्य वर्गीकरणं,क्रूसविल,कोष्ठी इत्यादयः धातुः विद्यते । याज्ञवल्यकीय स्मृतिग्रन्थानुसारं - अग्नौ सुर्बेर्णमत्रीणं रजते द्वफलं शते। अष्टौ त्रपुणि सीसे च ताम्रेपञ्चदशायसि ।।

अर्थात् यदि अग्नौ तापिते सुर्वणस्य (GOLD) संम्पुर्णतया हानिः, रजतस्य (SILVER) कृते 2% त्रपुणि (TIN)कृते 8% सीसा (LEAD) कृते 5% एवं लौह (IRON) कृते 10% भारस्य हानिः भवति ।

महाभातानुसारं – तद्वे पिपीलिका नाम उद्धृतं यत्पिपीलिकैः। तद्रुपं द्रोणमेयमहार्पुः पुञ्जाशो नृपाः ।।

**जीवशास्त्रस्य उपयोगिता -** शरीरं व्याधियुक्तम् । व्याधितो मुक्ते निर्मित्तं संस्कृत वाङ्कमये आयुर्वेद शास्त्रे निहितोऽस्ति । चरकसंहिताया,सुश्रुतसंहिता,अष्टाङ्गसंग्रह आर्युवेदस्य प्रमुख ग्रन्थः। चरकसंहितायां विवधानां रोगणां कारणं तेषां प्रतिकारोणयश्च वर्णितः । राजयक्षा-कर्कट-प्रभृतीनां चिकित्सापद्धतिरपि अत्र सुनिदिष्टा अस्ति। सुश्रुत संहितायां शल्यचिकित्सायाः प्राधान्यं अस्ति।

**भोतशास्त्रस्य उपयोगिताम् –** संयोग-विभाग-वेगनां कर्मणः शब्दस्य प्रकाशस्य च गतिः इति कणादेन श्च वैशेषिकदर्शने प्रतिपादनम् संयोग-विभाग-वेगानां कर्म समानामिति । अपि च प्रयत्नवशात् माध्याकषर्ण विरुध्यं उत्क्षेपणमस्ति। तत्र च संयोगः फल भवतीति इति कथितवन्तः। गुरुत्वं प्रयत्न-संयोगानमि उत्क्षेपणमिति । अदृष्ट करणेन मणिगमनं सूच्याभिसर्पणञ्च भवती इति । हिन्दु शास्त्रानुसारं भोतिकशास्त्रस्य वहु ज्ञानं गतिः-सन्धि-विच्छेदज्ञानं श्च। गुरुत्वाकर्पणविरुद्ध गतिः प्रयत्नात् सन्धिश्च प्राभावः। अदृश्यकारणा.त् रत्नपाषाणस्य कम्पाससुयस्य च गतिः। ताम्रपट्टिकानां उपयोगेन विद्युत्सक्तिः,शतशः मृत्तिका धटेषु स्थापितं रसायनं च वैटरीवैङ्क निर्मातुं शक्यते। तैत्तरीय उपनिषद् अनुसारं

तस्मात् निरपेक्षकारणात् अन्तरिक्षम् आगतः यस्मात् वायुः वायुतः अग्नि आगतः, अग्निनतः जल आगतः जलतः पृथिवीः आगतः। सृष्टेः क्रमानुसारं आकाशः-वायुः-अग्निः-आपः-पृथिवी श्च । आधुनिक भौतिकशास्त्रम् अस्य क्रमस्य प्लाज्मा(Plasma),गैसउर्जा(Gas energy),द्रव,(Liquid)ऊर्जा(Energy) च इति ददाति। तत् द्रव्यस्य च अन्तरिक्षविज्ञापनक्षमताम् अपि कथयति तथा उर्जा श्च।[१]

वैशेषिक दर्शनानुसारं “तरणिविश्वर्दर्शतो ज्योतिष्कुदस्ति सुर्यः विश्वमाभस्ति रोचनम्।” सायणचार्यानुसारं स्व टीका ग्रन्थे –

तथा च स्मर्यते योजनानं सहस्त्रं द्वे च योजने एकेन निमिषर्धम क्रममाणः ते च योजने ।

1 योजन -110 गजम्- 9.6025 माइल् 2202 योजनम् =211440705 माइल्

काल गृहीतः- ½निमिषः = 1/8.75 = 0.114286 क्षणः । एवं सुर्यप्रकाशस्य वेगः --- 1,85,016 माइल् / क्षणः

अत्र आधुनिक मुल्यम् – 1.86,000 माइल् /क्षणः

---

१. तस्माद् वा एतस्मादात्वान आकाशः सम्भुतः आकाशात् वायुः। वायोः अग्निः । अग्नेः आपः । अदभ्य पृथिवी.......... (तैत्तरीय उपनिषद् ब्रह्मानन्दवल्लिः अनुवाकः-1)

It is remembered that the sunlight travels 2202 yojanas in half (1/2) a Nimisha.

**उद्भिद्विद्यायाः (Botany) उपयोगिता–** संस्कृत शास्त्रे वृक्षाणां वर्गीकरणं(Classification) संश्लेष प्रक्रिया (Photo synthesis),वृक्ष आरोपण पद्धति(Grafting) इत्यादयो वर्णिता सन्ति। वृक्षार्युवेद ग्रन्थे वनस्पति-द्रुम-लता-गुल्म भेदेन वृक्षणां चर्तुविधः उल्लिखितं विद्यते । अपुष्पाः फलवन्तश्च ये ते वनस्पतय कथ्यते । सपुष्पाः फलवन्तश्च ये ते वनस्पतय कथ्यते । सपुष्पाः फलवन्तश्च द्रुमा कथ्यते । शाखादिरहिता वृक्षा या सा लतेति कथ्यते । सशखाः वहुस्तम्बाश्च गुल्मा इति कथ्यते ।

वृक्षायुर्वेदग्रन्थे वीजगणितं, वृक्षेभ्यः,अनिलानामुत्पत्तिः क्रमः,सम्यकणेषु फ्लास्मनामकं अंशस्य स्थितिः, उपवनविनोद ग्रन्थे वृक्षणां चिकित्सापद्धतिः चरकसंहितायाः सूर्यलोकेन वृक्षणां प्रतिक्रिया, महाभारतस्य शान्तिपर्वाणि वृक्षा दर्शन समर्था इति, गन्ध प्रति वृक्षाणां प्रतिक्रिया, इत्यादि वर्णनाः अनेन प्रमाणी भवति यदतेषां विषयाणां परीक्षणार्थ तदानीन्तने काले Microscope इति सुक्ष्मदर्शन यन्त्रमपि आसीन्।

**ध्वनिविज्ञाने विज्ञानस्य गुरुत्वम्** – परा-पश्यन्ती-मध्यमा-वैखरी भेदेन वाक् चतुर्विधा । प्रथमे स्थिता वाक् परा,नाभौ पश्यन्ति,हृदये मध्यमा, कण्ठे च वैखरीत्युच्यते । मूलचक्रं,नाभिः,हृदयं,कण्ठ,शिरः,मुख आदि वाणी क्रमशः स्थूलतां प्राप्य वर्णा अभिव्यक्त सहायकं भवति। सर्वेषणमपि विषयाणाम् उपस्थापने इच्छा आत्मनि जायते । ततपरम् आत्मा वुद्धा युङ्क्ते, ततश्च इष्टमर्थ प्रकाशितुम् मनो योजयति, मनश्च शरीरमनलं जायते । तदन्तरं प्राणवायौ प्रेरणा जायते । पश्चात् स एव प्राणवायु क्रमशः फुसफसयोः,कण्ठे,शिरसि,च स्वरादीन उत्पादयति। अतः पाणिनीयशिक्षयाः वर्णितः

आत्मा वुद्धा समोत्यार्थान्मनोयुङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।।

कण्ठे माध्यान्दिनयुगं मध्यमं त्रैष्टुभानुगम्  तारं तार्तीयसवनं शीषण्यं जगतानुगम्  ।।

अतएव वक्तु शक्यते वर्णत्पत्त्युच्चारणयोः एताः पद्धत्यो निश्चप्रचं वैज्ञानिक्य युक्तियुक्ता श्च ।

**अभियांन्त्रिक विषयः (Engineering)**

संस्कृतसाहित्ये अभियांन्त्रिकीविषये वाविधं ज्ञानं अस्ति। जले जाहजाः प्लवन्ति, भूमौ गछन्तः यानवाहानाश्च कथयन्ति। आकाशयानः अग्निना चलिता,तत् अन्तरीक्षयानं कथयन्ति। यथा-

जले नैकेव यानं स्याद् भूमियानं रथं स्मृतम् । आकाशे अग्नियानं च व्योमयानं तदेव  हि  ।। भृगु संहिता-2

मिश्रधातुः(Alloys) 16 प्रकाराः सन्ति ।त्रिधातु साहाय्येन विमानेन निर्मितं भवति । यथा- अथ नमानि । उष्मभर-उष्मपा-उष्महनो राजाम्लतृङ्गवीरहा पञ्चघ्नोऽग्नितृङ्गभारहनरशीतहनो । विषम्भर विशल्यकृत् विजमित्रो वातमित्रश्चेति ।( विमानशाश्त्रम्) ।

**विमानशास्त्रम् (Aeronautics)**

प्रारम्भिक संस्कृतग्रन्थे वायुयानशास्त्रं वायुयानप्रौद्योगिक्याः वर्तते । विमानशास्त्र ग्रन्थे –

आकाशपञ्चमे कक्षे विमानः सञ्चेद्यति । क्षत्रकोलहालज्वाला वेगात् भस्मीकृतं भवेत् ।। तस्मात् तत्परिहाराय रौद्रीदर्पणयन्त्रकम् ।।

उपसंहारः –

वैज्ञानिके खलु अस्मिन् युगे यथा वैज्ञानिक विषयणां महत्वं वर्तते तथा संस्कृतभाषायाः महत्वं नास्ति, परन्तु अनेकदृष्ट्या अस्याः भाषायाः महती उपयोगिता विद्यते । अस्माकं सम्पुर्ण संस्कृतसाहित्यं यं उपदिशति। तेन न केवलं भारतीयानाम् अपितु सम्पुर्णमानवतायाश्च हितं भवितुम् अर्हति । संस्कृत साहित्ये संम्पुर्ण निवद्धां संस्कृतिम् अनुस्मृत्यैव वस्तुनः विश्वकल्याणं सम्भवम् ।

*************

Volume XX : July to December – 2022, ISSN 2250-1711
Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]

# “नासतो विद्यते भावो...” इति गीतोक्तेरद्वैतविशिष्टाद्वैताचिन्त्यभेदाभेददिशा समीक्षणम्

प्रबन्धप्रणेता- **त्रिदिव-राय-मण्डलः**, पश्चिमबङ्गाल

**सारसंक्षेपः-**

संशयराक्षसनाशमहास्त्रस्वरूपिण्यां श्रवणमनननिदिध्यासनादिमोक्षसाधनसामग्रीप्रतिपादिन्यां सदसद्वस्तुविवेकबोधिन्यां स्रक्चन्दनवनितादिदृष्टस्वर्गाद्यदृष्टविषयभोगविरागोत्पादिन्यां जगत्सत्यत्वबुद्धिनाशिन्यामशेषानर्थरूपसंसारहेतुभूताविद्याग्रन्थिभेदिन्यामु- पनिषदभिन्नायां श्रीमद्भगवद्गीतायां भगवच्छ्रीकृष्णेन सदसत्स्वरूपमुपदिष्टम्। किन्तु सदसद्वस्तुस्वरूपविषये विवदमानेषु अनेकमतेषु सनातनसंस्कृतौ शङ्कररामानुजबलदेवविद्याभूषणाचार्योक्तमतानामत्यन्तं सुप्रसिद्धेः "नासतो विद्यते भावो..."[1] इत्यत्र तत्तदाचार्यप्रणीतभाष्याणा-मवलोकनपुरःसरं कस्य मतं ग्रहणयोग्यमयोग्यञ्च, योग्यत्वायोग्यत्वयोः युक्तयः सप्रमाणमत्र समीक्ष्यन्ते। सारसंक्षेपेऽस्मिन् समीक्षितस्थलेष्वेकं प्रदर्शयिष्यामः। "नासतो विद्यते भावो..."[2] इत्यत्रासतः शब्दस्य सकारणस्य शीतोष्णादेरित्यर्थः भगवच्छङ्करा-चार्यैरङ्गीकृतः। देहस्य इत्यर्थः रामानुजाचार्यैर्भणितः। अनात्मनः देहस्य चेत्यर्थः बलदेवविद्याभूषणाचार्यैर्गदितः। एवं विप्रतिपत्तौ कस्याचार्यस्य मतं ग्रहणयोग्यमित्येतद्विचारणीयम्। रामानुजाचार्यैः "भोक्ता भोग्यं प्रेरितारञ्च मत्वा..."[3] इति श्रुत्यनुसारं जीवेशप्रकृतिनां नित्यत्वाङ्गीकारात् एतन्मतेऽसच्छब्देन देहकथनं चिन्त्यम्। यतो हि सत एव नित्यत्वं युक्तियुक्तम्, न त्वसतः, नित्येषु च प्रकृतेरङ्गीकारात्, प्रकृतिदेहयोश्चाभिन्नत्वात्। अचिन्त्यभेदाभेदनयेऽपि जीवेशप्रकृतिकालानां नित्यत्वाङ्गीकारात् नित्यस्य च सदभिन्नत्वात्, देहस्य च प्रकृत्यभिन्नत्वात्प्रकृतेश्च सत्त्वात् असच्छब्देन देहकथनं युक्तियुक्तं न भाति। किन्तु भगवत्पादानां शङ्कराचार्याणां नये आत्मन एव नित्यत्वात्तद्भिन्नस्य चाशेषस्यासत्त्वात् असच्छब्देन शीतोष्णादिकथनं युक्तियुक्तं भाति। परमप्रमाणभूतासूपनिषत्स्वपि जीवाभिन्नस्य परमात्मनः नित्यत्वकथनात्तद्भिन्नस्य चाशेषस्य अनित्यत्वात् भगवच्छङ्करमतमत्र ग्रहणयोग्यं भाति। तथा च मानं "सत्यं ज्ञानमनन्तं ब्रह्म",[4] "अतोऽन्यदार्त्तम्"[5] चेत्यादि।

एवमस्माभिः शोधपत्रेऽस्मिन् सदसत्स्वरूपविषये शङ्कररामानुजबलदेवविद्याभूषणप्रणीतभाष्याणामालोचनपुरःसरं इतरेतरकृताः आक्षेपाः तत्तत्समाधानानि च गूढार्थदीपिकाभाष्यार्कप्रकाशतात्पर्यचन्द्रिकासारार्थवर्षिण्यादि-व्याख्यावलोकनेन प्रतिपाद्यन्ते इति शम्।

Keywords (**कुञ्चिशब्दाः**)- ब्रह्म, आत्मा, मोक्षः, सत्, असत्

**उपोद्घातः-**

सनातनधर्मप्रतिष्ठापनार्थमवतीर्णेष्वद्वैतवेदान्तदर्शनप्रतिष्ठापकेष्वनितरसाधारणप्रतिभाशालिषु ज्ञाननिर्धूतकल्मषेषु अन्यतमैः भगवद्भिः शङ्कराचार्यैः सप्रमाणं केवलाद्वैतविरोधि मतं सम्यक् छितम्। केवलाद्वैतराद्धान्ते आत्मैवेदं सर्वं, तदेव च सद्भूतं, तद्व्यतिरिक्तमन्यदशेषमसद्भूतम्। "सत्यं ज्ञानमनन्तं ब्रह्म"[6] "अतोऽन्यदार्त्तम्"[7] चेत्याद्याः श्रुतयोऽत्र प्रमाणम्। श्रीब्रह्मरुद्रसनकसम्प्रदायेषु विष्णूपासनाधिष्ठितमतेषु भागवतादिपुराणेषु च प्रसिद्धस्यास्य श्रीसम्प्रदायप्रवर्तितस्य विशिष्टाद्वैतदर्शनस्य प्रधानप्रतिष्ठापकैः रामानुजाचार्यैः "भोक्ता भोग्यं प्रेरितारञ्च मत्वा..."[8] इति श्रुत्यनुसारं चित्स्वरूपजीवस्य अचिद्रूपप्रकृतेः चिदचिद्विशिष्टब्रह्मणश्च सत्यत्वमङ्गीकृतम्। श्रीमद्भागवद्गीतोक्तं मतं मध्वाचार्यप्रणीतपूर्णप्रज्ञभाष्योक्तञ्च मतं स्वीयमतरूपेणाङ्गीकृत्य लोकशिक्षां प्रददतः श्रीचैतन्यमहाप्रभोरभिप्रायममुं प्रतिष्ठापयितुं बलदेवविद्याभूषणाचार्यैः प्रणीते गोविन्दभाष्ये प्रबोधितं तत्त्वमचिन्त्यभेदाभेदनाम्ना प्रख्यातम्। दर्शनेऽस्मिन् जीवेशप्रकृतिकालानां चतुर्णां सद्भूतत्वं भणितम्। अंशांशिनोः शक्तिशक्तिमतोश्चाभिन्नत्वात् ईशस्य तच्छक्तिस्वरूपजीवस्य चाभेदे सत्यपि जीवेशयोरणुमहत्परिमाणत्वनियम्यत्वनियन्तृत्वादिभेदवशात् वस्तुतस्तु तयोर्भेदोऽपि वर्तते। परब्रह्मणोऽचिन्त्यशक्तिप्रभावात् एतद्भेदा-भेदयोर्विद्यमानत्वात् अचिन्त्यभेदाभेददर्शनमिदम्।

जीवेशयोः भेदाभेदयोः नित्यत्वे च "यथा सुदीप्तात्पावकात्" [9] "न जीवः म्रियते" [10] "स अन्वेष्टव्यः स विजिज्ञासितव्यः"[11] चेत्याद्याः श्रुतयोऽत्र प्रमाणम्। एवमद्वैतविशिष्टाद्वैताचिन्त्यभेदाभेदर्शनेषु सदसद्वस्तुविषये विरुद्धानि मतानि प्राप्यन्ते। एतत्सदसद्वस्तुस्वरूपविषये भगवता श्रीकृष्णेन गद्यते "नासतो विद्यते भावो नाभावो विद्यते सतः। उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः॥"[12] इति।

## समीक्षणम्-

प्रायः सर्वेष्वास्तिकदर्शनेषु सद्वस्तुनोऽविनाश्यत्वमङ्गीकृतम्। "नाभावो विद्यते सतः"[13] इत्यत्र सच्छब्दस्यार्थः भगवत्पादैः शङ्कराचार्यैरात्मा भणितः। रामानुजाचार्यैरपि सच्छब्देनात्मा कथितः। बलदेवविद्याभूषणाचार्यैः सच्छब्दस्यार्थः जीवात्मा निगदितः। केवलाद्वैतसिद्धान्ते ब्रह्मण एव नित्यत्वात् सच्छब्देन केवलं परमात्मनः कथनं शाङ्कराद्वैते युक्तियुक्तम्। किन्तु विशिष्टाद्वैतवेदान्ते जीवेशप्रकृतितत्त्वानां नित्यत्वात् सच्छब्देन केवलमात्मनः कथनं चिन्त्यम्। नित्यस्य अविनाशित्वात् सतश्च नित्यत्वात् सच्छब्देन विशिष्टाद्वैतराद्धान्ते जीवेशप्रकृतितत्त्वानां ग्रहणं युक्तियुक्तमासीत्। मायिनः महेश्वरस्य नित्यत्वान्मायाया अपि नित्यत्वमङ्गीकृतम्। एवं जीवप्रकृतयोः नित्यत्वे "न जीवः म्रियते"[14] "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"[15] चेत्याद्याः श्रुतयोऽत्र प्रमाणभूताः। किन्तु रामानुजाचार्यैरुक्तं यत् "सतश्च आत्मनो न असद्भावः" इति। तस्माद्रामानुजमतमत्र विचारणीयम्। पुनश्च बलदेवविद्याभूषणाचार्यैः सच्छब्देन विहितं जीवात्मग्रहणमपि आलोच्यम्। यतो हि अचिन्त्यभेदाभेददर्शनराद्धान्ते जीवेशप्रकृतिकालानां नित्यत्वात् नित्यस्य च सदभिन्नत्वात् सच्छब्देन चतुर्णामपि ग्रहणं युक्तियुक्तं भाति। सच्छब्देन यदि केवलं जीवात्मनः ग्रहणं भवेत्तर्हि भगवता श्रीकृष्णेन उक्तस्य सच्छब्दस्यार्थसङ्कोचः स्यात्। अन्यथा जीवात्मनं विहाय असच्छब्देन ईशप्रकृतिकालानां ग्रहणं बलदेवविद्याभूषणाचार्यैः कार्य्यमासीत्, किन्तु न तथा कृतम्। तस्माद्बलदेवविद्याभूषणाचार्योक्तं मतं चिन्त्यम्। एवञ्च रामानुजाचार्यैः जीवेशप्रकृतिनां पृथक्तया नित्यत्वं प्रतिपादयितुं या श्रुतिरुदाहृता सा श्रुतिः वस्तुतस्तु परस्परं ब्रह्माभिन्नत्वं प्रतिपादयति। सम्पूर्णा श्रुतिस्तावत् "भोक्ता भोग्यं प्रेरितारञ्च मत्वा त्रिविधं ब्रह्म मे मतम्"[16] इति। अस्यां श्रुतौ साक्षादेव त्रयाणां ब्रह्मत्वं प्रदर्शितम्।

पुनश्च रामानुजाचार्यैः 'असत' इति शब्दस्य देहस्य इत्यर्थः गदितः। अचित्स्वरूपजगतः सत्यत्वाङ्गीकारात् सत आत्मन उत्पन्नं जगदिदं सदेवेति विशिष्टाद्वैतिनः मन्यन्ते। अतस्तन्मते देहः सदेवेति अङ्गीकर्तव्यत्वात् रामानुजाचार्यैः असच्छब्दस्य विहितदेहार्थवर्णनं न युक्तियुक्तमिति भाष्यार्कप्रकाशकारस्य मतम्। भाष्यार्कप्रकाशकारेणोच्यते "सत ईश्वरादुत्पन्नमिदं कार्यं जगत् सदेवेति सत्कार्यवादिनः स्वस्य 'असतः देहस्य' इत्यर्थवर्णनं स्वमतप्रच्युतिरूपदोषावहम्, परमतप्रवेशरूपदोषावहं च"[17] इति। किन्तु अत्रास्मिन् श्लोके सदसच्छब्दः चिदचिद्बोधक इति तात्पर्यचन्द्रिकाकारेण तत्समाधानं प्रदत्तम्। तात्पर्यचन्द्रिकायां वेदान्तदेशिकाचार्यवेङ्कटनाथेन कथ्यते "अचिद्वस्तुनः चेतनस्य इति पदाभ्यां सत्त्वासत्त्वयोः स्वभावत्वे हेतुः, चिदचिद्विषयतया सदसच्छब्दयोः प्रयोगश्च सूचितः"[18] इति। यदि असच्छब्देन अचिद्वस्तु उच्येत तर्हि सच्छब्देन चिद्रूपः जीवः वक्तव्यः। किन्तु रामानुजाचार्यैः सच्छब्देन आत्मा भण्यते इत्यतो वेदान्तदेशिकाचार्यवेङ्कटनाथकृतव्याख्यानं समीचीनं न वेति विचारणीयम्।

कृत्स्नविकारपदार्थः कारणेन विना नोपलभ्यते। यथा विकारः घटः कारणं मृद्व्यतिरेकेण नोपलभ्यते इत्यतः विकारमात्रमसदेवेति भगवच्छङ्कराचार्यस्य मतम्। अधुना तदुपरि नैयायिका आक्षिपन्ति यत् घटं प्रति मृत्कारणम्, मृत्प्रति द्व्यणुकं कारणम्, द्व्यणुकं प्रति परमाणुः कारणम्, तस्यापि परमाणोः कारणन्तु नोपलभ्यतेऽतः परमाणोः कारणव्यतिरेकेण अनुपलब्धेः सर्वाभावप्रसङ्गः खल्विति चेन्न, सर्वत्र सदसद्बुद्ध्योरुपलभ्यमानत्वात्। सतश्च परमात्मनोऽभावः कुत्रापि नोपलभ्यते, सतः परमात्मनः सर्वत्र विराजमानत्वात्, कारणाच्च ब्रह्मणः कार्यस्य जगतोऽनन्यत्वात्। "सर्वं खल्विदं ब्रह्म"[19], "पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण"[20] चेत्याद्याः श्रुतयोऽत्र मानम्। श्लोकस्थस्य 'सतः' शब्दस्य आत्मन इत्यर्थग्रहणं भगवच्छङ्कररामानुजबलदेविद्याभूषणाचार्यमतेषु समानम्।

किन्तु रामानुजमते चितोऽचितः चिदचिद्विशिष्टब्रह्मणश्च सत्यत्वात् 'सत' इति पदेन केवलं परमात्मनः ग्रहणं युक्तियुक्तं न भाति। रामानुजा चार्यैरुक्तं "उभयोः देहात्मनोरुपलभ्यमानयोः यथोपलब्धि तत्त्वदर्शिभिरन्तो दृष्टः"[21] इति। अत्र देहस्यापि उपलब्धिर्भवतीत्युक्तम्। किन्तु असतः देहस्य सद्भावः कुत्रापि न विद्यते इत्युक्त्वा देहस्योपलब्धिर्भवतीति कथनं न सङ्गच्छते, भावरूपवस्तुनऽवश्यमुपलभ्यमानत्वादिति मदीयं चिन्तनम्। असतः स्वरूपमसदेव, सतश्च स्वरूपं सदेव भवतीति तत्त्वदर्शिभिः दृष्टम्। असतः विनाशस्वभावत्वे सतश्चाविनाशस्वभावत्वे रामानुजाचार्यैः 'सद्भाव एवं भवतो मयोक्तो ज्ञानं यथा सत्यमसत्यम् अन्यत्'[22] इति वचनमुद्धृतम्। किन्तु तद्वचनमालोचयामश्चेत् तन्मते दोष एव आपतति। यतो ह्यत्र ज्ञानस्यैव सत्यत्ववचनात्, तद्भिन्नस्य च सर्वस्य असत्वकथनादचितः जगतः सत्यत्वसिद्धान्तव्याघातः।

असद्वस्तु असदेव, सद्वस्तु सदेवेति तत्त्वदर्शिभिरन्तोऽर्थान्निर्णयः दृष्टः। रामानुजाचार्यैः तत्त्वदर्शिभिरिति शब्दस्य व्याख्यानं न विहितम्। केवलं 'यथोपलब्धितत्त्वदर्शिभिः' इत्युक्तम्। रामानुजमते प्रकृतिपुरुषेश्वराणां त्रयाणां सत्यत्वात् तत्त्वं नाम प्रकृतिपुरुषेश्वरत्रितयम्। रामानुजभाष्यस्य व्याख्यानावसरे वेदान्तदेशिकाचार्यवेङ्कटनाथेन तात्पर्यचन्द्रिकायामुक्तं "एतेन तद्ब्रह्म, तद्भावस्तत्त्वमिति शङ्करोक्तमपहसितम्"[23] इति। भगवच्छङ्करमते तु तन्नाम ब्रह्म। तस्यैव ब्रह्मणः भावः तद्भावस्तत्त्वमर्थात् तत्त्वदर्शिनः नाम ब्रह्मयाथात्म्यस्वरूपदर्शिनः। भगवच्छाङ्करभाष्ये उच्यते "तत् इति सर्वनाम। सर्वं च ब्रह्म तस्य नाम तत् इति तद्भावस्तत्त्वं ब्रह्मणो याथात्म्यं तत् द्रष्टुं शीलं येषां ते तत्त्वदर्शिनः तैः तत्त्वदर्शिभिः"[24] इति। ननु किं तावद्ब्रह्मणो याथात्म्यमिति चेदुच्यते सत्यज्ञानानन्दस्वरूपमिति ब्रूमः। निर्गुणे ब्रह्मणि कथं सत्यज्ञानानन्दादयः धर्माः सम्भवन्तीति चेदुच्यते तेऽपृथग्भूतधर्माः पृथगिवावभासन्ते। अत एव पद्मपादाचार्येण पञ्चपादिकायामुच्यते "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः। अपृथकत्वेऽपि पृथगिव अवभासन्ते॥"[25] इति। 'ब्रह्मव्यतिरिक्तोऽशेषोऽयं प्रपञ्चः मिथ्याभूतः, अध्यस्तत्वात्, ब्रह्मैवैकमेवाद्वितीयं सत्' इति आत्मज्ञानिभिरुपलब्धः निर्णय इति भगवच्छङ्कराचार्योक्तमतार्थः। अध्यस्तस्य सर्वस्य मिथ्यात्वात् यदा अनात्मनि आत्मनोऽध्यासः तदा आत्मनः मिथ्यात्वमापततीत्यतः स्वमते दोष इत्याक्षेपः न विधेयः। कारणं हि "सत्यं ज्ञानमनन्तं ब्रह्म"[26], "आनन्दाद्ध्येव खल्विमानि भूतानि जायन्ते"[27], "तस्य भासा सर्वमिदं विभाति"[28] चेत्यादिषु निगदितनित्यशुद्धबुद्धमुक्तसत्यस्वभावत्वेन प्रतिपन्नात्मनोऽनात्मनि अध्यासः न भवति, अपि तु देहादिषु अहत्वाद्यभिमानत्वेन ज्ञातस्यैव अध्यास इति भगवच्छङ्करमतम्।

ननु कस्तावत् अध्यास इति चेत् अतस्मिन् तद्बुद्धिरिति कथयामः। अर्थात् यद्वस्तु यथा नास्ति तत्र तादृशस्य वस्तुन आरोपोऽध्यासः। यद्यपि रज्जुः न सर्पः तथापि असर्पभूतायां रज्जौ अरज्जुभूतस्य सर्पस्य आरोपोऽध्यासः। भगवत्पादैः शङ्कराचार्यैः ब्रह्मसूत्रभाष्यरचनादौ अध्यासलक्षणं भणितम्। यतो हि अध्यासे असिद्धे सति भिन्नरूपेण प्रतीयमानानां समेषां वस्तूनां पृथक्पृथक्तया सत्यत्वात् द्वैतापत्तिरद्वैतहानिश्च भवेत्। तस्मात् सिद्धे अध्यासे यथा रज्जोरेव सत्यत्वम् आरोपितस्य च सर्पस्य मिथ्यात्वं तथैव ब्रह्मण एव सत्यत्वं ब्रह्मणि च आरोपितस्य जगतः मिथ्यात्वम्। तथा च मिथ्यात्वं नाम स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम्। अत्र स्वं नाम जगत्। जगतोऽधिष्ठानम् अर्थात् आश्रयभूतं ब्रह्म। तस्मिन् ब्रह्मणि जगतोऽत्यन्ताभावो विद्यते। अत्यन्ताभावस्य प्रतियोगि जगत्। एवं जगति स्वाश्रयनिष्ठात्यन्ताभावप्रतियोगित्वम् आपतितम्। तदर्थमेव जगत् मिथ्येति कथ्यते। भगवत्पादैः शङ्कराचार्यैः अध्यासभाष्ये अध्यासलक्षणमुक्तं "स्मृतिरूपः परत्र पूर्वदृष्टावभासः"[29] इति। स्मृतिरूपं पदं स्मर्यमाणवस्तुसादृश्यप्रतिपादकम्। यद्यपि स्मृतौ प्रत्यभिज्ञायां च उभयत्र संस्कारजन्यत्वम् अस्ति तथापि स्मृतौ असन्निहितविषयत्वं तिष्ठति। प्रत्यभिज्ञायां तु सन्निहितविषयत्वं तिष्ठति। तस्मात् स्मृतिरूपपदेन प्रत्यभिज्ञायाम् अतिव्याप्तिः निवार्यते। लक्षणोक्तं परत्रेति पदम् अधिष्ठानस्य सत्यत्वं ज्ञापयति। अर्थात् अधिष्ठानं विना आरोपोऽशक्य इति परत्रेति पदेन ज्ञाप्यते। पूर्वदृष्टपदं पूर्वदृष्टसजातीयवस्तुपरकम्। अर्थात् पूर्वं दृष्टं यद्वस्तु तस्य वस्तुनः सजातीयं यत्किञ्चित् वस्तु अत्र आरोप्यते। एतेन पूर्वदृष्टपदेन नैयायिकानां निवृत्तिरभवत्। अन्यथाख्यातिवादिनां नैयायिकानां नये 'अयं सर्पः' इत्यत्र

अयमंशः विशेष्यः, सर्पांशः विशेषणभूतः। अयमित्यत्र समवायेन सर्पत्वं भासते तादात्म्येन वा सर्पः भासते इति नैयायिकाः वदन्ति। अपि च तत्र पूर्वं दृष्टः यः सर्पः तस्य एव सर्पस्य भासो भवति इति एते नैयायिकाः कथयन्ति। किन्तु वेदान्तिनः तन्नाङ्गीकुर्वन्ति। पूर्वं दृष्टः यः सर्पः तस्य सर्पस्य सजातीयं यत्किञ्चित् अत्र अध्यस्यते। तस्मात् पूर्वदृष्टपदार्थेन पूर्वदृष्टसजातीययत्किञ्चिद्वस्तुना नैयायिकाः खण्डिताः भवन्ति। अव-उपसर्गपूर्वकं भास्-धातोरर्थस्तावत् अवसन्नः भासोऽर्थात् उच्छेदात्मकः भासः। बाधकज्ञानोदयात् परं पुनः भ्रमवृत्त्यनुत्पत्तिरेव उच्छेदः। विवरणाचार्याणां नये अध्यासस्य स्वरूपलक्षणं तावत् परत्र परावभास इति। पुनश्च तन्मते तटस्थलक्षणं तावत् स्मृतिरूपः परत्र परावभास इति। स्वरूपान्तर्गतत्वे सति यद्व्यावर्तकं तत्स्वरूपलक्षणम्। यावल्लक्ष्यकालमनवस्थायित्वे सति यद्व्यावर्तकं तत् तटस्थलक्षणम्। अर्थात् यल्लक्षणं लक्ष्ये क्वचित् विद्यमानं सत् अलक्ष्येभ्यः लक्ष्यं व्यावर्तयति तत् तटस्थम्। यथा- 'शाखाग्रे चन्द्रमाः' इति चन्द्रस्य तटस्थलक्षणम्। अत्र माता सायमेव शिशुं प्रति चन्द्रं दर्शयति। तस्मात् एतल्लक्षणं सन्ध्याकाले एव सङ्गच्छते, न तु अन्यस्मिन् काले। एवमेव 'स्मृतिरूपः परत्र पूर्वदृष्टावभासः' इति पूर्वमुक्तं लक्षणमिदं प्रातिभासिकाध्यासे एव सङ्गच्छते, न तु अनाद्यध्यासादौ। लक्षणोक्तेन स्मृतिरूपपदेन कारणत्रितयं सूच्यते। दोषः संस्कारः सम्प्रयोगश्चेति त्रीणि कारणानि। कालव्यवधानामनोयोगादयः स्मृतौ दोषाः सन्ति। संस्कारः पूर्वज्ञानजन्यः। सम्प्रयोगो नाम इन्द्रियसन्निकर्षः। एतत्कारणत्रितयजन्यत्वघटितं लक्षणं शुक्तिरजतादिसाद्यध्यासे एव सङ्गच्छते। एतानि कालव्यवधानादीनि अध्यासस्य निमित्तकारणानि। अध्यासं प्रति उपादानकारणं तु अज्ञानम्। यत्कारणं कार्योत्पत्तेः पूर्वं परं च तिष्ठति तत्कारणम् उपादानम् इत्युच्यते। यथा घटोत्पत्तेः पूर्वं मृत्तिका विद्यमाना आसीत्। परञ्च घटरूपकार्ये विद्यमाना तिष्ठति। तस्मात् मृत्तिका घटस्य उपादानकारणम्। एवमेव अध्यासस्य उपादानकारणम् अज्ञानम्। रज्जुसर्पाध्यासे कारणं रज्ज्वज्ञानम्। सर्पोत्पत्तेः परमपि सर्पोऽज्ञानात्मकः तिष्ठति। रज्ज्वज्ञानं सर्पज्ञानं च रज्जुज्ञानेन बाधितं भवति। रज्ज्वज्ञाने सति रज्जौ सर्पाध्यासः शक्यः। अर्थात् रज्ज्वज्ञाने सति शक्यः सर्पाध्यास इति अन्वयः। असति रज्ज्वज्ञाने अशक्यः सर्पाध्यास इति व्यतिरेकः। अर्थात् मिथ्याज्ञानम् अध्यासं प्रति उपादानकारणम्। यत्र यत्र मिथ्याज्ञानं तत्र तत्र अध्यास इति व्याप्तिः। व्याप्तिः नाम अशेषसाधनाश्रयाश्रितसाध्यसामानाधिकरण्यरूपिणी। यथा- 'शुक्तौ रजताध्यासः, मिथ्याज्ञाननिमित्तत्वात्, रज्जुसर्पाध्यासवत्' इति। अत्र अशेषसाधनविशेषं मिथ्याज्ञानम्, तदाश्रयं यत्किञ्चिदधिकरणम्, तदाश्रयाश्रितसाध्योऽध्यासः, तत्सामानाधिकरण्यं मिथ्याज्ञाने वर्तते इति लक्षणसमन्वयः। अस्य अध्यासस्य फलं तावत् लोकव्यवहारः। अस्य अध्यासस्य बहवः भेदाः सन्ति। ते च भेदाः यथा- धर्म्यध्यासः धर्माध्यासः ज्ञानाध्यासोऽर्थाध्यासः सोपाधिकाध्यासः निरुपाधिकाध्यास आहार्याध्यासोऽनाहार्याध्यासः साद्यध्यासोऽनाद्यध्यासः चेति। धर्म्यध्यासस्य अपरं नाम तादात्म्याध्यासः। आत्मनि अनात्मन आरोपः तादात्म्याध्यासः। यथा- 'अहं देही' इत्यत्र आत्मनि अनात्मनः देहस्य आरोपः क्रियते। अनात्मनि आत्मन आरोपः धर्माध्यासः। अस्य अध्यासस्य अपरं नाम संसर्गाध्यासः। यथा- 'मम शरीरम्' इति। यद्यपि "अशब्दमस्पर्शमरूपमव्ययम्"[30] इत्यादिषु श्रुतिषु आत्मनः नीरूपत्वं श्रूयते तथापि आनन्दनित्यत्वादयः धर्माः परमात्मनः सन्ति। एतदेव स्पष्टतया पद्मपादाचार्यैः पञ्चपादिकायामुक्तम्। यद्यपि शुक्तिरजताद्यध्यासे सादृश्यम् अपेक्षते तथापि आत्मानात्मनोऽध्यासे सादृश्यं नापेक्षते। एतदत्र ध्येयं यत् साद्यध्यासे सादृश्यम् अनिवार्य्यम्। किन्तु आविद्यकाध्यासे तन्नापेक्षते। यद्यपि अनात्मनि आत्मनोऽध्यासे आरोपितस्य मिथ्यात्वनियमात् आत्मनोऽपि मिथ्यात्वप्रसङ्गः स्यात् तथापि अनात्मनि आत्मनोऽध्यासे आत्मनः स्वरूपत्वात् सत्यत्वात् शून्यवादप्रसङ्गाभावः। अत्र तु शरीरेन्द्रियाद्यवच्छिन्नत्वेन तत्परिच्छिन्नस्य आत्मनोऽवभास इति ज्ञेयम्।

विषये विषयान्तरस्य आरोपोऽर्थाध्यासः। यथा- रज्जौ सर्पः। रज्जुरूपविषये तद्भिन्नविषयस्य सर्पस्य आरोपः भवति। विषये ज्ञानान्तरस्य आरोपः ज्ञानाध्यासः। यथा- शुक्तिकारूपविषये तद्भिन्नविषयरजतज्ञानस्य आरोपः क्रियते।

उपाधिसहितः भ्रमः सोपाधिकोऽध्यासः। यथा- लोहितः स्फटिक इति। अत्र तु जवाकुसुमम् उपाधि। वस्तुतस्तु स्फटिकः रक्तवर्णः नास्ति तथापि तत्र जवाकुसुमस्थलोहितवर्णस्य स्फटिके आरोपः क्रियते। अस्मिन् सोपाधिकाध्यासे यथार्थज्ञाने उदिते सत्यपि मिथ्याज्ञानं सम्पूर्णतया दूरीभूतो न भवति। निरुपाधिकाध्यासे उदिते यथार्थज्ञाने भ्रमः सम्पूर्णतया दूरीभूतो वर्तते। यथा- रज्जौ सर्प इति। शास्त्रेण प्रेरितो भूत्वा अन्यस्मिन् तदन्यस्य वस्तुन आरोप आहार्याध्यासः। यथा- ओङ्कारे ब्रह्मबुद्धिः। तथा च शास्त्राणि "ओमित्येव ध्यायथाऽऽत्मानम्"[31], "ओमित्येतत्"[32] चेत्यादीनि। अत्र आहार्य्यं नाम बाधनिश्चयसत्त्वेऽपि इच्छया तथाज्ञानम्। अर्थात् अहं जानामि यत् शालग्रामः न विष्णुः तथापि शास्त्रेणोक्तत्वात् शालग्रामे विष्णुबुद्धिरारोपिता। आहार्यभिन्नम् अनाहार्यम्। यथा- शुक्तौ रजतमिदम् इति। साद्यनादिभेदेनापि अध्यासस्य द्वौ भागौ स्तः। सादिस्तावत् रज्जौ सर्प इति। अनादिस्तावत् ब्रह्मणि जगदिति। भगवत्पादैः शङ्कराचार्यैः अध्यासभाष्ये अध्यासस्य अनन्तत्वम् उक्तम्। तस्य तात्पर्यं यत् ज्ञानेन विना अशक्योऽध्यासनाश इति। केचन अध्यासाध्यारोपयोरभेदं मन्यन्ते। किन्तु तन्न साधु। ज्ञानपूर्वकमारोपोऽध्यारोपः। यथा- सिंहोऽयं माणवकः। माणवकस्य सिंहत्वासम्भवे ज्ञाते अपि सिंहस्थक्रोधादिसादृश्यवशात् मनुष्ये सिंहस्य आरोपः क्रियते। अज्ञानपूर्वकम् आरोपोऽध्यासः। एतच्च 'रज्जौ सर्पः','शुक्तौ रजतमिदम्' इत्यादिषु स्पष्टमेव। वस्तुतस्तु अद्वैतवेदान्तिनां पारमार्थिकसिद्धान्तस्तावत् ब्रह्मणि एव सर्वमिदम् अध्यस्तम्। अधुना संशयस्तावत् 'रज्जौ सर्पः','शुक्तौ रजतमिदम्' चेत्यादिषु कथं रज्जौ शुक्त्यादौ च सर्पादेरध्यासः। तदोच्यते यत् सर्पस्य बाह्यमधिष्ठानं रज्जुः। यदा रज्जुविषयकचित्तवृत्तिरुदिता भवति तदा रज्जुज्ञानं सम्भवति। अर्थात् तदा सर्पविषयकम् अज्ञानं नश्यति। किन्तु सत्त्ववृत्तिः जडा भवति, तस्याः वृत्तेरविद्यां नाशयितुं सामर्थ्यं नास्ति। तस्मादेव सा सत्त्ववृत्तिः रज्ज्ववच्छिन्नचैतन्यविषयिणी निगद्यते। अविद्या च रज्जौ नास्ति, अपि तु रज्ज्ववच्छिन्ने चैतन्ये विद्यते। रज्ज्ववच्छिन्नचैतन्यविषयिणी चित्तवृत्तिः यदा उदेति तदा सर्पज्ञानं बाधितं भवति। रज्ज्ववच्छिन्ने चैतन्ये विराजमानं यदज्ञानं तेन अज्ञानेन रज्ज्ववच्छिन्नं चैतन्यं सर्पाकारेण विवर्तितम्। एवं ब्रह्म जगदाकारेण विवर्तितम्, न तु परिणतम्। दधिदुग्धयोः समानसत्ताकत्वात् तयोः परिणामः शक्योऽर्थात् दधि दुग्धस्य परिणामरूपमिति वक्तुं शक्यम्। किन्तु जगद्ब्रह्मणोः परस्परं भिन्नसत्ताकत्वात् तयोः विवर्तभावः। अर्थात् ब्रह्मणः विवर्तरूपमिदं जगत्। केवलाद्वैतवेदान्ते ब्रह्मण एव पारमार्थिकी सत्ता अङ्गीक्रियते, नान्यस्य कस्यचित्। एवम् अध्यस्तत्वात् अशेषविषयाणां च मिथ्यात्वनिश्चयात् अन्तरारामस्य योगिनः सकाशे बाह्यविषयेभ्यः सुखोत्पत्तिरसम्भवा। एतादृशः योगी समाहितः सन् ब्रह्मानन्दम् अनुभवति। अत्र "ब्रह्मैव सन्..."[33] इति श्रुतिः मानम्। एते योगिनः सूक्ष्मतत्त्वदर्शिनः भवन्ति। एते सम्यग्दर्शिनः कथम् अभवन् इति चेदुच्यते यत् प्रथमं तावत् शास्त्रविहितकर्मणा अतिथिसेवायज्ञादिना पूर्वार्जितस्य पापस्य क्षयं कुर्युः। तच्च कर्म निरासक्ताः सन्तः निष्कामबुद्ध्या कुर्युः। निष्कामबुद्ध्या कृतेन कर्मणा चित्तशुद्धिः सम्पाद्यते। सत्त्वशुद्ध्या सूक्ष्मवस्तुदर्शनसक्षमाः भवन्ति। एवंरूपेण द्वैतावज्ञा सुस्थिता अद्वैतधीश्च निश्चिता तिष्ठति। येषां सम्पूर्णतया द्वैतबुद्धिः दूरीभूता अद्वैतधीः च निश्चिता ते छिन्नसंशयाः कृपालवोऽशेषभूतकल्याणे रताः परमानन्दञ्च अनुभवन्ति। एवम् अद्वैतधीसम्पन्नानां कामक्रोधलोभमोहाद्यशषमलानि अपगतानि। एतादृशाः कामक्रोधादिमलवियुक्ताः संयतान्तःकरणाः साक्षात्कृतमाधवाः भवन्ति। एते सम्यग्दर्शननिष्ठाः साक्षात्कृतमाधवाः देहत्यागात् पूर्वं परञ्च ब्रह्मण्येव वर्तमानाः परममानन्दम् अनुभवन्ति। प्रसङ्गेऽस्मिन् भगवत्पादैः शङ्कराचार्यैः निगदितं "सम्यग्दर्शननिष्ठसन्न्यासिनां सद्योमुक्तिरुक्ता"[34] इति। सद्योमुक्तिस्तावत् अशेषोपाधिविनिर्मुक्तनिर्गुणपरमात्मानुशीलनवताम् अपरोक्ष- ब्रह्मज्ञानोदयसमकाले सच्चिदानन्दस्वरूपब्रह्मात्मना अवस्थितिः सद्योमुक्तिः। विचार्यमाणे सति सद्योमुक्तौ एव जीवन्मुक्तेः विदेहमुक्तेश्च अन्तर्भावः। अहं सत्यज्ञानानन्दस्वरूपम् अद्वितीयं ब्रह्म अस्मीत्येवं सद्योमुक्तपुरुषोऽनुभवति। एतादृशस्य जीवतः सद्योमुक्तपुरुषस्य अनित्यदेहेन्द्रियादिषु अभिमानाभावात् स्वदृष्ट्या विदेहः स पुरुषः। अस्य सद्योमुक्तपुरुषस्य सकाशे शास्त्रादिकम् अर्थवादमात्रम्। वस्तुतस्तु अविद्यावतां कृते प्रारब्धकर्मावशेषम् अङ्गीकृत्य जीवन्मुक्तिः निगदिता। सद्योमुक्तपुरषस्य देहाविनाशात् स एव सद्योमुक्तः जीवन्मुक्तः पुरुषः।

एतच्च "समाधातुं बाह्यदृष्ट्या..."[35] इत्यादौ भगवत्पादैः शङ्कराचार्यैः स्पष्टमुक्तम्।

**उपसंहारः-**

एवमस्माभिः शोधपत्रेऽस्मिन् श्रीमद्भगवद्गीतोक्तसाङ्ख्ययोगाध्यायस्थायाः सदसत्स्वरूपविषयिण्याः गीतोक्तेरुपरि प्रणीतानाम् अद्वैतविशिष्टाद्वैताचिन्त्यभेदाभेदभाष्याणामालोचनपुरःसरम् इतरेतरकृता आक्षेपाः तत्तत्समाधानानि च भगवच्छङ्कररामानुजबलदेव-विद्याभूषणोक्तमतसमर्थनपरकगूढार्थदीपिका-नीलकण्ठ्यानन्दगिरिकृतव्याख्यानुभूतिकृतटिप्पनीभाष्यार्कप्रकाशतात्पर्यचन्द्रिकासारार्थ-वर्षिण्यादिव्याख्यापर्यावलोकनेन प्रतिपादितानि इति शम्।

## पादटिप्पणी

1. श्रीमद्भगवद्गीता- २/१६ । 2. श्रीमद्भगवद्गीता- २/१६ । 3. श्वेताश्वतरोपनिषत्- १/१२ । 4. तैत्तिरीयोपनिषत्- २/१/१ ।
5. बृहदारण्यकोपनिषत्- ३/७/२३ । 6. तैत्तिरीयोपनिषत्- २/१/१ । 7. बृहदारण्यकोपनिषत्- ३/७/२३ । 8. श्वेताश्वतरोपनिषत्- १/१२ ।
9. मुण्डकोपनिषत्- २/१/१ । 10. छान्दोग्योपनिषत्- ६/११/३ । 11. छान्दोग्योपनिषत्- ८/७/१ । 12. श्रीमद्भगवद्गीता- २/१६
13. श्रीमद्भगवद्गीता- २/१६ । 14. छान्दोग्योपनिषत्- ६/११/३ । 15. श्वेतश्वतरोपनिषत्- ४/१० । 16. श्वेताश्वतरोपनिषत्- १/१२ ।
17. श्रीमद्भगवच्छङ्कराचार्यविरचितं श्रीमद्भगवद्गीताभाष्यम्, पृष्ठाङ्कः- ६२ । 18. श्रीमद्भगवद्गीता(शाङ्करभाष्याद्येकादशटीकोपेता), पृष्ठाङ्कः- १०४
19. छान्दोग्योपनिषत्- ३/१४/१।20. मुण्डकोपनिषत्- २/२/१२।21. श्रीमद्भगवद्गीता(श्रीरामानुजभाष्य-हिन्दी-अनुवादसहिता), पष्ठाङ्कः ३१
22. विष्णुपुराणम्- २/१२/४५ । 23. श्रीमद्भगवद्गीता(शाङ्करभाष्याद्येकादशटीकोपेता), पृष्ठाङ्कः- १०४ । 24. श्रीमद्भगवच्छङ्कराचार्यविरचितं श्रीमद्भगवद्गीताभाष्यम्, पृष्ठाङ्कः- ६० । 25. पञ्चपादिका, पृष्ठाङ्कः- ९ । 26. तैत्तिरीयोपनिषत्- २/१/१ । 27. तैत्तिरीयोपनिषत्- ३/६/१ ।
28. तैत्तिरीयोपनिषत्- २/२/११ 29. वेदान्तदर्शनम्, स्वामी-विश्वरूपानन्दः(अनुवादकः व्याख्याता च), पृष्ठाङ्कः- २९ । 30. कठोपनिषत्- १/३/१५ । 31. मुण्डकोपनिषत्- २/२/६ । 32. कठोपनिषत्- १/२/१५ । 33. बृहदारण्यकोपनिषत्- ४/४/६ । 34. वेदान्तदर्शनम्, स्वामी-विश्वरूपानन्दः(अनुवादकः व्याख्याता च), पृष्ठाङ्कः- ४४४ । 35. अपरोक्षानुभूतिः- ९७

## अवलोकितग्रन्थसूची

1. तैत्तिरीयोपनिषत् (बङ्गपुस्तकम्). शाङ्करभाष्यसमेता. सम्पादकः अनुवादकश्च- महामहोपाध्यायः दूर्गाचरणसांख्यवेदान्ततीर्थः. कलिकाता : देव-साहित्य-कूटीर-प्राइभेट-लिमिटेड, २००८

2. छान्दोग्योपनिषत् (बङ्गपुस्तकम्). शाङ्करभाष्यसमेता. सम्पादकः अनुवादकश्च- महामहोपाध्यायः दूर्गाचरणसांख्यवेदान्ततीर्थः. कलिकाता : देव-साहित्य-कूटीर-प्राइभेट-लिमिटेड, २००२

3. ईशादि नौ उपनिषत्. शाङ्करभाष्यसमेता. गोरखपुर : गीताप्रेस (प्रकाशक एवं मुद्रक), सं.-२०६८

4. बृहदारण्यकोपनिषत्. शाङ्करभाष्यसमेता. गोरखपुर : गीताप्रेस (प्रकाशक एवं मुद्रक), सं.-२०७०

5. कठोपनिषत् (बङ्गपुस्तकम्). अनुवादकः व्याख्याकारश्च- स्वामी भूतेशानन्दः. कलिकाता : उद्बोधन-कार्यालयः. २००९

6. श्रीमद्भगवद्गीता (बङ्गपुस्तकम्). अनुवादकः व्याख्याकारश्च- स्वामी वासुदेवानन्द. कलिकाता : उद्बोधन-कार्यालयः, २०१४

7. श्रीमद्भगवच्छङ्कराचार्यविरचितं श्रीमद्भगवद्गीताभाष्यम्. श्रीमदनुभूतिस्वरूपाचार्यविरचितः श्रीमदानन्दगिरिस्वामिविरचितः श्रीबेल्लङ्कोण्ड-रामरायकविविरचितश्च प्रथमः द्वितीयश्च खण्डः. संशोधकः- मीमांसा-वेदान्ताचार्य-श्रीमणिद्राविडः. वाराणसी : श्रीदक्षिणामूर्तिमठप्रकाशनम्, २०१५

8. श्रीमद्भगवद्गीता. श्रीरामानुजभाष्य-हिन्दी-अनुवादसहिता. अनुवादक- श्रीहरिकृष्णदासगोयेन्दका. गोरखपुर : गीताप्रेस (प्रकाशक एवं मुद्रक), सं.- २०६४

9. मुण्डकोपनिषत्. सम्पादकः- ब्रह्मचारिमेधाचैतन्यः. दण्डिस्वामी-दामोदर-आश्रमः, २००८

10. श्वेताश्वतरोपनिषत्. व्याख्याकारः अनुवादकश्च- स्वामी विश्वरूपानन्दसरस्वती. मुम्बई : सत्साहित्य-प्रकाशन-ट्रस्ट, २००८ (द्वितीयसंस्करणम्,जानुयारिमासः)

11. श्रीमद्भगवद्गीता. रामानुजभाष्यं बङ्गानुवादसहितम्. अनुवादकः- श्रीमद्यतीन्द्ररामानुजाचार्यः. कोलकाता : श्रीबलराम-प्रकाशनी, १४०६ (बङ्गाब्दः)

12. चिद्घनानन्दस्वामी. आचार्य शङ्कर ओ रामानुज (बङ्गपुस्तकम्). प्रकाशकः- स्वामी-विश्वनाथानन्दः. कलकाता : उद्बोधन-कार्यालयः, २०००

13. विद्यारण्यस्वामी. पञ्चदशी. रामकृष्णकृतव्याख्यया-विषमस्थलटिप्पणी-पाठान्तर-श्रुतिकोशश्लोक-विषयसूच्यादिभिः-श्रीमत्परमहंस परिव्राजकाचार्य-महेश्वरानन्दगिरि-महामण्डलेश्वरमहोदयानां भूमिकया च समलङ्कृता. संशोधकः- नारायणराम-आचार्य (काव्यतीर्थः). दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २००८

14. उपनिषद्भाष्यम्. प्रथमखण्डः, श्रीमदानन्दगिर्याचार्यकृतटीकया-कठ-माण्डूक्य-तैत्तिरीयभाष्याणां प्रसिद्धाचार्यान्तरटीकाभिः-सटीकतैत्तिरीयवार्तिकेन च समलङ्कृतम्. सम्पादकः- सं. एस. सुब्रह्मण्यशास्त्री. वाराणसी : श्रीदक्षिणामूर्ति-मठ-प्रकाशन, २०००

15. सदानन्दयोगीन्द्रः. वेदान्तसारः (बङ्गपुस्तकम्). सम्पादकः- विपद्भञ्जनपालः. कलकाता : संस्कृतपुस्तकभाण्डारः, २०१०(नवमसंस्करणम्)

16. धर्मराजाध्वरीन्द्रः. वेदान्तपरिभाषा. सम्पादकः- श्री सीताराम-शास्त्री-मुसलगावकरः. Baranasi : Chowkhamba Vidya Bhavan, २०१०

17. श्रीमद्भगवद्गीता. शाङ्करभाष्याद्येकादशटीकोपेता, प्रथमः भागः. संशोधकः- 'साधले' इत्युपाह्व-शम्भुजनुर्गजाननशर्मा. दिल्ली : पब्लिकेशन्स। 2014(Third Edition)

18. सुरेश्वरः. नैष्कर्म्यसिद्धिः. व्याख्याकारः- स्वामी प्रज्ञानानन्दसरस्वती. वाराणसी : दक्षिणामूर्ति-मठ-प्रकाशनम्, २०६६ (वैकमाब्दः , द्वितीयसंस्करणम्)

19. मधुसूदनसरस्वती. अद्वैतसिद्धिः. (प्रणेता)। सम्पादकः- स्वामी विशुद्धानन्दगिरिः. वाराणसी : श्री दक्षिणामूर्तिमठः, १००० (प्रथमसंस्करणम्)

20. ईशोपनिषत्. Delhi : Narendra Prakash Jain , Matilal Banarsidass, २००२

21. श्रीमद्भगवद्गीता. श्रीपादविश्वनाथचक्रवर्तिमहोदयविरचित-सारार्थवर्षिणीटीकया एवं श्रीयुतबलदेवविद्याभूषणमहोदयविरचित-गीताभूषण- भाष्येण समलङ्कृता. प्रकाशकः- कृष्णदासबाबा. मथुरा : राधाकुण्ड, कुसुमसरोवर, २०२३

22. सर्वज्ञात्मात्ममुनिः. संक्षेपशारीरकम्. पञ्चप्रक्रियासहित-श्रीस्वामिरामानन्दकृत-भावदीपिका-हिन्दीव्याख्यासहितम्. सम्पादकः- स्वामी योगीन्द्रानन्दः. वाराणसी : चौखम्बा विद्याभवन, १९८७

23. श्रीमद्भागवतपुराणम्. श्रीधरस्वामिविरचितया भावार्थबोधिनीनाम्ना संस्कृतटीकया समुपेतम्. संस्कृता- आचार्यजगदीशलालशास्त्री. दिल्ली : मोतीलाल बनारसीदास, १९८८

24. श्रीमन्महर्षि-वेदव्यासः. विष्णुपुराणम् (बङ्गपुस्तकम्).सम्पादकः-आचार्यपञ्चाननतर्करत्नः कोलकाता:नवभारत-पावलिशार्स,१३९० (बङ्गाब्दः)

25. भगवच्छङ्कराचार्यः. अपरोक्षानुभूतिः. श्रीस्वामिविद्यारण्यमुनिविरचितया दीपिकया सहिता. व्याख्याकारः सम्पादकश्च- चित्तनारायणपाठकः. वाराणसी : चौखम्बा विद्याभवन, २०१२

26. जगद्गुरुश्रीभगवत्पादाचार्यः, विशिष्टाद्वैतसिद्धान्तः. पं. विश्वनाथशास्त्रिदातारः कृतविमर्शसहितः. सम्पादकः- राष्ट्रपतिसम्मानित-देवर्षि-कलानाथ-शास्त्री. राजस्थानम् : सीकर, रेवासा, २००३

27. श्रीमद्भगवद्गीता. अष्टटीकोपेता. सम्पादकः- प. वासुदेवलक्ष्मणशास्त्री-पणशीकर. दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, २००९

28. पण्डितप्रवर-कृष्णजोयिस्. शाङ्करदर्शनमर्मप्रकाशः. Editor - Dr. M.L. Narakrishna Murthy. Tirupati : Rastriya Sanskrit Vidyapeetha, २००९

29. श्रीमत्पद्मपादाचार्यः. पञ्चपादिका. चतुःसूत्रीशारीरकभाष्यव्याख्या. वाराणसी : श्रीदक्षिणामूर्तिमठप्रकाशन, २०११

30. महर्षि-पतञ्जलिः. पातञ्जलयोगदर्शनम्. व्यासभाष्यसम्वलितं तच्च योगसिद्धि-हिन्दी-व्याख्योपेतम्. व्याख्याकारः- सुरेशचन्द्रश्रीवास्तवः. वाराणसी : चौखम्बा सुरभारती प्रकाशन, २००८

31. कृष्णदास-कविराजः. चैतन्यचरितामृतम् (बङ्गपुस्तकम्). गोरखपुर : गीताप्रेस (प्रकाशक एवं मुद्रक), एकादश-संस्करणम् २०१६

**Dr. Tridib Roy Mondal**, M.Phil & Ph.D.
Advaita Vedanta, Assistant Professor of Diamond Harbour Women's University,
Vill.- Kalagachhiya, P.O.- Sarisha, P.S.- Diamond Harbour,
Dist.- South 24 Parganas, Pin- 743368, West Bengal.
Ph.No.- 9875459288
E-mail : tridibrm@gmail.com

***************

**Volume XX : July to December – 2022, ISSN 2250-1711**
**Journal of Veda Samskrita Academy [Recognised in the UGC-CARE List]**

# पूर्वमीमांसाशास्त्रे अतिदेशस्वरूपविचारः

**डा. टि. उमेशः**
सहाचार्यः, पूर्वमीमांसाविभागः
श्रीवेङ्कटेश्वरवेदविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेश
9492551742, dr.bhatut@gmail.com

निगमाय सुकर्मबोधिने मुनये जैमनये च सूत्रिणे। शबराय च भाष्यकारिणे नम ईशाय कुमारिलात्मने॥

**''धर्मो विश्वस्य जगतः प्रतिष्ठा लोके धर्मिष्ठं प्रजा उपसर्पन्ति धर्मेण पापमपनुदति धर्मे सर्वं प्रतिष्ठितं तस्माद्धर्मं परमं वदन्ति''**[1] इत्यादिश्रुतिवाक्यानि धर्मस्य जगत्प्रतिष्ठापकत्वं पापनाशकत्वं च बोधयन्ति। जगतः स्थितिकारणीभूतः प्राणिनां साक्षात् अभ्युदयनिश्रेयसहेतुकः अयं धर्मः। अस्य मूलः वर्तते आम्नायः। मन्त्रब्राह्मणात्मकस्य शब्दराशेः आम्नायस्य अनादित्वात् अपौरुषेयत्वान्नित्यत्वाच्च गरीयस्त्वं माहात्म्यं च दरीदृश्यते। अपौरुषेयस्य वेदस्य प्रामाण्यकथनसौकर्याय अनुष्ठानविनियोगव्यवस्थार्थं च विधिमन्त्रनामधेयनिषेधार्थवादात्मना पञ्चधा विभागः कृतः। तादृशस्य अपौरुषेयस्य वेदस्य तात्पर्यार्थनिर्णयार्थं प्रवृत्तमिदं मीमांसाशास्त्रम्। जैमिनिना रचितेऽस्मिन्सूत्रग्रन्थे सन्ति द्वादशाध्यायाः। सहस्राधिकरणयुक्तः सहस्रन्यायप्रतिपादकः च अयं ग्रन्थः द्वादशलक्षणी इति प्रसिद्धः। ''**अथाऽतोधर्मजिज्ञासा**''[2] इत्यादि सूत्रैः द्वादशाध्यायेषु प्रमेयत्वेन धर्मः विचारितः। प्रमेयभूतेऽस्मिन्धर्मे साधनं श्रुतिः। मीमांसायाः इतिकर्तव्यतात्वम्। तदुक्तम् अभियुक्तैः - धर्मे प्रमीयमाणे तु वेदेन करणात्मना। इतिकर्तव्यताभागं मीमांसा पूरयिष्यति॥[3] इति

जैमिनिना रचितेऽस्मिन्द्वादशाध्यायात्मकग्रन्थे प्रमाणादयः प्रसङ्गान्ताः द्वादशपदार्थाः क्रमेण द्वादशसु अध्यायेषु प्रतिपादिताः। तदुक्तम् - धर्मो द्वादशलक्षण्या व्युत्पाद्यस्तत्र लक्षणैः। प्रमाणभेदशेषत्वप्रयुक्तिक्रमसंज्ञकाः॥

अधिकारोऽतिदेशश्च सामान्येन विशेषतः। ऊहो बाधश्च तन्त्रं च प्रसङ्गश्चोदिताः क्रमात्॥ [4] इति

वेदे च द्विविधानि वाक्यानि दृश्यन्ते – उपदेशात्मकानि, अतिदेशात्मकानि चेति। पूर्वषट्के प्रकृतिविकृतिसाधारण्येन उपदेशः चिन्तितः। इदमित्थं कर्तव्यमित्येवमादीनि उपदेशात्मकानि। उत्तरषट्के तु साधारण्येन अतदेशचिन्ता करिष्यते। तद्वदिदं कर्तव्यमित्यादीनि अतिदेशात्मकानि। अधिकारनिरूपणं विना अतिदेशः साफल्येन न भवतीति अतिदेशनिरूपणात्प्राक् अधिकारनिरूपणं कृतम्। अयमधिकृत्य इत्थं कुर्यात् इत्याकारकोपदिष्टपदार्थनिरूपणानन्तरमेव तद्वत्कुर्यात् इतिविधानात् अतिदेशस्य उपदेशानन्तरत्वं सिध्यति।

उपदेशप्रमाणनिरूपणपरस्य पूर्वषट्कस्य अतिदेशप्रमाणनिरूपणपरोत्तरषट्कं प्रति हेतुत्वात्हेतुहेतुमद्भावसङ्गतिः। उपदेशो नाम - यदपेक्षितधर्माणां प्रत्यक्षं प्रतिपादकम्। प्रधानसन्निधौ शास्त्रमुपदेशः स उच्यते॥

अन्यसम्बन्धनिरपेक्षमेव पदार्थानां वा कार्याणां वा प्रत्यायकं प्रत्यक्षम् अनुमेयं वा शास्त्रम् उपदेशात्मकं भवति। यस्मिन्वेदभागे सकालाङ्गविशिष्टं प्रधानं समाम्नायते तत्रैव तावदङ्गविशिष्टं मया एतत्कर्तव्यमति बुद्धिरुत्पद्यते स वेदभागः उपदेशः इत्युच्यते। दर्शपूर्णमासयागे पठितः प्रयाजादयः उपदेशात्मकः। यत्र साक्षात् उपदेशेन नाङ्गप्राप्तिः तत्र कथमनुष्ठानम् इत्याकाङ्क्षा उदेत्येव। तत्र जिज्ञासायां प्रकृतिवद्विकृतिः कर्तव्या इत्यतिदेशशास्त्रनियमानुसारम् अविहितेतिकर्तव्यताकेषु अतिदेशादङ्गप्रमाणसिद्धिः इति सप्तमाध्याये भगवता जैमिनिना प्रतिपादितम्। प्राकृतस्य दर्शपूर्णमासपदार्थस्य विकृतौ सौर्यादौ अनुष्ठानम् इत्यादिना। अतिदेशस्वरूपावगमनार्थं प्रकृतिविकृत्योः स्वरूपज्ञानम् अत्यावश्यकम्। तदर्थं यथाशास्त्रं प्रकृति- विकृतियागयोः लक्षणं किञ्चित् सङ्गृह्य आदौ उपस्थाप्यते।

साध्यरूपस्वर्गादिफलोद्देश्यककृतौ प्रधानयागोपकारकतया यावदङ्गान्यपेक्षितानि, तावदङ्गानां समाम्नानं यस्मिन्यागे अस्ति स यागः प्रकृतियागः इति निर्दिश्यते। तदेवोक्तम्–''**यत्र समग्राङ्गोपदेशः सा प्रकृतिः**''[5] इति। येषां प्रधानानां श्रुत्याद्यवगतशेषत्वैः पदार्थैः कल्पितोपकारः कथं भावाकाङ्क्षापूरकाः ताः प्रकृतयः। अत्र–''**विकृतिर्यतोऽङ्गानि गृह्णाति सा प्रकृतिः**''[6] इति । ''**चोदकात्यत्र नाङ्गप्राप्तिः सा प्रकृतिः**''[7] इति। ''**प्रकर्षेण अङ्गोपदेशो यत्र क्रियते सा प्रकृतिः**''[8] इति। कृत्स्नाङ्गविषयत्वं प्रकर्षः, स्वापेक्षितनिखिलाङ्गानां यत्र प्रत्यक्षतः पाठः सा प्रकृतिः इति।

एकत्र श्रुतानामङ्गानामन्यत्र प्रवर्तकं शास्त्रमतिदेशमित्युच्यते। एवं विभिन्नप्रकारैः प्रकृतयागलक्षणं शास्त्रकारैः सूत्रकारैश्च सम्यक्प्रतिपादितम्। उक्तलक्षणं दर्शपूर्णमासज्योतिष्टोमाग्नीषोमीयपशुयागेषु अस्तीत्यतः तेषां प्रकृतित्वम्।

इदानीं किञ्चिदत्र विकृतियागलक्षणं प्रतिपाद्यते। येषां च अविहितेतिकर्तव्यताकानामन्यत्र विहितेनोपकारेण कथं भावाकाङ्क्षा पूर्यते ताः विकृतयः। साध्यरूपस्वर्गादिफलोद्देश्यककृतौ तदुपकारकतया यावदङ्गान्यपेक्षितानि, तावदङ्गानि यस्मिन्कर्मणि न साक्षादुपदेशादिना प्राप्तानि सन्ति तादृशं कर्म विकृतिकर्म इति याज्ञकैः स्वीकृतम्। तदुक्तम्–''**यत्र न समग्राङ्गोपदेशः सा विकृतिः**''[9] इति। अत्र कतिपयाङ्गानाम् अतिदेशेन प्राप्तिरस्ति स यागो विकृतिपदवाच्यः। यस्याः सम्बन्धिनो धर्माः कर्मान्तरे विधीयन्ते सा विकृतिः। यत्र कर्मान्तरोपदिष्टकर्तव्यतापेक्षया कर्मानुष्ठानसिद्धिः सा विकृतिः। यत्र ''**केवलप्रधानमात्रं विधीयते न धर्मविशेषाः सा विकृतिः**''[10] इति। इत्येवं प्रकारेण विकृतियागलक्षणं निर्दिष्टम्। उक्तलक्षणं सौर्यश्येनादिषु अस्तीत्यतः तेषां विकृतित्वम्। तत्र केवलप्रकृतयः, केवलविकृतयः, प्रकृतिविकृतिरनुभयः, प्रकृतिविकृतिरुभयश्चेति प्रकाराः शास्त्रे निरूपिताः। नैतेषु विचारः विस्तीर्यते। इदानीम् अतिदेशस्वरूपमात्रं संस्पृश्यते। अतिदेशो नाम प्राकृतस्य पदार्थस्य विकृतौ अनुष्ठानम्।

तदुक्तं न्यायरामलायाम् -

अन्यत्रैव प्रणीतायाः कृत्स्नायाः कार्यसन्ततेः। अन्यत्र कार्यतः प्राप्तिः अतिदेशोऽभिधीयते॥[11] इति

अतिदेशस्य लक्षणं भाष्यकारेण शाबरस्वामिना इत्थं प्रतिपादितम्। यथा –

''**परत्र विहिताः धर्माः तमतीत्य अन्यत्र तेषां देशो येन भवति सोऽतिदेशः**''[12] इति।

खण्डदेवाचार्येण अतिदेशस्य लक्षणम् एवं लक्षितम्। **यः पदार्थः यादृशोपकारद्वारा यदङ्गत्वेन अवधारितः तस्य पदार्थस्य तत्सम्बन्धित्वेन रूपेण तादृशोपकारद्वारैव अन्याङ्गताबोधकं प्रमाणम्**[13] इति। **समिधो यजति**[14] इत्यादि प्रयाजादौ लक्षणसमन्वयः।

यः पदार्थः समिदादिपदार्थः प्रकृतौ यादृशोपकारद्वारा यदङ्गत्वेन आग्नेयाङ्गत्वेन अवधारितः तस्य प्रयाजादिपदार्थस्य तत्सम्बन्धित्वेन रूपेण तादृशोपकारद्वारैव विकृतौ अन्याङ्गता सौर्याङ्गता बोधकं प्रमाणम्।

अतः सिद्धं प्रकृतौ दर्शपूर्णमासाङ्गत्वेन पठितानां प्रयाजादिपदार्थानां विकृतौ सौर्याद्यङ्गत्वम्। तत्र प्रकृतिवद्विकृतिः कर्तव्या इत्यतिदेशप्रामाण्यबोधकवाक्यमेव प्रमाणम्।

स्वर्गाङ्गत्वेन अवधारितानां दर्शपूर्णमासादीनां तेन द्वारेणैव पापक्षयाद्यङ्गताबोधकयावज्जीवादिवाक्ये अतिप्रसक्तिः स्यात्। तद्वारणाय तत्सम्बन्धित्वेन इति दलम्। पुरोडाशकपलेन तुषान् उपवपति इत्यत्र तुषोपवापे पुरोडशधर्मातिदेशवारणार्थं तादृशोपकारद्वारेति विशेषणम्। इत्थं लक्षणलक्षितातिदेशः त्रिविधः। तद्यथा -

1. वचनातिदेशः 2. नामातिदेशः 3. चोदनालिङ्गातिदेशः चेति।

**१. वचनातिदेशः-**

यत्र साक्षात्श्रुतिवचनेनैव अतिदेशः भवति तत्र वचनातिदेशः। इषौ श्रूयते – समानमितरच्छ्येनेन इति। श्येनेषु नामकौ द्वौ ज्योतिष्टोमविकारौ यागौ। उभयोरत्र चोदकेन ज्योतिष्टोमाङ्गानि प्राप्तानि। तत्र इषौ समानमितरत्श्येनेन इतिवचनं श्रुतम्। अत्र इतरशब्दो हि पूर्वोक्तातिरिक्ततत्सदृशसन्निहितवाचि। दृष्टं च लोकेऽपि चैत्रमैत्रयोः कम्बलकौशेये देये, इतरद्विष्णुमित्राय इत्यत्र पूर्वोक्तसदृशसन्निहतवस्त्रादिरेव इतरशब्देन प्रतीयते। इत्थं च सन्निहितानां प्राकृतानां पूर्वोक्तरप्राकृतैः सप्ताहादिभिः सादृश्यासम्भवात्श्येनवैशेषिकाङ्गानाम् अप्राकृतत्वेन सादृश्यसम्भवेऽपि असन्निहिततया सादृश्यसन्निहितत्वयोरन्यतरस्य त्यागे अवश्यकर्तव्यत्वे वचनार्थवत्वाय सन्निहितत्याग एव युक्तः। तथा च श्येनाङ्गसदृशं यदप्राकृतत्वेन सप्ताहादिसदृशं तदिषौकार्यमिति वाक्यार्थः। अतः श्येनयागे यानि विशेषाङ्गानि विहितानि तानि अङ्गानि इषौ अनेन वाक्येन अतिदिश्यन्ते।

**२. नामातिदेशः-**

''**मासमग्निहोत्रं जुहोति**'' इति कुण्डपायिनामयने श्रूयते। कुण्डपायिनामयनं नामसहस्रसं वत्सरसाध्यं सत्रम्। अग्निहोत्रशब्दः नित्ये एव मुख्यः। अन्यत्र गौणः। नित्याग्निहोत्रे तु विधितः एव द्रव्यदेवतयोः सत्वात् अग्निहोत्रपदं मुख्यम्। मासाग्निहोत्रे तु तादृशरूपसामग्र्यभावे न

गौणत्वम्। अतः नित्याग्निहोत्रवत्जुहुयादिति साध्यसादृश्यात्गौणत्वमित्येव स्वीकर्तव्यम्। अतः अग्निहोत्रनाम्ना नित्याग्निहोत्राङ्गानि मासाग्निहोत्रे अतिदिश्यन्ते।

**३. चोदनालिङ्गातिदेशः-**

''**सौर्यं चरुं निर्वपेत्ब्रह्मवर्चसकामः**'' इति श्रूयते। अत्र सौर्यवाक्ये अभिहितेन ब्रह्मवर्चसफलेन सौर्ययागेन करणेन च फलांशे करणांशे च निराकाङ्क्षिकृते सति कथमित्याकाङ्क्षायाम् अनिवृत्तायां सौर्ययागसन्निधौ चेतिकर्तव्यताम्नानाभावात्स्वसदृशं वाक्यं बुद्धौ सन्निधापयति। सन्निधापितेष्वपि फलकरणेतिकर्तव्यतारूपेषु अर्थेषु फलकरणाभ्यां सौर्यभावना न सम्बध्यते। स्ववाक्ये ब्रह्मवर्चसरूपफलस्य सौर्ययागस्य च श्रुतत्वे न भाव्यांशे करणांशे च अपेक्षाभावात्। यातु अनाम्नाता अग्न्यन्वाधानादि इतिकर्तव्यता साकाङ्क्षा सन्निधियोग्यत्वैः ब्रह्मवर्चसफलभाव्यकया सौर्ययागकरणकया भावनया अर्थद्वारेण अनुषज्यते। इदमनेन कुर्यात् इत्युपमानेन इतिकर्तव्यता अनुषज्यते। अत्र तद्धितेन देवतानिर्देशस्यौषधद्रव्यकत्वस्यैकदेवताकात्वस्य च सादृश्यं वर्तते। तत्र आग्नेय इति तद्धितेन देवता उक्ता। अत्रापि सौर्येति तद्धितेन देवता उक्ता। आग्नेययागे पुरोडशस्य द्रव्यत्वात् ओषधद्रव्यत्वं वर्तते। सौर्येऽपि चरोः द्रव्यत्वेन विहितत्वात् ओषधद्रव्यकत्वं वर्तते। आग्नेये अग्निदेवता, सौर्येऽपि सूर्यदेवता इति एकदेवताकत्वम् उभयत्रापि वर्तते। तस्मात् आग्नेयवत्सौर्यः कर्तव्यः इतिवचनं कल्प्यते। अतः अत्र आग्नेयाङ्गानि सौर्ये अतिदिश्यन्ते।

एवमेव इतरत्रापि सादृश्यादिप्रमाणेन प्रकृतिवद्विकृतिः कर्तव्या इत्यतिदेशनियमः पालनीयः।

अयं च अतिदेशः अङ्गानाम् एव भवति न प्रधानस्य। प्रकृतितः एव अतिदेशः नान्यस्मात्कर्मणः। प्रकृतौ दृष्टद्वारा अदृष्टद्वारा वा येन रूपेण उपकारः सिद्धः तेषामङ्गानां तादृशोपकारद्वारैव विकृतौ अतिदेशः। उपकारपृष्ठभावेनैव अङ्गानामतिदेशः। आकाङ्क्षा सत्येव अतिदेशः भवति। इतिशम् ॥

**पादटिप्पणी**

1. तै.उ– 4 । 2. जै.सू – 1.1.1 । 3. शा.दी, यक्तिस्नेहपूरणीव्याख्या, पृ.सं -36 । 4. जै.न्या, पृ.सं – 5 । 5. मी.न्या.प्र, पृ.सं – 52 ।
6. मी.न्या.प्र, पृ.सं – 44 । 7. मी.न्या.प्र, पृ.सं – 44 । 8. तै.सं.भा.भू, पृ.सं – 221 । 9. मी.न्या.प्र, पृ.सं – 53 । 10. शा.भा – 7.1.1 ।
11. अन्यत्रैव प्रणीतायाः कृत्स्नायाः धर्मसंहतेः। अन्यत्र कार्यतः प्राप्तिः अतिदेशः स उच्यते।। जै.न्या. 7.1.1 ।
12. शा.भा. अतिदेशाध्यायः -7.1.1 । 13. भा.दी – 7.1.1, पृ.सं – 337 । 14. तै.सं -6.1.1

**सहायकग्रन्थसूची**


१. जैमिनीयन्यायमाला — पट्टाभिरामशास्त्री, चौखम्बाप्रकाशन, वाराणसी, 2016
२. मीमांसाशाबरभाष्यम् (आर्षमतविमर्शिन्या हिन्दीव्याख्यया सहितम्) — युधिष्ठिरमीमांसकः, रामलालकपूर ट्रष्ट, हरियाणा - 1990
३. मीमांसामञ्जरी — तङ्गस्वामिशर्मा, भारतीयदार्शनिकानुसन्धानपरिषत्, नवदेहली, 1996
४. भाट्टदीपका (प्रभावलीव्याख्यासहितः) — खण्डदेवाचार्यः, सद्गुरु पब्लिकेशन्स, नवदेहली
५. मीमांसानयमञ्जरी — पट्टाभिरामशास्त्री, संपूर्णानन्दग्रन्थमाला – 13, वाराणसी
६. जैमिनिसूत्रवृत्तिः (सुबोधिनी) — रामेश्वरसूरी, चौखम्बा संस्कृतप्रतिष्ठान, देहली
७. शास्त्रदीपिका (युक्तिस्नेहपूरणीव्याख्यासहिता) — पार्थसारथिमिश्रः, चौखम्बाकृष्णदास अकाडेमी, वाराणसी, 2003
८. मीमांसान्यायप्रकाशः (सारविवेचिनीव्याख्यासहितः) — चिन्नस्वामिशास्त्री, चौखम्बासंस्कृतसंस्थानम्, वाराणसी, 2016


*****************